श्री वर्धमानसूरि विरचित

श्री वासुपूज्य चरितम्.

प्रकाशक

श्री जैनधर्म प्रसारक सभा.

भावनगर.



अमदावाद–सीटी प्रीन्टींग प्रेस.

किंमत रु. २–८–०

सर्व हक्क स्वाधीन.

प्रस्तावना.

आ श्रीवासुपूज्यस्वामीनुं चरित्र अनेक प्रकारना रसोथी परिपूर्ण छे. कर्तानी कविरवशक्ति पण अद्भुत छे. संस्कृत भाषाना अभिलाषीओने हृदयना हार जेवुं छे. आ चरित्रना ४ सर्ग छे. ते सघळा अनुष्टुप् काव्यवाळा छे. तेना तथा प्रशस्तिना मळीने ५४७४ श्लोक छे.

आ चरित्र प्रथम श्री ज्ञानप्रसारक मंडळे छपाववा मांडेलुं हतुं, परंतु केटलाएक कारणसर अपूर्ण रहेवाथी वकील केशवलाल प्रेमचंदनी प्रेरणाथी अमे ताकीदे संपूर्ण करावबानुं स्वीकार्युं हतुं; पण प्रेसनी ढीलथी तेमज प्रुफो दूर प्रदेशमां मोकलवाना होवाथी आ चरित्र बहार पडवामां बिशेष विलंब थयो छे.

आ ग्रंथनी एक कोपी रोम शहेरनिवासी डोक्टर एम्ब्रोजीयो बेलीनीए तैयार करीने मोकलावी छे तेथी तेमनो अने आना प्रुफ डॉ. हरमन जेकोबीए तपासी आपेला होवाथी तेमनो अत्र आभार मानवामां आवे छे.

परस्पर संबंध जोडी देवा विगेरे कार्यमां वकील केशवलाल प्रेमचंद पण सारो प्रयास कर्यो छे तेथी तेमनो पण आभार मानवामां आवे छे.

आ चरित्र साद्यंत वांचवाथी अनेक प्रकारनो बोध थइ शुके तेम छे, तेथी ते प्रकारनी भलामण करीने आ टुंकी प्रस्तावना समाप्त करवामां आवे छे.

संवत १९६६ वैशाख

श्री जैनधर्म प्रसारक सभा.

भावनगर.

INTRODUCTION.

From the prasasti of the *Vasupujya-charita* (वासुपूज्यचरित), we learn that its author, *Vardhamanasuri*, (वर्धमानसूरि) belonged to the Nagendragachchha (नागेन्द्रगच्छ). His spiritual descent is the following: (1)

1. Virasuri — वीरसूरि
2. Chachchiga — चच्चिग
3. Vardhamana (of the Paramara family) — वर्धमान
4. Ramasuri — रामसूरि
5. Chandrasuri — चन्द्रसूरि
6. Devasuri — देवसूरि
7. Abhayadevasuri — अभयदेवसूरि
8. Dhanesvara — धनेश्वर
9. Vijayasinha — विजयसिंह

Devendracharya (देवेन्द्राचार्य) | Vardhamanasuri (वर्धमानसूरि)

The *prasasti* adds, furthermore, the origin the poem and gives the date of its composition.

(1). This descent corresponds precisely with

The great-grandson of Vadhu (वाधू) of the Shri Gallaka (गल्लक) family, Devachandra, (देवचन्द्र) had by his wife Padmini (पद्मिनी) four sons; Ambada, (अम्बड) Jalhana, (जल्हण) Ahladana and Prahladana. (आह्लादन, प्राह्लादन.) The first became prime minister and the last was also minister. Ahladana seems to have been appointed judge. He showed great religious zeal in causing temples to be erected, images of the Tirthankars to be consecrated, manuscripts to be copied, etc. In Anhilvad Pattan he founded the temple of Vasupujya, and induced his teacher Vardhamana to write the life of that Tirthankara. The poet apparently intended to honour his pupil in making his work आह्लादनाङ्क i. e. in using the word, आह्लादन in the last stanza of each canto. Thus the book was written in Samvat 1299, or A. D. 1243, (1) the first edition of which is now given to the public.

The subject of the Vasupujyacharita is, as indicated by the name of the work, the life of the twe'fth Tirthankara. The first two sargas

---

that given by *Devendracharya* (देवेन्द्राचार्य) of himself in the *prasasti* of the *Chandraprabhacharita* (चन्द्रप्रभचरित) (Peterson, Rep. IV. 84-85).

(1) Sloka 28 ततोऽसौ निधिनिध्यर्कसाख्ये (१२९९) विक्रमवत्सरे। आचार्यश्चरितं चक्रे वासुपूज्यविभोरिदम् ॥

narrate the edifying exploits of king Padmottara who in his next existence became Vasupujya. The last two sargas describe the birth, life, and spiritual career of Vasupujya. With this groundwork of our poem, however, are interwoven a number of *Kathas*, nineteen on the whole, in order to exemplify some of the fundamental doctrines of the Jains, a demonstration of which is given either in the principal narration or in the several *Kathas* themselves.

In the table of contents of these Kathas(1) I enumerate them with such particulars as the reader may desire to have. It may be added that I have given a detailed analysis in Italian of the contents of the Vasupujyacharita in the first and second Volumes of *Rivista degli Studi Orientali, Rome 1907–08.*

---

(1). Of these *Kathas*, the first (I, 66–612: the King **Punyadhya**) treats of *merit* (*punya*) the second, intercalated in the first (I, 423–567; **Hamsa** and **Kesava**) on the importance of the vow *not to eat during the night* (*bhogavirati*); the third (II, 12–600: **Ratisara**) on *liberality* (*dana*); the fourth (II, 607–1369: **Sanatkumara** and **Sringarasundari**,) on exercises in the *moral* restraints (*sila*); the fifth (II, 1375–1528: **Samvara**) on *austerities* (*tapas*); the sixth (II, 1534–2170: **Chandrodara**) on the *meditations* (*bhavana*); the seventh (IV, 24–176: **Vikrama**) on *true faith* (*samyaktva*); the eight (IV, 182–

The *Vasupujyacharita* is written throughout in Sloka, except the last stanzas of each of the four cantos, which are in Vasantatilaka. The style is fluent, abounding in poetical conceits, and aiming at different kinds of alliteration (**अनुप्रास**) wich seems to have been greatly relished by Jain authors and readers. The language is correct on the whole and altogether not different from what we meet with in other Jain Kavyas of the same character and period.

---

244 **Sura** and **Chandra**) on the vow *not to kill* (*ahinsa*); the ninth (IV, 250-320: **Hamsa King of Rajapuri**) on *sincerity* (*satya*); the tenth (IV, 325-400: **Laksmikunja**) on the vow *not to steal*; the eleventh (IV, 405-466: **Nagila**) on the vow of *chastity* etc; the twelfth (IV, 471-533: **Vidyapati**) on the vow of *limitation in possession* (*aparigraha*, *parigrahapramana*); the thirteenth (IV, 537-595: the **Simha merchant**) on the vow of the *directions* (*digvrata*); the fourteenth (IV, 599-654: the **Dharma child**) on vow of concerning the *continence in enjoyment of food* etc (*bhogopabhogavrata*); the fifteenth (IV, 657-699: The **Surasena and Mahasena princes**) on the vow to *refrain from unnecessary injury* (*anarthadandavirativrata*); the sixteenth (IV, 704-761: The **Kesarin prince**) on the vow with regard to *time* (*samayika*); the seventeenth (IV, 765-820 the **pious minister Sumitra**) on the vow of "*drawing closer or contracting every day the limits already laid down to the range of tra-*

The present edition of the *Vasupujyacharita* is based on the following Mss.

A. a modern, fairly correct Ms. 182 leaves, 12 lines on a page, dated Samvat 1915.

B. an old and good Ms. but it omits frequently verses or parts of verses; 107 leaves, 17 lines on a page. It bears no date, but, judging from its appearance and the form of the letters, it may be 300–400 years old.

C. a bad Ms. written by an ignorant scribe. Besides the text it contains an interlineary Guzerati Taba; 505 leaves. Dated Samvat 1859, Saka 1724, Magha Sudi 9. Monday.

D. a carefully written Ms; though it is younger than B, it has the advantage of containing no lacunæ. Not dated, but apparently older than C.

All these Mss. have kindly been lent me by *Vakil Keshavlal Premchand B.A., L.L.B.* of Ahmedabad. To his well known endeavours in the interest of Jain Literature it is due that this edition of the Vasupujya Charita could be undertaken.

---

vels." (Bhandarkar Rep. 1884 p. 114f) (*desavakasikavrata*); the eighteenth (IV, 824–887): the **Mitrananda minister**) on the vow of *fasting* (*paushadhavrata*); the nineteenth (IV 890–970: **Sumitra**) on the vow of *giving food and shelter to Ascetics* (*atithisamvibhaga*).

In conclusions I have to thank my respected teacher Professor *Doctor Hermann Jacobi* of Bonn, who has revised my manuscript before sending it to the press and has assisted me in reading the proofs.

Rome, Dr. Ambrogio Ballini.

April 1910.

A TABLE OF CONTENTS OF KATHAS NARRATED IN THE WORK.

सर्ग.	श्लोक.	Name of the hero or heroine.	Subject.	(English equivalent.)	Serial number.	Page of the work.
१	(६६–६१२)	पुण्याढ्य	पुण्य	merit	१	६–५२
१	(४२३–५६७)	हंस केशव	निशाभोजन-विरति	the vow not to eat during the night	२	३६–४८
२	(१२–६००)	रतिसार	दान	liberality	३	६१–११०
२	(६०७–१३६९)	सनत्कुमार–शृंगार-सुन्दरी	शील	exercise in the moral restraints	४	१११–१७५
२	(१३७५–१५२८)	संवर	तपः	austerities	५	१७६–१८९
२	(१५३४–२१७०)	चन्द्रोदर	भावना	meditations	६	१९०–२४४
४	(२४–१७६)	विक्रम	सम्यक्त्व	true faith	७	३५३–३६५
४	(१८२–२४४)	सूर चन्द्र	अहिंसा [१]	the vow not to kill	८	३६६–३७१
४	(२५०–३२०)	हंस(king of राजपुरी)	सत्य [२]	sincerity	९	३७२–३७८
४	(३२५–४००)	लक्ष्मीकुञ्ज	अस्तेय [३]	the vow not to steal	१०	३७८–३८५

४ (४०५–४६६)	नागिल	ब्रह्म [४]	the vow of chastity	११	३८५–३९०
४ (४७१–५३३)	विद्यापति	परिग्रहप्रमाण [५]	the vow of limitation in possession	१२	३९१–३९६
४ (५३७–५९५)	सिंह	दिग्व्रत[६]	the vow concerning directions	१३	३९६–४०१
४ (५९९–६५४)	धर्म child	भोगपरिभोग-व्रत [७]	the vow of continence in enjoyment of food &c.	१४	४०२–४०६
४ (६५७–६९९)	सुरसेन महासेन	अनर्थदण्ड-विरति[८]	the vow to restrain from unnecessary injury	१५	४०७–४१०
४ (७०४–७६१)	केशरि	सामायिक [९]	the vow with regard to time	१६	४११–४१५
४ (७६५–८२०)	the pious minister सुमित्र	देशावकाशिक व्रत	the vow of drawing closer [१०]	१७	४१६–४२०
४ (८२४–८८७)	मित्रानन्द minister	पौषधव्रत[११]	the vow of fasting	१८	४२१–४२६
४ (८९०–९७०)	सुमित्रा	अतिथिसंविभाग [१२]	the vow of giving food and shelter et *c*.	१९	४२६–४३३

VARIOUS READINGS OF THE VASUPUJYACHARITA.

पाठान्तर.



I.

26aB यस्य ॥
52aB मुदा ॥
56bB न किम् ॥
85bA अवध्यत ॥
86bB वासानदावपम् ॥
109aB वात्यावर्तवद्भ्रमन्।
„ bB लोलयामास ॥
116aA महोत्सवमयम् ॥
123bBC संसर्ग ॥
141aB तत्क चेत्तु सः ॥
142bB कार्यमाचार्यवर्य-
मावर्ज्य
171bB साधितम् ॥
174aB बन्दिकदम्बेन ॥
„ bB तूर्यनादेन ॥
195a Mss. सौर्यलक्ष्मी-
नटीनाद्या०
217bA कृत्वानतिम् ॥
219bA निर्ममो निर्ममे
सोऽयम् ॥
228bB अत्राद्ये ॥
234aA शिवसौख्यानाम्
238aA इति तस्य ॥
240aA राज्यं चापि ततः
क्षणं ॥
247bB कमप्युच्चकाया०
264aB मेदमुच्यताम् ॥
325aA तु ॥
349bB यत्तु स्यात्तुर्यम्
358bB न बन्धनीयो ॥
„ aB [अ]वधिज्ञान-
निधिः ॥
458bA कस्याधिकरो-
त्वघम् ॥
472bB युक्तमित्युक्तयः
सताम् ॥
496aB किंच ॥
517bA यनुजोज्वलः ॥
541bB पारणक्षणम् ॥
578bA स्वसमान सु-
धाभुजः ॥

586aA ०व्यापारसार-
धर्मधीः ॥
598bA पुण्यश्रीद्वरवि-
द्वतः ॥
612aB पुण्यसाराभिधं
राज्ये न्यस्य
तस्य सुतं द्रुतम् ।
658aA ०दीपिकाम् ॥
,, b ,, ०देशनां क्लेश-
वाशिनीम् ॥
673bA ०मिषादिति ॥

II.

1bB प्रपञ्चयामास ॥
40aB नरकं च न ॥
53bA निजाभाग्य० ॥
88aA किंचित्ततो ॥
104aB विस्मितः ॥
118bB वदेत् ॥
157bA कर्णयोस्तु द्व-
शोऽगमन् ॥
160bA सानन्दम् ॥
258aB ०मन्त्रीन्दुपु-
त्राद्यैः ॥
290bA जीविताकारः ।
326bB तन्मृत्यौ मा वि-
रहोऽस्तु नः ॥
349aA तवालोके वि-
गलद्० ॥
369bA कृपासारः ॥
413aA तयैतया ॥
520bA वितीर्णे ।
528bA ०न्तरायान्तानी-
ति नामतः
538bB मतम् ।
542aB विज्ञेया स्थिति-
रस्यापि ।
582bB भेदाः ।
598aB तदाभजन् ।
604bA सुधाम्बोनिधि-
सेवनम् ।
629aB प्रापतत् ।
639bB मूर्छाशतकृत-
च्छिदः ।
1058aA ससुराननः ।
1074aA दुर्बन्धकर्मवंशो-
त्थः ।
1175bB उपदेशस्वरः ।
1421bB क्षमासारै०
1449bB तावद्यावदिमाः
सप्ताभूवन्मासेषु
सप्तसु ॥

1558bD हन्मग्नदुःखं ॥
1717aB तद्विधेहि ॥
1723aA °भग्ने ॥
1824aB स्वस्य किंचिद-
प्यलं स ॥
1872bB दुर्दमः ॥
1975aA मुनेर्भक्तिव्यक्ति-
भासुर° ॥
2133bB पुनर्नवः ॥
2175bBC तद्विभो ॥
2258aB ववौ तमनुमोदये॥
2272bA च तेने च पञ्च-
शब्दोदयं तदा ॥

III.

145aA मदोज्ज्वलः ॥
146aA °धुनोदेष्यतीतीव॥
151bA शुक्लश्रतु° ॥
189bB प्रबोधन ॥
260bAD ध्वजमञ्जुलम् ॥
282aA नदीनदव्रजादपि॥
„ „ D नदीपद्मह्रदादपि॥
300bD रौप्य° ॥
306aB त्वद्गुणांस्तात ॥
„ D त्वद्गुणास्तात॥

312bAB कराङ्गुष्ठे प्रभो
न्यस्य नानार-
समुधां हरिः ॥
315aD °मातुश्च ॥
344bA वरानन° ॥
381aA धनग्रट ॥
385aA कटीतटी प्रथुर्जज्ञे॥
432bA निरूपयन्रूपनि-
श्चयात् ॥
450bA सौम्योच्चग्रहल-
ग्ने साध्यद्भुतां ॥
547bA पुरस्तासाम् ॥
560bA अङ्गेषु निधिसं-
गेषु ॥
578aA तत्रेशं प्रवेश्य ।
588bBD स्वस्वहर्षैरनृत्य-
न्त सुरा° ॥
605aBD परं भोगफलं कर्म
भेत्तुं भजञ्जन-
स्थितिम् ।
मघवाख्यं सुतं
स्वामी पद्मवा-
त्यामजिजनत् ॥
625aA विमानान्तःसुरी-
त्यमी ॥
641aBD अथैनं ॥

659aBD तत्पूज्यौ न्यस्य मन्मोहं स्वपौत्रे मघवत्यपि । मां व्रतायानुमन्येथामिहार्थेऽस्मि कृताञ्जलिः ॥

667bA मुधैव खिद्यसे ॥

668aBD स्थितम् ॥

690aD यतो यतो भवाभिख्यः ॥

702aBD जिनोऽहात्पाणिनेपथ्यं सर्वशस्त्रग्रहादरैः ॥

711BCD प्रभुः प्रपेदे चारित्रं कृत° ॥

734bA विभुं सर्वे ०गुणा इव ॥

761bBC याचते ॥

805bBD पञ्चनाम् ॥

929aBCD तेषूच्चैर्भेजिरे ॥

1082bD दार्ढ्यमान् ॥

1085aA शत्रुहस्त० ॥

1094aAC त्रिपदानुसृतेरेका० ॥

1101bAC श्रीमद्वसुपू० ॥

IV

21bAC द्वादशनां तु सम्यक्त्वं जीवितं परमं स्मृतम् ॥

24aAC जम्बुद्वीपेऽस्ति कुसुमसन्निभं कुसुमं मुरम् ॥

56aAC अन्येषु पौनःपुण्येन ॥

69a, 70b } BD omits

121bA स्तुतां B सुताः (sic) C स्तताः (sic D स्तुता ॥

152bC उद्यमः D उद्भवः ॥

168bA चिरं विराग० ॥

186aD वृत्तिरपि कल्पिता ॥

192 bAC विविक्तरागमद्राक्षीत् ॥

219aBCD निशितास्त्रोऽथ ॥

244aBD: अमुं दृष्टान्तमाकार्ण्य सकर्णः कर्णकार्मणम् ॥

„ C मुक्तिसंप्राप्तिकार्मणम् ॥

247bBD: सुधीभिर्धीप्रप-
श्चेन ॥
259aAC: पूर्वकर्मवशा-
द्दृशम् ॥
293aBCD: चिन्तामसौ
चुम्बन् ॥
304bA: नृपचारेभ्यः ॥
321bA: शिववर्त्मनः ॥
322aA: आहूतं ॥
324aA: °पालननिश्चलः ॥
325aAC: °धर्मकर्मोर्मि° ॥
329aBC: विविधाभिर्वि°॥
409bACD: विवेकदीपं- ॥
(S. Sl. 425)
452bA स शङ्कास्थो ऽ
वदत्ततः ॥
464aAC: अन्ते संतोजित-
ध्यानो नागिलः
सह नन्दया ॥
465aAC: भोगान्समं दिवः॥
480bA: वञ्चयसि प्रियाम् ॥
C: प्रिय ॥ ,,
510bA: विपुलश्रीमहाग्र-
हात् ॥
608aD °चिन्तात्रस्तस्यो
र्वी° ॥
705aD कदाप्यदः ॥
709aD इति ध्यात्वा ह्र-
यं तत्र ॥
724aA कोपतप्तं लोचन-
योर्द्वयम् ॥
784bAC स प्रतिज्ञो महा-
मात्यः ॥
858bD पद्मनेत्रेति नाम-
तः ॥
861aA °विद्यावेत्ता ॥
902aBD तमालोककृता-
दरः ॥
925aD अथासौ ॥
951aA यथाविधेषु पात्रेषु ॥
976A मघवा नामतस्त-
स्यामवनीमघ-
वाभवत् ।
रेजेऽरिषु भुजा-
दम्भादम्भोलिर्य-
स्य भीषणः ॥
1061bD मुखमण्डनम् ॥

1077bA ०खर्वसर्वाङ्गक-
म्पभाक् ॥
1107bD दुःष्टाक्रान्तः ॥
1116D पापी द्वीपो बभू-
वाथ तृतीयां च
गतोऽथ सः ।
नकुलीभूय द्वि-
तीयां बकोऽथ
प्रथम[i]च सः ॥
1125bA पुण्यपुष्पैश्च दुर्ग-
न्धः सुगन्धश्च ॥
1132bA सौक्यभागसौ ॥
1143bD यूना तेन सम-
ग्राहि जगृहेऽथं
कलावलिः ॥
1154aBD विद्यते सुप्रभा ॥
1157bAC राधावेधविधा-
धियः ॥
1169bBD वैरिगोत्रवना-
नलः ॥
1184aD ०ज्ञानिवचः स्म-
रन् ॥
1191bA भूधनेनानुधावत॥
1229bA तत्कथ्यतां ध्रुवं ॥
1237aD धर्मरुचि ॥
1241bAC मुनिमुन्मुदम् ॥
1248aA जातिज्ञानमवाप्य
1251bD वासुपूज्यपवित्रि-
ताम् ॥
1255bA नो केन नामलो-
केषु काङ्क्षितम् ॥
1256aA मध्येऽपि कं
रामं ॥
„ „ D मध्येऽधिकं रामं
नीरागान्तोऽपि नैव यः॥
1258aB ०जगद्भर्तुरुपदे-
शैः शमी नृपः ।
लघुं न्यस्य सुतं
राज्ये भेजे ।
„ „ D नृपः श्रुत्वा जग-
द्भर्तुरुपदेशं प्रशा-
न्तधीः ।
राज्ये न्यस्य सुतं
सोऽथ भेजे ॥
1269aA मूकीकृतनन्दी-
भिः स्वाकृतैक० ॥

1293bA दृश्यते स्पृश्यते ॥
„ „ D अवादयंस्तदा
सुखांभिकाः ॥
1331aA क्षीणकर्माथ क-
र्तव्यो ॥
„ bD जगद्गुरुः ॥
1363aD कीकासगणान् ॥

Sl.3aD सूरिर्भूरिगुणाद्भुतः॥
Sl. 8-25A omits.
Sl.16aD श्रीमदाह्लादनो
BC श्रीमदाह्लादनो-
ऽजनि metr
mistaken !
„ 29aD बुधा ॥

॥ वासुपूज्य चरितम्. ॥

प्रथमः सर्गः

अर्हन्तं नौमि नाभेयं कल्याणकलशं सताम् ।
रेजुराम्रदलानीव यत्कर्णनिकटे जटाः ॥ १ ॥
भक्तिरागभृतानन्तभव्यस्वान्तस्थितेरिव ।
विद्रुमच्छायकायो ऽसौ वासुपूज्यः श्रियेऽस्तु वः ॥ २ ॥
स्वार्थे ऽहं कमठात्कष्टं सेहे भोगी तु मत्कृते ।
तन्मान्यो ऽयमितीवामुं पार्श्वो मूर्ध्नावहन्मुदे ॥ ३ ॥
रणे ऽपि धीरा वीराः स्युर्महावीरस्त्वसौ यतः ।
देवीहावैर्जितो नेति यं स्तौतीन्द्रः स वो ऽवतात् ॥ ४ ॥
अन्यानपि जिनान्नौमि ध्यायामि श्रुतदेवताम् ।
प्रारब्धसिद्धिफलदाञ्श्रये कल्पतरून्गुरून् ॥ ५ ॥
सतामाह्लादनो धर्मः सर्वलोकोत्तरस्थितिः ।
जीयाज्जन्तुसमुद्धारव्यापाररुचिरश्चिरम् ॥ ६ ॥
देयाद्धर्मः स वः कामान्कामधेनूरमूर्यतः ।
चतस्रः क्षीरधारान्ति बुद्धिश्रीवृद्धिसिद्धयः ॥ ७ ॥
परोपकारिणां धुर्यो धर्म एवाश्रितेषु यः ।
ददाति निर्वृतिं स्वस्य सत्तायामपि निःस्पृहः ॥ ८ ॥
जयन्ति जगदुत्सङ्गरङ्गदुत्तुङ्गकीर्तयः ।
ते सन्तः सततं येषां धर्मे ऽस्मिन् रमते मतिः ॥ ९ ॥

चत्वारो ऽस्य सपर्यायाः पर्यायाः कृतिनां मताः ।
दानशीलतपोभावनामानः कामितप्रदाः ॥ १० ॥
ते तु भीमभवाम्भोधिसेतवः पुण्यहेतवः।
बुद्धिमद्भिर्विबुध्यन्ते महतां चरितश्रुतेः ॥ ११ ॥
अतः सत्पुरुषश्रेणिश्रवणामृतवर्षणम् ।
शर्मणः कार्मणं कर्ममालिन्यक्षालनक्षमम् ॥ १२ ॥
वासवानां हि यः पूज्यो वासुपूज्य इति श्रुतः ।
तस्य तीर्थेशितुश्चारु चरितं रचयाम्यदः ॥ १३ ॥ युग्मम् ॥

अस्ति स्वस्तिनिधिः स्वर्णशैलवर्ण्यान्तरावनिः ।
जम्बूद्वीप इति द्वीपो लक्षयोजनविस्तृतः ॥ १४ ॥
यस्योत्तरकुरुस्थानश्चित्ररत्नमयो द्रुमः ।
जम्बूर्भवति मायूरच्छत्रं द्वीपजयोच्छ्रितम् ॥ १५ ॥
यो ऽनन्तप्रतिमो ऽप्यत्र सर्वत्राप्रतिमः क्षितौ ।
अनादिनिधनो ऽप्युक्तः सप्तवर्षमयो बुधैः ॥ १६ ॥
सो ऽस्ति कङ्कणरूपेण लवणाम्बुधिना वृतः ।
द्विलक्षयोजनोन्मानो विस्तारेण निरन्तरम् ॥ १७ ॥
यो ऽन्तःकूटस्थचैत्येषु भक्त्या नित्यार्हतां पुरः ।
नृत्यत्यूर्मिभुजैर्नित्यं गायत्यूर्जितगर्जितैः ॥ १८ ॥
द्वीपो ऽस्ति परतस्तस्य धातकीखण्डसंज्ञकः ।
यः पृथुत्वे चतुर्लक्षयोजनानि समन्ततः ॥ १९ ॥
ख्यातो ऽस्मदभिधानेन द्वीपो ऽयमिति नृत्यते ।
यत्र रत्नमयैर्मेरुद्वयस्थैर्धातकीद्रुमैः ॥ २० ॥
यश्चकास्ति चतुःषष्ट्या विजयैः पदिकैरिव ।
चतुरङ्गबलद्यूतफलकं नयधर्मयोः ॥ २१ ॥

जनस्यान्तरषड्वैरिजेतुस्तेजोयशःश्रियाम् ।
यत्रार्काः कुण्डलायन्ते द्वादश द्वादशेन्दवः ॥ २२ ॥
विद्यते तस्य कालोदजलधिः परिधिस्थितः ।
विस्तृतः सर्वतो यो ऽष्टलक्षयोजनमानभृत् ॥ २३ ॥
आशापत्रेषु गीर्नित्यमनन्तानर्हतां गुणान् ।
लिखत्विवीव यो धत्ते मषीभावं निजाम्भसि ॥ २४ ॥
द्वीपो ऽस्ति परतस्तस्य श्रीपुष्करवराह्वयः ।
यो योजनानि विस्तारे लक्षाः षोडश लक्ष्यते ॥ २५ ॥
तस्य नामार्थमत्यर्थं प्रथयन्ति वरश्रियः ।
माद्यन्मधुपझङ्कारैः पुष्करैः पुष्कराश्रयाः ॥ २६ ॥
तस्यार्धे वृत्तवान्भूभृद्भासते मानुषोत्तरः ।
नित्यार्हच्चारुचैत्यानि यस्यास्ते मुकुटः स्फुटः ॥ २७ ॥
तस्मादर्वाग्विभागे ऽस्ति स्वर्णाद्रिर्भूमिभूषणम् ।
यद्भासः केसरायन्ते गगने नीलनीरजे ॥ २८ ॥
ततः पूर्वविदेहाख्यं क्षेत्रं प्राच्यां प्रियं सताम् ।
यत्रार्हद्वाक्सुधासेकाज्जायन्ते शिवशालयः ॥ २९ ॥
तत्र सीतासरिद्वीचिसिच्यमानवनावनिः ।
अस्ति विस्तारिमङ्गल्यो विजयो मङ्गलावती ॥ ३० ॥
विभावर्यामपि जना विभावर्याङ्गभूषणैः ।
ध्वस्तध्वान्तभरा यत्र यान्ति प्रान्तरवर्त्मसु ॥ ३१ ॥
इन्द्रनीलमयं दाम शून्ये ऽपि पतितं पथि ।
भुजङ्गमभ्रमेणेव यत्र नादीयते जनैः ॥ ३२ ॥
तत्र पात्रं सुवर्णानां वर्णिन्यास्तिलकं भुवः ।
निःसपत्ननृरत्नश्रीवरं रत्नपुरं पुरम् ॥ ३३ ॥

सत्कृत्यामृतसिक्तानां यत्र भान्ति ध्वजाञ्चलाः ।
तीर्थेशवेश्मनां पुण्यद्रुमाणां पल्लवा इव ॥ ३४ ॥
वपन्तो धार्मिकाः सारं यत्र क्षेत्रेषु सप्तसु ।
पुण्यधान्यैर्गरिष्ठं स्वं कोष्ठागारं सुबिभ्रति ॥ ३५ ॥
यत्र स्त्रीवेणिवक्षोजवक्त्रेषु श्रीरहर्निशम् ।
वीरासिकुम्भिकुम्भाब्जवाससौख्येन खेलति ॥ ३६ ॥
धर्मेण त्याजिता लक्ष्मीश्चापलं यद्गृहेषु यत् ।
कोटिध्वजाञ्चलव्याजात्तन्मूर्तमिव वीक्ष्यते ॥ ३७ ॥
तस्मिन्पद्मोत्तरो राजा प्रजापालनलालसः ।
अभूदभूमिर्दोषाणां रोषाणामिव सन्मुनिः ॥ ३८ ॥
अंह्रिहस्तास्यनेत्राणि नलिन्याभान्ययं दधौ ।
अतोऽस्य नलिनीगुल्म इत्याख्याभिदधे बुधैः ॥३९॥
स्वप्ने पद्मं महत्तस्मिन्गर्भस्थे ददृशे ऽम्बया ।
अतः सद्भिर्महापद्म इत्यस्य विदधे ऽभिधा ॥ ४० ॥
व्योममण्डलमालिन्यच्छलत्कज्जलमालिनः ।
बभौ छायेव यत्तेजःप्रदीपस्यारिदुर्यशः ॥ ४१ ॥
आपीय विशदं वैरिवनितानां स्मिताम्बुम् ।
उद्गारवद्यशोभारं यस्यासिः शाश्वतं व्यधात् ॥ ४२ ॥
स देहद्युतिसंदोहसंदेहितविभूषणः ।
सभायां भूधनो ऽन्येद्युर्भद्रासनमभूषयत् ॥ ४३ ॥
श्रीकेलिदीर्घिका संसदथ हंसकुलैरिव ।
रेजे राजपदाम्भोजसेवाहेवाकिभिर्नृभिः ॥ ४४ ॥
अमान्त्यान्तर्विनिर्यान्त्या सितया पलितच्छलात् ।
बुद्ध्या विमलबोधाढ्या रेजिरे तत्र मन्त्रिणः ॥ ४५ ॥

मुहुः प्रकम्प्य मूर्धानं सभ्यैर्निबिडपूर्तये ।
क्षेप्यमाणानि कर्णेषु तत्र सूक्तान्यधुर्बुधाः ॥ ४६ ॥
व्यवहारकृतस्तत्र देहार्चिर्याचकैरिव ।
रत्नैरन्योन्यसंघट्टवाचालैर्भूषिताः स्थिताः ॥ ४७ ॥
यत्सैन्यप्रोच्छलद्धूलीमये तिमिरसंचये ।
दधौ खद्योतपोतस्य द्युतिं प्रद्योतनः सदा ॥ ४८ ॥
उदेष्यतः प्रतापाग्नेर्धूमदण्ड इवोन्मुखः ।
यदासिर्युधि शत्रुस्त्रीनेत्रैर्दृष्टो जलाविलैः ॥ ४९ ॥
कर्पूरपूरवद्येषां यशो रोदःसमुद्गके ।
जज्ञे ऽरिदुर्यशःकृष्णाङ्गारसङ्गाच्चिरं स्थिरम् ॥ ५० ॥
स्वाम्यादेशघनावेशरसलालसचातकाः ।
उन्मुखास्ते ऽपि भूपालास्तत्र तस्थुर्यथास्थिति ॥ ५१ ॥
चतुर्भिः कलापकम् ॥
तांश्च भूमिभुजः स्वौ च भुजौ पश्यन्मुहुर्मदात् ।
राजा पद्मोत्तरो हृष्यन्नुवाच सचिवेश्वरम् ॥ ५२ ॥
यदाक्रामति दिक्चक्रं भूशक्रो भुजविक्रमात् ।
तन्न चित्रं यतः सर्ववलेभ्यो दोर्बलं महत् ॥ ५३ ॥
वदामीदमयुक्तं चेत्तन्नीतौ दक्ष शिक्षय ।
यन्मत्पितामहस्यापि सर्वशिक्षागुरुर्भवान् ॥ ५४ ॥
अथामात्यपतिर्दध्यौ नृपो ऽयं भुजदुर्मदः ।
ततस्तत्त्वविदां हृद्भिरुपहास्यं वदत्यदः ॥ ५५ ॥
नृपस्तं चिरमित्यन्तश्चिन्तयन्तमभाषत ।
किं न मद्वचसां किंचिद्भवद्भिर्दत्तमुत्तरम् ॥ ५६ ॥
एवं निशम्य मन्त्रीन्दुर्जगाद नृपतिं प्रति ।

दन्तेन्दुद्युतिभिर्दूरान्नृणां मोहतमो हरन् ॥ ५७ ॥
प्रभो ऽयुक्तं त्वयोक्तं यद्बलेभ्यो दोर्बलं महत् ।
तत्तु स्यात्सफलं येन तत्पुण्यं प्रबलं न किम् ॥ ५८ ॥
अथाह भूपो भूपानां शौर्यमेवार्थसाधकम् ।
तदादिशसि मन्त्रीन्द्र यत्पुण्यमिति किं नु तत् ॥ ५९ ॥
इत्युक्तिभाजि राजेन्द्रे मन्त्रीन्द्रो वदति स्म सः ।
प्राच्यधर्मपरीपाकः पुण्यमेवोच्यते ऽर्थकृत् ॥ ६० ॥
अथापृच्छदतुच्छाशः पृथ्वीन्दुरिति मन्त्रिणम् ।
साक्षात्तेजो ऽर्थकृत्तावद्धर्मास्तित्वे तु का प्रमा ॥ ६१ ॥
मुदे दुरितविच्छेदनाद्यसभ्यस्य भूपतेः ।
ततः सुकृतसूचेव प्रत्यूचे सचिवेन वाक् ॥ ६२ ॥
राज्यं सुकृतहीनस्य तेजसा च बलेन च ।
अभोगसारं सारङ्गराजस्य क्व नु राजते ॥ ६३ ॥
भूपेभ्यः शोभते भूरि धाम स्थाम च दन्तिनाम् ।
यदमीषाममी यानं जानीं धर्मो ऽत्र कारणम् ॥ ६४ ॥
शक्तौ दीनो ऽकुलीनो ऽङ्गहीनो ऽपि नृपपुङ्गवैः ।
यत्पुण्याढ्यनृपो ऽसेवि पुण्यं तेन प्रमीयते ॥६५॥

तथाहि विश्वहृद्राहि महत्त्वद्योति विद्यते ।
क्ष्माकेलिपद्मं पद्मायाः सद्म पद्मपुरं पुरम् ॥ ६६ ॥
तत्र क्षत्रियसंग्रामसत्रधाम भुवो विभुः ।
अभवद्भुवनाम्भोजतपनस्तपनाभिधः ॥६७॥
हस्तिरत्नं गृहीत्वात्र व्यवहारी धनावहः ।
कदाचिदाययौ कृष्टो भूपभाग्यगुणैरिव ॥ ६८ ॥

भाग्याभोगेन भूपानां रत्नमेतादृशं भृशम् ।
इति दक्षैस्तदा पुम्भिः ख्याते तत्कुम्भिगौरवे ॥ ६९ ॥
असामान्यो गुणैर्मान्यो ममायमिति तस्य सः ।
ययौ कुञ्जरराजस्य सम्मुखं राजकुञ्जरः ॥ ७० ॥ युग्मम् ॥
ननादाम्बुदनादेन प्रीतः प्रेक्ष्य नृपं द्विपः ।
नृपस्त्वपूरि रोमाञ्चैर्वैदूरी भूरिवाङ्कुरैः ॥ ७१ ॥
वामं च दक्षिणं चाङ्गं शिरःकम्पनकैतवात् ।
मुहुरस्याद्भुतं पश्यन्निवेति ध्यायति स्म सः ॥ ७२ ॥
द्रष्टुमैरावणमसौ तद्गुणग्रहधीरिव ।
उच्चैस्त्वात्तु नभोगर्भगतो ऽब्द इव गर्जति ॥ ७३ ॥
इन्द्रेभस्पर्धया शङ्के यशोभिर्विशदीभवन् ।
इन्द्रतायोग्यभाग्यानामेवायं याति यानताम् ॥ ७४ ॥
इति ध्यायन्धराजानिः सन्मान्य व्यवहारिणम् ।
विधातुं दन्तिनो मूल्यं तद्विदः स समादिशत् ॥ ७५ ॥
त्रिभिर्विशेषकम् ॥
निरीक्ष्य लक्षणान्यस्य द्विरदस्य विशारदाः ।
जगदीशं जगुर्लोलमौलयः पुलकाङ्किताः ॥ ७६ ॥
शास्त्रोक्तानामदोषाणां सर्वसल्लक्षणस्पृशाम् ।
हस्ती दृष्टो ऽयमेवाद्य द्विरदानामुदाहृतिः ॥ ७७ ॥
भूपस्य यस्य कस्यापि स्यादसौ द्वारभूषणम् ।
संसाधयति दुःसाधानप्यरीँल्लीलयैव सः ॥ ७८ ॥
पदं कृतयुगस्येव निरीतिः सुकृतैकभूः ।
एतद्दन्तिभृतो भूमिभर्तुर्देशो ऽपि शोभते ॥ ७९ ॥
स्वामिन्न स्यादमूल्यस्य मूल्यमस्य गजस्य तत् ।

याचते यद्वणिग्यादृग्देयं देव तदेव हि ॥ ८० ॥
किं ते मूल्यं ददामीति राज्ञि प्रीते ऽथ पृच्छति ।
व्याहारि व्यवहारैकहारिणा व्यवहारिणा ॥ ८१ ॥
स्वामिन्विन्ध्याद्विराजस्य युवराज इव द्विपः ।
अत्युत्तमो ऽयं विख्यातः साम्प्रतं हस्तिबन्धिषु ॥ ८२ ॥
स्वदारिद्र्यद्रुमद्रोहकृते ऽसौ केन केन न ।
महोपायसहस्रेण धर्तुमारभ्यताभितः ॥ ८३ ॥
वितन्वतीभिः साम्यं वा वैषम्यं वा किमप्ययम् ।
बद्धुं शेके न वारीभिर्नारीभिरिव संयमी ॥ ८४ ॥
सम्यग्मत्वैनमग्राह्यं गन्धेभं गन्धवाहवत् ।
अवल्यत विलक्षेण लक्षेण करिबन्धिनाम् ॥ ८५ ॥
अथाहमधिकोत्साहः सुस्वप्नशकुनव्रजैः ।
अस्य बन्धाय विन्ध्याद्रिं गत्वा वासमदापयम् ॥ ८६ ॥
कथं ग्राह्यः स हस्तीति चिन्ताचकितचेतसः ।
मम प्रमोदरोमाञ्चपचयं स्वयमथ ॥ ८७ ॥
मुक्तिस्पृहमसम्यक्त्वमिव मामेतदर्थिनम् ।
सतां प्रहसतां चित्ते चमत्कारं प्रपञ्चयन् ॥ ८८ ॥
मृदुगर्जितवाद्येन मदषट्पदगीतिभिः ।
श्रियमग्रे निजक्रीडानर्तकीमिव नर्तयन् ॥ ८९ ॥
वनदेवीभिरप्येष वीक्ष्यमाणः कुतूहलात् ।
शनैर्वनान्ममागारमगान्नागाधिपः स्वयम् ॥
चतुर्भिः कलापकम् ॥ ९० ॥
आश्चर्योन्मत्तचित्तेन मयोत्थाय रयादथ ।
असावपूजि प्रत्यक्षं स्वभाग्यस्येव दैवतम् ॥ ९१ ॥

नमतो मम तोषेण सुप्रसन्नः करी करम् ।
सुस्वामीव दधावेष पृष्ठे कमलकोमलम् ॥ ९२ ॥
भूभृद्वनीं विरागीव भूभृतामवनीं प्रति ।
संचचालाथ संज्ञाप्य हस्ती हस्तेन मामसौ ॥ ९३ ॥
अथैनं पृथिवीलीलाचारिणं वारणेश्वरम् ।
वयं प्रीत्यान्वगच्छामः विवेकमिव सद्गुणाः ॥ ९४ ॥
दूरतो राजधानीनामुपकण्ठमपि त्यजन् ।
क्रयोत्कं भूभृतां सङ्घं लङ्घमानो बलादपि ॥ ९५ ॥
मयानुगम्यमानोऽयमेत्य नित्यप्रयाणकः ।
इह स्वगृहवत्तस्थौ यूथनाथो ऽद्य सुस्थितः ॥ ९६ ॥
युग्मम् ॥
रक्ता कोपाग्नितप्तेव जज्ञे यान्येषु राजसु ।
प्रमोददुग्धधौतेव धवला त्वयि सास्य दृक् ॥ ९७ ॥
तन्नूनमयमानिन्ये त्वद्भाग्यैरेव वारणः ।
ममैतदनुगामित्वान्मद्भाग्यैरसि दर्शितः ॥ ९८ ॥
ततः स्वसुकृतक्रीतं गृहाणैनमिभं विभो ।
अहं कृतार्थ एवाद्य भवद्भालनिभालनात् ॥ ९९ ॥
अथ वाग्भिः सुधापानपुण्यैः कर्णेन्द्रियश्रियः ।
प्रीतो महीन्दुर्मन्त्रीन्द्रमुखसंमुखदृग्जगौ ॥ १०० ॥
अमूल्यमेनमानिन्ये वन्येभमयमेकतः ।
अमूल्यमेकतोऽवोचद्वचनं वज्रनोज्झितम् ॥ १०१ ॥
तदमूल्यद्वयीदातुरुर्वीसर्वस्वमप्यहं ।
दत्त्वाप्यस्यानृणीभावं न गच्छामि करोमि किम् ॥ १०२ ॥
इति स्थिते नरेन्द्रे ऽथ व्याहारि व्यवहारिणा ।

स्वामिन् गजस्तवैवोक्तो मूल्यं गृह्णे ऽस्य न ध्रुवम् ॥१०३॥
इत्यस्मै निश्चयवते सचिवानुमतो नृपः ।
दत्त्वा बलेन राज्यार्धं तं द्विपेन्द्रमुपाददे ॥ १०४ ॥
ततः कृतेभरत्नाप्तिमङ्गलो ऽयं महीपतिः ।
चक्रे यात्रां जगत्कम्पहेतुं जेतुं दिशो ऽखिलाः॥१०५॥
निस्वानध्वानधूलीभिर्बधिरान्धारिविक्रमम् ।
संकटीभूतभूगोलं लोलं प्रास्थित तद्बलम् ॥ १०६ ॥
स गन्धसिन्धुरो बद्धरत्नपट्टः पुरो ऽचलत् ।
मूर्धोर्ध्वभ्रान्तकोपाग्निरिव लोपाय विद्विषाम् ॥ १०७ ॥
न नेमुः सर्वतो गर्वकुशीभिः कीलिता इव ।
ये पुरा वैरिणस्तेषु स तत्याज कृपां नृपः ॥ १०८ ॥
रणेषु वारणेन्द्रस्तु स वात्यावर्तवद् द्रुमान् ।
लोडयामास विद्वेषिचमूस्तृणसमूहवत् ॥ १०९ ॥
द्विपेन्द्रः प्रेक्षकीभूतसकलस्वबलोच्चयः ।
शत्रून् स त्रासयामास दुस्सहश्चण्डवानिलः ॥ ११० ॥
दन्तघातदलद्वप्रकपाटः पाटयन्भटान् ।
अरीन्करीन्द्रश्चक्रे ऽसौ दुर्गस्थानपि दुर्गतान् ॥ १११ ॥
इत्येष समरे ऽजैषीद्दन्तलक्षीकृतान्द्विषः ।
लक्षीकृतं तदस्त्रैः स्वं गतिवेगादलक्षयन् ॥ ११२ ॥
दिशामन्तेषु मिथ्यात्वख्यातान्प्रेक्ष्येव दिग्गजान् ।
जितकाशी स कुम्भीन्द्रो ववले ऽनुचलद्बलः ॥ ११३ ॥
शक्तिसाधितदुःसाधे सिन्धुरे जयबन्धुरे ।
तस्मिन् सविस्मयप्रेम रेमे भूमीशमानसम् ॥ ११४ ॥
तमेवेभविभुं भूपैर्जयश्रीमङ्गलागतैः ।

पदे पदे ऽर्चयन्नाप पुरं नरपुरन्दरः ॥ ११५ ॥
महोत्सवमहो भूपप्रवेशावेशपेशलम् ।
सचिवैस्तत्पुरं चक्रे शक्रेणापीप्सितास्पदम् ॥ ११६ ॥
आलोककामवामाक्षीजालमालितजालकम् ।
काश्मीरनीरनीरन्ध्रच्छटाछोटितभूतलम् ॥ ११७ ॥
व्योमापगां जयन्तीभिर्वैजयन्तीभिरद्भुतम् ।
उत्तुङ्गतोरणस्तम्भानद्धसंमदसिन्धुरम् ॥ ११८ ॥
कृताकल्पमिवानल्पैरुच्चस्थानासनैर्जनैः ।
सहासामिव दन्ताभमुक्ततोरणकान्तिभिः ॥ ११९ ॥
दुर्जयारिजयारोहप्ररोहन्मोहसंमदः ।
तत्पुरं प्रविवेशाथ नृपस्तद्द्विपसंगतः ॥ १२० ॥
चतुर्भिः कलापकम् ॥
प्रीतिगौरैर्मुहुः पौरैः स्तूयमानः पदे पदे ।
लिखन्करी करेणोर्वीं सविलक्ष इवैक्ष्यत ॥ १२१ ॥
खेलन् सेहलममलं कराग्रेणाथमग्रहीत् ।
कुतो ऽप्यट्टात्खटीखण्डं बीजं धर्मतरोरिव ॥ १२२ ॥
करात्तखटिकाखण्डः शुण्डारः स व्यराजत ।
स्वर्गदण्डाग्रसंसर्गिसोमव्योमतलोपमः ॥ १२३ ॥
किं कर्तानेन करटी खटीखण्डेन सम्प्रति ।
इत्यसौ विस्मयस्मेरैः प्रेक्ष्यमाणः पुरीजनैः ॥ १२४ ॥
आत्तनागरमङ्गल्यः प्रतिस्थानं मतङ्गजः ।
लीलालसगतिः प्राप भूपालभवनाङ्गणम् ॥ १२५ ॥
युग्मम् ॥
मृग्यमाणो महाश्चर्यानिश्चलैः खेचरैरपि ।

स गुणी प्रगुणीकृत्य कृत्यावित्खटिकामिमाम् ॥ १२६ ॥
चतुष्पंक्तिं भवचतुर्गतिनिर्गतिमार्गवत् ।
श्लोकमेतन्नृपागारद्वाराभित्तौ द्विपो ऽलिखत् ॥ १२७ ॥
युग्मम् ॥

अविज्ञातत्रयीतत्त्वो मिथ्यासत्त्वोल्लसद्भुजः ।
हा मूढः शत्रुपोषेण मित्रशोषेण हृष्यसि ॥ १२८ ॥
श्लोकमालोकयन्नेनमनेनसमसौ नृपः ।
अजानन्नर्थमर्थज्ञानपृच्छन्मित्रमन्त्रिणः ॥ १२९ ॥
श्लोकः कथंचिद्बुबुधे बुधेशैरपि तैर्न सः ।
अतिदीर्घो ऽपि न पुमान्पदाभ्यां लङ्घ्यते ऽर्णवम् ॥ १३० ॥
मुखाग्रे तोरणीकुर्वन्नथ दन्तांशुधोरणीम् ।
न्यवीविशन्नृदेवो ऽसौ वाग्देवीं रसनासने ॥ १३१ ॥
मदिष्टदेवता कापि मयि दत्त्वा जगज्जयम् ।
श्लोकं शिक्षाविशेषाय लिलेख द्विपरूपभाक् ॥ १३२ ॥
तदस्यार्थमविज्ञाय न विशामि निवेशनम् ।
अमित्रमित्रसंदेहे कास्तु देहे ऽपि निर्वृतिः ॥ १३३ ॥
तदित्युदीर्य काव्यार्थं हृल्लेखादीर्यमाणहृत् ।
तत्रैवास्थानमास्थाय विभुर्निविविशे विशाम् ॥ १३४ ॥
संहताः सूरयः प्रज्ञावज्ञातसुरसूरयः ।
तैरप्यभेदि न श्लोकष्टङ्कैर्वज्रमणिर्यथा ॥ १३५ ॥
श्लोकार्थं लोकसार्थेषु समन्तान्मतिगर्वितान् ।
धर्माचार्यानथाकार्यापृच्छत्पृथ्वीपतिः क्रमात् ॥ १३६ ॥
अर्थेष्वघटमानेषु तेषामप्युक्तियुक्तिभिः ।
विषादपात्रं धात्रीशः किंकर्तव्यजडो जगौ ॥ १३७ ॥

श्लोकेनानेन कनकाचलेनेव प्रकम्पनाः ।
सर्वज्ञमानिनः सर्वे गर्वेण रहिताः कृताः ॥ १३८ ॥
अद्यापि विद्यते क्वापि को ऽपि प्रष्टव्यतास्पदम् ।
न वेति वदति क्ष्मापे सचिवेन्दुरवोचत ॥ १३९ ॥
अद्याप्येको विवेकोर्मिसमुद्रो न समेति सः ।
आनन्दचन्द्रसूरीन्द्रो जिनशासनतत्त्ववित् ॥ १४० ॥
ऊचे ऽथ राज्ञा नाज्ञायि यदन्यैस्तत्कथं नु सः ।
तथाप्याहूयतां सो ऽपि दीर्णशल्यो ऽस्तु संशयः ॥ १४१ ॥
अथ मन्त्री स्वयं गत्वा नत्वा विनयवामनः ।
निवेद्य कार्यमाचार्यवर्यं मावर्ज्य हूतवान् ॥ १४२ ॥
ते कर्तुकामास्तीर्थेशशासनस्य प्रभावनाम् ।
राजमन्दिरमाजग्मुः सूरयो ऽथ नयोज्ज्वलाः ॥ १४३ ॥
मूर्तं शममिवायान्तं तमवेक्ष्य महामुनिम् ।
भून्यस्तदशनो हस्ती नमश्चक्रे मुदा नदन् ॥ १४४ ॥
देवांशः को ऽप्यसौ कुम्भी मोहशुम्भी ननाम यम् ।
तं किं मुनीन्द्रं निस्तन्द्रा नमामो वयमप्यमुम् ॥ १४५ ॥
इति ध्यायन्समुत्थाय भद्रपीठाद्विभुर्भुवः ।
नमश्चकार सपरीवारः संसारतारणम् ॥ १४६ ॥
सूरिं सिंहासने ऽध्यास्य निविश्याग्रे ऽतिभक्तिभाक् ।
तं श्लोकं दर्शयन्भिक्ष्यामर्थं पप्रच्छ पार्थिवः ॥ १४७ ॥
दन्तच्छविच्छलान्मुक्तिशिलादीधितिवर्णिकाम् ।
दर्शयन्निव भक्तेभ्यो गुरुर्गिरमथाकिरत् ॥ १४८ ॥
यो देवगुरुधर्माणां त्रयीं जानाति तत्त्वतः ।
रमते तन्मतिः सत्त्वे स मित्रामित्रभेदविद् ॥ १४९ ॥

वीतरागप्रभुर्देवो गुरुस्तत्त्वोपदेशकः ।
धर्मश्च करुणारम्यस्त्रयीतत्त्वमिदं विदुः ॥ १५० ॥
तत्सत्त्वं यद्भवाम्भोधिः क्रममात्रेण लङ्घ्यते ।
मिथ्या सत्त्वं पुनः कर्ममरिष्यन्मार्यमारणम् ॥ १५१ ॥
रिपवो रागरोषाद्या मुहुर्देहं दहन्ति ये ।
मूलादुन्मूलनीयास्ते समत्वास्त्रेण धीधनैः ॥ १५२ ॥
मित्राणि प्राणिवर्गस्तु यो द्विषन्नपि कर्महा ।
कामं क्षामयितव्यो ऽसौ क्रुधा दीप्तः शमामृतैः ॥ १५३ ॥
कषायविषयाञ्शत्रून्परिपुष्यन्ति मित्रवत् ।
सुहृदो ऽसूनपि क्षूकृत्य निघ्नन्ति धिग्जडाः ॥ १५४ ॥
राजन्को ऽप्यवधिज्ञानी तव पूर्वसुहृत्करी ।
सूक्त्यानया ददौ शिक्षां भुक्तराज्यस्य संयमे ॥ १५५ ॥
इति विज्ञाय सूक्तार्थं चमत्कुर्वन्गुरोर्गिरा ।
मेदिनीजानिरानन्दहृष्टरोमपदो ऽवदत् ॥ १५६ ॥
अद्य मे फलवज्जन्म यद्भवान्भवपारदः ।
अलभ्यत गुरुर्गौरगुणगौरवभाजनम् ॥ १५७ ॥
त्वत्प्रसादेन संसारसारासारविचारवित् ।
जाने ऽधुना धुनाम्पुर्वीभोगान्योगानुरक्तधीः ॥ १५८ ॥
प्रभो पीयूषसदृशा दृशा मां वीक्ष्य दीक्षय ।
विलीयन्तां भवोत्थाना देहदाहज्वरोमयः ॥ १५९ ॥
इत्युदीर्य पदद्वन्द्वमद्वन्द्वस्थिरमानसः ।
आनन्दचन्द्रसूरीणामग्रहीदाग्रही नृपः ॥ १६० ॥
श्लोकार्थज्ञानसंविग्नाः परेऽपि बहवो जनाः ।
दक्षा दीक्षामयाचन्त मुनिमानम्य तं तदा ॥ १६१ ॥

अयं करात्तकल्याणकलशः करिशेखरः ।
अभिषिञ्चति यं राज्ये स्थाप्यः कामं स मामके ॥ १६२ ॥
इत्यादिश्य तदा मन्त्रिवृन्दं वृन्दारको नृणाम् ।
मुक्तिवीक्षाप्रतिभुवं दीक्षामादत्त संमदी ॥ १६३ ॥ युग्मम् ॥
ते ऽपि शुद्धधियो धीराः क्षीराब्धिस्फूर्तिकीर्तयः ।
कति नादिदिरे दीक्षां भवक्षोदविनोदिनीम् ॥ १६४ ॥
जिनप्रवचनप्रौढप्रभावपृथुभावनः ।
अथातः सपरीवारो विजहार महामुनिः ॥ १६५ ॥
मङ्गल्यकलशं तस्य करे न्यस्य करीशितुः ।
पवित्रा मन्त्रिणस्तत्र ततः प्राञ्जलयो जगुः ॥ १६६ ॥
गजैकराज राजत्वं विराजयति यो गुणैः ।
तस्मै कस्मैचिदैश्वर्यं वितीर्य विजयी भव ॥ १६७ ॥
ततो मतङ्गजस्वामी चामीकरविभूषणः ।
मन्द्रगर्जितवाचालीदक्वक्रः प्रचचाल सः ॥ १६८ ॥
रङ्कानराज्ञश्च राज्याय पुरो ऽसौ परिपातिनः ।
सदृशैव दृशा पश्यन्मार्गविघ्नानमन्यत ॥ १६९ ॥
सरलं तरलं गच्छन्मदागतिरिव द्विपः ।
स तस्थौ नगरारामग्रामोर्वीष्वपि न क्वचित् ॥ १७० ॥
क्वानेन हन्त गन्तव्यमित्यन्तश्चिन्तयातुराः ।
तं मन्त्रिणो ऽन्वगुर्मन्त्रं प्रभावा इव साधितम् ॥ १७१ ॥
रत्नार्थीव पुमानब्धिं पुंरत्नार्थी स वारणः ।
दुःप्रवेशं विवेशाथ दूरदेशाटवीपथम् ॥ १७२ ॥
सुप्तं तरुतले कंचिच्चीरच्छन्नशरीरकम् ।
तत्राभ्यषिञ्चदम्भोभिः कुम्भी कल्याणकुम्भजैः ॥ १७३ ॥

ततो बन्दिकदम्बेन कृते जयजयारवे ।
दूरमापूर्यमाणे च तूर्यकाणेन दिग्गणे ॥ १७४ ॥
अयमुत्थापयांचक्रे यावद्राज्याय मन्त्रिभिः ।
दृष्टस्तावद्विसंकोचिहस्ताद्यवयवः पुमान् ॥ १७५ ॥ युग्मम् ॥
प्रत्यक्षलक्षितक्ष्मापलक्षणोऽपि हहा महान् ।
नैष पद्भ्यां गतौ शक्तो न पाणिभ्यां तृणग्रहे ॥ १७६ ॥
किमीदृशोऽपि राज्ये स्यादिति ध्यायिषु मन्त्रिषु ।
करेणारोप्य तं पृष्ठे पुराय प्रययौ द्विपः ॥ १७७ ॥
नूनं ज्ञानी गजोऽनेन राज्यं वर्धिष्णु वीक्ष्यते ।
प्रवेशोत्सवमित्यस्य विचित्रं मन्त्रिणो व्यधुः ॥ १७८ ॥
अज्ञातकुलशीलस्याप्युन्मीलद्भाग्यशालिनः ।
राज्याभिषेकमङ्गल्यं तेनिरे ऽस्य नरोत्तमाः ॥ १७९ ॥
राज्यप्रधानपुंवर्गस्तं ननाम च नाम च ।
पुण्यर्द्धिभावतस्तस्मिन्पुण्यात्म्य इति निर्ममे ॥ १८० ॥
राज्यार्धस्वामितागर्वोदखर्वस्तु धनावहः ।
पङ्गुं नामुं नमामीति निर्ययौ नगराद्बहिः ॥ १८१ ॥
तद्राज्यार्धबलं तस्य मण्डलेशाः परेऽपि च ।
विधुराङ्गधराधीशवैराग्येण तमन्वगुः ॥ १८२ ॥
सहस्तिकैर्हस्तिपकैः सतुरङ्गैस्तुरङ्गिभिः ।
नृपमूलबलाधीशैरप्यसावन्वगम्यत ॥ १८३ ॥
बलीयाञ्जयतीत्येष नियोगिभिरपि श्रितः ।
बहिर्बहुबलत्वेन नागरैरप्यगामि सः ॥ १८४ ॥
अपि हस्तिपकेनोच्चैर्नुन्नो हस्तिपतिस्तु सः ।
एक एव बहिर्नागान्निर्भाग्येषु क तादृशः ॥ १८५ ॥

अभूत्पुण्याढ्यभूपस्य भूपसङ्घैव केवलम् ।
ययौ राज्यं समस्तं तदर्धराज्यहरे नरे ॥ १८६ ॥
भद्रासनैकभक्तात्मा मध्ये ऽपि भुजभृद्गणः ।
को ऽपि स्यादिति संनद्धबलजालश्चचाल सः ॥ १८७ ॥
आधोरणाग्रणीस्तस्य वारणाधिपतेस्तदा ।
प्राञ्जलिर्जगतीजानिं विजयाय व्यजिज्ञपत् ॥ १८८ ॥
जयत्येव रणोत्सङ्गसंगतो ऽसाविभो विभो ।
अस्मिन्नारुह्यतामाशु मुह्यतांमासुहृद्गणैः ॥ १८९ ॥
एवमस्त्विति जल्पन्तं गोपमारोपयद्विपे ।
हस्तिपालस्तदाकाल इव पूर्वाचले रविम् ॥ १९० ॥
अथायमचलद्योद्धुमचलश्रीरिभप्रभुः ।
अवेपिनो भटाः के ऽपि पट्टभक्ताः पुरो ऽभवन् ॥ १९१ ॥
शौर्यलक्ष्मीनटीनाट्यारम्भसंभ्रमभृत्ततः ।
अमिलत्तुमुलोत्तालं तालवत्तद्बलद्वयम् ॥ १९२ ॥
विपक्षासिप्रहाराणां हाराणामिव पातिनाम् ।
सज्जीचक्रुः शरीराणि वीरश्रीलम्पटा भटाः ॥ १९३ ॥
गायत्कोदण्डदण्डज्यो नदद्विरदमर्दलः ।
नृत्यद्वीरकबन्धो ऽयं बन्धुरो ऽभूद्रणक्षणः ॥ १९४ ॥
भटान्पुण्याढ्यभूभर्तुः क्षणेनाथ द्रुमानिव ।
उन्मूलयद्भिः प्रसृतं द्विट्पूरैः सिन्धुपूरवत् ॥ १९५ ॥
हस्ती न हन्त हन्तव्यः पङ्गुरेवैष हन्यताम् ।
इत्यूर्ध्वपाणिरवदत्तदा धीरान्धनावहः ॥ १९६ ॥
क्षीणोपान्तस्वसैन्यो ऽपि दुर्धर्षो ऽथ करीश्वरः ।
रिपुसैन्यं ममन्थासौ दधिमन्थानको यथा ॥१९७॥

करी सर्वाभिसारेण ततो ऽरोधि विरोधिभिः ।
रजनीसमयोद्भ्रान्तैर्ध्वान्तैरिव वियत्पथः ॥ १९८ ॥
इत्यस्मिन्संकटे तिष्ठन्पुण्याढ्यनृपतिर्जनैः ।
किमध्यासि करीशेण राज्ये ऽसावित्यशोच्यत ॥ १९९ ॥
तृणमप्यात्महस्तेन कुरु शस्त्रं रिपूञ्जय ।
तदेत्युवाच पुण्याढ्यमदृश्या भाग्यदेवता ॥ २०० ॥
तदैव दैवतस्तस्य मारुतप्रेरितं करे ।
अरोहच्च तृणं शत्रौ शस्त्रमित्यक्षिपच्च सः ॥ २०१ ॥
अथाशु स्फूर्जदूर्जस्विस्फूर्जथुस्फोटिताम्बरम् ।
लोलकीलाकुलौद्धत्यधगद्दिग्मण्डलोदरम् ॥ २०२ ॥
कम्पमानाचलचयं भयभुग्नजगत्त्रयम् ।
तृणमप्यभवद्वज्रं व्योम्नि पुण्याढ्यपुण्यतः ॥२०३॥युग्मम्॥
यो न नंस्यति पुण्याढ्यं तत्र वज्रं पतिष्यति ।
इत्यभूच्च नभोवाणी भूपभाग्याधिदैवतात् ॥ २०४ ॥
इत्युदन्तेन दन्तेषु नृणामीशास्तृणान्यधुः ।
नृपं नेमुश्च पुण्याढ्यमहो पुण्यमहोदयः ॥ २०५ ॥
दासस्ते ऽस्मीति जल्पन्तं कलयन्तं मुहुः स्तुतिम् ।
लुठन्तं भूतले भूपो ऽनुजग्राह धनावहम् ॥ २०६ ॥
पुरं प्रविशतस्तस्य राज्ञो ऽथ जितकाशिनः ।
प्रथीयानरिवारो ऽपि परिवारो ऽभवत्तदा ॥ २०७ ॥
पुण्याढ्यभूपतेराज्ञां राज्ञां मूर्धन्यतन्वताम् ।
प्राणनाशार्थमाशासु कुलिशं विलसत्यदः ॥ २०८ ॥
इत्यम्बरगिरा साक साकम्पभुवनत्रयम् ।
दूरादसंख्यदेशेषु दिवि तद्वज्रमभ्रमत् ॥ २०९ ॥ युग्मम् ॥

प्रदत्तासंख्यदेशान्तः पृथ्वीनाथाज्ञमित्यदः।
अनिशं तासु सीमासु भीमार्चिर्वज्रमस्फुरत् ॥ २१० ॥
अन्यायवार्तामपि यश्चक्रे दध्यौ च तद्भुवि ।
तमेवाकम्पयद्वज्रमन्यायकरकायभित् ॥ २११ ॥
तस्य बिभ्रद्भिरित्याशामाशङ्कां च प्रथीयसीम् ।
आज्ञा मूर्ध्नि दधे कामं तत्सीमावासिभिर्नृभिः ॥२१२ ॥
वज्रसंचारनिश्चिन्तो बहुदेशमहीपतिः ।
श्रीपुण्याढ्यः सुखं तस्थावित्थं स्वर्गे हरिर्यथा ॥ २१३ ॥
हृष्यन्नेत्यावनीपालं वनीपालः कदापि तम् ।
अवतंसीभवत्पाणिपङ्कजश्रीर्व्यजिज्ञपत् ॥ २१४ ॥
स्वामिन्नेतत्पुरस्वामी तपनस्तपसि स्थितः ।
आजगाम तवाराममवधिज्ञानभानुमान् ॥ २१५ ॥
इत्याकर्ण्य श्रियः कर्णाभरणं धरणीपतिः ।
मुदितो दन्तिराजं तमारुह्योद्यानमासदत् ॥ २१६ ॥
महामुनिमिहानम्य निविष्टो हृष्टहृन्नृपः ।
कृतानतिः करीन्द्रोऽपि तस्थौ वचनगोचरे ॥ २१७ ॥
पुरस्य पुरभर्तुश्च प्रधानपुरुषैः क्रमात्
दूरं मुनिसभापूरि भूरिभिर्द्यौरिवोडुभिः ॥ २१८ ॥
ततः श्रुतसुधाम्भोधिविहरल्लहरीनिभाम् ।
निर्ममे निर्ममेशोऽयं निर्मलां धर्मदेशनाम् ॥ २१९ ॥
इहानादौ भवे ऽनादिर्जीवो ऽनादिस्वकर्मतः ।
अव्यवहारराशौ स्याद्दुःसह्यग्रहदुःखभाक् ॥२२० ॥
असंख्या ह्यत्र गोलाः स्युर्गोलो ऽसंख्यनिगोदकः ।
एकैकस्मिन्निगोदे स्युरनन्ता जन्तवः स्थिराः ॥ २२१ ॥

अन्योन्यजन्तुसंवाससंमर्दोत्पीडपीडितः ।
जीवो ऽनन्तान्भवानेकेन्द्रिय एवात्र संवसेत् ॥ २२२ ॥
उत्पत्तिनाशैस्तत्रैवाकामनिर्जरया चिरात् ।
स क्षिपेत्कानिचित्किंचित्कर्माणि कथमप्यथ ॥ २२३ ॥
एवं तेषु निगोदेषु सो ऽनुभूय महाव्यथाम् ।
आयाति व्यवहाराख्यराशौ दैववशादिह ॥ २२४ ॥
अत्यन्तस्थावरो ऽप्यत्र कथंचित्कर्मलाघवात् ।
मानुष्यमुत्तमं प्राप्य भवे तत्रैव सिध्यति ॥ २२५ ॥
प्रायेणान्यस्तु सर्वो ऽपि संसारे स्वस्वकर्मभिः ।
चतुरशीतिलक्षासु जीवो भ्राम्यति योनिषु ॥ २२६ ॥
तथाहि ।
जन्मानि सप्तलक्षाः स्युः पृथ्वीकाये शरीरिणः ।
जले सप्तानले सप्तानिले सप्त स्वकर्मतः ॥ २२७ ॥
द्विधा वनस्पतिर्ज्ञेयः प्रत्येकानन्तभेदतः ।
तत्राद्ये दशलक्षाणि द्वितीये तु चतुर्दश ॥ २२८ ॥
द्वीन्द्रिये त्रीन्द्रिये द्वे द्वे द्वे लक्षे चतुरिन्द्रिये ।
लक्षाश्चतस्रो निरये चतस्रस्त्रिदशालये ॥ २२९ ॥
लक्षाश्चतस्रस्तिर्यक्षु मनुष्येषु चतुर्दश ।
वर्णाद्यैः सममेकं तदुक्तं स्थानं तु बह्वपि ॥ २३० ॥
चतुर्भिः कलापकम् ॥
इत्थं भ्राम्यन्भृशं भाग्यैरात्माभ्येति भवे नृणाम् ।
आर्यक्षेत्रसुगोत्रायुरङ्गाक्षपटुतान्विते ॥ २३१ ॥
न स्यात्तत्र गुरुप्राप्तिः सा चेत्तन्नागमश्रुतिः ।
सापि चेत्तन्न जीवस्य हृदि श्रद्धा समुल्लसेत् ॥ २३२ ॥

सत्यां तस्यामपि प्रायस्तुच्छपुण्यस्तु मानवः ।
कर्तुं न लभते धर्ममाधिव्याधिप्रमादतः ॥ २३३ ॥
निदानं सर्वसौख्यानां फलं मर्त्यत्वभूरुहः ।
विरलः कोऽपि शुद्धात्मा श्रध्वद्धर्मं निषेवते ॥ २३४ ॥
विरुद्धाचरणैः केचिदधन्या धर्ममप्यहो ।
विराधयन्ति दुर्बुद्धिबाधिता ह्यात्मवैरिणः ॥ २३५ ॥
आराद्धाच्च विराद्धाच्च धर्मादेव शुभाशुभे ।
लभते जन्तुरन्यत्तु मुख्यं किंचिन्न कारणम् ॥ २३६ ॥
इति निश्चित्य सत्कृत्यमाचितत्य शुभात्मना ।
धर्मः संसेव्य एवैषो ऽतुल्यकल्याणजन्मभूः ॥ २३७ ॥
इत्थं तस्य मुनीशस्य तैः पपे वचनामृतम् ।
अतृप्तैरपि मूर्धानं धुनानैर्धर्मिभिर्नृभिः ॥ २३८ ॥
अथ पृथ्वीश्वरो ऽत्यर्थं सव्यथो हृदये दधौ ।
किं मया युगपद्धर्माधर्मौ पूर्वभवे कृतौ ॥ २३९ ॥
यदेवं देहवैधुर्यं राज्यं चाप्यत तत्क्षणं ।
इन्द्रवारणनारङ्गसमास्वादनसोदरम् ॥ २४० ॥ युग्मम् ॥
इति ध्यात्वाधिकं धात्रीधवः साधुशिरोमणिम् ।
अपृच्छत्कायसंकोचभाग्यासंकोचकारणम् ॥ २४१ ॥
ततो दन्तद्युतिच्छद्मदृश्यधर्मद्रुपुष्पया ।
आसन्नमुक्तिफलया गिराप्रीणाज्जनं मुनिः ॥ २४२ ॥
पुरं लक्ष्मीपुरं नाम शोणश्यामाश्मवेश्मभिः ।
पदं धर्मभुजेरस्ति महस्तिमिरमेलकृत् ॥ २४३ ॥
जज्ञिरे तत्र सित्राणि त्रयः क्षात्रियगोत्रजाः ।
रामवामनसंग्रामनामानः प्रीतिभाजनम् ॥२४४ ॥

चतुर्दशाब्ददेशीयाः कामं विरहकातराः ।
खलान्ति स्म सहेलं ते पुरि पौरप्रियश्रियः ॥ २४५ ॥
ते सज्जनमनस्तोषकारितुल्यक्रियास्रयः ।
साधोर्मनोवचःकायप्रपञ्चा इव रेजिरे ॥ २४६ ॥
कदाप्युद्यानमेदिन्यां ते ययुः केलिलालसाः ।
ददृशुश्च कमप्युद्यत्कायोत्सर्गस्थितं यतिम् ॥ २४७ ॥
प्रीतिमन्तो नमन्ति स्म ते यतेः पदयोः पुरः ।
उन्नमन्ति स्म लोकाग्रं यावत्पुण्येन वर्ष्मणा ॥ २४८ ॥
पयःकणोऽपतत्पृष्ठे वामनस्य नमस्यतः ।
मुक्तिसीमन्तिनीमुक्तकलीलाकर्करकोपमः ॥ २४९ ॥
स चातक इवोत्पश्यः पश्यन्वारिलवागमम् ।
गलदश्रुजलं साधोरेकमीक्षणमैक्षत ॥ २५० ॥
निरीक्ष्य निपुणं दक्षः स्ववयस्यावुवाच सः ।
नेत्रं मुनेर्दुनोत्यस्य दृश्यतामेष कण्टकः ॥ २५१ ॥
मारुतोर्मिधुतो नूनमयमस्यापतद्दृशि ।
नाकृष्येत शरीरेऽपि निरीहेणामुना पुनः ॥ २५२ ॥
अस्मत्करोऽल्पकायत्वान्नैतदम्बकचुम्बकः ।
तत्कथं कण्टकः क्रष्टुं शक्यो ऽरिष्टमिवात्मनः ॥ २५३ ॥
रामो वामनमाचष्ट सखे मा खेदमुद्वह ।
चतुष्पदीभवाम्येष पाणिस्पृष्टमहीतलः ॥ २५४ ॥
मत्पृष्ठदत्तपादाग्रो वामन त्वमवामनः ।
भव हर्षगृहं कर्ष कण्टकं मुनिनेत्रतः ॥ २५५ ॥
अथ जग्राह संग्रामो व्यामोहद्रोहकृद्वचः ।
सखे निर्माहि कर्मेदमव्यग्रो मत्करग्रहात् ॥ २५६ ॥

ततश्चतुष्पदीभूततनौ रामे कृतक्रमः ।
संग्रामहस्तविन्यस्तवामहस्तः स वामनः ॥ २५७ ॥
अहो कियन्मलार्द्रोऽयं संकुचन्निति शूकया ।
अवामपाणिनाकर्षन्महर्षेः कण्टकं दृशः॥ २५८ ॥ युग्मम् ॥
सुखसंचरणार्थं ते मुक्तिमार्गमिवात्मनः ।
कृत्वा निष्कण्टकं नेत्रं मुनेर्भुमुदिरेतराम् ॥ २५९ ॥
उपकारपरो न स्यात्को ऽप्यस्मान्क्षत्रियान्विना ।
इति गोत्रमदं दध्यौ मुग्धत्वाद्रामनस्तदा ॥ २६० ॥
कृतिनः कृतकृत्यास्ते नमस्कृत्य यतिं ततः ।
पुराय प्राचलन्वाचमिति चोवाच वामनः ॥ २६१ ॥
निर्वृतानामिवेहापि येनानन्दो ऽजनिष्ट नः ।
अहो भविष्यति कियत्कर्मणो ऽस्याग्रतः फलम्॥ २६२ ॥
आस्येन बहुहास्येन तदा रामो ऽकिरद्गिरम्
इहाभूत्पशुरूपत्वं ममैतत्कर्मणः फलम् ॥ २६३ ॥
गामग्रहीच्च संग्रामो राम मा मैवमुच्यताम् ।
हास्योक्त्यापि भवत्येव पुण्यकर्म गलत्फलम् ॥ २६४ ॥
यदस्य मुनिराजस्य नेत्रं निःकण्टकीकृतम् ।
राज्यं भवान्तरे भावि तदकण्टकमेव नः ॥ २६५ ॥
अथ प्रोन्मीलदुद्दामकामनो वामनो ऽवदत् ।
कर्मामेयफलं ह्येतत्फलमानो ऽस्य नोच्यते ॥ २६६ ॥
इत्थं मिथः कथालापशालिनः प्रीतिमालिनः ।
अद्भुतं भावयन्तस्तत्कर्म हर्म्यमहीमगुः ॥ २६७ ॥
अजातपौरपीडाभिः क्रीडाभिस्ते निरन्तरम् ।
वयस्या गमयामासुर्वासरान्धर्मभासुरान् ॥ २६८ ॥

ते ऽथ पातकपूरेण दूरिताः पूरितायुषः ।
यथा यथा समुत्पन्नाः शृणु भूप तथा तथा ॥ २६९ ॥
फलं मे पशुरूपत्वमिति हासोक्तिकर्मणः ।
स रामः सामजो जज्ञे तैः पुण्यैर्ज्ञानवानयम् ॥ २७० ॥
मुनिदृक्कण्टकाकर्षाद्राज्यं निष्कण्टकं भवेत् ।
इत्युक्त्या प्राप संग्रामजीवो ऽहं तादृशं फलम् ॥ २७१ ॥
प्राग्मैत्रीरागतो नागवरो ऽसौ मामुपागतः ।
बोधितो ऽहमनेनेदं प्राक्कर्मफलमासदम् ॥ २७२ ॥
यस्त्वासीद्वामनः किंचिद्गोत्रगर्वादवामनः ।
भूपस्वरूपमेतस्य शृणु शेषं विशेषतः ॥ २७३ ॥
अस्त्यवन्ती समस्तार्थानवन्ती नामतः पुरी ।
वाग्लक्ष्म्या क्रीडतो ऽपीडं यस्यां जनमुखाम्बुजे ॥२७४॥
तस्यां शस्यांसशैलाग्रझरत्पौरुषनिर्झरः ।
विरोधिरोधकृद्धाहुः सुबाहुरिति भूपतिः ॥ २७५ ॥
तस्य धात्रीपतेश्छत्रधरः किन्नरसंज्ञकः ।
गृहिणी हरिणी तस्य हरिणीनयनाजनि ॥ २७६ ॥
सुकृती वामनस्यात्मा गर्भे ऽस्याः समवातरत् ।
गर्भानुभावतो ऽपश्यत्तदा सा स्वप्नमद्भुतम् ॥ २७७ ॥
तत्क्षणं हरिणी त्यक्तनिद्रा चन्द्रमुखी सुखम् ।
पल्यङ्कादुत्थिता पत्युः सुस्थितेति व्याजिज्ञपत् ॥ २७८ ॥
ममोदरे रुचां राशेरभिषेकं वितन्वन्ती ।
मेरुशृङ्गे महालक्ष्मीः स्वप्ने ऽद्य ददृशे मया ॥ २७९ ॥
अथाविददादो नारीं किन्नरः शृणु सुन्दरि ।
सर्वोत्तमसुतोत्पत्तिसूचकः स्वप्न एष ते ॥ २८० ॥

ततो ऽवादीन्मुदा वाणीं हरिणी हारिणीमसौ ।
स्वामिन्धुतसुधावस्तु सत्यमस्तु तवोदितम् ॥ २८१ ॥
इत्थमन्योन्यमालापसुखस्वादनमेदुरौ ।
देवतार्चादिसत्कृत्यं चक्रतुस्तौ प्रमोदतः ॥ २८२ ॥
गर्भानुभावतः कान्तिकीर्तिसौख्यसमृद्धिभिः ।
तद्गृहे ऽथ मुदा सार्धं वृद्धे स्पर्धयाधिकम् ॥ २८३ ॥
तृतीये मासि संपूर्णे हरिण्याः पुण्यगर्भभूः ।
रत्नाकरस्य पाने ऽभूद्दोहदो हृदि दाहदः ॥ २८४ ॥
अस्मिन्नपूर्यमाणे ऽस्याः शोषस्तोषहरो ऽजनि ।
अविच्छेदस्य खेदस्य सत्रं छत्रधरो ऽप्यभूत् ॥ २८५ ॥
ते मन्त्रतन्त्रशास्त्रज्ञाः पृष्टास्तेन सहस्रशः ।
न दधार धियं कश्चिदीदृग्दोहदपूरणे ॥ २८६ ॥
कदापि क्ष्मापतेरग्रे कुतूहलकलापकम् ।
दर्शयन्नमुनादर्शि दिष्ट्या को ऽपीन्द्रजालकृत् ॥ २८७ ॥
पृष्टस्तेनायमित्याह पूरयिष्यामि दोहदम् ।
किं च ते भविता सूनुः कोऽपि विश्वविलक्षणः ॥ २८८ ॥
गृहस्याग्रे निवेश्याथ तत्र च्छत्रधरप्रियाम् ।
अदीदृशदसावैन्द्रजालिको जलधिं सुधीः ॥ २८९ ॥
उच्छलच्छोणरत्नांशुमालामग्नार्कमण्डलम् ।
समुच्चद्भिन्दुसंदोहोपशान्तश्रान्तखेचरम् ॥ २९० ॥
माधुर्यधुर्यदुग्धोर्मिरसप्रीतसुधाशनम् ।
ऐन्द्रजालिकनिर्देशात्पातुं सा तं समुद्यता ॥२९१॥युग्मम्॥
ऐन्द्रजालिकविज्ञानप्रसादेन रसादसौ ।
एकेनैव तयापायि श्वासेन पयसांपतिः ॥ २९२ ॥

सा पूर्णदोहदा तूर्णमन्तःसंतोषशालिनी ।
मुहुरानन्दसंदर्भाद्वपुः सपुलकं दधौ ॥ २९३ ॥
अथेन्द्रजालिको हर्षहारिणा च्छत्रधारिणा ।
कृतकृत्यः कृतः कृत्यविदा सर्वस्वदायिना ॥ २९४ ॥
अङ्गसंगतनिःशेषामुद्रसामुद्रलक्षणम् ।
सुतं सूते स्म कालेन साथ पाथोधिपायिनी ॥ २९५ ॥
पितृभ्यां निर्मितानेकमहाभ्यामहनि प्रिये ।
श्रीदत्त इति चक्रे ऽस्य नाम स्वमानुमानतः ॥ २९६ ॥
विकासिरक्तराजीवराजीसमकरक्रमः ।
अतन्द्रचन्द्रमश्छायाचौरगौरमुखच्छविः ॥ २९७ ॥
असावनन्यसामान्यसर्वावयववैभवः ।
बभौ मातृपितृस्वान्तानन्दनो नन्दनो ऽधिकम्॥२९८॥युग्मम्॥
स क्रमादक्रमारूढगूढागूढगुणोच्चयः ।
अवाप कामं वामभ्रनयनैकप्रियं वयः ॥ २९९ ॥
ईदृक्षलक्षणः क्षोणीपतिः स्यादिति लौकिकी ।
तत्कथा पृथिवीनाथश्रुतिगोचरतां गता ॥ ३०० ॥
छन्नमेव निशामध्ये वध्यः स इति भूपतिः ।
भटानाह भयात्कस्य न पापे रमते मतिः ॥ ३०१ ॥
ज्ञात्वेति नृपवृत्तान्तं सुकृतैरेकतो भटात् ।
श्रीदत्तश्छन्न एकाकी निरगान्नगरान्निशि ॥ ३०२ ॥
अहर्निशं निराहारविहारः सप्तभिर्दिनैः ।
क्षुधाक्षामोदरः श्रान्तः कान्तारं किंचिदाप सः ॥ ३०३ ॥
अज्ञातद्रुमनामापि संकोचनतरोः फलान् ।
आस्वाद्य कापि सुष्वाप–च्छायायां स पटीवृतः ॥३०४॥

तद्वृक्षफलमाहात्म्यात्सद्यः संकुचिताङ्गकः ।
द्विर्पेनानेन स भवान्भुवनाधिपतिः कृतः ॥ ३०५ ॥
यद्गोत्रगर्वतः साधोः पुरोऽल्पमपि चिन्तितम् ।
तदुत्पन्नो ऽसि पुण्याढ्य किंचिन्नीचकुले किल ॥ ३०६ ॥
शूकसंकोचिनाकर्षि शल्यं यन्मुनिलोचनात् ।
सममेवाङ्गसंकोचो राज्यं चाप्यत तत्त्वया ॥ ३०७ ॥
तत्कर्मोमेयफलता भवता भाविता च यत् ।
तदेमेयमहत्त्वं ते राज्यं राजन्नराजत ॥ ३०८ ॥
कदापि क्वापि कस्यापि तवेवाद्भुतकर्मणः ।
पुण्यादेवेत्थमैश्वर्यं नाभवन्न भविष्यति ॥ ३०९ ॥
तदितः स्पष्टदृष्टान्तान्नित्यं कर्मणि निर्मले ।
स्थातव्यं भवभेदात्तपौरुषैः पुरुषोत्तमैः ॥ ३१० ॥
अथ पृथ्वीपतिः प्राह प्रभो संयच्छ संयमम् ।
संसारवारिधेः सेतुं केतुं धर्ममहीपतेः ॥ ३११ ॥
अथाचष्ट गुरुः स्पष्टं प्रतिलेखादिकर्मसु ।
अक्षमो ऽसि क्षमाभर्तर्व्रतमस्तु कुतस्तव ॥ ३१२ ॥
किं ते व्रतेन कष्टेन विशिष्टसुकृताश्रय ।
अस्मिन्नेव भवे भावी भवतो ह्यपुनर्भवः ॥ ३१३ ॥
इत्युक्तो ऽप्यस्मयः स्मेरविस्मयः सस्मितं नृपः ।
गुरूनुवाच किं मे स्याद्गृहिणो ऽप्यपुनर्भवः ॥ ३१४ ॥
अजल्पत्तपनः साधुः शृणु पुण्याढ्यभूपते ।
ते पञ्चदशभिर्भेदैः सिद्धाः स्युरिह तद्यथा ॥ ३१५ ॥
सिद्धस्तीर्थकरो ऽतीर्थकरः प्रत्येकबुद्धकः ।
स्वलिङ्गः परलिङ्गश्च नरलिङ्गो नपुंसकः ॥ ३१६ ॥

तीर्थसिद्धो ऽतीर्थसिद्धः स्त्रीलिङ्गो बुद्धबोधितः ।
एकसिद्धो ऽनेकसिद्धः स्वयम्बुद्धो गृही तथा ॥ ३१७ ॥
एकस्मिन्समये जीवाः सार्धद्वीपद्वये ऽपि तु ।
एकमारभ्य सिध्यन्ति यावदष्टोत्तरं शतम् ॥ ३१८ ॥
सिद्धत्वे केवलज्ञानं कारणं कीर्तितं जिनैः ।
तत्तु कर्मक्षयादेव ध्यानात्कर्मक्षयो भवेत् ॥ ३१९ ॥
अन्तर्मुहूर्तमेकाग्र्यचिन्ता ध्यानमिदं पुनः ।
आर्तं रौद्रं च धर्म्यं च शुक्लं चेति चतुर्विधम् ॥ ३२० ॥
ऋतमित्युच्यते दुःखं तस्मादेतद्भवेदिति ।
आर्तं विदुरिदं ध्यानं तदप्युक्तं चतुर्विधम् ॥ ३२१ ॥
इन्द्रियाप्रियवस्तूनां प्राप्तौ या दुःखितो भवेत् ।
अतीवविरहातीवोच्छेदचिन्तेदमादिमम् ॥ ३२२ ॥
द्वितीयं रुजि सत्यां तत्प्रतीकारैकचेतसः ।
तद्वियोगतदसंप्रयोगातीवचिन्तनम् ॥ ३२३ ॥
तृतीयं त्विष्टविषयभोगौ संहृष्टचेतसः ।
चिन्ता तदवियोगे च तत्सङ्गे च महास्पृहा ॥ ३२४ ॥
तुर्यं च चक्रिशक्रादिगुणर्द्धिप्रार्थनामयम् ।
निदानमधमं ज्ञानकणिकामप्यबिभ्रतः ३२५ ॥
हिंसादिक्रूरतायुक्तं रौद्रमाहुस्तदुद्भवम् ।
ध्यानमप्युच्यते रौद्रं चतुर्धा तदपीरितम् ॥ ३२६ ॥
वधबन्धननिर्दाहाङ्कनमारणकर्मणाम् ।
जीवेषु प्रणिधानं यन्निर्दयस्य तदादिमम् ॥ ३२७ ॥
द्वितीयं त्वतिसंधानसानिर्बन्धस्य मायिनः ।
असद्भूतभूतघातिकूटवाक्प्रणिधामयम् ॥ ३२८ ॥

तृतीयं त्वतिदुष्टस्य भूरिलोभक्रुधाहृदः ।
भूतघातपरद्रव्यापहारप्रणिधामयम् ॥ ३२९ ॥
शब्दादिविषयापूर्तिहेतुषु द्रविणेषु यत् ।
लब्धिसंग्रहसंरक्षाप्रणिधा तत्तुरीयकम् ॥ ३३० ॥
उत्पद्यमानमप्येतद्वयं वार्यं शुभाशयैः ।
उपेक्षितं प्रमादात्तु महादुःखाय जायते ॥ ३३१ ॥
धर्माद्यदनपेतं तद्धर्म्यं तत्तु चतुर्विधम् ।
आद्यं तत्र जिनाज्ञायाः पालनं तत्त्वनिश्चयात् ॥ ३३२ ॥
कषायविषयापायत्राणचिन्ता द्वितीयकम् ।
तृतीयं चिन्त्यते कर्मविपाकश्च शुभाशुभः ॥ ३३३ ॥
उत्पत्तिविगमध्रौव्यस्वरूपस्य नराकृतेः ।
अनाद्यन्तस्य लोकस्य चिन्तनं तच्चतुर्थकम् ॥ ३३४ ॥
अन्यथा वा चतुर्धोक्तं धर्म्यध्यानमिदं बुधैः ।
पिण्डस्थं च पदस्थं च रूपस्थं रूपवर्जितम् ॥ ३३५ ॥
देहस्थं ध्वस्तकर्माणं चन्द्राभं ज्ञानिनं सुधीः ।
यत्रात्मानं परैश्वर्यं पश्येत्पिण्डस्थमत्र तत् ॥ ३३६ ॥
मन्त्राक्षराणि शारीरपद्मपत्रेषु चिन्तयेत् ।
गुर्वादेशेन यद्योगी पदस्थं तदिहोच्यते ॥ ३३७ ॥
सप्रातिहार्यं समवसृतिस्थं ज्ञानिनं जिनम् ।
तद्बिम्बं वा स्मरेद्योगी यत्तद्रूपस्थमिष्यते ॥ ३३८ ॥
यदमूर्तं महानन्दमयं सिद्धं निरञ्जनम् ।
ध्यायेद्योगी परात्मानं रूपातीतं दिशन्ति तत् ॥ ३३९ ॥
एवं संक्षेपतः प्रोक्तं धर्मध्यानं धराधिप ।
इह लोके ऽपि माहात्म्यमस्यानन्तं सतां भवेत् ॥३४०॥

दुःकर्मनिर्मितामुच्चैः शुचं क्लमयतीत्यदः ।
शुक्लमादिश्यते ध्यानं तदपि स्याच्चतुर्विधम् ॥ ३४१ ॥
पृथक्त्वे ऽपि पदार्थानामनुमानविचारतः ।
श्रुते पदे पदार्थस्याद्दृष्टस्यापि स्वरूपधीः ॥ ३४२ ॥
दृष्टे पदार्थे विज्ञानं पदस्याप्यश्रुतस्य यत् ।
स्यात्पृथक्त्ववितर्केण सविचारं तदादिमम् ॥३४३॥युग्मम्॥
ददच्छब्दार्थयोरैक्यपरिज्ञानं वितर्कतः ।
अपृथक्त्वविचारेण मनोनैश्चल्यकारणम् ॥ ३४४ ॥
पूर्वश्रुतानुसारोत्थं केवलज्ञानहेतुकम् ।
तद्वैतीयकमेकत्ववितर्कमविचारकम् ॥ ३४५ ॥ युग्मम् ॥
निरुद्धे वाङ्मनोयोगयुगे केवलिनः प्रभोः ।
यद्भवत्यङ्गयोगे ऽर्धनिरुद्धे मुक्तिकालतः ॥ ३४६ ॥
श्वासोच्छ्वासक्रिया सूक्ष्मा यत्र यन्न निवर्तते ।
तृतीयं कथ्यते सूक्ष्मक्रियं तदनिवर्तकम् ॥ ३४७ ॥युग्मम्॥
अङ्गत्यागे ऽपि यत्रात्मा शैलेशीकरणस्थितः ।
ईशः शैल इवात्मीयमङ्गरूपं न मुञ्चति ॥ ३४८ ॥
मुक्त्युत्पातक्षणे मुक्तश्वासोच्छ्वासादिकाक्रियम् ।
अनिवर्ति च यत्तत्स्यात्तुर्यं व्युपरतक्रियम् ॥३४९॥युग्मम्॥
आत्मप्रकाशकैवल्यरूपं कर्मक्षयोदितम् ।
केवलज्ञानकाले स्याद्ध्यानं शुक्लं तु योगिनः ॥ ३५० ॥
एतद्ध्यानं स्वतो जातं सद्गुरोर्वोपदेशतः ।
वज्रऋषभनाराचेदेहस्यैव स्थिरं भवेत् ॥ ३५१ ॥
इदं स्थिरत्वमापन्नं कृत्वा कर्मक्षयं क्षणात् ।
जनयेत्केवलज्ञानं योगीन्द्रस्य शिवप्रदम् ॥ ३५२ ॥

तत्पुण्याढ्य गृहस्थो ऽपि ध्यानस्यामुष्य योगतः ।
केवलज्ञानमासाद्य सद्यः सिद्धो भविष्यसि ॥ ३५३ ॥
तत्रेदं शृण्वभिज्ञानमभिज्ञजनमण्डनम् ।
संकोचदूषणं ते ऽङ्गादुत्तरिष्यति सर्वथा ॥ ३५४ ॥
तर्हि देहि गृहस्थानामेव धर्मं मम प्रभो ।
इत्युक्तो भूभुजा सूरिः श्रद्धापूरितचेतसा ॥ ३५५ ॥
तस्मिंस्तदैव सम्यक्त्वं द्वादशव्रतभूषितम् ।
विधिनारोपयामास प्रकाशितमहोत्सवे ॥ ३५६ ॥ युग्मम् ॥
व्रतानां सेवने शिक्षां दक्षायास्मै प्रदाय सः ।
सद्गुरुर्ज्ञापयामास विशेषादिति तं नृपम् ॥ ३५७ ॥
अयं सम्यक्त्वतत्त्वज्ञो विधिज्ञाननिधिर्गजः ।
अबन्धनीयो धर्मात्मा धर्मबान्धवतां गतः ॥ ३५८ ॥
सिन्धुरो ऽयमबद्धो ऽपि न किंचित्पीडयिष्यति ।
यद्वितीये भवे स्वर्गी सप्तमे सिद्धिसौख्यभाक् ॥ ३५९ ॥
अतः सुकृतकार्येषु निःशेषनिजदोषहृत् ।
न शोच्यः पशुरूपो ऽपि भूप चिद्रूपचेतनः ॥ ३६० ॥
तथेति प्रतिपद्यार्थं कर्मोन्मथकथामिमाम् ।
गुरुं नत्वा नृपो धर्मवासः स्वावासमासदत् ॥ ३६१ ॥
राजा कुञ्जरराजस्य गुर्वाज्ञाराजितस्ततः ।
बन्धारोहणयुद्धादिबाधाचारमवारयत् ॥ ३६२ ॥
नृपतिर्द्विपनाथस्य स्वस्येवास्य व्यधापयत् ।
नित्यं भोगभृतस्य त्रीन्वारानारात्रिकक्रियाः ॥ ३६३ ॥
चलन्पदात्पदान्मन्दं स जन्तुकृपया द्विपः ।
तन्मन्दगतयो ऽद्यापि तत्क्रमेणैव वारणाः ॥ ३६४ ॥

मर्यादायन्त्रिताहारविहारो विदधे ऽन्वहम् ।
शमजातमनःशैत्यः स चैत्यपरिपाटिकाम् ॥ ३६५ ॥
द्विपः स पर्वसूद्वर्धमकर्मा विनिर्ममे ।
साधुश्राद्धौघमध्यस्थो जिनयात्रोत्सवादिकम् ॥ ३६६ ॥
इत्येष करिणामिन्द्रः करुणामुद्रिताशयः ।
समयान्गमयामास बहून्राज्ञा बहूकृतः ॥ ३६७ ॥
अन्येद्युर्गजवैद्यस्तं गजमस्तंगतोद्यमम् ।
वीक्ष्य ज्वरभराक्रान्तं राज्ञे व्यज्ञपयद्द्रुतम् ॥ ३६८ ॥
राजन् राजति यो युष्मज्जीवितस्यापि जीवितम् ।
कुम्भी रिपुयशःशुम्भी सो ऽभवज्ज्वरजर्जरः ॥ ३६९ ॥
ततः पितुरिव भ्रातुरिव मातुरिव ज्वरम् ।
आकर्ण्य व्याकुलो ऽभ्यर्णे गजस्य स ययौ नृपः॥ ३७० ॥
अथाह पृथिवीजानिर्यः कुर्यान्नीरुजं गजम् ।
दद्यामद्यात्मनस्तस्मै राज्यार्धं राज्यमेव वा ॥ ३७१ ॥
किं राज्यैस्त्वत्प्रसादाप्तैः किमल्पमिति जल्पिनः ।
गजराजरुजश्छेदे वैद्याश्चक्रुरुपक्रमम् ॥ ३७२ ॥
स रिपून्परिपूर्णायुर्जेतुं कर्माभिधान्पुनः ।
सान्नं रोगपरीतो ऽयं करी तोयं विमुक्तवान् ॥ ३७३ ॥
अस्यां रुजि न जीवामि जगृहे ऽनशनं मया ।
इति च क्ष्मापतेराख्यत्क्षितिन्यस्ताक्षरः करी ॥ ३७४ ॥
मध्ये पुरस्य न श्रेयो मरणं करिणामिति ।
जगाम सामजन्मायं शनैरुपवनावनीम् ॥ ३७५ ॥
अधः क्षिप्त्वेव कर्माणि प्रपेष्टुं प्रतिमल्लवत् ।
उपाविक्षदसौ वक्षःस्पृष्टदक्पूतभूतलः ॥ ३७६ ॥

स्वर्गलक्ष्मीकटाक्षाभस्तस्योपरि करिप्रभोः ।
पुष्पालम्बप्रभाशुभ्रो नृपेणाकारि मण्डपः ॥ ३७७ ॥
तस्याशुभविपक्षस्य पार्श्वपक्षेषु पार्थिवः ।
दापयामास सुरभिद्रव्यद्रवघटाच्छटाः ॥ ३७८ ॥
श्राविका भावसाराश्च बन्दिनो गाथकास्तथा ।
इतश्चेतश्च तस्योच्चैर्जगुर्धर्मोल्बणान्गुणान् ॥ ३७९ ॥
भूरयः सूरयस्त्वस्य पुरस्तथ्यगिरः कथाः ।
कथयन्ति स्म पूर्वर्षिकीर्तिपीयूषवर्षिणीः ॥ ३८० ॥
इत्थं शमसुखाम्भोधिमग्नो बोधिसुधां पिबन् ।
शक्रादपि द्विपोत्तंसः स्वं स धन्यममन्यत ॥ ३८१ ॥
तद्वृन्दं करिणः पार्श्वे निशीथे सुप्तमन्यदा ।
प्रदीप इव भूमिपः स्नेहादेकस्त्वजागरीत् ॥ ३८२ ॥
रोगाभोगव्यथावीर्यश्लथधैर्यस्तदा गजः ।
परिमीलितदृग्देहभङ्गं दीनस्वरो ऽकरोत् ॥ ३८३ ॥
अथाह पृथिवीन्दुस्तं बन्धो रोगबलाकुलः।
मा धैर्यतः पत स्तम्भ इव धर्मो ऽवलम्ब्यताम् ॥ ३८४ ॥
अङ्गात्क्लेशावलीरङ्गादुदस्य न्यस्यतां मनः ।
नमस्कारपरावर्ते तदर्तेरुद्भवः कुतः ॥ ३८५ ॥
इत्यवस्थाप्य नृपतिर्द्विपस्यार्तिचलं मनः ।
प्रापश्चयत्कृती पञ्चपरमेष्ठिनमस्कृतीः ॥ ३८६ ॥
दृशौ बाष्पस्पृशौ बिभ्रद्रुपुः सपुलकं पुनः ।
हृष्यत्करी नमस्कारान्भावनामसृणो ऽशृणोत् ॥ ३८७ ॥
सुखेन प्राप्तया दीर्घनिद्रया स्वप्नभागिव ।
इभप्रभुरसौ धर्मदिव्यः सौधर्मदिव्यगात् ॥ ३८८ ॥

चन्दनागुरुकर्पूरकस्तूरीणां भरैरिभम् ।
अह्नि वह्निहुतं चक्रे शोकाश्रुप्लुतदृग्नृपः ॥ ३८९ ॥
तस्यं कालोचितां धर्मबद्धां बन्धोरिव क्रियाम् ।
विधाय दुःखदीनात्मा ययौ धाम धराधिपः ॥ ३९० ॥
दुःखदीर्घं दिनमयं गमयित्वा कथंचन ।
नृचन्द्रश्चन्द्रशालायां निशि शय्यामशिश्रियत् ॥३९१॥
श्वासोच्छ्वासोल्लसच्छोकशङ्कुसंकुल्यमानहृत् ।
निद्रामलभमानो ऽयमित्यन्तः समचिन्तयत् ॥ ३९२ ॥
बहुदेशमहैश्वर्यश्रियापि मम किं तया ।
मृते ऽस्मिन्सिन्धुरे कृत्तधम्मिल्लेव बभूव या ॥ ३९३ ॥
तारयेव विना दृष्टिरात्मनेव विना तनुः ।
कीदृशी भाति मे भूमिस्तेनेभविभुना विना ॥ ३९४ ॥
दृगिन्द्रियेण किं मे ऽद्य किमु कर्णेन्द्रियेण वा ।
येन दृश्यं न तद्रूपं येनाकर्ण्यो न तद्ध्वनिः ॥ ३९५ ॥
भ्रमन्ती यत्र तत्रापि खिन्नेयं नयनद्वयी ।
तद्विलोकसुधापानं विना तप्ता क्व शाम्यतु ॥ ३९६ ॥
पुरातनानि मे सन्ति यदि पुण्यानि कानिचित् ।
तैरध्वनि दशोरेकवारमेतु स वारणः ॥ ३९७ ॥
इति क्षितिपतिर्ध्यायन्नेत्राग्रे गजमैक्षत ।
अल्पकल्पद्रुनैपुण्यं पुण्यं पुण्यवतां यतः ॥ ३९८ ॥
शोकाश्रूण्यथ हर्षाश्रूकुर्वन्नुर्वीन्दुरुत्थितः ।
आलिङ्गद्धस्तिनस्तस्य हस्तं हस्तोरसा रसात् ॥ ३९९ ॥
दध्यौ च किं मयादर्शि स्वप्ने व्यसुरसौ गजः ।
मृत एवाथवा जीवन्नेष स्वप्नान्निरीक्षितः ॥ ४०० ॥

मृतो न जीवतीत्युक्तिर्जिनशासनशास्त्रगा ।
कथंचिदन्यथापि स्यात्किं वा कालेन केनचित् ॥ ४०१ ॥
इत्यनल्पविकल्पालिं जजल्पालिङ्गनोन्मदम् ।
नृपं द्विषवरः स्मेरविस्मयं दिव्यया गिरा ॥ ४०२ ॥
हहा महात्मन्मोहस्त्वां किं ध्वान्तो ऽर्कमिवाविशत् ।
यदन्यथा जिनमतग्रन्थोक्तमपि शङ्कसे ॥ ४०३ ॥
मृत एवास्मि नाजीवमहं राजीवलोचन ।
विचार्यो चन्द्रशालान्तर्दन्तिनामागतिः कुतः ॥ ४०४ ॥
दृष्टो ऽस्मि यन्मृतो यन्मे रूपमेतच्च पश्यसि ।
अस्वप्नतुल्यं न स्वप्नाविमौ स्वप्नः क्व जाग्रतः ॥ ४०५ ॥
तदनल्पयशःशिल्प तल्पमेतदलङ्कुरु ।
कथयामि यथा भूप स्वरूपमहमात्मनः ॥ ४०६ ॥
अथोदारचमत्कारस्तच्चकार धराधवः ।
श्रोतुं तच्चरितं कण्डूप्रवणश्रवणद्वयः ॥ ४०७ ॥
स्वान्तस्थसुकृताम्भोधिसुधोर्मिनिभवागिभः ।
अवदन्मदमत्तालिकण्ठतालान्कठोरयन् ॥ ४०८ ॥
राजन्नाजन्मनिर्व्याजध्यातधर्मपिधायिना ।
मृत्युक्षणे व्यथौघेन मोहितो ऽहमचिन्तयम् ॥ ४०९ ॥
नित्याहृतनृपद्रव्या न व्याधिं ये हरन्ति मे ।
तान्वैद्यान्यदि पश्यामि तन्नयामि यमालयम् ॥ ४१० ॥
इति रौद्रतरध्यानैरधोऽधःपातिनं तदा ।
मामुदधार श्रीधर्मस्त्वद्गिरा जातजागरः ॥ ४११ ॥
परमेष्ठिनमस्कारसुधाब्धिलहरीभरैः ।
क्षिप्तः सौधर्मकल्पे ऽहं त्वन्मुखेन्दूदितैस्तदा ॥ ४१२ ॥

प्राप्य सौधर्मदेवत्वं ममेदृग्वैभवं कुतः ।
इत्याशु ध्यायतादर्शि तन्निमित्तं मया भवान् ॥ ४१३ ॥
तन्नागविरहार्तस्य सद्यः प्रीतिकृते तव ।
मुक्तोरुदिव्यरूपश्रीस्त्वामागां नागरूपभाक् ॥ ४१४ ॥
प्रभुत्वं स्वप्रसादस्य मयि पश्येति स द्विपः ।
तद्दिव्यं दर्शयामास स्वं वपूरविपूररुक् ॥ ४१५ ॥
जीवतो भोगदस्त्वं मे म्रियमाणस्य धर्मदः ।
तत्प्रभुश्च गुरुश्चासि शून्यहस्तेन नेक्ष्यसे ॥ ४१६ ॥
पारिजाततरोः स्वर्गलक्ष्मीलक्षणलक्ष्मणः ।
गृहाणेदं फलं राजन्रसैराजिह्मितामृतम् ॥ ४१७ ॥
सद्य एवेदमास्वाद्यं क्षाल्यो ऽस्य रसनिर्झरैः ।
भवद्भाग्यविधोः पङ्के वपुःसंकोचविप्लवः ॥ ४१८ ॥
इदं निगदता तेन तद्दत्तं द्युसदा फलम् ।
आदाय नृपतिः प्रीत्या प्रत्याह स हसन्वचः ॥ ४१९ ॥
आसन्नमुक्तपशुतासुलभं मोहमुद्वहन् ।
किं विवेकिन्फलस्वादं निशायां दिशसि स्वयम् ॥ ४२० ॥
सुरमुख्य ममेदानीं वपुषः पाटवेन किम् ।
नैन्द्यादिलाभलोभे ऽपि जन्यं रजनिभोजनम् ॥ ४२१ ॥
आदृतं दुःखपूराय विमुक्तं पुण्यपंक्तये ।
सान्निशाभोजनं हन्त हंसकेशवयोरिव ॥ ४२२ ॥
अथास्ति पृथिवीकान्ताकुण्डलं कुण्डिनं पुरम् ।
अस्ति मुक्तासगाकारप्राकारपरिवेषभृत् ॥ ४२३ ॥
तस्मिन्यशोधनो नाम यशोधवलितावनिः ।
बभूव नवद्रव्योपार्जकचूडामणिर्वणिक् ॥ ४२४ ॥

अभूतां भुवनानन्दचन्दनौ तस्य नन्दनौ ।
रम्भाकुक्षिसरोम्भोजश्रीहंसौ हंसकेक्षणौ ॥ ४२५ ॥
ये दोषाभोजने दोषा धर्मघोषाभिधाद्गुरोः ।
वनं गताभ्यां ते ताभ्यां देशनासु निशामिताः ॥ ४२६ ॥
तौ बोधात्तं गुरुं साक्षीकृत्य कृत्यविवेकिनौ ।
रजनीभोजनत्यागं मुदितौ चक्रतुस्ततः ॥ ४२७ ॥
अथ धाम्नि गतौ मध्यंदिने जनितभोजनौ ।
भागे ऽष्टमे ऽह्नस्तौ मातुर्वैकालिकमयाचताम् ॥ ४२८ ॥
किं भोज्यमधुना वत्सौ यतो दुग्धप्रियौ युवाम् ।
तत्पुनः स्थितवेलायां निशि स्यात्तत्किमुत्सुकौ ॥ ४२९ ॥
इति मातुर्वचः श्रुत्वा तौ सत्यमिदमूचतुः ।
आवाभ्यां नियमान्मातस्तत्यजे रात्रिभोजनम्॥४३०॥युग्मम्॥
इदं गर्भगृहस्थेन निशम्य वचनं तयोः ।
यशोधनेन सक्रोधं दध्ये मध्ये हृदस्तदा ॥ ४३१ ॥
ध्रुवं धूर्तेन केनापि सुतौ मे विप्रतारितौ ।
ततः कुलक्रमायातं त्यजतो रात्रिभोजनम् ॥ ४३२ ॥
तदवश्यं बुभुक्षार्तौ कृत्वा द्वित्रैर्दिनैः सुतौ ।
त्याजयिष्यामि तं रात्रिभोज्यत्यागकदाग्रहम् ॥ ४३३ ॥
एवं चिन्तयता तेन रम्भा स्थालार्थमागता ।
सुतयोर्भोजनं देयं नेति च्छद्मं न्यवार्यत ॥ ४३४॥
भर्तुराज्ञावशादेषा तावेत्यावददित्यथ ।
अन्नपाको ऽधुना भावी पक्कान्नाद्यस्ति वस्तु न ॥ ४३५ ॥
किं च रात्रौ समं पित्रा युवाभ्यां भोज्यमेव यत् ।
कुलीनास्ते सुता ये स्युः पितृमार्गानुगामिनः ॥ ४३६ ॥

स्मित्वा तावूचतुर्मातः सन्मार्गः सेव्यते पितुः ।
सुपुत्रैरपि किं कूपे पतंस्तातो ऽनुगम्यते ॥ ४३७ ॥
तर्हि सम्प्रति लप्स्येथे न युवां भोजनं सुतौ ।
मात्रेत्युक्तौ ततो मौनं कृत्वा तौ जग्मतुर्बहिः ॥ ४३८ ॥
श्रेष्ठिनः सुतयोर्वाक्यं मिथ्यादृष्टेर्जगत्प्रियम् ।
विशेषाद्दोषकृज्ज्ञे ज्वरार्तस्य हविर्यथा ॥ ४३९ ॥
भवत्या भोजनं देयं रजन्यामेव पुत्रयोः ।
इत्थमत्यर्थशपथैः श्रेष्ठी रम्भामवारयत् ॥ ४४० ॥
जनन्याथ रजन्यां तावागतावार्थितावपि ।
न भोजनं महासत्त्वचक्रिणौ चक्रतुस्तदा ॥ ४४१ ॥
द्वितीये ऽह्नि शठश्रेष्ठः श्रेष्ठी तौ विशदाशयौ ।
क्रयविक्रयलीलासु न्ययुङ्क्त महतीष्वसौ ॥ ४४२ ॥
तथा लाभरसाभोगभङ्गीभिस्तौ विलेसतुः ।
तदेव कुर्वतोः कर्म यथागान्निधनं दिनम् ॥ ४४३ ॥
तौ धाम यामिनीयामसमये समुपागतौ ।
अभुक्त्वैवापतुः स्वापं तदभिग्रहसाग्रहौ ॥ ४४४ ॥
इति व्यवहृतिं पित्रा कार्यमाणौ रसेन तौ ।
अजातभोजनावेव प्रसुप्तौ पञ्च शर्वरीः ॥ ४४५ ॥
षष्ठे ऽहनि निशारम्भे संभेजतुरिमौ गृहम् ।
आचष्ट च वचः श्लक्ष्णं विनयेन यशोधनः ॥ ४४६ ॥
वत्सौ यत्सौख्यदं मे स्यादिष्टं स्पष्टं तदेव वाम् ।
इति प्रत्ययतः किंचिद्वच्मि तच्च विरच्यताम् ॥ ४४७ ॥
निशाहारपरीहारं न वेद्मि युवयोर्ध्रुवम् ।
तदीदृशि भृशक्लेशे युवां कार्ये नियोजितौ ॥ ४४८ ॥

यदभुक्तवतोर्भुङ्क्ते युवयोर्न जनन्यपि ।
अद्यास्यास्तदभूत्षष्ठ उपवासः प्रयासकृत् ॥ ४४९ ॥
तद्वां षण्मासजन्मासौ स्वसा कुसुमकोमला ।
स्तन्यान्यलभमानाद्य कियन्म्लाना विलोक्यताम् ॥४५०॥
म्लानिमस्याः शिशोर्वीक्ष्य कारणं मम पृच्छतः ।
आख्यद्भवदनाहारपूर्वं सर्वमयं जनः ॥ ४५१ ॥
तद्भुज्यतां यथा भुङ्क्ते भवन्मातापि संप्रति ।
कृपासारौ शिशोरस्या मा भूत्पित्तादिभूर्व्यथा ॥ ४५२ ॥
पूर्वं निशाया यामार्धं प्रदोषः कीर्त्यते बुधैः ।
प्रत्यूषं पश्चिमं तेन सा त्रियामेति विश्रुता ॥ ४५३ ॥
इदानीं भोजनं तद्वां न निशाभोजनं भवेत् ।
यामिनीघटिकायुग्ममपि नाद्यापि याति यत् ॥ ४५४ ॥
इति तातगिरा भिन्नः क्षुधा च विधुरीकृतः ।
हंसः क्लेशहतावेशः केशवाननमैक्षत ॥ ४५५ ॥
इति ज्यायांसमुद्भाव्य भ्रातरं कृत्यकातरम् ।
व्याचष्ट केशवः कष्टजनकं जनकं प्रति ॥ ४५६ ॥
यस्ते सुखकरो भावः करोमि तमहं पितः ।
न ते सुखायते तत्किं यन्मे पातकघातकम् ॥ ४५७ ॥
यज्जनन्यादिवात्सल्यं तच्छल्यं धर्मकर्मणः ।
स्वकर्मफलभुक्सर्वः कः कस्यार्थे करोत्वघम् ॥ ४५८ ॥
मुहूर्तो ऽह्नो मुखे ऽन्ते च निशासन्नो निशासमः ।
तत्तत्रापि न भोक्तव्यं निशैवास्त्यधुना पुनः ॥ ४५९ ॥
तद्वारं वारमेवं न वाच्यो ऽहं भवता पितः ।
कार्ये ऽस्मिन्विहिते शान्तिं क्व लभे भवतापितः ॥४६०॥

अथैनमेनसां धाता तत्पिता कुपितोऽवदत् ।
लङ्घसे यदि मद्वाचं मुञ्च लोचनवर्त्म तत् ॥ ४६१ ॥
ततोऽथ विषभृद्वृन्दकन्दरादिव मन्दिरात् ।
स निःससार संसारकारणं ममतां त्यजन् ॥ ४६२ ॥
हंसं तमनुगच्छन्तं कृच्छ्राद्धृत्वा यशोधनः ।
प्रलोभ्य बहुभिर्वाग्भिर्भोजनाय न्यवीविशत् ॥ ४६३ ॥
पुरग्रामनगारामविलङ्घनघनक्रमः ।
स ययौ सप्तमे ऽप्यह्नि तथैवावेशवान्पथि ॥ ४६४ ॥
अटन्नटव्यां कुत्रापि निशीथसमये ऽथ सः ।
घनयात्राजनं यक्षायतनं किंचिदैक्षत ॥ ४६५ ॥
तत्र यात्राजना यक्षगृहे सज्जितभोजनाः ।
हृष्यन्तः समभाषन्त तमागच्छन्तमुत्सुकाः ॥ ४६६ ॥
एह्येहि भोज्यमादेहि देहि पुण्यानि पान्थ नः ।
पश्यामः काममतिथिं वयमारब्धपारणाः ॥ ४६७ ॥
कीदृग्व्रतं व्रतं यस्य निशि पारणमित्यथ ।
केशवो विकसत्पुण्यसन्तानस्तानभाषत ॥ ४६८ ॥
ते ऽवदन्माणवाख्यो ऽयं यक्षो दक्षो जगन्मुदे ।
स्यादस्याद्य महायात्रा पुण्यपात्रायितस्थितिः ॥ ४६९ ॥
कृत्वोपवासं दिवसे निशीथे ऽतिथिमादरात् ।
भोजयित्वा विधातव्यं पारणं पुण्यकारणम् ॥ ४७० ॥
तदीदृक्षोपवासानां पारणायोद्यमस्पृशाम् ।
त्वं भवातिथिरस्माकमाकस्मिकसमागमः ॥ ४७१ ॥
स जगौ नेह भुञ्जे ऽहमंहःकारिणि पारणे ।
रजन्यां भोजनं न स्याद्युक्तमुक्तामिदं यतः ४७२ ॥

उपवासे ऽत्र जायेत गुणो गुञ्जासमो न वा ।
ध्रुवं दोषस्तु दोषायां भोजने भूधराधिकः ॥ ४७३ ॥
उपवासो ऽप्यसौ न स्याद्यत्रैवं निशि भुज्यते ।
धर्मशास्त्रेष्वहोरात्राभोजने स हि कीर्त्यते ॥ ४७४ ॥
धर्मशास्त्रविरुद्धं ये तपः कुर्वन्ति दुर्धियः ।
ते यान्ति दुर्गतिं धूर्ताः कूटद्रव्यक्रतो यथा ॥ ४७५ ॥
ते ऽप्यशंसन्नसावेव देवस्यास्य व्रते विधिः ।
युक्तैरपि न शास्त्रोक्तैर्विरच्यास्य विचारणा ॥ ४७६ ॥
अवश्यमतिथिं कंचिद्भोजयित्वाद्य भुज्यते ।
इति तद्दर्शने ऽस्माकं रजनिर्विपुलाजनि ॥ ४७७ ॥
तत्तूर्णं पारणे ऽस्माकमस्मिन्भव पुरःसरः ।
इत्युक्त्वोत्थाय ते सर्वे तस्य प्राणिपदे ऽलगन् ॥ ४७८ ॥
पुण्येशः केशवश्चैनमप्यवाजीगणद्गणम् ।
एकस्तदैव यक्षाङ्गाद्भीष्माङ्गो निर्ययौ नरः ॥ ४७९ ॥
रे दूषयसि मे धर्मं मद्भक्तानवमन्यसे ।
भुंक्ष्व शीघ्रं न चेन्मुण्डं शतखण्डं करोमि ते ॥ ४८० ॥
इत्याक्षिप्य गिरा तीक्ष्णरूक्षया मंक्षु केशवम् ।
सो ऽमुद्गमयामास मुद्गरं विकरालदृक् ॥ ४८१ ॥
हसन्हंसानुजो ऽथाह किं क्षोभयसि यक्ष माम् ।
भवान्तरोद्भवद्भूरिभाग्यर्द्धेर्मृत्युभीः क्व मे ॥ ४८२ ॥
आचचक्षे ऽन्तरिक्षे ऽथ यक्षः स्वान्किङ्करानिति ।
एतद्धर्मगुरुर्धृत्वानीय वध्यो ऽस्य पश्यतः ॥ ४८३ ॥
अथाकाशे कक्षपाशभृद्भिस्तत्किंकरैर्धृतम् ।
आर्तघोषमृषिं धर्मघोषमैक्षत केशवः ॥ ४८४ ॥

स्वं शिष्यं भोजयेदानीं त्वां वा हन्मि शठं हठात् ।
इत्युक्तस्तेन यक्षेण मुनीशः केशवं जगौ ॥ ४८५ ॥
अप्यकृत्यं सृजेद्देवगुरुसङ्घकृते कृती ।
यामी मामीदृशा घ्नन्तु त्वद्गुरुं कुरु भोजनम् ॥ ४८६ ॥
धर्माख्याने ऽपि यो वक्ति विधिमन्यापदेशतः ।
सत्त्वी मृत्युभिया दत्तां स पापे ऽनुमतिं कुतः ॥ ४८७ ॥
तन्नूनं मद्गुरुर्नायमियं मायास्य मायिनः ।
इति ध्यात्वाथ मौनेन यशोधनसुतः स्थितः ॥४८८॥युग्मम्॥
मुनौ मुद्गरमुद्यम्य त्वद्गुरुं हन्मि भुंक्ष्व वा ।
इति कोपकरालाक्षो जगौ यक्षो ऽथ केशवम् ॥ ४८९ ॥
सो ऽपि व्याचष्ट रे मायिन्ममायं न गुरुः स हि ।
तादृक्षचारुचारित्रपात्रं न त्वादृशां वशः ॥ ४९० ॥
त्वद्गुरुस्त्वद्गुरुः सो ऽस्मि कृपाब्धे भुङ्क्ष्व रक्ष माम् ।
इत्यारटन्नथ मुनिस्तन्मुद्गरहतो ऽपतत् ॥ ४९१ ॥
तं व्यसुं वीक्षमाणस्य केशवस्याग्रतस्ततः ।
एत्यादत्त गिरं यक्षो मुद्गरभ्रमिभीषणः ॥ ४९२ ॥
सञ्जीवन्यश्वासि चेत्तत्ते जीवयामि गुरुं जवात् ।
वितरामि तरामृद्धिं प्राज्यं राज्यं च किंचन ॥ ४९३ ॥
एतन्मुद्गरनिर्घातनिर्विघ्नगगनक्रमः ।
पथि कीनाशहर्म्यस्य पथिकीक्रियसे ऽन्यथा ॥ ४९४ ॥
ततः पुण्यसुधासिन्धुहंसो हंसानुजो हसन् ।
दशनांशुमिषप्रेक्ष्यमाणसत्त्वगुणो जगौ ॥ ४९५ ॥
नैवायं मद्गुरुः किंचित्वया जीवन्ति चेन्मृताः ।
तद्ममीषां स्वभक्तानां सर्वाञ्जीवय पूर्वजान् ॥ ४९६ ॥

किं राज्यदानशक्तेन नामी राज्यभृतः कृताः ।
किं भापयसि मां मृत्योः का भीर्नियतभाविनः ॥४९७॥
एवं नियमवाग्दक्षं यक्षो ऽयं क्षान्तिमानिव ।
प्रहृष्टो हृष्टरोमालिः समालिंग्य जगाद तम् ॥ ४९८ ॥
साधु मित्र धियां पात्र न स्यादेष गुरुस्तव ।
मृता मया न जीवन्ति नैव राज्यं च दीयते ॥ ४९९ ॥
इत्थमुक्ते ऽथ यक्षेन्द्रे सहासं सहसोत्थितः ।
मुनिरूपं परित्यज्य स्वं ययौ यक्षकिंकरः ॥ ५०० ॥
विस्मयस्मेरवक्त्राक्षमनया चित्रमायया ।
उवाचाचलचित्तेशं केशवं यक्षपुङ्गवः ॥ ५०१ ॥
खिन्नः सप्तोपवासैस्त्वं क्लिन्नश्चाध्वविहारतः ।
विश्रम्येह निशामद्रि सहैभिः कुरु पारणम् ॥ ५०२ ॥
इत्युक्त्वादर्शयत्तस्मै स तल्पं शक्तिकल्पितम् ।
केशवो ऽस्मिन्विशश्राम श्रेयसीव यशश्चयः ॥ ५०३ ॥
यक्षयात्राजनैर्यक्षादिष्टैः संवाहितक्रमः।
केशवो ऽकलयन्निद्रामुन्निद्रसुकृतक्रमः ॥ ५०४ ॥
विभावरी विभातेयं निद्रा विद्राव्यतामिति ।
तं प्रत्यक्षो जगौ यक्षो निद्रातन्द्रालुलोचनम् ॥ ५०५ ॥
अथ निद्रादरिद्राक्षो विश्वं वीक्ष्य दिनोज्ज्वलम् ॥
नभो ऽर्कभूषितं चेति चिन्तयामास केशवः ॥ ५०६ ॥
ब्राह्म एव मुहूर्ते ऽहमन्वहं कृत्यनिष्ठधीः ।
स्वयं यामि त्रियामान्तयामसुप्तो ऽप्यनिद्रताम् ॥ ५०७ ॥
अद्रि यामार्धमात्रे ऽपि त्रियामार्धशयो ऽप्यहम् ।
स्वयं नाद्य विनिद्रत्वमासदं किमिदं किल ॥ ५०८ ॥

दिवसे ऽप्यद्य किं निद्राविवशे मे दृशौ भृशम् ।
किं नान्तः पद्मवीकाशसुरभिः श्वासमारुतः ॥ ५०९ ॥
इति शङ्काजुषं यक्षस्तमूचे मुञ्च जिह्मताम् ।
प्रातःकृत्यानि कृत्वाशु भूहार कुरु पारणम् ॥ ५१० ॥
सो ऽप्युवाच न वञ्च्यो ऽहं यक्ष दक्षतया तव ।
विशालैव निशाद्यापि त्वन्मायोत्थमहर्महः ॥ ५११ ॥
इत्यस्य जल्पतो मूर्ध्नि पुष्पवृष्टिर्दिवो ऽपतत् ।
स त्वं धीमञ्जय जयेत्यभून्नभसि भारती ॥ ५१२ ॥
पुरः सुरमसौ कंचिच्चञ्चदर्चिषमैक्षत ।
न यक्षं न च यक्षौको न च यक्षार्चकान्वने ॥ ५१३ ॥
स्मितांशुकुसुमश्रेणिशृङ्गारसुरभीकृतम् ।
मुखश्रीलक्षितप्रीतिरित्यादत्त वचः स च ॥ ५१४ ॥
एकः पुण्यवतां रत्नं निःसपत्नगुणो भवान् ।
भवादृशां प्रसूत्यैव रत्नगर्भा बभूव भूः ॥ ५१५ ॥
शृणु सत्त्वभराश्रान्तस्वान्त इत्तान्तमान्तरम् ।
मध्येसभमिति प्रोच्चैश्चक्रे शक्रस्तव स्तवम् ॥ ५१६ ॥
अहो वरेण्यतारुण्यः पुण्यवान्सुखलालितः ।
यशोधनस्य वणिजस्तनुजो मनुजोत्तमः ॥ ५१७ ॥
रजनीभोजनत्यागात्केशवः क्लेशकोटिभिः ।
अचलाचलचैतन्यश्चाल्यते नामरैरपि ॥ ५१८ ॥ युग्मम् ॥
तदाकर्ण्य तदा कर्णतप्तपुसमं वचः ।
स्वभावादाभवादेव देवत्वे ऽपि सुबोधिते ॥ ५१९ ॥
दुःखितो ऽन्यप्रशंसाभिर्देवः सर्वाभिसारवान् ।
महर्द्धिर्वाहिनामाहमिहागां त्वां परीक्षितुम् ॥ ५२० ॥युग्मम्॥

त्रैलोक्यचालनोत्तालशक्तिनापि न ते मया ।
रोमाप्यचालि नियमाद्वीरः को ऽस्तु भवानिव ॥ ५२१ ॥
वह्निना परितप्तो ऽपि मूलोत्तरगुणाग्रणीः ।
सुवर्ण इव सद्वर्णभूमिर्भ्रातर्भवानभूत् ॥ ५२२ ॥
यक्षादिक्षोभसंरम्भो यः कश्चिद्विदधे मया ।
तं मयि प्रणयं तन्वंस्तत्साहसत्वं सहस्व भोः॥ ५२३ ॥
किं च याचस्व किंचिन्मां क्व वा याञ्चा भवादृशाम् ।
त्वदङ्गस्पृक्पयःसिक्तो रोगी नीरुग्भविष्यति ॥ ५२४ ॥
यच्च किंचित्कदाचित्त्वमातुरश्चिन्तयिष्यसि ।
भविष्यत्याशु तत्पुण्यशुभानां किमु दुर्लभम् ॥ ५२५ ॥
कस्यापि नगरस्यान्ते त्वां मुञ्चाम्यधुना पुनः ।
क्लेशावेशाय तुच्छापि त्वादृशामंहिचारिका ॥ ५२६ ॥
इत्युक्त्वा द्युतिदीक्षाशस्तिरोधत्त सुरोत्तमः ।
प्रान्ते पुरस्य कस्यापि स्वमपश्यच्च केशवः ॥ ५२७ ॥

चतुर्भिः कलापकम् ॥

प्राचीनाचलचूलाग्रचुम्बिन्यम्बुजबन्धवे ।
कृतप्रातःक्रियो ऽथायं प्राचलत्पुरमीक्षितुम् ॥ ५२८ ॥
धर्माख्यानगिराहूतः स जीमूतरवश्रिया ।
आरामे वामतः सूरिं सूरनामानमानमत् ॥ ५२९ ॥
देशनारसपीयूषरसनप्रसृतश्रुतिः ।
स व्यक्तवासनस्तत्र युक्तमासनमासदत् ॥ ५३० ॥
पुरस्य तस्य साकेतनाम्नः स्वामी धनञ्जयः ।
देशनान्ते मुनीशं तं मुदा नत्वा व्यजिज्ञपत् ॥ ५३१ ॥
प्रभो जरापराभूतो व्रतग्रहचिरस्पृहः ।

अपुत्रः कुत्र राज्यं स्वं न्यस्यामीत्यस्मि दुःखितः ॥५३२॥
मत्पुण्येनेव मूर्तेन पुंसा दिव्येन केनचित् ।
स्वप्ने ममेति शान्तेन निशान्ते ऽद्य न्यवेद्यत ॥ ५३३ ॥
प्रातर्देशान्तरादेति यस्ते गुरुपुरः स्थिते ।
योग्ये तस्मिन्भुवं न्यस्य भव पूर्णमनोरथः ॥ ५३४ ॥
अथास्तनिद्रो निर्माय प्रातःकृत्यमिहागमम् ।
अदर्श्यं चैनमायातमाकारख्यातसत्कुलम् ॥ ५३५ ॥
अथादिशद्गुरुर्ज्ञानी केशवस्य शुभात्मनः ।
वृत्तं निशाशनत्यागनिश्चयामोदसुन्दरम् ॥ ५३६ ॥
मम केनोपदिष्टो ऽयमिति पृष्टे ऽथ भूभुजा ।
वह्निनामुष्य सत्कर्महृष्टेनेति गुरुर्जगौ ॥ ५३७ ॥
इति श्रुत्वा गुरुं नत्वा सत्त्वाधिकगुरुः पुरम् ।
केशवेन समं प्रीतः प्रविवेश विशां विभुः ॥ ५३८ ॥
स्वराज्ये केशवं भूमानभ्यषिञ्चन्महोत्सवैः ।
स्वयं सूरगुरोः पार्श्वे तदैव व्रतमग्रहीत् ॥ ५३९ ॥
ययौ श्रीकेशवो राजा नन्तुं देवान्विवेकवान् ।
सामात्यस्तत्र चैत्येषु पताकाभासुरे पुरे ॥ ५४० ॥
विहितातुल्यमङ्गल्यः स्वसौधे शुद्धधीर्व्यधात् ।
दुस्थितानां स दानेन तारणः पारणस्थितिम् ॥ ५४१ ॥
प्रतापाक्रान्तसीमालभूपालः पालयन्प्रजाम् ।
स राज्यं न्यायनैपुण्यहृष्यन्मन्त्रिजनो ऽतनोत् ॥ ५४२ ॥
कदाचित्पितुरुत्कण्ठामाप भूपो गवाक्षगः ।
ददर्श च पथि श्रान्तं भुवि यान्तं यशोधनम् ॥ ५४३ ॥
अनुधावत्परिजनप्रकरः सत्वरस्ततः ।

सौधादुत्तीर्य नृपतिः पितुः पदयुगे ऽपतत् ॥ ५४४ ॥
तादृग्विभूतिपर्यङ्को ऽप्यद्य रङ्कोपमाश्रयः ।
कुतः पितरितो ऽसीति प्राह च प्रीतिदुःखितः ॥ ५४५ ॥
नन्दनस्य नरेन्द्रत्वपदेन मुदितो ऽपि सन् ।
दुःखाश्रूणि दधद्गेहवार्तामाह यशोधनः ॥ ५४६ ॥
धीमन्गते त्वयि तदा हंसो भोक्तुं निवेशितः ।
भूमौ पपात संजातभ्रमिर्भुक्तार्धभोजनः ॥ ५४७ ॥
एतत्किमिति तन्मात्रा दीपे दूरादुपाहृते ।
तदन्ने ऽदर्शि गरलं तुलापट्टे च पन्नगः ॥ ५४८ ॥
धर्मज्ञं मन्यमानेन त्वां तदा तदुदाहृतेः ।
कुटुम्बेन महाक्रन्दश्चक्रे दिक्चक्रविक्रमी ॥ ५४९ ॥
तदाक्रन्दमिललोकवर्ती विषभिषग्वरः ।
एको हि मान्त्रिकाह्वानकृतोद्यममुवाच माम् ॥ ५५० ॥
न कार्यः क्लेशलेशो ऽपि सर्पस्यास्य विषक्लमैः ।
सटत्रुटद्गलत्कायो मासमेवैष जीवति ॥ ५५१ ॥
जनं विसृज्य शय्यायां शायितो ऽथ त्वदग्रजः ।
स्थितो ऽस्मि तत्स्वरूपं च ज्ञातुं पञ्चदिनीं गृहे ॥ ५५२ ॥
रोमरोमपतच्छिद्रं मत्वाथ मृतमेव तम् ।
त्वां द्रष्टुं निरगां गेहात्सुकृतैर्दर्शितो ऽसि च ॥ ५५३ ॥
विषग्रासदिनान्मासः पूर्णः क्ष्मामटतो मम ।
त्वज्ज्येष्ठो ऽद्य मृतो वास्तु म्रियतां वा हतो ऽस्मि हा ॥५५४॥
योजनानां शतमितस्तत्पुरं मत्पुराद्भवेत् ।
कथं याम्यद्य तत्राशु जीवद्बन्धुमुखोत्सुकः ॥ ५५५ ॥
तद्वार्तार्त इति ध्यायन्नेव हंसस्य पार्श्वगम् ।

स्वमैक्षत ततः क्ष्मापः सतातं सपरिच्छदम् ॥५५६॥युग्मम्
कुथिताङ्गातिदुर्गन्धत्रस्तबन्धुकदम्बकम् ।
एकयैवाम्बया युक्तं रोदनोच्छूनेनेत्रया ॥५५७॥
अर्तिभिर्नरकार्तीनां सारोद्धारैरिवार्दितम् ।
आसन्नमृत्युं भूक्षिप्तं दुःखी हंसं ददर्श सः ॥५५८॥युग्मम्॥
तद्वचथाव्यथितो ऽपीद्दग्दूरमार्गद्रुतागतौ ।
कुतः शक्तिरिति ध्यायन्सो ऽपश्यद्वह्निदैवतम् ॥ ५५९ ॥
मा कार्षीर्विस्मयं मत्वावधिज्ञानात्तव व्यथाम् ।
आगां कर्तुं वरं सत्यमित्युक्त्वागादिवं सुरः ॥ ५६० ॥
हृष्टेन केशवेनाथ पाणिस्पृष्टेन पाथसा ।
हंसः सिक्तश्च रोगौघमुक्तश्च द्रुतमुत्थितः ॥ ५६१ ॥
पूर्वस्मादुत्तरेणैव वपुषा विपुलद्युतौ ।
जाते ऽस्मिन्बन्धुवर्गस्य प्रावर्तन्त महोत्सवाः॥ ५६२ ॥
एवं प्रभावमुद्भाव्य केशवस्य नरेशितुः ।
दधौ व्याधिवधाय स्वे मूर्ध्नि पादोदकं न कः ॥ ५६३॥
किं वर्ण्यः केशवोर्वीशः सिषेवे यत्पदोदकम् ।
भूतभाविरुजो भेत्तुमासमुद्रं नृपैरपि ॥ ५६४ ॥
भाविरोगभिया स्वर्णकलशे क्षिप्तमोकसि ।
न जीवितमिवाराक्षि केनोर्व्यां तत्पदोदकम् ॥ ५६५ ॥
सद्यः प्रभावमासाद्य भूपतेरिति धर्मजम् ।
रात्र्याहारपरीहारपरा जज्ञे धरा स्वयम् ॥ ५६६ ॥
अथायं दिग्जयं कृत्वा स्थित्वा साकेतपत्तने ।
पात्वा चिरं धरामत्रामुत्राभूत्परमः सुखी ॥ ५६७ ॥
॥ इति रजनीभोजनत्यागे केशवकथा ॥

इत्थं हंसस्य विपदं संपदं केशवस्य च ।
श्रुत्वा मुखाद्धुरोः स्वर्गिन्कथमद्मि फलं निशि ॥ ५६८ ॥
सुरा ह्यविरता नित्यं श्रावका विरतिस्पृशः ।
तदेवमावयोर्भेदो जज्ञे पुण्याढ्यपार्थिव ॥ ५६९ ॥
तदभ्यर्च्य जिनं धर्मिन्धर्माशावुदयस्पृशि ।
अङ्गरोगविभङ्गाय तदिदं फलमाहरेः ॥ ५७० ॥
इत्युदित्वा तिरोभूते सुरे दध्यौ नरेश्वरः ।
अहो जीवन्मृतो ऽपीभः कियन्मय्युपकारकः ॥ ५७१ ॥
त्रिभिर्विशेषकम् ॥

तदस्य नागनाथस्य नाम्ना धाम जिनेशितुः ।
कारयिष्याम्यनशनस्थाने कैलासशैलवत् ॥ ५७२ ॥
इत्यादिमधुरध्यानो गमयित्वा तमीमिमाम् ।
जिनपूजनपूतात्मा भूपस्तत्फलमाहरत् ॥ ५७३ ॥
तदैव फलतस्तस्मादकस्माद्भूपतेर्वपुः ।
सरोजमिव संकोचमुन्मुमोच विरोचनात् ॥ ५७४ ॥
भूपः स्वभावसुभगो धूतसंकोचविक्रियः ।
विश्वदृक्पेयतां प्राप दिनमुक्तेन्दुधामवत् ॥ ५७५ ॥
अङ्गपाटवमङ्गल्यगर्जन्नागरगौरवः ।
व्रजन्त्यहानि भूजानिर्जानीते स्म न कानिचित् ॥ ५७६ ॥
क्रीडदन्तःपुरीलोकस्तोकीभूतत्रपाभरः ।
निनाय नायकः क्ष्मायाः प्रीत्या कत्यपि वासरान् ॥५७७॥
उत्पन्ननन्दनानन्दसुधास्नानवशेन्द्रियः ।
स मेने कत्यपि समाः स्वसमान्नाकिनोऽपि न ॥ ५७८ ॥
वनक्रीडारसाधीनो रसाधीशः कदाप्ययम् ।

तद्विपानशनस्थानं वीक्ष्य दुःखादचिन्तयत् ॥ ५७९ ॥
हा मां कामान्धहृदयं भवभावा व्यलोभयन् ।
स्वभङ्गभीरवो यन्मे कृत्यनाशं वितेनिरे ॥ ५८० ॥
नान्योपकारिणस्तस्य करिणः कर्तुमीहितः ।
मोहोल्लासादिह हहा प्रासादोऽपि न कारितः ॥ ५८१ ॥
एवं ध्यानपतच्चित्तो ऽमात्यानित्यादिशन्नृपः ।
विपुलं द्विपुनान्नात्र कार्यतां जिनमन्दिरम् ॥ ५८२ ॥
अह्ना मासेन वर्षेण दशवर्ष्यापि भोजनम् ।
करिष्यामि जिनं प्रेक्ष्य प्रासादे ऽत्र प्रतिष्ठितम् ॥ ५८३ ॥
नृमाणिक्य न शक्यो ऽयं तरीतुं निश्चयार्णवः ।
इत्येष लपतो ऽमात्यानवमत्याविशत्पुरम् ॥ ५८४ ॥
जिनधामद्रुताधानबद्धारम्भास्तदैव ते ।
पुण्याहमङ्गलं तत्र मन्त्रिमुख्या व्यधापयन् ॥ ५८५ ॥
हृदुत्तारितसंसारव्यापारः सारधर्मधीः ।
अकृताहार एवाष्टौ नृपो निन्ये दिनानि सः ॥ ५८६ ॥
ततः प्रत्यूषशेषायां रजन्यां जातजागरम् ।
देवः स एव प्रत्यक्षीभूय भूपमभाषत ॥ ५८७ ॥
जय त्वं कीर्तिविस्तीर्ण निस्तीर्णभवसागर ।
प्रतिपन्नमनोदार्ढ्य श्रीपुण्याढ्य महीपते ॥ ५८८ ॥
अवधिज्ञानतो ज्ञात्वा नृदुःपूरं तवाग्रहम् ।
लोकोत्तरं स्वरूपं च किंचिदद्यैव भावि ते ॥ ५८९ ॥
शुभापुर्यां तत्तपनाभिश्रित्य ज्ञानभास्करात् ।
बिम्बं निर्माय जैनेन्द्रं प्रतिष्ठाप्य यथाविधि ॥ ५९० ॥
अस्थापयं वने तस्मिंश्चैत्ये पूर्णीकृते क्षणात् ।

अहं तवैव भाग्यानां सम्प्रति प्रतिहस्तकः ॥ ५९१ ॥
तत्कल्याणनिधे तूर्णमेहि पूर्णमनोरथः ।
जिनं चन्द्राननं नत्वा नमस्यो जगतां भव ॥ ५९२ ॥
एवं देवस्य तस्योक्तं श्रुत्वा दध्यौ धराधिपः ।
अहो कियानयं मे ऽभूदुपकारी द्विषामरः ॥ ५९३ ॥
पञ्चभिः कुलकम् ॥
नवप्रासादतीर्थेशदर्शनोत्कण्ठितस्ततः ।
पुरःकृतसुरः पृथ्वीपतिः प्रति वनं ययौ ॥ ५९४ ॥
प्रासादमौलिमारुह्य नृत्यन्त्याः सुकृतश्रियः ।
लोलं हस्तमिव प्रेक्ष्य पताका मुमुदे नृपः ॥ ५९५ ॥
कल्याणकलशं पश्यन्मौलौ जिनगृहश्रियः ।
मुक्तिप्रस्थानकृद्भूपः शकुनेनान्वमोदत ॥ ५९६ ॥
चान्द्रीः कलाः शिलाभावं गमयित्वेव निर्मितः ।
जिनालयो ऽसौ भूपस्य निन्ये ऽक्षिकुमुदं मुदम् ॥ ५९७ ॥
ततो न्यरूपयत्तत्र भूवरस्तोरणं पुरः ।
पुण्यश्रीदूरविधृतस्वयंवरणमाल्यवत् ॥ ५९८ ॥
चैत्यद्वारं ददर्शासौ सद्धर्मपुरगोपुरम् ।
सतां यत्र स्थितानां स्याज्जिनः सुलभदर्शनः ॥ ५९९ ॥
नित्योद्यतस्य निर्जेतुमधर्मं सङ्घभूपतेः ।
गुप्यद्गुरुमिवापश्यत्स तुङ्गं रङ्गमण्डपम् ॥ ६०० ॥
गुर्वीरुर्वीश्वरो ऽद्राक्षीद्रम्याश्चित्रकचतुष्किकाः
धर्मस्य श्रद्धया सार्धं विवाहे वेदिका इव ॥ ६०१ ॥
असंख्यसुखसंप्राप्तिनित्यानन्दात्मसेवितः ।
साक्षान्मोक्ष इव प्रीत्यै राज्ञो ऽभद्गूढमण्डपः ॥ ६०२ ॥

अथार्हत्प्रतिमामर्ककोटिकान्तिकृतामिव ।
पश्यन्स भूपश्चिक्षेप भवकोटिभवं तमः ॥ ६०३ ॥
रूपातिशयविस्फूर्तौ विभोर्मूर्तौ नरेशितुः ।
स्पर्धयेवाक्षियुग्मस्य जगाम स्थिरतां मनः ॥ ६०४ ॥
आनन्दामृतमग्नस्य लीनं तस्य मनस्तथा ।
यथा जिनं च विश्वं च स्वं च नो बुबुधे तदा ॥ ६०५ ॥
समत्वमसृणीभूतः प्रभूताद्भुतशक्तिभृत् ।
आरूढः क्षपकश्रेण्यां शुक्लध्यानामलो नृपः ॥ ६०६ ॥
तस्य घातीनि कर्माणि दग्धानि ध्यानवह्निना ।
तद्वियोगादिव भवोपग्राहीण्यप्यगुः क्षणात् ॥ ६०७ ॥
तस्यामिव सहाद्यायां घटिते घनमेलतः ।
नृपे ऽस्मिन्कृतसंकेते ज्ञानमोक्षश्रियौ समम् ॥ ६०८ ॥
अथ विज्ञाय तज्ज्ञाननिर्वाणमवनीविभोः ।
मूढत्वेनैव मन्वानान्वज्रपातमिवोत्सवम् ॥ ६०९ ॥
हा तातेति हहा भर्तरिति हा त्रायकेति च ।
नन्दनान्तःपुरीलोकान्क्रन्दतः प्रतिबोध्य सः ॥ ६१० ॥
तदा मुदागतैः सम्यग्दृष्टिभिस्त्रिदशैः सह ।
कृत्वोर्ध्वदेहिकं कृत्यं स्वमित्रस्य शुभात्मनः ॥ ६११ ॥
पुण्यसाराभिधं न्यस्य पुत्रं राज्ये ऽत्र भूपतेः ।
अनुशास्य जिनार्चायां द्विपदेवो दिवं ययौ ॥ ६१२ ॥
चतुर्भिः कलापकम् ॥

॥ इति हंसकेशवनिदर्शनान्विता पुण्यप्रामाण्ये
पुण्याढ्यभूपतिकथा ॥

तदेवं देव जानीहि पद्मोत्तरनृपोत्तर ।
प्रभावं प्राच्यपुण्यानां पुण्याढ्यस्य निदर्शनात् ॥ ६१३ ॥
किं च कर्मवशं विश्वमवश्यमिदमीश तत् ।
मया कृतमदः कार्यो न कदाचिदयं मदः ॥ ६१४ ॥
जडः कार्ये सुनिष्पन्ने मयाकारीति माद्यति ।
तस्मिन्पुनरनिष्पन्ने दोषं दैवाय यच्छति ॥ ६१५ ॥
पूर्वगर्वग्रहक्रीडाव्रीडापीडातुरस्ततः ।
अभ्यधाद्बुधाधीशः स सुधाबन्धुरां गिरम् ॥ ६१६ ॥
स्वच्छन्दं छन्दवृत्त्या ये रञ्जयन्ति महीभुजम् ।
लक्ष्मीहृतिकृतोपायाः शत्रवस्ते न मन्त्रिणः ॥ ६१७ ॥
अप्रवृत्तिगतं भृत्या मुदे भूपं स्तुवन्ति ये ।
ते पाययन्ति सर्पीषि कुवैद्या इव सज्वरम् ॥ ६१८ ॥
अच्छन्दवादिनो नीतिपात्रं मन्त्रीश मन्त्रिणः ।
भवन्ति भूभुजां भाग्यवैभवेन भवादृशाः ॥ ६१९ ॥
युक्तं दुर्गतिकूपस्य कण्ठाग्रादिव गर्वतः ।
बालको जनकेनेव त्वयाहमपवाहितः ॥ ६२० ॥
युक्तमुक्तं च कर्माणि प्रमाणं प्राक्तनानि यत् ।
दुःस्थादुःस्थव्यवस्थेयमन्यथा प्रथते कथम् ॥ ६२१ ॥
कर्माणि न प्रमाणं चेत्तत्सर्वोऽपि न किं प्रभुः ।
अवश्यं स्वस्य नैव स्यात्को ऽपि काप्यल्पचिन्तकः ॥६२२॥
यतितव्यं ततः प्राज्ञैः शुभे कर्मणि निर्मदैः ।
अपारं गोष्पदीकर्तुममुं संसारसागरम् ॥ ६२३ ॥
यत्तस्य व्रतिनो दृष्टिकण्टकाकृष्टिजं फलम् ।
तेषां तादृगभूत्किं स्यात्पुंसां तत्राद्दते व्रते ॥ ६२४ ॥

महामात्य ममात्यर्थं तद्व्रतग्रहणे रतिः ।
तदाशु तद्विधिः सर्वविधिज्ञ मयि धीयताम् ॥ ६२५ ॥
अजल्पि कल्पितामोदं दन्तांशुकुसुमव्रजैः ।
वचो विमलबोधेन सुधानामधिदैवतम् ॥ ६२६ ॥
स्वामिन्सह रहस्येन जानते ये जिनागमम् ।
त एव गुरवो गौरधियो व्रतविधौ बुधाः ॥ ६२७ ॥
अथालपन्नृपः स्मित्वा मन्त्रिन्संभाव्यते बुधः ।
किं त्वत्तो ऽपि गुरुः को ऽपि शास्त्रबोधनशुद्धधीः ॥६२८॥
उवाच सचिवः स्वामिन्मेदं वादीर्यतो मतः ।
द्वारं मोक्षस्य धर्मस्य नेत्रं क्षेत्रं धियां गुरुः ॥ ६२९ ॥
ये ऽपि सर्वज्ञदेवास्ते ऽप्यामनन्ति गुरुं गुरुम् ।
प्राग्जन्मगुरुवाक्तेषामपि तत्फलबीजति ॥ ६३ ॥
क्व स सद्गुरुरस्तीति प्रीते पृच्छति पार्थिवे ।
मन्त्रीन्दुरानखद्दन्तरुग्धौतेन पथा गिरम् ॥ ६३१ ॥
शुद्धप्रवचनः शुद्धचरितः शुद्धदेशकः ।
स्वामिन्गुरुर्गुरूकर्तुं योग्यो भाग्येन लभ्यते ॥ ६३२ ॥
तनोति मन्त्रिणा यावदित्यालापमिलापतिः ।
तावदाविरभूत्तत्र चित्रमाकस्मिकं महः ॥ ६३३ ॥
क्वचिच्चन्द्रप्रभाचारु क्वचिद्विद्रुमविभ्रमम् ।
क्वचिदम्भोदसौन्दर्यं क्वचित्काञ्चनकोमलम् ॥ ६३४ ॥
क्वचित्कीरच्छदच्छायं क्वचित्पारापतोपमम् ।
क्वचित्सिन्दूरविद्योति क्वचित्केकिकलापरुक् ॥ ६३५ ॥
कीर्णं सभान्तः संभ्रान्तस्तदालोक्य तदा नृपः ।
दृशं प्रतिदिशं तन्वञ्जज्ञे विस्मेरविस्मयः ॥ ६३६ ॥
त्रिभिर्विशेषकम् ॥

आपतन्त्यो महीमस्मत्प्रभुसौभाग्यभाग्यतः ।
पुरन्दरकुरङ्गाक्ष्यः कटाक्षान्विक्षिपन्ति किम् ॥ ६३७ ॥
आकृष्टः पुण्यपुष्ट्या वा दानीन्द्रस्यास्मदीशितुः ।
अभ्येति नभसा रत्नद्वीपो रत्नकरान्किरन् ॥ ६३८ ॥
इत्यनल्पविकल्पोर्मिरसभाजि सभाजने ।
राज्ञा तज्ज्ञातुमाज्ञायि को ऽप्येकः सेवकः स्वकः ॥६३९॥

त्रिभिर्विशेषकम् ॥

अध्यास्य सौधमूर्धानमसौ सस्मयविस्मयः ।
एत्याशु नृपमित्यूचे चञ्चद्रोमाञ्चकञ्चुकः ॥ ६४० ॥
प्रभो पञ्चविधोदञ्चन्मणिसंचयरोचिषः ।
नृत्यन्त इव केतूनामञ्चलैर्वायुचञ्चलैः ॥ ६४१ ॥
सुस्वादनादाः प्रासादाः प्रसर्पन्तः पुरोपरि ।
निपतन्तो निरूप्यन्ते नभसः केलिकानने ॥६४२॥युग्मम्॥
अथ कौतूहलोत्तालश्चचालाच्छपरिच्छदः ।
हयैः कतिपयैः केलिवनाय क्षितिनायकः ॥ ६४३ ॥
स यावज्जगतीहारः प्राकारद्वारमागमत् ।
गत्यातुरः पुरस्तावदारामपतिरापतत् ॥ ६४४ ॥
वनस्वरूपं भूपेन पृष्टः संहृष्टमानसः ।
स जगौ जगदानन्दरसनिस्यन्दिनीं गिरम् ॥ ६४५ ॥
स्वामिन्कश्चन चण्डांशुनिवहस्य रहस्यवत् ।
धाम्नां धाम त्वदारामाजगाम महामुनिः ॥ ६४६ ॥
आगत्य कापि शम्पाभसंपच्चम्पककाननात् ।
अमुं ननाम कामस्याङ्गिनी शक्तिरिवाङ्गना ॥ ६४७ ॥
कुसुमद्रुममौलिभ्यः समुत्तीर्य तदा मुदा ।

स्त्रीणां गणः प्रणम्यर्षिं वर्यस्तं पर्यचारयत् ॥ ६४८ ॥
ततो धात्रीतले तत्र पवित्रे चित्रकारणम् ।
सहस्रपत्रमासूत्रि तपनीयमयं तया ॥ ६४९ ॥
धन्यस्तन्मध्यमध्यास्य घनाघनघनध्वनिः ।
कर्णैकपेयं पीयूषमुच्चैः किंचिदुवाच सः ॥ ६५० ॥
लोला कोलादयो वन्या धन्यंमन्या इवाभितः ।
तद्वाग्नवसुधां पातुमुपान्तवसुधां श्रिताः ॥ ६५१ ॥
आसीनास्तरुराशीनामुपर्यालोलमौलयः ।
दिग्भ्यो ऽभ्येत्य मुदं भेजुः पिबन्तस्तस्य गाः खगाः ॥६५२॥
विमानैर्व्योमतस्तूर्णमुत्तीर्णा वर्णिनीवृताः ।
उद्यदानन्दविद्योतमाननिर्मानमानसाः ॥ ६५३ ॥
जगद्गुरो जय जय वज्रनाभ मुनीश्वर ।
इति स्तुत्वा च नत्वा च तस्थुस्तस्य पुरः सुराः ॥ ६५४ ॥
युग्मम् ॥
इत्यक्षिसाक्षिणीमाख्यामाख्यातुं भवतः प्रभो ।
मुक्ता मनो ऽपि तत्रैव त्वरयाहमिहागमम् ॥ ६५५ ॥
अथ धात्रीभुजा मन्त्री वीक्ष्यमाणमुखो ऽवदत् ।
शङ्के ऽसौ केवलज्ञानी वज्रनाभो महामुनिः ॥ ६५६ ॥
महीरुहामधिष्ठानदेवीभिः सेव्यमानया ।
वनदेवतया देव तयादौ कृतसत्कृतिः ॥ ६५७ ॥
मुदां निदानं सत्त्वानां तत्त्वानां रत्नदीपिकाः ।
मुनिः प्रतनुते धर्मदेशनाः क्लेशनाशिनीः ॥ ६५८ ॥
तद्धान्तिर्यत्र ते सैष धर्मः साक्षात्प्रमीयताम् ।
यदेव देवतावृन्दैः सेव्यते स पुमानपि ॥६५९॥

राजाथ तेन धर्मस्य प्रामाण्येन चमत्कृतः ।
लोलमौलिः सहर्षाश्रुः सरोमाञ्चः क्षणं स्थितः ॥ ६६० ॥
सत्कृत्याथ वनीपालमवनीपालपुङ्गवः ।
आगादुद्यानमेदिन्यां मुनीन्द्रोत्कण्ठया रयात् ॥ ६६१ ॥
विलोक्यं पुलकी तत्र चित्रां मुनिविभोः सभाम् ।
भवार्णवतरङ्गाभात्तुरङ्गादुत्ततार सः ॥ ६६२ ॥
ततो विमलबोधेन बोधितो वसुधाधिपः ।
भव्यभूपोचिताः पञ्च वितेने विनयक्रियाः ॥ ६६३ ॥
तथाहि ।
गुरोरंहिरजो मूर्ध्ना स्पृशतो मे ऽन्तरस्थितः ।
असौ स्खलनकारीति किरीटं किल सो ऽमुचत् ॥ ६६४ ॥
भूपावतंसः संसारवार्धिवृद्धिकरं ततः ।
निशाधवमिव च्छत्रं गौरच्छायमदूरयत् ॥ ६६५ ॥
गन्तव्यं भुवनाम्भोजभास्करस्य पुरो गुरोः ।
इत्यमुञ्चत शस्त्रालीं क्षमापः पापतमस्तमीम् ॥ ६६६ ॥
वर्यं भाति ममैश्वर्यं गुरुपादनखांशुभिः ।
सम्प्रत्याभ्यां किमित्येष चक्रे चामरवारणम् ॥ ६६७ ॥
समुत्तीर्येव संसाराटवीमुत्कटकण्टकाम् ।
सो ऽमुञ्चन्मुनिवाग्वापीरसं पातुमुपानहौ ॥ ६६८ ॥
पुनः सचिवराजेन राजा विज्ञापितस्ततः ।
चकार पञ्चाभिगमानुचितान्गुरुदर्शने ॥ ६६९ ॥
तद्यथा ।
चन्दनाम्बुजताम्बूलपरिहारपदात्तदा ।
रागत्यागस्य पुण्याहमङ्गलं विदधे सुधीः ॥ ६७०॥

विशेषाद्भूषणं बिभ्रद्भूपो ऽमान्मुद्रिकादिकम् ।
र्णगुर्वागतश्रद्धः पुण्यद्रुरिव पुष्पितः ॥ ६७१ ॥
नखरत्नप्रभामञ्जुमञ्जलिं मस्तके दधत् ।
गुर्वालोके बभौ भूपो ऽशेखरो ऽपि सशेखरः ॥ ६७२ ॥
प्रदर्श्या वामता नात्र प्रकाश्या दक्षिणस्थितिः ।
स दक्षः कृतवैकक्षश्चख्यावंसमिषादिव ॥ ६७३ ॥
गुरोर्गिरः सुधाधारा यान्तु मा कर्णतो बहिः ।
इत्यसौ हृद्घटं स्थैर्ये सुस्थिते सुस्थितं व्यधात् ॥६७४॥
अथ हर्षप्रकर्षश्रीपद्मं पद्मोत्तरः सुधीः ।
प्रविवेश नरेशस्तां मुनिहंसस्य संसदम् ॥ ६७५ ॥
संक्षिपन्निव संसारं भ्रमणत्रयमात्रया ।
विततार मुनेस्तस्य तिस्रो दक्षः प्रदक्षिणाः ॥ ६७६ ॥
हृष्यन्मना ननामाथ क्ष्मानाथः कर्ममाथकम् ।
एनं मुनीन्द्रमुन्निद्रभावनाभावनात्मकः ६७७ ॥
मुनिक्रमनखज्योतिःसन्ध्याभं मूर्ध्नि भूपतेः ।
नमतः सूचयामास सद्ध्यानार्चिर्विधूदयम् ॥ ६७८ ॥
मुनीन्द्रावेक्षणक्षुण्णकारीणि स्युरिमानि किम् ।
इत्यशृणि निनिन्दैष हर्षोत्कर्षोद्भवान्यपि ॥ ६७९ ॥
इत्थं स पार्थिवगुरुर्गुरुभक्तिमुच्चै
रोमाञ्चकञ्चुकधरो मधुरां विधाय ।
हृष्टाशयः समुचितासंनसंनिविष्टः
श्रद्धां प्रियामभिनवां स्वहृदा दधानः॥ ६८० ॥
आह्लादनं सकललोकविलोचनानां
श्रीवज्रनाभवदनेन्दुमुदीक्षमाणः ।

वाक्चन्द्रिकां रसयितुं सुरसङ्घसेव्यां
पद्मोत्तरः परिचकार चकोरचर्याम् ॥६८१॥युग्मम्॥

इति दण्डाधिपतिश्रीमदाह्लादनसमभ्यर्थितश्रीविजयसिंहसूरिशिष्यश्रीवर्धमानसूरिविरचिते श्रीवासुपूज्यचरित आह्लादनाङ्के महाकाव्ये सद्गुरुलब्धिवर्णनो नाम प्रथमः सर्गः ॥

अथ द्वितीयः सर्गः

अथ ज्ञाननिधिर्जानन्राजानं भाविनं जिनम् ।
वचः प्रपञ्चयांचक्रे मोहद्रोहकरं गुरुः ॥ १ ॥
भ्रान्तैश्चतुरशीत्यङ्गिलक्षयोनिवने ऽङ्गिभिः ।
निर्भाग्यैर्दुर्लभः कल्पद्रुकल्पो मानवो भवः ॥ २ ॥
जन्यते निष्फलः स्वर्गापवर्गफलदो ऽप्यसौ ।
अज्ञानैश्च प्रमत्तैश्च कैश्चित्प्राप्तो ऽपि पुण्यतः ॥ ३ ॥
तदिष्टफलदं मर्त्यपदं जानीत सज्जनाः ।
विरच्यतां विपश्चिद्भिरप्रमादश्च तत्फले ॥ ४ ॥
सिक्तो गुरूक्तिपीयूषैः प्रथयन्पुण्यपुष्पितम् ।
दानशीलतपोभावमिषं शाखाचतुष्टयम् ॥ ५ ॥
श्रितच्छायो भवारण्यभ्रमिखिन्नैः सुरासुरैः ।
तस्मै फलाय कस्मैचिन्मानवानां भवो भवेत् ॥६॥युग्मम्॥
जना दानं तु जानन्तु प्रधानं सर्वकर्मणाम् ।
अपि शीलतपोभावैः शुद्धैर्यद्धुरि धार्यते ॥ ७ ॥
शक्रचक्रधरादीनामदीनामपि संपदम् ।
भोगभाग्यनिदानस्य दानस्यैव वशां विदुः ॥ ८ ॥
भवार्णवस्य वीचीषु श्रीषु लोलासु लालसाः ।
मज्जन्ति पात्रदानं ये यानपात्रं न तन्वते ॥ ९ ॥
भवाब्धियानपात्रेषु यत्पात्रेषु निधीयते ।
असंख्यीभूय भूयस्तद्दातुर्भोगाय जायते ॥ १० ॥

पात्रदानं हृदानन्दहेतुरत्र परत्र च ।
कृतिनो रतिसारस्य कुमारस्येव कल्पते ॥ ११ ॥
तथाहि विद्यते माहिष्मतीति विदिता पुरी ।
यत्पौरैः पूर्यते लक्ष्म्या लोलत्वं दानलीलया ॥ १२ ॥
सुभूम इति भूपो ऽभूत्तत्र निश्छत्रितद्विषत् ।
यस्य दानश्रियः केलिकाननं कल्पपादपाः ॥ १३ ॥
पुत्रः क्षितिपतेस्तस्य बभूव भुवनाद्भुतः ।
रतिसाराभिधः शुद्धकलाकमलिनीरविः ॥ १४ ॥
पतिव्रतेव रूपश्रीर्यस्य विश्वमनोहरा ।
नापे सुरैरपि ध्यानतूर्णपूर्णमनोरथैः ॥ १५ ॥
अदूषणैर्गुणैर्यस्य मुदितो मेदिनीपतिः ।
अदात्प्रसादतः स्वेच्छावित्तव्ययनवल्गितम् ॥ १६ ॥
स कदापि कलावद्भिर्वृतो रविरिवांशुभिः ।
विचिक्रीड पुरक्रोडे पौरदृक्पङ्कजप्रियः ॥ १७ ॥
असावपश्यदुत्पश्यैर्वीक्ष्यमाणं विचक्षणैः ।
नरं कंचित्पताकाग्रजाग्रद्ग्रन्थिं चतुष्पथे ॥ १८ ॥
अथोचितचमत्कारे कुमारे परिपृच्छति ।
तस्य स्वरूपं चिद्रूपः कश्चिदेवं न्यवेदयत् ॥ १९ ॥
कुमार कोऽपि साकारस्तुङ्गमानः पुमानयम् ।
कुतो ऽपि केतुमान्प्रातरापपात पुरान्तरम् ॥ २० ॥
वीक्ष्य ग्रन्थिं ध्वजाग्रे ऽस्य नागरैर्गुणसागरैः ।
इह वस्तु किमस्तीति स्पष्टं पृष्टो ऽयमभ्यधात् ॥ २१ ॥
इह श्लोकस्त्रिलोकस्य हितो ऽस्ति महितो बुधैः ।
विक्रीणे कार्यतो निष्कलक्षेणामूल्यमप्यमुम् ॥ २२ ॥

इत्यस्य वचसाश्चर्यवशंवदहृदस्तदा ।
अमिलन्नमलप्रज्ञाः प्रज्ञाः पुरपुरःसराः ॥ २३ ॥
ते भृशं तादृशश्लोकसमालोकसमुत्सुकाः ।
अमुं जगुः क गुप्तस्य मूल्यश्रीरस्तु वस्तुनः ॥ २४ ॥
अथायमभ्यधाल्लुभ्या न सभ्याः क्वचिदीदृशाः ।
छद्मैव प्रस्तुतं वस्तुलब्धौ येषां धनं घनम् ॥ २५ ॥
आस्वादमात्रविभ्रस्तरोगां रोगवते ऽर्थिने ।
स्वादं परीक्षितुं दत्ते विक्रेता कः सुधां मुधा ॥ २६ ॥
मूल्यं संसारसारस्य यद्वाच्यस्यैव याच्यते ।
श्लोकं दक्षाः परीक्षार्थं दर्शये तं कथं वृथा ॥ २७ ॥
भवद्भिर्विभवत्प्रज्ञैर्निभाल्यैव विभाव्यते ।
अर्थः श्लोकस्य भोः कस्य विक्रयः क्रियतां मया ॥२८॥
इत्यनेन कृता कामं यद्विदा कोविदावलिः ।
अस्ति श्लोकावलोकार्थमुपायध्यायिनी चिरात् ॥ २९ ॥
इत्याकर्ण्य कुमारो ऽन्तःसमारोपितविस्मयः ।
सुहृदां हृदयालूनामास्यं पश्यन्नदो ऽवदत् ॥ ३० ॥
अपि विद्यात्रयीहृद्यान्कुर्वती खर्वितोत्तरान् ।
अतुल्यमूल्या यस्योक्तिभङ्गिरप्यङ्ग रञ्जति ॥ ३१ ॥
स विक्रीणाति यं श्लोकं लोकम्पृणगुणं भणन् ।
तं क्रीणन्हेमलक्षेण दक्षो विक्षोभमेति कः ॥३२॥ युग्मम् ॥
वदन्निति सुहृद्वृन्दैर्नन्दितो नृपनन्दनः ।
प्रीतः किंचित्परिक्रम्य श्लोकविक्रयिणं जगौ ॥ ३३ ॥
गृहाण स्पृहया हेम मूक्तरत्नं वितीर्यताम् ।
पुनर्नरश्रेष्ठ कथ्यतां तथ्यमाकरः ॥ ३४ ॥

अथ प्रीतिसुधासिन्धुचञ्चद्वीचीयितस्मितः।
कुमारमुखमार्तण्डकोकः श्लोकधनो ऽभ्यधात् ॥ ३५ ॥
शृणु मुक्ताकरं श्रीमन्नस्ति श्रीमन्दिरं पुरी।
श्रावस्तीति समाहूतपुरहूतपुरस्तुतिः ॥ ३६ ॥
स्वर्द्धेर्मानमजानानः स्वस्य स्थान्न इव द्विपः।
तस्यामृद्धः प्रसिद्धो ऽहं सुबन्धुर्नामतो मतः ॥ ३७ ॥
हयहेषितवेषेण बिभ्राणां भूषणकणान्।
ननर्त नर्तकीव श्रीरश्रमं मम वेश्मनि ॥ ३८ ॥
सद्भाग्यव्यवसायाभ्यां पक्षिणीभिर्विभूतिभिः।
पारावारस्य पारे ऽपि चरन्तीभिरवर्धि मे ॥ ३९ ॥
नरं कंचन रङ्कं च नृपतिं च न वेद्मि तम्।
अदधादधमर्णत्वं यो मे नो मेदिनीतले ॥ ४० ॥
चिरमित्यभवं भूप भवभूरिविभूतिभाक्।
अहं दुहितृदौहित्रपुत्रपौत्रालिमालितः ॥ ४१ ॥
एकदा क्षणदापुच्छे स्वप्ने ऽपश्यं वरस्त्रियम्।
विभूषणगुणैर्भान्तीं निर्यान्तीं निजमन्दिरात् ॥ ४२ ॥
यावद्व्यायामि निद्रान्ते स्वान्ते दुःखमशान्तिकम्।
तावन्मूर्तमिवाभाग्यं धूमो ऽभूद्भिवौकसि ॥ ४३ ॥
तत्कालमेव मे भाग्यभङ्गभङ्गिगरीयसाम्।
तत्रोदभूद्भाग्यानां प्रताप इव पावकः ॥ ४४ ॥
वित्तालिनिःस्पृहश्चित्तादुत्तीर्णस्वजनव्रजः।
निःसृतो ऽहं तदागारात्संसारादिव निर्ममः ॥ ४५ ॥
तदा तु यद्यदाकृष्टं दह्यमानं धनं जनैः।
छलिनस्तत्तदादाय पलायांचक्रिरे रयात् ॥ ४६ ॥

मदीयाभाग्यमङ्गल्यदीपे तस्मिन्प्रदीपने ।
प्रपतद्भिः पतङ्गानां भङ्गिरङ्गीकृता हयैः ॥ ४७ ॥
पदार्थदाहदुःखोर्मिव्यथया मूर्छिते तदा ।
ओको विमुच्य लोको ऽभूत्प्रतिकारपरो मयि ॥ ४८ ॥
यावच्चिच्छेद मे मूर्छां जनस्तावद्विभावसुः ।
निन्ये निःशेषमप्येष वेश्म भस्मावशेषताम् ॥ ४९ ॥
सद्मतो निःसृताशेषस्वजनं मुक्तमूर्छनम् ।
दग्धसर्वस्वमप्याहुर्मां जनाः पुण्यभाजनम् ॥ ५० ॥
तप्तं स्वर्णादिपिण्डस्थं देयमूल्यपदे तदा ।
एत्यं क्रयाणवाणिज्यकारिभिर्जगृहे गृहात् ॥ ५१ ॥
लभ्याक्षरेषु दग्धेषु विदग्धैरधमर्णकैः ।
दत्तं नोत्तरमप्युच्चैर्याच्यमाने धनोच्चये ॥ ५२ ॥
निध्यायामि निधानानि यावत्तावदहिव्रजः।
व्यलोक्यत स्वकाभाग्यलताकन्दलवृन्दवत् ॥ ५३ ॥
दिगन्तगतवाणिज्यवित्तप्राप्तिप्रतीक्षणम् ।
धनिभ्यो धनमादाय स्वकुटुम्बमजीवयम् ॥ ५४ ॥
किं तु मद्दिवसप्रान्ते मदभाग्यतमोमये ।
सर्वे मम वणिक्पुत्रा मार्गे ऽमृह्यन्त तस्करैः ॥ ५५ ॥
मद्भाग्यविप्रयोगाग्निकीलालिव्याकुला इव ।
पोतभाजस्तु पाथोधौ ममज्जुर्मम सम्पदः ॥ ५६ ॥
एतद्वार्ताश्रुतेरार्तामन्तर्वृत्तिं वहन्नहम् ।
अवाप न रतिं क्वापि बिभ्यदिभ्यगणाद्दणी ॥ ५७ ॥
किं देयमुत्तमर्णानामुत्तरं याचतामिति ।
भृशं देशान्तरायाहमुत्साहमसृजं निशि ॥ ५८ ॥

दृशाश्रुमिश्रया वीक्ष्य पूर्णेन्दुवदनां चिरम् ।
निद्राणां प्रेयसीं पृष्ट्वा दैन्यगद्गदया गिरा ॥ ५९ ॥
दृश्यानि पुनरीदृशि केति साश्रु दृशं मुहुः ।
क्षिपन्मुखेषु सुप्तानां शिशूनां मुग्धकान्तिषु ॥ ६० ॥
दुःखौघशम्बलो बाहुसहायः पदवाहनः ।
निशीथे निःसृतो मन्दं मन्दं मन्दिरतस्ततः ॥ ६१ ॥

त्रिभिर्विशेषकम् ॥

अथाशु गतिचातुर्यात्पुर्या बहिरहं गतः ।
कुमार सुकुमारत्वान्मेदुरं खेदमासदम् ॥ ६२ ॥
अन्वेषद्भ्यो धनिभ्यो ऽथ भीतः प्रीतिं मृतौ वहन् ।
झम्पां दातुं पुरीलीलाशैलमौलिं गतः शनैः ॥ ६३ ॥
दुःखानि सह देहेन तूर्णं चूर्णयितुं मयि ।
झम्पार्थं प्रस्थमारूढे कुतो ऽप्युक्तिरभूदिति ॥ ६४ ॥
मा मानवं भवं हन्त चिन्तामणिमिवार्भकः ।
परिक्षेपीर्मुधा मूढ प्रौढभाग्यभरार्जितम् ॥ ६५ ॥
इत्याकर्ण्य क्षिपन्दिक्षु चक्षुरप्रेक्ष्य कंचन ।
पुनर्जातो ऽस्मि पातोत्कस्तदा वागित्यभूत्पुनः ॥ ६६ ॥
खेदभेदधिया प्राणप्रहाणं मुग्ध मा विधाः ॥
स्फीतशीतभिदे कल्पशालं ज्वालयतीह कः ॥ ६७ ॥
इति श्रुत्वार्पयन्दिक्षु पञ्चषानि पदान्यहम् ।
कंचिदप्रेक्ष्य झम्पार्थी जातश्चाभूच्च वागियम् ॥ ६८ ॥
दुःखद्वेषेण किं मूर्ख निजं त्यजसि जीवितम् ।
रेणुवैरेण पीयूषच्छटां किरति कः क्षितौ ॥ ६९ ॥
तामुक्तिमवगण्यैव तुङ्गतः शैलशृङ्गतः ।

झम्पामहमदां नाम शृण्वन्मा मेति भाषितम् ॥ ७० ॥
पातसंवेगसंजातमहावातधुतस्ततः ।
मूर्छामहं महीदेशसदेशगमनो ऽगमम् ॥ ७१ ॥
अथोन्मीलितदृक्तस्य शैलस्यैवोपरि स्थितम् ।
अपश्यमहमात्मानं मुनिमेकं च कंचन ॥ ७२ ॥
किं स्वप्नः किं मतिभ्रान्तिरसाविति वितर्किणम् ।
विस्मयस्थमथोवाच स मामसमवाग्मुनिः ॥ ७३ ॥
मया मुहुर्निषिद्धो ऽपि मर्तुं धावसि किं मुधा ।
दुःखानां कौषधं मृत्युरात्मनः सहचारिणाम् ॥७४॥
इत्युक्त्वा मयि मीमांसासंमुखे स मुनीश्वरः ।
विगलन्मन्मनःशोकं श्लोकं जल्पन्खमुद्यया ॥ ७५ ॥
ततः क्षणं तनूकान्तिपुनरुक्तारुणोदये ।
गते तस्मिन्नदृश्यत्वमहमित्थमचिन्तयम् ॥ ७६ ॥
नूनं को ऽप्येष संसारतारणश्चारणो मुनिः ।
रात्रावत्राचले कायोत्सर्गं मत्सुकृतैर्ददौ ॥ ७७ ॥
अनेनैव दयार्द्रेण पतन्नद्रेरहं धृतः ।
कृतश्च श्लोकदानेन सदानेन सुनिर्वृतः ॥ ७८ ॥
इति ध्यात्वा धरां नत्वा मुनेस्तस्य क्रमाङ्किताम् ।
तच्छ्लोकध्यानपीयूषपानच्छिन्नखिदाभरः ॥ ७९ ॥
सुप्तेष्वेव मनुष्येषु स्वेषु शेषे निशाक्षणे ।
मन्देतरतरैराशु पदैः सदनमासदम् ॥ ८० ॥ युग्मम् ॥
मुनीन्द्रालोकनश्लोकलाभौ मनसि भावयन् ।
अजीगणं गुणायाहं विपदं सम्पदः पदे ॥ ८१ ॥
मां क्षीणाशेषलक्ष्मीकं मत्ता दाक्षिण्यदीक्षितैः ।

कदाचिदपि नायाचि लभ्यमिभ्यजनैर्धनम् ॥ ८२ ॥
किंचित्कैश्चित्रपावद्भिरधमर्णैर्मम स्वयम् ।
दत्तं वित्तं कुटुम्बस्य बभूव कशिपुश्रिये ॥ ८३ ॥
इत्यहं यद्भविष्यः सन्प्रियामपि विपद्गताम् ।
चक्रे श्लोकस्य तस्यार्थसामर्थ्येन प्रमोदिनीम् ॥ ८४ ॥
साम्प्रतं मत्प्रियायास्तु सोदरः परिणेष्यते ।
सागदद्गद्गदोक्त्या मां तदुत्सवगमोत्सुका ॥ ८५ ॥
न भूषणानि भूरीणि चीवराणि वराणि न ।
नाध्वयोग्यानि युग्यानि दानीयानि धनानि च ॥ ८६ ॥
स्फारशृङ्गारसारासु दानीयाद्भुतभूतिषु ।
रंस्ये प्रधानयानासु सोदरासु किमीदृशी ॥ ८७ ॥
आत्मानमपि विक्रीयाधिकं किंचित्ततो ऽपि वा ।
मानं मे पाहि मानो हि स्वात्मनो ऽप्यधिकः सताम् ॥८८॥
न मानः पूर्यते चेत्तन्मरणं शरणं मम ।
मन्यन्ते मानिनो मानमात्मनोऽपि हि दुस्त्यजम् ॥ ८९ ॥
इत्याग्रहमहं तस्या हन्त श्याममुखस्तदा ।
चिरं विचार्य चित्तेन किंकार्यत्वजडो ऽभवम् ॥ ९० ॥
वस्तु पश्यामि नो गेहे विना देहेन किंचन ।
मूल्यं कर्मकृतामेव प्राप्यं तद्विक्रये पुनः ॥ ९१ ॥
तत्किं कुर्वे क्व गच्छामीत्युद्यद्दुःखहृदा तदा ।
स श्लोकः सस्मरे दुःखस्मरणीयतया मया ॥ ९२ ॥
ततः कदाग्रहग्रस्तमहिलामोहिताशयः ।
कृत्यतत्त्वं स्वसत्त्वं च तृणयन्धनतृष्णया ॥ ९३ ॥
तं मातृवदविक्रेयमपि श्लोकमिहाप्यहम् ।

इत्यर्धोक्ते ऽश्रुधारालदृगेष न्यग्मुखो ऽभवत् ॥९४॥युग्मम्॥
ततस्तं ग्रन्थिमुद्भिन्द्य तदङ्गुल्यग्रसंज्ञया ।
कुमारः स्वयमादाय स्वकरे श्लोकपत्रिकाम् ॥ ९५ ॥
क्षणमात्रं ततो गात्रं स्तम्भपात्रं सृजन्नसौ ।
किंचित्तदैव तत्स्वादमास्वाद्योच्चैरदोऽवदत् ॥ ९६ ॥युग्मम्॥
द्रागिन्द्रियमयीं धीराः श्रवणे सृजत स्रजम् ।
अस्यैष श्लोकराजस्य प्रवेशो भवतीह यत् ॥ ९७ ॥
कार्यः सम्पदि नानन्दः पूर्वपुण्यभिदे हि सा ।
नैवापदि विषादश्च सा हि प्राक्पापपिष्टये ॥ ९८ ॥
इति श्लोकामृतं पीत्वा प्रीत्या नृत्यभृतामिव ।
श्रुतीनामाश्रयैरापि कम्पः केषां न मौलिभिः ॥ ९९ ॥
प्रीतिगौरवगौरेषु तदा पौरेषु दुःखिनम् ।
भूपभूरभ्यधाद्वाग्भिः सुबन्धुं मधुबन्धुभिः ॥ १०० ॥
नूनं त्वमसि मे पूर्वजन्मबन्धुर्यतस्त्वया ।
सूक्तपीयूषपानस्य भागेनास्मि न वञ्चितः ॥ १०१ ॥
धनं हरिकरिस्वर्णरत्नाद्यमिह माद्यति ।
विद्यते यत्र कुत्रापि स्पृहा तव गृहाण तत् ॥ १०२ ॥
इत्युदित्वा ससंमानममुं प्रैषीन्नृषाङ्गजः ।
दत्त्वा दुकूलकल्याणरत्नवारणधोरणीः ॥ १०३ ॥
तन्वन्दानानि दीनेषु गुणलीनेषु विस्मितः ।
ततो भूशक्रभूश्चक्रे श्लोकभावेशिकोत्सवम् ॥१०४॥
निर्गम्य दिनमुन्निद्रकवीन्द्रकुलकेलिभिः ।
असौ नक्तं नृदेवस्य सेवार्थं संमदी ययौ ॥ १०५ ॥
क्षणे ऽत्र क्षोणिनेतारमेत्य व्ययनियोगिना ।

अवाच्यत चमत्कुर्वच्चित्तो वित्तोच्चयव्ययः ॥ १०६ ॥
अथ क्रोधादिलाधारः कुमारमिदमचिवान् ।
विभवं विभुताप्राणान्मुधा मुग्ध किमुज्झसि ॥ १०७ ॥
आकरः परमः काव्यमणीनामनणीयसाम् ।
न स्यात्कशिपुमात्रस्य दानतः कानतः कविः ॥१०८॥
तत्किमेष तदुन्मेषमात्रगात्रव्यवस्थितिः ।
श्लोकः कनकलक्षस्य क्षयादङ्गीकृतस्त्वया ॥ १०९ ॥
वीजं लोकद्वयानन्दकारिणोः कामधर्मयोः ।
तृणवत्त्यजति व्यक्तबोधनः को धनव्रजम् ॥ ११० ॥
कलाविक्रमबुद्धीनामसाध्यमपि साधयेत् ।
यत्तद्वित्तमवज्ञानरूपे कूपे ऽपि कः क्षिपेत् ॥१११॥
द्रविणैः कृपणो ऽप्येति सेव्यतां महतामपि ।
सेव्यः स्वर्णाद्रिरुन्निद्रैः किं सदैव न दैवतैः ॥ ११२ ॥
गुणी रक्तो ऽपि मुच्येत क्षीणश्रीराश्रितैरपि ।
त्यजन्ति निशि निःश्रीकानलिनो नलिनोत्करान् ॥ ११३ ॥
ध्यात्वेत्यर्जयितुं वित्तं न स्वं कः संशये क्षिपेत् ।
अबालस्त्वमिवोत्तालः क इव व्ययति श्रियम् ॥ ११४॥
अथ पुंस्कोकिलालापकल्पामयमकल्पयत् ।
कुमारः पुण्यकान्तारसहकारतरुर्गिरम् ॥ ११५ ॥
शतशः सत्सु विद्वत्सु सत्काव्याभिगमः कुतः ।
वज्राकरे ऽपि सद्वज्रं निष्पुण्यैः क्वापि नाप्यते ॥ ११६ ॥
श्रद्धा धर्मस्य कामस्य प्रीतिरुत्पत्तिकारणम् ।
लोला तत्कर्मणि श्रीस्तु दासी कस्तत्र रज्यति ॥ ११७ ॥
लीलयैव कलासौर्यबुद्धयः साधयन्ति यम् ।

तमर्थं तदसाध्ये ऽपि साधकं कः सुधीर्दिशेत् ॥ ११८ ॥
अज्ञानकूपश्चिद्रूपैरर्थ एवोपदिश्यते ।
अशक्यं क्रष्टुमात्मानमत्र कस्तृष्णया क्षिपेत् ॥ ११९ ॥
निर्ग्रन्थो ऽपि विरक्तो ऽपि निर्गुणो ऽपि यतिः सताम् ।
सेव्यः स्याद्येन तज्ज्ञानं यतन्ते ऽर्जयितुं बुधाः १२० ॥
इत्यनादरणीयैः स्वैरसंख्यैरपि गृह्यते ।
सतामादरणीयश्चेज्ज्ञानलेशो ऽपि लभ्यते ॥ १२१ ॥
एवमुत्तरमुद्दामं ददाने नन्दने नृपः ।
कामं कामपि नोवाच वाचं रोषातिरूक्षदृक् ॥ १२२ ॥
अथोत्तस्थौ कुमारो ऽयं भूवल्लभसभान्तरात् ।
देशान्तरगतिध्यानतत्परस्तत्पराभवात् ॥ १२३ ॥
गुप्तः सुप्तं जनं मुक्त्वा पुरान्निशि विनिःसृतः ।
कुमारो वारिजव्यूहमिव व्योम्नो विभाविभुः ॥ १२४ ॥
खुरलीखेलनाभ्यासादजातक्रमणश्रमः ।
अलं चलन्नलङ्घिष्ट महीमेष महीयसीम् ॥ १२५ ॥
श्वापदाः स्वापकाले ऽपि महारण्ये महस्विनः ।
ज्वलदग्निधिया नासन्नासन्नास्तस्य कुत्रचित् ॥ १२६ ॥
ईदृग्नरा न रामत्वं वहन्ते को ऽप्ययं सुरः।
हेलया खेलतीत्येनं तस्करा न पराभवन् ॥ १२७ ॥
इति सत्त्ववतां धुर्यस्तुर्ये ऽहनि नृपाङ्गजः ।
धराहारो निराहारः श्रावस्तीं नगरीमगात् ॥ १२८ ॥
मध्यन्दिने दिनेशस्य कान्तिभिः क्लान्तिमागतः ।
श्रान्तस्तत्र विशश्राम कामस्यायतने ततः ॥ १२९ ॥
को ऽप्युज्ज्वलज्वलद्धामा सामान्यो न पुमानयम्।

इति ध्यानवशादेव देवंपूजिकया रयात् ॥ १३० ॥
आनीय शुचिपानीयकरकं नरकुञ्जरः ।
सफलीक्रियतां वीर नीरमित्यभ्यधायि सः ॥१३१॥युग्मम्॥
ता माधुरीधुरीणाः स वनरीणः पपावपः ।
प्रीतो भवभ्रमिश्रान्त इव तीर्थेशदेशनाः ॥ १३२ ॥
तदा संहर्षवाचालपिकीजालकुहूपमम् ।
रवं श्रुत्वा किमत्रेति तत्रेमां पृच्छति स्म सः ॥ १३३ ॥
सा जगौ राजगौराणां यशसां विनिवेशनम् ।
नृपः कृप इतीहास्ति रिपुहास्तिककेसरी ॥ १३४ ॥
तस्य कान्त्यधिकन्यासा कन्या सारङ्गशावदृक् ।
सौभाग्यमञ्जरीत्यस्ति सौभाग्यतरुमञ्जरी ॥१३५॥
मधा सुधाभुजां चक्षुरनिमेषत्वभूरभूत् ।
सा रम्यरूपपीयूषकूपिका न न्यरूपि यैः ॥ १३६ ॥
सर्वस्वं रूपपुण्यस्य कन्यारत्नमिदं महत् ।
बाल्येन यामिकेनेव यौवनायार्पितं यतः ॥ १३७ ॥
धीराख्यमन्त्रिधन्याख्यश्रेष्ठिकन्ये शुभे उभे ।
तस्याः सख्यौ कलाहृद्ये विद्येते तुल्ययौवने ॥ १३८ ॥
ध्यायन्राजसुतारूपे न्यायं घौणाक्षरं विधिः ।
शिल्पिसिद्धिपरीक्षार्थमिव ते व्यधिताद्भुते ॥ १३९ ॥
प्रियंवदासुताराख्ये सख्यौ ते सर्वकर्मसु ।
तां कदाचिन्न मुञ्चेते रतिकान्ती इव श्रियम् ॥ १४० ॥
त्रैलोक्यरमणीरूपसम्पदामिव देवताः ।
तिस्रो ऽपि कौशलं प्रापुः सकलासु कलासु ताः ॥१४१॥
श्रीतनूजस्य पूजार्थमायान्त्यन्वहमत्र ताः ।

तत्परीवारनारीणां रवः सम्यग्निशाम्यते ॥ १४२ ॥
इत्यस्यां विकसद्वाचि साचिचञ्चद्विलोचनाः ।
व्यलोक्यन्त कुमारेण योषितस्तोषितस्मराः ॥ १४३ ॥
तिस्रो नरविमानस्थास्तासु प्रैक्ष्यन्त कन्यकाः ।
तेनानङ्गक्षितीशस्य प्रत्यक्षा इव शक्तयः ॥ १४४ ॥
यनां मनोवनोत्सङ्गं ज्वलय्यन्कनकोज्ज्वलः ।
चक्राम कामदावाग्निरिवैष स्त्रीजनः शनैः ॥ १४५ ॥
दीपयद्भिर्नृसन्दोहहृदि मोहमयीं निशाम् ।
भासमाना निशानाथसमानांशुभिराननैः ॥ १४६ ॥
विवेककुसुमे लीनं सतां भृङ्गायितं मनः ।
कर्षद्भिर्नयनाम्भोजैर्भूषयन्तीर्भवार्णवम् ॥ १४७ ॥
मन्दयद्भिर्मुनीन्द्राणामपि जात्युज्ज्वलं यशः ।
शरीरधामभिः कामदीपिकाभिरिवाद्भुताः ॥ १४८ ॥
तिस्रो ऽपि शनकैः कन्याः समीपं समुपेयुषीः ।
ददर्श च कुमारस्ता मारस्य च वशं गतः ॥ १४९ ॥
चतुर्भिः कलापकम् ॥
तं च चञ्चत्प्रभाचक्रं नरशक्रं निरीक्ष्य ताः ।
मिथो ऽपि वचनं चारुस्मितसूचितमूचिरे ॥ १५० ॥
अस्मद्भक्तिगुणक्रीतः प्रीतः श्रीतनयः किमु ।
प्रासादान्निर्गतो मार्गत्यस्मान्मार्गमयं स्वयम् ॥ १५१ ॥
कर्तुं कश्चिदसौ कामसेवां देवाग्रिमः किमु ।
अभ्ययाद्बहुभालाभलोभलोलुभधीरिह ॥ १५२ ॥
अस्मभ्यं वा वरं दातुकामः कामः कमप्यमुम् ।
स्वतो ऽप्याधिकधामानमानयन्मानवं नवम् ॥ १५३ ॥

इत्युक्तियुक्तिभाजस्तास्तस्मिल्लीनदृशो भृशम् ।
उत्तेरुः कन्यका धन्यंमन्या नरविमानतः ॥ १५४ ॥
चतुर्भिः कलापकम् ॥
मुहुः पिहितमप्यङ्गं पिदधत्यों ऽशुकेन ताः ।
स्खलन्मृदुपदन्यासाः प्रासादक्रोडमासदन् ॥ १५५ ॥
दिदृक्षवो मुखं तस्य ह्रिया वीक्षितुमक्षमाः ।
नेत्रकोणावलोकस्य व्यधुः प्रारम्भमञ्जलम् ॥ १५६ ॥
भवद्भ्यां भासुरं रूपमीदृशं शुश्रुवे क्वचित् ।
इति प्रष्टुमिवाभ्यर्णं कर्णयोस्तदृशो ऽगमन् ॥ १५७ ॥
भावभिन्नां कुमारः स्वे तत्प्रवेशोत्सवे हृदि ।
ददौ दृशं भृशं नीलोत्पलस्रक्तोरणोपमाम् ॥ १५८ ॥
विलङ्घ्य दृक्पथं तस्य कथंचिदपि ता ययुः ।
तदधीनहृदो मीनकेतनायतनान्तरम् ॥ १५९ ॥
विरहस्य भियान्योन्यं रहस्यथ रहस्यवत् ।
सा मन्दमिदमाचख्यौ सख्यौ प्रति नृपाङ्गजा ॥ १६० ॥
कदापि प्रगुणप्रेमगुणबन्धनिबन्धनम् ।
न नो मनो ऽपि सम्भिन्नं डिम्भतारम्भतो ऽप्यभूत्॥१६१॥
पतिभ्यः पितृभिर्दत्ता भिन्नेभ्यो भिन्नजातिभिः ।
कथमाश्लथयिष्यामो वयस्यत्र वयस्यताम् ॥ १६२ ॥
अवियोगनियोगस्तद्यदि वां हृदि वाञ्छितः ।
एकश्चक्षुःसुधासेकस्तदयं दयितो ऽस्तु नः ॥ १६३ ॥
असमक्षं समस्तानां जनानां रजनाविह ।
वियोगपातभीत्याद्य क्रियते ऽस्य करग्रहः ॥ १६४ ॥
एवमुक्त्वात्तमौनायामेते दत्तः किमुत्तरम् ।

इत्याकुलहृदि क्ष्मापपुत्र्यां प्राह प्रियंवदा ॥ १६५ ॥
यत्त्वयोक्तं तदेवासीन्न देवि यदि मे ह्रहि ।
तत्त्वत्सख्यनिदानाय प्रेयसे श्रेयसे शपे ॥ १६६ ॥
इत्यस्या वचनस्यैव प्रतिशब्द इवाभवत् ।
शब्दस्तदा सुतारायां वदनोदरकन्दरे ॥ १६७ ॥
इत्थं मिथः कथासारसुधासारपरिप्लुतैः ।
मनोभिर्निर्मलैरेताः श्रीतनूजमपूजयन् ॥ १६८ ॥
अथागत्य बहिः कामस्तुतिप्रस्तुतिकैतवात् ।
इमाः कुमारमुद्दिश्य जगुर्मञ्जुगुणां गिरम् ॥ १६९ ॥
अस्मन्मनः स्थिरं नाथ यथा त्वयि तथा त्वयि ।
मात्राधिके प्रसादे ऽत्र स्थिरीभाव्यमहर्निशम् ॥ १७० ॥
इत्युक्तियुक्तिभिस्तासां कुमारः स्वं व्यचारयत् ।
क्षिपायामपि तत्रैव प्रसादे स्थापितं कृती ॥ १७१ ॥
ताश्चेलुरथ चक्षूंषि क्षिपन्त्यः पृष्ठतो मुहुः ।
स्मरार्चाचारुतादीपसत्ताद्यालोकनच्छलात् ॥ १७२ ॥
दीप्तस्मरानलज्वालापङ्कै रागरसैस्ततः ।
कुमारं चित्रवच्चित्रफलके न्यस्य ता ययुः ॥ १७३ ॥
अधिकं दधदौज्ज्वल्यं तापायैवाभवत्तदा ।
तासां मारश्च हारश्च कुमारश्च हृदि स्थितः ॥ १७४ ॥
भक्ते ऽसौ कामदः कामं काम इत्युक्तिभागथ ।
कुमाराय ददौ शेषान्मोदकान्देवपूजिका ॥ १७५ ॥
तदा कृततदाहारः कुमारः शुशुभे शुभैः ।
पुष्पेषुशेषताम्बूलपुष्पावलिविलेपनैः ॥ १७६ ॥
अथ तस्य च तासां च दक्षप्रभादण्डमण्डलैः ।

भानुर्नुन्न इव प्राप प्रत्यग्गिरिशिरस्तटीम् ॥ १७७ ॥
तेषां हृदि तदोद्दामः कामतापः स को ऽप्यभूत् ।
यज्जितेनेव सूरेण गतं दूरेण लज्जया ॥ १७८ ॥
बिभ्रदभ्रंलिहीभावं संध्याभ्रपटलच्छलात् ।
तेषां भृशं निशारम्भे जजृम्भे रागसागरः ॥ १७९ ॥
तदङ्गज्वलितानङ्गदावपावकजन्मभिः ।
अपूरि भूरिभिर्धूमैरिव ध्वान्तभरैर्नभः ॥ १८० ॥
इति क्रमान्निशीथिन्यां निशीथसमयस्पृशि ।
पौरेषु परितो निद्रामुद्रितेन्द्रियवृत्तिषु ॥ १८१ ॥
भूषिताभरणाः पाणिग्रहोपकरणान्विताः ।
तास्तिस्रो ऽपि ययुर्मीनिकेतनस्य निकेतनम्॥१८२॥युग्मम्॥
आगमिष्यन्ति ता नो वा भविष्यति न वात्र सः।
इत्याकुलहृदो ऽन्योन्यं ते ऽमिलन्संमदास्पदम् ॥ १८३ ॥
तैर्हृष्टैरथ तत्कालज्वालितज्वलनच्छलात् ।
दीप्यमानो बहिश्चक्रे हृदयाद्विरहो महान् ॥ १८४ ॥
भवाम्भोनिधिडिण्डीर[illegible]रविभ्रमभृत्प्रभे ।
चीवरे पीवरप्रेमप्रकर्षास्ते ऽथ पर्यधुः ॥ १८५ ॥
अमन्दमोदैर्मदनफलान्यथ करेषु तैः ।
कन्दर्पलतिकाकन्दबन्धुराणि बबन्धिरे ॥ १८६ ॥
अथ ताः प्रथितोत्साहः करे जग्राह कन्यकाः ।
विप्रयोगपयोराशौ निमज्जन्तीर्नृपाङ्गजः ॥ १८७ ॥
तेषां जिह्वासुधावल्लिपुष्पाण्यथ मिथः कथाः ।
जग्मुर्मधुमुचश्चारुवर्णाः कर्णावतंसताम् ॥ १८८ ॥
ततः प्रभातमिश्रायां तमिस्रायां निजं निजम् ।

ता निकेतं गताः स्वापं कुमुदिन्य इवासदन् ॥ १८९ ॥
एष्यद्रविभयान्निद्रा नलिनेभ्यः पलायिता ।
विशश्राम कुमारस्य तदा नेत्रारविन्दयोः ॥ १९० ॥
द्राग्दृष्टनष्टया स्पष्टं संध्यया सुधियो वपुः ।
सत्वरं गत्वरं मत्वा धर्मतत्त्वान्यधुस्तदा ॥ १९१ ॥
वीक्ष्यैव कुमुदे लक्ष्मीं क्षणात्क्षीणां विचक्षणाः ।
श्रियश्चलत्वं जानन्तो दानं तोषहृदो ददुः ॥ १९२ ॥
संयोगं विप्रयोगान्तं दृढयन् कोकदर्शनात् ।
सत्सु साधुजनः सम्यग्विदधे धर्मदेशनाम् ॥ १९३ ॥
सुप्तस्यापि समेति श्रीर्ममेव समये स्वयम् ।
तस्यै मा क्लिश्यतामब्जमितीवाख्यदलिस्वनैः ॥ १९४ ॥
पवित्रितधरित्रीकः पादन्यासैरिवांशुमान् ।
आकर्षत्तिमिराद्विश्वं दुःकृतादिव तीर्थकृत् ॥ १९५ ॥
अथ सुप्तां विवाहश्रीचिह्नां सौभाग्यमञ्जरीम् ।
वीक्ष्य क्षितिपतेराख्यत्कञ्चुकी चकितस्तदा ॥ १९६ ॥
केनापिं निंशि कन्ये नौ व्यूढे इति पतिः क्षितेः ।
एत्य तत्र क्षणे मन्त्रिश्रेष्ठिभ्यां व्यज्ञपि स्वयम् ॥ १९७ ॥
इहेदग्निविडं केन विडम्बनमिदं कृतम् ।
इति कोपाकुले भूपे को ऽप्येत्य पुरुषो ऽवदत् ॥ १९८ ॥
स्वामिन् कश्चन कन्दर्पायतने ऽनुपमः पुमान् ।
हृद्यश्रीर्विद्यतेसद्यःपाणिग्रहणवेषभाक् ॥ १९९ ॥
इत्याकर्ण्य तलारक्षमिलारक्षः क्रुधादिशत् ।
आगसां सागरो मङ्क्षु स बद्धानीयतामिति ॥ २०० ॥
अथ गत्वा तलारक्षस्तं दक्षो वीक्ष्य दोर्भृतम् ।

तूर्णमेत्य भयापूर्णः क्ष्माभुजङ्गं व्यजिज्ञपत् ॥ २०१ ॥
अस्ति विस्तीर्णदक्पाततृणीकृतजगत्त्रयः ।
तत्र स्वामिन्पुमान् कोऽपि द्वादशार्कनिभप्रभः ॥ २०२ ॥
रूपं निरुपमं तस्य निरूप्य निरुपाधिकम् ।
स्त्रीत्वाय स्पृहयत्येव देवानामपि मानसम् ॥ २०३ ॥
मन्ये तादृग्दृगुल्लासस्तादृग्युक्तादृगाकृतिः ।
अपीन्द्रमनसा मान्यो न सामान्यो ऽस्ति को ऽप्यसौ॥२०४
तदेकमपि सैन्येऽस्मिन्व्यूहो ऽप्यहं नहिं ।
असुं धर्तुं समर्थो ऽग्निकणं तृणगणो यथा ॥ २०५ ॥
इत्युक्तिविकटामर्षस्तत्कर्षणकृते नृपः ।
प्रैणीद्वीरम्सानन्यं सेनान्यं सेनया रयात् ॥ २०६ ॥
अथो रथेभपत्त्यश्वसेनाभिर्नाभिवद्वृतः ।
तरसा सरसोत्तालश्चचाल करवालभृत् ॥ २०७ ॥
राज्ञा सैन्यं त्वयि प्रैषि कथिते ऽपि जनैरिति ।
तदा तस्य न रोमापि नरोत्तंसस्य कम्पितम् ॥ २०८ ॥
बिभ्रद्भिरधिकं दर्पं कन्दर्पायतनं ततः ॥
अवेष्टत चमूशूरैः क्रूरैरात्मेव कर्मभिः ॥ २०९ ॥
उच्चनीचस्फुरच्छीर्षैः शूरैः शोणमुखै रुषा ।
कुमारो मुहुरालोकि कृकलासैरिवांशुमान् ॥ २१० ॥
एवमालोक्य सेनानीर्गृह्यतां गृह्यतामयम् ।
इति कोपानलज्वालां वाग्मालामुदलालयत् ॥ २११ ॥
इत्युक्त्या तस्य कल्पान्तवातवेगिनि धावति ।
वीरवारे कुमारेण मेरुणेव न चुक्षुभे ॥ २१२ ॥
स्थानत्यागे प्रियारागे भयभागे च तत्र सः ।

तं श्लोकं संस्मरन्भिन्नं न मनः कचन व्यधात् ॥ २१३ ॥
ते तु दैन्यमुचः सैन्यभटाः सर्वे ऽपि गर्विताः ।
कुमाराय क्रुधावन्तो धावन्तों दधुरन्धताम् ॥ २१४ ॥
ततः स्वमपि हस्ताग्रमपश्यन्तो ऽन्धदृष्टयः ।
पुरो यत्रापि तत्रापि स्खलनादवलम्बते ॥ २१५ ॥
भृशं विसंस्थुलां धीरा दधतः परितो गतिम् ।
अन्धा मिथो ऽप्ययुध्यन्त संमुखीनैर्द्विषद्धिया ॥ २१६ ॥
किं रे कन्यास्त्वया व्यूढा मूढेनेत्युद्धतोक्तिभिः ।
ताडितो ऽश्मपुमान्कैश्चित्प्राप्तः स्मरसुरौकसि ॥ २१७ ॥
तत्रावलम्बितं प्राप्य पाणिस्पर्शेन चामरम् ।
कुमारकेशबुद्ध्यान्ये ऽच्छिदन्दुर्वाक्यदुर्धराः ॥ २१८॥
के ऽपि कोपाकुलाःप्राप्य प्रौढाश्मकरिणः करम् ।
चक्रुर्दन्तदृष्टोष्ठाः कुमारेन्द्रभुजभ्रमात् ॥ २१९ ॥
इत्यनेकविधोद्दामसंग्राममयकौतुकः ।
चमवारः कुमारस्य चकार नयनोत्सवम् ॥ २२० ॥
एवं श्रुत्वा चमूचित्रमूचिवान्सचिवं नृपः ।
पुमानसावसामान्यः सन्मान्यानीयतामिति ॥ २२१ ॥
अथ गत्वा त्वरा वेशराजिना राजवाजिना ।
नास्मिन्वीरे विरोद्धव्यमित्यूचे सचिवश्चमूम् ॥ २२२ ॥
ईदृग्मन्त्रिगिरा शान्तमनसः पृतनाजनाः ।
सद्यो ह्यदृशः स्वस्मिन्मत्वा युद्धं ललज्जिरे ॥ २२३ ॥
सचिवस्तु विमुच्याश्वं गतः स्मरमरुद्गृहम् ।
अग्रे कुमारमारूढविनयां वाचमाचरत् ॥ २२४ ॥
धीरचूडामणे वीर गम्भीरगुणनीरधे ।

त्वन्मुखेन्दौ नृपश्चक्षुश्चकोरयितुमिच्छति ॥ २२५ ॥
उत्थानमेव भूमीपसमीपगतये ततः ।
विततार कुमारस्तद्गिरामुत्तरमुत्तरम् ॥ २२६ ॥
रथेन प्रथितेनाथ मन्त्रिनाथनिदेशतः ।
अगादगारं जगतीभुजङ्गस्य महाभुजः ॥ २२७ ॥
क्षमाजानिस्तमायान्तं सभान्तर्भान्तमंशुभिः ।
उपमानामनध्यायं निध्याय ध्यायति स्म सः ॥२२८॥
स धन्यः स सतां मान्यः पश्येद्यः सकृदप्यमुम् ।
बन्धुः श्रीबन्धुरो येषामेष तेषांतु किं ब्रुवे ॥२२९ ॥
तासां तु सफलं जन्म दूरे तासामनिर्वृतिः ।
प्रेम यासामसौ कामी सौहृदेन हृदेच्छति ॥ २३० ॥
ईदृग्ध्यानसुधापानरसमानसमानमत् ।
इलातलमिलन्मौलिः कुमारः कामुकं भुवः ॥२३१॥
ततः प्रीतिं परां बिभ्रदभ्युत्थाय धराधवः ।
दूरादुल्लासयन्पाणी वाणीमेतामुवाच तम् ॥ २३२ ॥
गुणमालिन्समालिङ्ग ममाङ्गानि समुत्सुकः ।
इमान्यमृतपानेन हसन्तु रसनेन्द्रियम् ॥ २३३ ॥
अथार्पितपरीरम्भं दोर्भ्यां संभाव्य भूविभुः ।
निवेश्य गुणसंकेतस्थानमङ्के तमभ्यधात् ॥ २३४ ॥
प्रवीर भवता हीरप्रतिवीरगुणैर्गुणैः ।
को वंशः सर्ववंशानामवतंसः कृतिन्कृतः ॥ २३५ ॥
स्वाभिधेयसुधासिक्तैरक्षरैरभिषिञ्चसि ।
भवदुःखाग्नितप्तानि सज्जनानां मनांसि कैः ॥ २३६ ॥
कैरस्मद्वसुधाभाग्यैराकृष्टेन त्वयाधुना ।

अकारि स्ववियोगेन खेदिनी मेदिनी च का ॥२३७॥
ईदृक्षवेषसंभाव्यस्तव पाणिग्रहोत्सवः ।
कस्याः सफलयामास जीवितं जन्म वर्ष्म च ॥ २३८ ॥
दृक्प्रिये ऽपि त्वयि प्रापुर्मद्गलानि किमन्धताम् ।
उलूकमण्डलानीव भासुरे वासरेश्वरे ॥ २३९ ॥
इत्युक्ते भूभुजाचख्यौ कुमारश्चरितं निजम् ।
क्रुद्धसैन्यान्धताहेतुं न वेद्मीति जगाद सः ॥ २४० ॥
अथ धात्रीशमन्त्रीशश्रेष्ठिश्रेष्ठैरतन्यत ।
प्रमोदप्रीणितं पुत्रीपाणिग्रहमहामहः ॥ २४१ ॥
श्लोकाप्तिबन्धुताप्रीतिबन्धुरेण सुबन्धुना ।
तदुक्तिश्रवणादेस्य कुमाराय ददे मदः ॥ २४२ ॥
कुमारस्य प्रसादेन धनं धात्रीश मे ऽधुना ।
इति विज्ञपनात्तेन विशेषात्तोषितो नृपः ॥ २४३ ॥
कुमारेण समं प्रीतिवार्ताभृतामिलामृतम् ।
एत्यापराह्णकाले ऽथ वनपालो व्यजिज्ञपत् ॥ २४४ ॥
स्वामिन्को ऽप्यद्य दक्षौघवारणश्चारणो मुनिः ।
उत्तीर्य व्योमतो ऽकार्षीत्कायोत्सर्गं वने ऽधुना ॥ २४५ ॥
इत्यभिश्रुत्य सत्कृत्य वनीशमवनीश्विता ।
ययौ समं कुमारेण मुनेरुत्कण्ठया वने ॥ २४६ ॥
नमस्यतो नरेशादीन्भव्यान्संभावयन्नथ ।
ज्ञानत्रयमयः कायोत्सर्गमप्यमुञ्चन्मुनिः ॥ २४७ ॥
देशनां भवकान्तारतापनिर्वापनोचिताम् ।
व्यधान्मुक्तिपुरद्वारसुधासिन्धुं यतिस्ततः ॥ २४८ ॥
सुबन्धोः स्वस्य च प्राच्यं कर्मवैचित्र्यकारणम् ।

भवं भूपभवो ऽपृच्छद्देशनान्ते नतो यतिम् ॥ २४९ ॥
मुनीन्दुरपि दन्तांशुच्छलप्रचलदञ्चलाम् ।
आन्दोलयत लोलायां दोलायामिव भारतीम् ॥ २५० ॥
श्रीहस्तिपुरमित्यस्ति भुवस्तिलकवत्पुरम् ।
सेव्यन्ते कृतकीर्त्यम्बुमज्जनैर्यज्जनैः श्रियः ॥ २५१ ॥
तत्रासीदहितत्रासी सुमित्र इति भूपतिः ।
यत्प्रतापप्रतानिन्या निन्ये भानुः प्रसूनताम् ॥ २५२ ॥
तस्य सूनुरभूद्विश्वसेनाख्यो विश्वभूषणम् ।
यः कलानां गुणानां च शङ्के सङ्केतकेतनम् ॥ २५३ ॥
अदुष्टयैव दृष्ट्या स स्वभावाविर्भवत्कृपः ।
ददर्श सर्पतः सर्पानपि दर्पातिपातिनः ॥ २५४ ॥
कदाप्यन्यायवल्लीनां मस्करे ऽपि न तस्करे ।
करुणाकरिणीविन्ध्यो वधबुद्धिं व्यधत्त सः ॥ २५५ ॥
अपराधपराधीने क्रोधासीने ऽपि विद्विषि ।
न कदाचिदसौ चक्रे मत्सरं विश्ववत्सलः ॥ २५६ ॥
चत्वारो ऽस्य कलासारसूरवीरजयाख्यया ।
मन्त्रिक्षत्रवणिग्वैद्यनन्दनाः सुहृदो ऽभवन् ॥ २५७ ॥
एभिः समं स मन्त्रीन्द्रपुत्राद्यैर्माद्यदुद्यमः ।
चतुर्भिः शुशुभे खेलन्धर्मैरात्मेव धीमतः ॥ २५८ ॥
स प्रैक्षत कृपाशीलो लीलोद्याने ऽन्यदा व्रजन् ।
चण्डालैश्चालितं कंचिच्छूलमूलचरं नरम् ॥ २५९ ॥
दशामीदृशमामच्छत्किमागः कलयन्नयम् ।
इति भूपभुवा पृष्टश्चण्डालपतिरालपत् ॥ २६० ॥
नभोरत्नसपत्नाभरत्नाभरणपेटिका ।

त्वन्मातुरमुनाहारि राज्ञासौ समहारि तत् ॥ २६१ ॥
मन्मातुर्वित्तहर्तायं हन्तव्यः स्वेच्छया मया ।
इत्युदित्वाथ तेभ्यस्तं कुमारश्चौरमग्रहीत् ॥ २६२ ॥
अन्यायाद्रह्यमाणा श्रीर्मणिः फणिपतेरिव ।
मर्त्येषु मोहमत्तेषु दत्ते मृत्युमसंशयम् ॥ २६३ ॥
आकृष्टिमन्त्रे लक्ष्मीणां पिष्टियन्त्रे महापदाम् ।
धर्मस्य जीवितप्राये मतिर्न्याये वितन्यताम् ॥ २६४ ॥
इत्युक्तया शिक्षयित्वायं कुमारेण मलिम्लुचः ।
वरचीवरदानेन तोषितः प्रेषितो ययौ ॥ २६५ ॥
त्रिभिर्विशेषकम् ॥
एकदा राजसेवार्थं व्रजन्राजगृहाजिरे ।
प्रभूतां मण्डलीभूतां भूपजः प्रैक्षत प्रजाम् ॥ २६६ ॥
किमत्रेति कुमारेण पृष्टः कोटीरयन्करौ ।
व्यक्तभक्तिकलदीक्षस्तलारक्षो जगाद गाः ॥ २६७ ॥
निजा निजघ्निरे येन विषयाश्छद्मसज्ञना ।
त्वरावत्पत्रसेनेन श्येनेनेव पतत्रिणः ॥ २६८ ॥
प्रच्छन्नपुंनियुक्तेन रसदानेन यः सदा ।
हन्ति नो दन्तिनो लीलाशैलानिव जयश्रियः ॥ २६९ ॥
जगत्यस्ति समस्तेऽपि नास्माकं यत्परः परः ।
सैष विक्रमसेनाख्यस्तामलिप्तीपुरीश्वरः ॥ २७० ॥
वीरसेनेन सेनान्या छलघाटिकया धृतः ।
क्षेपितः क्ष्माभुजा हन्तुमिह मन्तुमहोदधिः ॥ २७१ ॥
चतुर्भिः कलापकम् ॥
इति श्रुतिकृतक्रोध इवाकृष्टं प्रनर्तयन् ।

कृपाणं भृकुटीभीमभालः काककटाक्षवत् ॥ २७२ ॥
मन्तुमन्तममुं हन्ता हन्तायं भूपभूः स्वयम् ।
इति कौतूहलोत्तालालोके लोके स्थि ते ऽभितः॥ २७३ ॥
मृत्युर्ममायमायातीत्युद्वृत्ताकुलचक्षुषः ।
तामलिप्तीपुरीभर्तुरुपर्यागत्य वेगतः ॥ २७४ ॥
कृपाश्रुपूर्णदृक्प्रीत्या वपुः सपुलकं वहन् ।
असौ जगाद संबन्धबन्धुर्बन्धनमाच्छिनत् ॥ २७५ ॥
चतुर्भिः कलापकम् ॥
त्वरया ये मनांसीव मनसामपि रेजिरे ।
तैरश्वैर्विश्वसेनेन प्रेषितः स ययौ जवात् ॥ २७६ ॥
तत्परिज्ञाय विच्छायः कुपितो नृपतिर्जगौ ।
कुमारं प्रति सारङ्गपतिवन्निष्ठुरस्वरः ॥ २७७ ॥
येनैकेन हतेन स्याद्बहूनां देहिनां सुखम् ।
स वध्यः शुद्धबुद्धीनां कृपातिशयलिप्सया ॥ २७८ ॥
कृपा ते कूपपातेन किमियं न क्षयं गता ।
यद्विषं मुञ्चता देशः पातकिन् घातितस्त्वया ॥ २७९ ॥
कुर्वन्भूरि स्वदेशघ्ने निर्विवेकः कृपां रिपौ ।
त्वमप्यसि विपक्षो मे न स्थेयं मद्भुवि त्वया ॥ २८० ॥
इति व्याहृतिमाकर्ण्य कुमारस्तारसंमदः ।
स्फारविद्वच्चमत्काररचनं वचनं दधौ ॥ २८१ ॥
श्वसल्लँसन्ग्रसन्को न जन्तून् हन्ति सहस्रशः ।
तदेकस्य वधः कस्य प्राज्यप्राणिप्रियाय न ॥ २८२ ॥
एवं सति मतिप्रष्ठैर्बहूनां हृष्टिहेतवे ।
को हन्तव्यः क्व कर्तव्यः कृपावद्भिः कृपाकणः ॥ २८३ ॥

तन्मन्ये सर्वथा नाथ दुरवस्थागते ऽङ्गिनि ।
मित्रामित्राविचारेण प्राणित्राणं विधीयते ॥ २८४ ॥
सहन्त एव ये हन्त शत्रुं ते ऽपि शिवाध्वगाः ।
ये तु तत्रोपकुर्वन्ति तेषां गतिमवैति कः ॥ २८५ ॥
तद्विषं मुञ्चतस्तात क्व मे ऽभूदविवेकिता ।
क्व वास्मि द्वेषिपक्षो ऽहं त्वत्पादाम्बुजषट्पदः ॥ २८६ ॥
यदादिष्टं च देवेन मन्महीं मुच्यतामिति ।
तद्गतो ऽयमहं पापं पितुराज्ञाभिदं विदुः ॥ २८७ ॥
इत्युदीर्य महावीर्यः प्रस्थितो दूरदेशधीः ।
प्रतृषीवाम्बुजाद्धंसः पुंवतंसः स संसदः ॥ २८८ ॥
कृपायाः परमप्राणः परत्राणाय शुद्धधीः ।
यो ऽस्माकं हृदयाधारः स कुमारः क्व गच्छति ॥ २८९॥
पराभूतान्परैः पाति यो मातेव पितेव नः ।
जगतां जीविताधारः स कुमारः क्व गच्छति ॥ २९० ॥
जगन्त्यपि विजानाति यः स्वस्येव कुटुम्बकम् ।
पवित्रचरितोदारः स कुमारः क्व गच्छति ॥ २९१ ॥
शरीरं जीवितेनेव येनैकेन चकास्ति पूः ।
कृताखिलपरीहारः स कुमारः क्व गच्छति ॥ २९२ ॥
इत्याक्रन्दपरैर्मन्ददृग्भिरुत्खातचेतनैः ।
पौरैः प्रेक्षितसंचारः कुमारो निर्ययौ पुरात् ॥ २९३ ॥
पञ्चभिः कुलकम् ॥
निर्याते जीवितप्राये वीरे ऽस्मिन्गुणवेश्मनि ।
नगर्या नागराश्चक्रुरपस्नानमिवाश्रुभिः ॥ २९४ ॥
पौरे ऽनुगन्तुकामे ऽपि स्थिते क्षितिपतेर्भयात् ।

सुहृदस्ते महासत्त्वाश्चत्वारो ऽपि तमन्वगुः ॥ २९५ ॥
शुशुभे स स भूदशो यं यं सो ऽर्क इवागमत् ।
यं यं मुमोच स श्रीमान्स स निःश्रीकतां गतः ॥ २९६॥
विलङ्घ्य पञ्चभिः कंचिद्वनदेशं दिनैरसौ ।
कचिद्ग्रामे गतस्तस्थौ सरस्तीरे तरोस्तले ॥ २९७ ॥
तत्र क्षत्रवणिक्पुत्रौ शूरवीरौ वरत्वरौ।
ग्रामगर्भोत्किमप्यन्नं समादाय समागतौ ॥ २९८ ॥
तौ तु मन्त्रिभिषक्पुत्रौ कलासारजयौ रयात् ।
कारयांचक्रतुर्विश्वसेनं देवार्चनक्रियाम् ॥ २९९ ॥
अथ सो ऽतिथये पश्यन्दिशो मासोपवासिनम् ।
मुनिमैक्षिष्ट धन्यानां फलन्त्याशु मनोरथाः ॥ ३०० ॥
ततः स्वच्छन्दचतुरः पप्रच्छ चतुरः सखीन् ।
कुमारः पारणाहेतोरन्नं दातुमना मुनौ ॥ ३०१ ॥
क्षुधान्धैः सखिदाक्षिण्यमायाभावनया ततः ।
उक्तं वणिग्भिषग्मन्त्रिनन्दनैर्दीयतामिति ॥ ३०२ ॥
शूरस्तूत्साहवान्प्राह मन्ये धन्येतरैर्नरैः ।
पात्रमत्र क्षणे नेदृग्दृश्यं द्राग्दीयतामिति ॥ ३०३ ॥
अथाभ्युत्थाय भूनाथसूनुनाभ्यर्थितो मुनिः ।
दक्षो निर्दूषणं जानन्नन्नमादातुमुद्यतः ॥ ३०४ ॥
आनन्दार्णवकल्लोलशीकरायितदृक्पयाः ।
कुमारेशः समारेभे तस्मै दातुमनातुरः ॥ ३०५ ॥
दत्ते भोज्यार्थमात्रे ऽथ सूरः साकूतमभ्यधात् ।
कुमार त्वं कृपाधारः क्षुधातापिषु नापरः ॥ ३०६ ॥
विज्ञाय तदभिप्रायमपि साधौ निषेधति ।

कुमारः पुरुषाहारमानमन्नमदान्मुदा ॥ ३०७ ॥
वलमानस्य निःसङ्गपतेरङ्गमथैक्षत ।
कुमारः पश्चिमं स्फारदद्रुमण्डलमण्डलम् ॥ ३०८ ॥
समं स मित्रैर्भूजानिजानिर्जानितभोजनः ।
जयमुत्साहयन्साधुचिकित्सात्युत्सुको ऽभवत् ॥ ३०९ ॥
विश्वसेनकलासारौ शुश्रूषां चक्रतुर्यतेः ।
असज्जयज्जयः शूरवीरानीता महौषधीः ॥ ३१० ॥
इति क्रमेण निःक्रान्तरुजि संक्रान्तकान्तते ।
मुनौ संमदविश्रान्ते तमिस्रान्ते ऽचलन्नभी ॥ ३११ ॥
क्रमयामिकतावश्यवयस्यगणमध्यगः ।
क्षपायां विपिने क्वापि सुष्वाप क्ष्मापनन्दनः ॥ ३१२ ॥
तृतीययामिनीयामयामिके जयनामनि ।
प्रमादतः प्रसुप्ते ऽत्र दैवाद्दावानलो ऽज्वलत् ॥ ३१३ ॥
कुमारो द्राग्जजागार स्फुटद्वेणुघटास्वनैः ।
प्रमादसुप्तस्तत्त्वज्ञो लोकशोकरवैरिव ॥ ३१४ ॥
यावत्पश्यत्ययं तावद्दावानलशिखावलिः ।
नृत्यतीव वनं प्राज्ययोजनं प्राप्य भोजनम् ॥ ३१५ ॥
उत्थाप्य सुहृदौ यावत्करोत्येष पलायनम् ।
तावद्भभार निर्द्वारप्राकाराकारतां दवः ॥ ३१६ ॥
स निर्जिगमिषुर्दावात्किं तु निर्गन्तुमक्षमः ।
संभ्रमी बम्भ्रमीति स्म मिथ्यादृष्टिर्भवादिव ॥ ३१७ ॥
अनल्पाः सविपत्कल्पाः क्षिपन्कीला दवानलः ।
धूमैस्तमान्धयन्मोह इवाभव्यं कदाग्रहैः ॥ ३१८ ॥
कामं संकटयामास कृशानुस्तं क्रमान्मिलन् ।

परितः सरितः पूर इव द्वीपासिनं जनम् ॥ ३१९ ॥
यत्र तत्र जगामायं वयस्यास्तत्र तत्र ते ।
अन्वगुस्तं शुभात्मानं पुरुषार्थोदया इव ॥ ३२० ॥
तापव्यापदि संभ्राम्यन्स बभावात्मपञ्चमः ।
अक्षग्राम इवोद्दामव्यथाया विपिनश्रियः ॥ ३२१ ॥
चेलान्तं चिहुरान्तं च गृह्णन्कीलाग्रपाणिना ।
मुहुराच्छोटितो वह्निस्रसद्भिस्तैश्चपेटया ॥ ३२२ ॥
अगम्येषु प्रदेशेषु सर्वेष्वेकप्रदेशगान् ।
नृमांसस्वादलोभीव दावस्ताञ्जिह्वयालिहत् ॥ ३२३ ॥
तेषां कीलाग्रचकितैः संकुचद्भिः समन्ततः ।
अङ्गैरङ्गेष्विव तदा प्रवेष्टुमुपचक्रमे ॥ ३२४ ॥
रुद्धायां जीविताशायामाशाभिः सह वह्निना ।
क्षणे ऽत्र सुहृदः स्माह महीदयितनन्दनः ॥ ३२५ ॥
आकृष्ये मरुतेवाहमाकाशं प्रति संप्रति ।
आलिङ्गतं मदङ्गं तन्मा मृत्यौ विरहो ऽस्तु नः ॥ ३२६ ॥
अथ लग्नौ दृढं वीरजयौ पदसरोजयोः ।
कुमारस्य कलासारशूरौ तु करपद्मयोः ॥ ३२७ ॥
अमी समीरसंवर्तहृता इव चमत्कृताः ।
आत्तमुक्ता इव दवज्वालाभिः खमथागमन् ॥ ३२८ ॥
तापातुरस्फुरज्जन्तुपटलं ज्वलनं ततः ।
ते ऽपश्यन्पुरुषोत्तंसाः संसारमिव योगिनः॥ ३२९ ॥
अथो दवदवीयस्यां ते वयस्याः क्षितौ स्थितम् ।
स्वप्नोत्थितमिवात्मानं कलयन्ति स्म विस्मिताः ॥ ३३० ॥
यावत्किमिदमित्यन्तश्चिन्तां विरचयन्तिते ।

तावदाविराभूत्को ऽपि पुरः श्रीभासुरः सुरः ॥ ३३१ ॥
कमलाभमुखोन्मीलत्कलहंसकलस्वरः ।
स जगौ जगतीजानितनयं विनयान्वितः ॥ ३३२ ॥
शिक्षयित्वा त्वयामोचि चौरः कारुण्यगौर यः ।
सो ऽहं सद्धर्मनिर्माणादीदृशीं श्रियमश्नुयम् ॥ ३३३ ॥
विपन्निपतितं मत्वा त्वत्वामवधिनाधुना ।
प्राप्तो ऽस्मि प्राणदानेन क्रीतानां सभयो ह्ययम् ॥ ३३४ ॥
एवमुक्त्वा समित्रस्य वपुर्नृपतिजन्मनः ।
स चकार करस्पृशादतापं दलितश्रमम् ॥ ३३५ ॥
नाद्य प्रभृति दुःखस्य लवो ऽपि भविता तव ।
इत्युदित्वा स विद्योतैर्द्योतयन्द्यां तिरोदधे ॥ ३३६ ॥
ते ऽपि तोयरुहभ्रान्तभृङ्गीगीते ऽरुणोदये ।
कान्तारान्ताय संचेलुस्तच्चरित्रार्द्रचेतसः ॥ ३३७ ॥
तारेतरणितारुण्यकारुण्येन व्यलोकि तैः ।
आपतद्विपिनक्रोडे क्रोडानामाकुलं कुलम् ॥ ३३८ ॥
युद्धाय धावता यूथं पश्यता नश्यता मुहुः ।
खेदितं मेदुरेणाथ प्रोथिनाथेन केनचित् ॥ ३३९ ॥
कंचिदञ्चितकोदण्डमुद्दाण्डहयमण्डनम् ।
उत्किरीटं नरं मेक्ष्य कुमारस्तारमीर्जगौ ॥३४०॥युग्मम्॥
त्वमीशो ऽसि महाभाग महीभागस्य कस्यचित् ।
अङ्ग त्वङ्गलक्ष्याणि लक्षणानि वदन्त्यदः ॥ ३४१ ॥
राज्ञां द्विषो ऽप्यवध्यास्ते ये दधुस्तृणमानने ।
नृहंस हंसि तज्जन्तून्निर्मन्तूंश्च तृणाननान् ॥ ३४२ ॥
अकृताङ्गपरिष्कारा: सदाचारा वनौकसः ।

मुनीन्द्रा इव विद्राव्याः पशवो न विवेकिना ॥ ३४३ ॥
हन्ति जन्तुः पुरा हन्तृनेभिरग्रे च हन्यते ।
तद्वध्यरक्षया दक्षः स्वैरं स्याद्वैरपारगः ॥ ३४४ ॥
कां योनिं न जगामायमात्मा प्रतिकुल किल ।
तत्सर्वस्यापि सर्वो ऽपिं बन्धुर्वध्यो ऽस्तु कस्य कः॥३४५॥
इति क्षत्रत्वधर्मित्वनीतिसौजन्यजन्यया ।
कृपया नृपकोटीर रक्ष्यतां रक्ष्यतां पशुः ॥ ३४६ ॥
इत्युक्तिश्रुतिहृष्टो ऽयमुत्तीर्य त्वरया हयात् ।
लुठन्कुमारपादारविन्दयोरिदमब्रवीत् ॥ ३४७ ॥
त्वत्प्रेष्यस्यापि मे जन्तुजातघातकृतागसः ।
त्वयि नित्यक्षमाभाजि क्षमस्वेति न भाति वाक् ॥ ३४८॥
अथवाहं तवालोकविगलद्वृजिनव्रजः ।
न किंचित्क्षमये साक्षान्नीरुजां किमु जायुभिः ॥३४९॥
कुमार नृपतिद्वारि बद्धस्य लुठतः क्षितौ ।
तदा प्राणप्रदानेन त्वया मे जनकायितम् ॥ ३५० ॥
तामलिप्यां पुरि स्वाम्यं ततः स्वामिन्नुरीकुरु ।
इहैश्वर्यं न मे युक्तं पितरीव त्वयि स्थिते ॥ ३५१ ॥
अथामुं तामलिप्तीशं जानन्भूजानिनन्दनः ।
उत्थाप्य प्रीतिवर्यश्रीः पर्यरब्ध प्रमोदिनम् ॥ ३५२ ॥
निजदेशपरीवारपरीहारनिबन्धनम् ।
अथाख्यत्पृच्छते सो ऽस्मै कुमारः कारणान्तरम् ॥ ३५३॥
अथ स्फारास्यफेनासु हयसेनासु हेषया ।
हसन्तीष्विव चेतांसि समेतासु त्वराभरात् ॥ ३५४ ॥
अमूढतुरगारूढं प्रौढभक्तिर्धराधिपः ।

कुमारं ससुहृद्वारं नगराय निनाय तम् ॥ ३५५ ॥युग्मम्॥
हस्तपादाग्रलग्नेन भूपेन व्यक्तभक्तिना ।
लक्षणानां गणेनेव स राज्ये ऽध्यासितो बलात् ॥ ३५६॥
वेत्रीभूय पुरः प्रीत्या नरदेवः स्वसेवकान् ।
पदद्वयं कुमारस्य नमस्कारयति स्म सः ॥ ३५७ ॥
एवं सेव्यपदो विश्वसेनस्तेन महीभुजां ।
धामभिस्तामसौ तामलिप्तीं चिरमभूषयत् ॥ ३५८ ॥
इत्यशेषं निशम्यास्य चरेभ्यश्चरितं नृपः ।
सुमित्रः पिप्रिये पुत्रपुण्यपात्रत्वनिश्चयात् ॥ ३५९ ॥
यास्यता जनकेनाथ योगभोगधिया वनम् ।
अयमाकार्य नाकेन्द्रप्रतापः क्ष्मापतिः कृतः ॥ ३६० ॥
सुहृद्भिः सह हृद्भित्तिचित्रितान्योन्यमूर्त्तिभिः ।
स चकार चिरं राज्यं सुकृतैककृतोद्यमः ॥ ३६१ ॥
महीभोगमहीनं ते भुञ्जानन्ते सुरौकसि ।
जग्मुः पञ्चापि तत्रापि मैत्र्यपात्रंमिमे ऽभवन् ॥ ३६२ ॥
क्रमात्समस्तमप्येते पीत्वा स्वर्गसुखामृतम् ।
तदर्जनधियेवोर्वीतलं पुनरवातरन् ॥ ३६३ ॥
स जीवो विश्वसेनस्य रतिसार भवानभूत् ।
जीवस्तु क्षत्रपुत्रस्य सुबन्धुत्वमधारयत् ॥ ३६४ ॥
जयवीरकलासारजीवाः सौभाग्यमञ्जरी ।
प्रीयंवदा सुतारा च कन्याः संजज्ञिरे पुनः ॥ ३६५ ॥
चञ्चद्गुणप्रपञ्चानां पञ्चानामपि तेन वः ।
जयत्ययं पृथुस्थेमा प्रेमा प्राग्भवसंभवः ॥ ३६६ ॥
जयाद्यैर्यन्मुनौ दानं मायया नुमतं तदा ।

भाग्ये भोग्यस्य तुल्ये ऽपि स्त्रीत्वं तेषामिदं ततः ॥ ३६७ ॥
त्रयणां हृदयं तेषामजानन्नन्नदानकृत् ।
आहारस्यान्तरायेण त्रिदिनं दुःखभागभूः ॥ ३६८ ॥
अर्धाहारे मुनीन्द्राय दत्ते यत्ते पुरस्तदा ।
कुमार त्वं कृपाधारः क्षुधातापिषु नापरः ॥ ३६९ ॥
इति स्तुतिवचोभङ्ग्या क्षुधार्तं स्वं निवेदयन् ।
अल्पेतरान्नदानस्य निषेधं क्षत्रमूर्ध्यधात् ॥ ३७० ॥
सुबन्धोरर्धभुक्तैव तेन श्रीर्मुखतश्च्युता ।
पक्षिणः फलवत्स्फारं विषादं ददती हृदि ॥ ३७१ ॥
त्रिभिर्विशेषकम् ॥
यद्भवद्भिर्भवभ्रंशक्रमप्रथमसाधकम् ।
चक्रे विरुग्मुनेरङ्गं तद्वो रूपर्द्धिरीदृशी ॥ ३७२ ॥
त्वमपश्यः पुरा दृष्ट्या यदुष्टानप्यदुष्टया ।
त्वया कालमुखात्कृष्टा यत्प्राज्या हन्त जन्तवः ॥ ३७३ ॥
तत्त्वां प्रत्यधुना को ऽपि विरोधं विदधाति न ।
ये च किंचिद्विरुध्यन्ते दधते युधि ते ऽन्धताम् ॥ ३७४ ॥
युग्मम् ॥
ददाति देहिनां पुण्यं कानि कान्यद्भुतानि न ।
अपि देवा यदेवाप्य भवन्त्याश्चर्यभूमयः ॥ ३७५ ॥
एवं प्राग्भवमाकर्ण्य रतिसारे रतिस्पृशि ।
भूपो भक्तिनमन्मौलिरित्यपृच्छन्मुनिप्रभुम् ॥ ३७६ ॥
लक्षणानि निरीक्ष्यन्ते क्षोणिरक्षाक्षमाणि ते ।
अद्यापि चारुतारुण्यो भगवन्भासते भवान् ॥ ३७७ ॥
वयसीह ततस्तप्ततरुणीकरुणोचिते ।
अपि राज्यमभित्यज्य किमात्मा तपसे ऽर्पितः ॥ ३७८ ॥

अथ दन्तांशुसंदोहच्छद्मना देहिनामिव ।
अनर्तयद्गिरं रङ्गन्मृदङ्गाभध्वनिर्मुनिः ॥ ३७९ ॥
तारुण्यं वा जरा वास्तु वास्तवः कस्तपःक्षणः ।
यत्र वा तत्र वा मृत्युरनवस्थो हि देहिनाम् ॥ ३८० ॥
राजञ्जरसि शक्तिः क क च शक्तिं विना तपः ।
परिव्रजञ्जनस्तस्यां बोधं नयति मोहताम् ॥ ३८१ ॥
शक्तिकार्याणि कार्याणि जरायां प्रारभेत यः ।
तस्यं प्रहस्यते बुद्धिः पलितच्छलतस्तया ॥ ३८२ ॥
मृत्योश्चामरधाणिया भान्त्या पलितचामरैः ।
जरसालिङ्गितस्यास्तु फलदा कस्य धर्मधीः ॥ ३८३ ॥
मोहमत्तद्विपालानतरुस्तरणिमा पुनः ।
मदक्लिन्नो न कस्यैष स्यात्कुकर्मालिमालितः ॥ ३८४ ॥
अमुं लीलास्पदीचक्रे विवेको केशरीव मे ।
आगत्य वर्त्मना येन तदपूर्वं निवेद्यते ॥ ३८५ ॥
श्रीसूर्यपुरमित्यस्ति पुरं यत्रास्तिको जनः ।
धत्ते धर्मनृपक्रीडाकल्पद्रुभवनश्रियम् ॥ ३८६ ॥
इहाजनि महीजानिर्महेन्द्र इति विश्रुतः ।
अन्तर्बहिर्द्विषज्जैत्रं शास्त्रं शास्त्रं च यो दधौ ॥ ३८७ ॥
कुलोचितासु विद्यासु गुरुभिः कारितश्रमः ।
तस्याहं नन्दनश्चन्द्रयशा इत्याभिधामधाम् ॥ ३८८ ॥
हर्षी षोडशवर्षीयं सुधावर्षी गिरां भरैः ।
भवतापी कदापीदं मामुपांशु नृपो जगौ ॥ ३८९ ॥
राज्यं संसारकान्तारे शृङ्गाटो ऽयमटन्निह ।
कलितस्खलितः श्रीभिः पिशाचीभिः प्रपात्यते ॥ ३९० ॥

वहन्ति मणयो मोहमहीपमहदीपताम् ।
यल्लोभलोलुभा नाथः के पतन्ति पतङ्गवत् ॥ ३९१ ॥
तितीर्षवो भवाम्भोधिं बोधिबोहित्थवाहिताः ।
त्यजन्ति दूरतो मध्यभूधरानिव सिन्धुरान् ॥ ३९२ ॥
भवाटवीकुरङ्गाणां तुरङ्गाणां चलात्मनाम् ।
मोहश्रीदृग्विलासानां गोचरे नो चरेत्कृती ॥ ३९३ ॥
मोहभूमिभुजङ्गस्य जङ्गमास्थानमण्डपम् ।
छायाच्छलात्तले व्याप्तं पातकैस्तस्य सेवकैः ॥ ३९४ ॥
छत्रं विवेकमार्तण्डप्रकाशभरनाशकम् ।
न को ऽपि सेवते तादृग्जडताचकितः कृती ॥ ३९५ ॥
युग्मम् ॥
रत्नान्यगाधवर्तीनि स्त्रियो भान्ति भवार्णवे ।
पुमान्मज्जत्यनुन्मज्जो यत्पाणिग्रहणाग्रही ॥ ३९६ ॥
एतदीदृग्विधं मोक्तुमशक्तः सकलः कृती ।
असक्त एव सेवेत भीतभीत इवानलम् ॥ ३९७ ॥
तदिदानीमहं मोहादतो निर्गन्तुमुद्यतः ।
राज्ञां राज्यश्रमः सूनुर्यौवनान्तो हि नः कुले ॥ ३९८ ॥
तातो मामिव वत्स त्वां स्वस्थाने ऽस्मिन्निवेश्य तत् ।
मोहवीरस्य कारातः संसाराज्निरये ऽधुना ॥ ३९९ ॥
इत्युक्त्वा बलतो राज्याभिषेकं विरचय्य मे ।
नृपो लक्ष्यतपोलक्ष्मीयौवनं प्रययौ वनम् ॥ ४०० ॥
परिपालयतो राज्यं ममापि क्ष्मापशिक्षया ।
राज्ञी रत्नावली नाम प्राणेभ्यो ऽपि प्रियाऽभवत् ॥ ४०१ ॥
भवानुबन्धिनी जानन्नपि तां तद्गतं मनः ।

आक्रष्टुं न क्षमो ऽभूवं पङ्कमग्नमिव द्विपम् ॥ ४०२ ॥
लग्नं तस्यां तथा प्रेमवज्रलेपेन मन्मनः ।
न यथाकर्षि राज्यश्रीधुरीणैरपि वारणैः ॥ ४०३ ॥
तस्यामुच्छृङ्खलं कामपिशाचेन मनो मम ।
गृहीतं हन्त नामोचि मन्त्रज्ञैरपि मन्त्रिभिः ॥ ४०४ ॥
तदेकायत्तचित्तस्य राज्यश्रीरीर्ष्यया मम ।
परहस्तं यती तस्थौ वृद्धामात्यह्रिया हृदि ॥ ४०५ ॥
मानसे मानसेविन्या तया नित्याश्रिते ऽविशन् ।
स्त्रीसंघट्टभयेनेव न धर्मगुरवो ऽपि मे ॥ ४०६ ॥
इत्यनन्यमना धन्यंमन्यस्तन्न्यस्तलोचनः ।
अमन्ये मान्मथं पर्व निर्वाणपदमप्यदः ॥ ४०७ ॥
अन्यदा मदनानन्दरसनिद्रावशंवदः ।
स्वमपश्यमहं स्वप्ने मुक्तागिरिशिरश्चरम् ॥ ४०८ ॥
तस्यामुन्निद्रनिद्रायामुन्निद्रो ऽहं तदा हृदा ।
अचिन्तयमिदं चिन्तान्तरावसरशालिना ॥ ४०९ ॥
स्वप्नः सर्वोत्तमस्तावन्मुक्तेर्लाभं दिशत्यसौ ।
किं तु कान्तावशहृदः क तत्संभावनापि मे ॥ ४१० ॥
किंकुर्वत्काञ्चना कान्तिस्तृणन्मत्तगजा गतिः ।
दासदृश्वा दृगुल्लासाः कर्करन्मणयो नखाः ॥ ४११ ॥
चेटत्कर्पूरकस्तूरिमुख्यगन्धो मुखानिलः ।
यस्या रेणुकणद्विव्यदुकूला दशनद्युतिः ॥ ४१२ ॥युग्मम्॥
युक्तं तयैकया हन्मे राज्यभोगे श्लथीकृतम् ।
एतद्भोगं श्लथीकर्तुं को ऽभ्युपायो ऽस्तु मे ऽधुना ॥४१३॥
किमस्या न महानीललीलां दधतु कुन्तलाः ।

हृद्वर्तिभिः कलुषितं श्रुतं मे क्षीरहारि यैः ॥ ४१४ ॥
किममुष्या मुखं नेन्दुर्यल्लीलामीलितं मम ।
विवेकमब्जवद्वीक्ष्य हंसगौरैर्गतं गुणैः ॥ ४१५ ॥
अस्या नीलाब्जसदृशो दृशो नित्यधृतस्मिताः ।
शंसन्ति तत्त्वविज्ञानभानुमस्तमितं मयि ॥ ४१६ ॥
अधरो मधुमाधुर्यधुर्यो ऽस्या यद्वशं भृशम् ।
प्रमत्तं मन्मनो ऽमुञ्चन्दूरतः सूरयो रयात् ॥ ४१७ ॥
एतस्याः कम्बुवत्कण्ठो गम्भीरमधुरस्वरः ।
कृत्स्नानां मम कृत्यानां प्रयागायैव कल्पितः ॥ ४१८ ॥
अप्येतन्मृदुदोर्नालपाशबद्धं निजं मनः ।
नाहं मोचयितुं शक्तो धिगसारनराग्रणीः ॥ ४१९ ॥
लीलयैव विलङ्घे ऽहमहो भवमहाटवीम् ।
तस्यामस्यास्तु दुर्लङ्घो वेणिदण्डो हृदापि मे ॥ ४२० ॥
सर्वतो ऽपि भवाम्भोधिः सुतरः सुतरामसौ ।
इहैतन्नाभिगम्भीरावर्तबन्धस्तु दुस्तरः ॥ ४२१ ॥
एतत्सिञ्जानमञ्जीरगतचित्तस्य विस्मृता ।
हंसस्येवामलौ पक्षौ धिग्ममोर्ध्वगतिक्षमौ ॥ ४२२ ॥
इत्यादिध्यानसंलीने मयि स्वं निन्दति स्वयम् ।
अपठन्प्रातरुत्तालस्वरं वैतालिका बहिः ॥ ४२३ ॥
निद्रां नरेन्द्र मुञ्चाशु बोधस्य समयो ह्यसौ ।
हन्तुं तमो ऽभ्ययाद्भानुः संमोहमिव सद्गुरुः ॥ ४२४ ॥
एनामुपश्रुतिं मुक्तिसूचिनीं बन्दिनां गिरम् ।
स्वप्नसंवादिनीं जानन्नानन्दमहमासदम् ॥ ४२५ ॥
क्षणे ऽस्मिञ्जाग्रती साग्रे प्रेक्ष्य मां प्रथमोत्थिम् ।

हीनघ्रास्या वचः किंचिन्नोचे मयि चटूचितम् ॥ ४२६ ॥
अगाधबोधिदुग्धाब्धिसंमुखान्तरचक्षुषा ।
समभाषि मयाप्येषा न किंचिन्मर्मभाषया ॥ ४२७ ॥
अथाग्रभागमागत्य प्रणिपत्य च मां मुदा ।
व्याजहार प्रतीहारी हारीकृतरदद्युतिः ॥ ४२८ ॥
देव विज्ञपयत्येवममात्यो मतिसागरः ।
चिराद्भवन्मुखालोककौतुकी सेवको जनः ॥ ४२९ ॥
इति तद्वचनान्ते ऽहं नित्यप्रत्यूषकृत्यकृत् ।
सेवितां सेवकस्तोमैः सभामुवमभासयम् ॥ ४३० ॥
ततः प्रणमतः सर्वानुर्वीनाथान्निरूपयन् ।
वीक्ष्य कस्यापि हस्ते ऽब्जं तामब्जदृशमस्मरम् ॥ ४३१ ॥
वचोवीचीषु पीयूषसधीचीषु मनीषिणाम् ।
तदा तद्विरहोत्तप्तं न रेमे तत्र मे मनः ॥ ४३२ ॥
उत्कः क्षिपाम्यहं चक्षुर्यावदन्तःपुरं प्रति ।
तावच्चारुतनुं काँचिदुदञ्चदतुलद्युतिम् ॥ ४३३ ॥
गाढग्रन्थिपरीधानं कटिवेष्टोत्तरीयकम् ।
अंसलम्बितनिस्त्रिंशमुरोबद्धासिधेनुकम् ॥ ४३४ ॥
बिभ्राणं दक्षिणे पाणौ ताम्बूलदलमण्डलीम् ।
वामे तया तु हर्षिण्या कृतहस्तावलम्बनम् ॥ ४३५ ॥
चक्षुषाधैर्यधुर्येण पश्यन्तं मामवज्ञया ।
नरं निरूपयामास निर्गच्छन्तं द्रुतैः पदैः ॥ ४३६ ॥
चतुर्भिः कलापकम् ॥
क एष क्व नयत्येतामिति कोपारुणेक्षणम् ।
मामित्यूचे हसन्ती सा तं स्थिरीकृत्य सत्वरम् ॥ ४३७॥

अहं महापातकिना वन्दीचक्रे चिरं त्वया ।
प्रयामि संप्रति न्यस्य त्वदीयहृदये पदम् ॥ ४३८ ॥
ईदृक्तद्वचनक्रुद्धो भटानित्यहमभ्यधाम् ।
ध्रियतां ध्रियतामेष हन्यतां हन्यतामयम् ॥ ४३९ ॥
ततो मरुत्त्वरातारप्रचरच्चरणः क्षणात् ।
तया सह स हर्षिण्यागमद्गृहबहिर्महीम् ॥ ४४० ॥
एष यात्येष यातीति प्रत्यानैरनुधावताम् ।
पुरःस्था अपि पौरास्तं न धर्तुं शेकुरादृताः ॥ ४४१ ॥
उत्फुल्लफेनया धावद्धयानां सेनया मया ।
मनसेवेन्द्रियग्रामः सो ऽन्वगामि प्रवेगिना ॥ ४४२ ॥
पर्यन्तं पर्यटन्पुर्यास्तदन्वेषपरः पुरः ।
आलोकयं चमूं कांचित्काश्चनोद्भासिभूषणाम् ॥ ४४३ ॥
तदन्तर्भद्रदन्तीन्द्रपृष्ठारूढस्य कस्यचित् ।
करे तेनार्पि सा सो ऽपि तां वामाङ्के न्यवीविशत् ॥ ४४४॥
सा च वाचः सुदूरस्थं मां वीक्ष्य स्त्रीत्वलम्पटा ।
तदङ्गालिङ्गनी वामकराङ्गुष्ठमनर्तयत् ॥ ४४५ ॥
तन्निरीक्ष्य विलक्षो ऽहमेतच्चेतस्यचिन्तयम् ।
अहो महोदधिर्मोहमाहिन्नां महिलाजनः ॥ ४४६ ॥
मदिराया गुणज्येष्ठा लोकद्वयविरोधिनी ।
कुरुते दृष्टमात्रापि महिला ग्रहिलं जनम् ॥ ४४७ ॥
परापकाराहंकारि किं विषं सन्ति हि स्त्रियः ।
यत्सेवनभवस्तापः परत्रापि न शाम्यति ॥ ४४८ ॥
स्त्रियां विषतनौ दक्षा लक्षणावैपरीत्यतः ।
सुधाकराद्यैरौपम्यं ददुस्तन्न जडा विदुः ॥ ४४९ ॥

विश्वासघातनां मौलिरत्नं जानामि योषितः ।
नरकाब्धौ नरं प्रेम्णा परिरभ्य क्षिपन्ति याः ॥ ४५० ॥
अबला इति न स्त्रीभिः कर्तव्यं हस्तमेलनम् ।
हरन्ति जीवितं पुंसां संशये च क्षिपन्ति याः ॥ ४५१ ॥
इयं हि मम रक्तस्य प्रतीचीव विवस्वतः ।
मानम्लानिं ददौ कां तु गतिं दातेति वेत्ति कः ॥ ४५२ ॥
धिग्मामेतद्वशित्वेन शिवोदयनिरादरम् ।
घूकनेत्रमिव ध्वान्तमित्रत्वेनार्कनिःस्पृहम् ॥ ४५३ ॥
एतद्वैराग्यतो नैतद्वैरं मुञ्चे ऽधुना पुनः ।
कुलस्यापि कलङ्कः स्यादपमानो हि मानिनाम् ॥ ४५४ ॥
यः प्रदत्ते हृदि पदं तमूर्ध्वं गिलति क्षणात् ।
अपमाने ऽप्यनुद्योगी पङ्कादप्यधमः पुमान् ॥ ४५५ ॥
क्षुद्रोऽप्युपद्रवं कुर्यान्निकाममपमानितः ।
विदधुर्मधुहर्तारं बिधुरं मधुमक्षिकाः ॥ ४५६ ॥
गृह्णन्तं रससर्वस्वं भास्वन्तं प्रत्यपक्रियाम् ।
कांचित्कर्तुमशक्तस्य पङ्कस्यापि स्फुटत्युरः ॥ ४५७ ॥
दूरे त्यजति मातापि परावज्ञासहं नरम् ।
क्षममप्यक्षमैर्बद्धं गर्जं विन्ध्याटवी यथा ॥ ४५८ ॥
तदेतस्यापमानाब्धेः पारं गत्वासिनौकया ।
संसारार्णवपाराय भजिष्ये पोतवद्व्रतम् ॥ ४५९ ॥
अपमाने ऽपि चेद्दृढे व्रतं तन्मे निदर्शनात् ।
मत्पूर्वेषामपि भवत्येषा संभवना व्रते ॥ ४६० ॥
यावदित्युद्धतध्यानस्त्यानचित्तो ऽस्मि युद्धधीः ।
सैन्यसर्वाभिसारेण मन्मन्त्री तावदागमत् ॥ ४६१ ॥

ततो ऽन्तरस्फुरद्भूताविर्भूताद्भुतवैरयोः ।
मम तस्य च सेनाभिः समरः समवर्तत ॥ ॥ ४६२ ॥
मिथो रथो रथं नागं नागो ऽश्वो ऽश्वं भटं भटः ।
समियाय समीकाय स्वकायव्ययनिर्भयः ॥ ४६३ ॥
समनम्यत कोदण्डैः खड्गदण्डैरकम्प्यत ।
तत्र रौद्रे रणोद्रेके नृ शौर्योद्भटैर्भटैः ॥ ४६४ ॥
वपुषो निखिलस्यापि शक्त्या मुष्टिप्रविष्टया ।
दृढयन्तः प्रहरणान्यहितान्प्राहरन्भटाः ॥ ४६५ ॥
तादृग्युद्धश्रिया धन्यंमन्यो मन्योर्वशं गतः ।
प्रहारेषु लगत्स्वङ्गं भटः कण्टकितं दधौ ॥ ४६६ ॥
विलुठत्तुरगव्रातं पतन्मातङ्गमण्डलम् ।
त्रुटच्छकटसंधानबन्धं नृत्यत्कबन्धकम् ॥ ४६७ ॥
लोलत्कीलालकल्लोलमालिनीमण्डलं ततः ।
पक्षद्वयक्षयकरं प्रावर्धत रणक्षणम् ॥ ४६८ ॥ युग्मम् ॥
भ्राजिष्णुभूरितेजस्कैः क्रमान्मत्पृतनाः परैः ।
कर्शयामासिरे ग्रीष्मवासरैरिव रात्रयः ॥ ४६९ ॥
राजवाह्यमथारुह्य जवादिभविभुं विभीः ।
अहं तेन सह क्रुद्धो द्वन्द्वयुद्धोत्सुको ऽमिलम् ॥ ४७० ॥
मयि मुञ्चति नाराचवीचीर्दक्षेण रक्षितः ।
तेनात्मा च गजेन्द्रश्च तलवर्गश्च मार्गणः ॥ ४७१ ॥
स तु निर्नाशयामास मार्गणानां गणैः क्षणात् ।
मद्बलं सकलं भानुर्भचक्रमिव भानुभिः ॥ ४७२ ॥
यद्यदस्त्रं मयामोचि तत्तदेष क्षणादपि ।
छेकश्चिच्छेद सद्यस्कं भवत्कर्मेव केवली ॥ ४७३ ॥

पतत्यथ तदस्वार्ते गजे क्षीणाखिलायुधः ।
अस्त्रयन्मुष्टिमुत्प्लुत्यागमं तदिभमूर्धनि ॥ ४७४ ॥
धृत्वाथ हस्तयोस्तेन क्षिपन्पादाहतीरहम् ।
उत्क्षिप्तः पतितो दूरे यन्त्रोत्थग्रावगोलवत् ॥ ४७५ ॥
सहसा सह सेनाभिः प्राविशन्मत्पुरं स तत् ।
तन्वन्साकं तयोत्तालहस्ततालः कथा मिथः ॥ ४७६ ॥
एवमालोकमानो ऽहमपमानोच्चयाकुलः ।
इष्टमिष्टतमेभ्यो ऽपि गणयन्मरणं तदा ॥ ४७७ ॥
यद्यस्ति सुकृतं किंचिन्मम तत्तन्निदानतः ।
मा भूद्भवान्तरे ऽपि स्त्रीसङ्गः सत्पथभङ्गकृत् ॥ ४७८ ॥
इत्यालपन्पुरः प्रेक्ष्य कूपं तत्र पपात च ।
सभान्तर्भद्रपीठस्थं स्वं ददर्श च पूर्ववत् ॥ ४७९ ॥
ये युधि क्रुधि दुर्धर्षाः क्षताः प्रपतिता मृताः ।
तानक्षतानहं संसद्यपश्यं पार्श्वतो भटान् ॥ ४८० ॥
ये दृष्टाः संगरे पिष्टास्तेषामशृणवं रवम् ।
हस्तिनां हस्तिशालासु वाजिशालासु वाजिनाम् ॥ ४८१ ॥
अन्तरन्तःपुरं यावत्क्षिप्ता दृक्तावदैक्ष्यत ।
तदालिमाला तादृक्तत्प्रतिकर्मक्रियोन्मुखी ॥ ४८२ ॥
इत्यद्भुतधुतस्वान्ते मयि कान्तेन तेजसा ।
अर्कं कर्करयन्कश्चिदाविरासीत्पुरः सुरः ॥ ४८३ ॥
तद्विलोकादहं जातजातिस्मृतिरचिन्तयम् ।
प्राग्जातौ धनधन्याख्यौ सुहृदावहमेष च ॥ ४८४ ॥
अनेन सह संसारनिःसारत्व विचारवान् ।
व्रताभिरर्गलस्वर्गलक्ष्मीभोगमुपार्जयम् ॥ ४८५ ॥

अभ्यर्थितो ऽयमाश्लिष्य दिवः प्राक् च्यवता मया ।
उद्धर्तव्यस्त्वया सो ऽहं भवे मोहार्णवादिति ॥ ४८६ ॥
तन्नूनममुनैवाहं घटयित्वेति नाटकम् ।
बोधितो बोधदुग्धानामन्धुना बन्धुनाधुना ॥ ४८७ ॥
इत्युत्थाय मया प्रीत्या सत्कृतः स तिरोभवत् ।
अहं च प्राव्रजं मङ्क्षु भवारण्यं विलङ्घितुम् ॥ ४८८ ॥

ईदृक्चरित्रश्रवणाद्भवभीतो भुवः पतिः ।
राज्ये जामातरं न्यस्य व्रतव्रतातिभूरभूत् ॥ ४८९ ॥
नृपे विरतिसारे ऽथ रतिसारेण भूभुजा ।
व्योमेव व्योमरत्नेन तेन राज्यमराज्यत ॥ ४९० ॥
नृपाज्ञाकृज्जनध्वंसी नृपध्वंसीव दीव्यति ।
निरायुधं वधं राज्ञामाज्ञाभङ्गं विदुर्विदः ॥ ४९१ ॥
तन्मल्लोकद्रुहां सद्यो विपदो मद्गृहामिव ।
भविष्यन्तीति देशान्तस्तेनाताद्यत डिण्डिमः ॥४९२॥युग्मम्॥
तत्तत्पुण्यप्रभावेण तदैवोद्गच्छदापदः ।
देशे तस्य परार्तिभ्यो विन्यवर्तन्त जन्तवः ॥ ४९३ ॥
सर्वा अपि स्त्रियः सत्यः सत्यवाक्सकलो जनः ।
मलिम्लुचो न च क्वापि कापेयं न च कस्यचित् ॥ ४९४ ॥
अपि केलीषु नो बालैरुत्तालैः कलहायितम् ।
युवभिः स्नेहद्रोहो ऽपि कलहो गलहस्ततः ॥ ४९५ ॥
तिर्यञ्चो ऽपि विषाणाद्यैर्न चक्रुःकस्यचिद्व्यथाम् ।
आत्मभोगास्पदं रोगा न च किंचिदतन्वत ॥ ४९६ ॥
न को ऽप्यास्कन्दि माद्यद्भिर्व्यन्तराद्यैरपि क्वचित् ।
चुल्लीन्धनेष्वपि ज्वालाजिह्वो मर्यादया ज्वल ॥ ४९७ ॥

पान्थवृन्दखिदामात्रजायुभिर्वायुभिर्ववे ।
ददौ सरः कृषिफलं काले वारि च वारिदः ॥ ४९८ ॥
सकृत्सिक्तापि विस्फारं पफाल सरसा रसा ।
तमःशममितं चांशुस्तोमं व्योममणिर्व्यधात् ॥ ४९९ ॥
इति प्रभावमुद्भाव्य रतिसारस्य भूपतेः ।
सर्वे ऽप्युर्वीभृतः स्वोर्व्यां तस्यैवाज्ञामवर्तयन् ॥ ५०० ॥
सुभूमस्तत्पिताप्येवं श्रुत्वा माहिष्मतीपतिः ।
स्वदेशे न्यस्य तस्याज्ञां हृष्टो ऽमुत्रहितं व्यधात् ॥५०१॥
तस्याज्ञा यत्र यत्रेन्दोः कौमुदीव स्फुटाभवत् ।
न तापतमसां भूमिः सा सा भूमिरजायत ॥ ५०२ ॥
इति क्रमादशेषायां क्ष्मायां तच्छासनस्पृशि ।
बभूव धर्मनिर्माणे ऽलंकर्मीणो ऽखिलो जनः ॥ ५०३ ॥
इत्यशेषां स्मितामेष चिरकालमपालयत् ।
प्रदत्तनरकद्वारं भग्नस्वर्गार्गलं भुवम् ॥ ५०४ ॥
कदापि कौतुकागारे प्रियाणां तिसृणां मुखम् ।
विलोकयन्नयं प्राप कामं कामपि निर्वृतिम् ॥ ५०५ ॥
इन्दुहृद्ये मुखे भाति चान्दनं चित्रकं न ते ।
विलुप्यं तन्वि तेनेदं कुर्वे कस्तूरिकामयम् ॥ ५०६ ॥
इत्युक्त्वा सात्त्विकस्वेदजलार्द्रैरङ्गुलीदलैः ।
भूपो लुलोप सौभाग्यमञ्जर्या वर्यकान्ति तत् ॥५०७॥युग्मम्॥
अथापतिलका तारशृङ्गारप्रसरापि सा ।
अस्तेन्दुः स्फारतारापि रजनीव रराज न ॥ ५०८ ॥
पुण्ड्रेणैकेन हीनापि यन्निःश्रीकेयमीक्ष्यते ।
तद्विराजिष्यते कीदृग्मुक्तानिःशेषभूषणा ॥ ५०९ ॥युग्मम्॥

इति ध्यात्वा विरागोर्मिवर्मितस्वान्तवार्धिना ।
नृपेण स्वकरेणास्याः क्रमाद्भूषाभरो हृतः ॥ ५१० ॥
ततो हृतशिरोरत्नां निशि निर्दीपसद्मवत् ।
आकृष्टकुण्डलद्वन्द्वां द्यामिवास्तेन्दुभास्कराम् ॥ ५११ ॥
गतहारां सुरागारद्वारं निस्तोरणामिव ।
अकेयूरभुजां लूनपद्मोर्मिसरसीमिव ॥ ५१२ ॥
अकङ्कणकरां वल्लिमुक्तवृक्षां वनीमिव ।
क्वणन्मञ्जीरहीनांघ्रिमहंसाब्जामिवाब्जिनीम् ॥ ५१३ ॥
एवं निरस्तनिःशेषभासमानविभूषणाम् ।
दलपुष्पफलत्यक्तां फाल्गुनीयां लतामिव ॥ ५१४ ॥
तां पश्यन्नान्तरेणाक्ष्णा स दध्यौ नास्ति कुत्रचित् ।
अप्रक्षालितशुद्धाङ्गः को ऽप्यभूषितभासुरः ॥ ५१५ ॥
पञ्चभिः कुलकम् ॥
का वान्यस्य कथात्मापि धौतकर्मावलीमलः ।
ज्ञानदर्शनचारित्रैर्भाति रत्नैरलंकृतः ॥ ५१६ ॥
तदस्मिन्कर्ममलिने यत्परिष्करणं तनोः ।
विगुप्तपश्चाद्भागं तन्मयूरस्येव नर्तनम् ॥ ५१७ ॥
नाङ्गस्य भूषणैरात्मा भूष्यते ऽस्य तु भूषणैः ।
भूष्यते ऽखिलमप्यङ्गं नभो ऽर्कस्य करैरिव ॥ ५१८ ॥
तत्कार्यः काममात्मायमकर्ममलमण्डलः ।
ज्ञानदर्शनचारित्रभूषणः कायभूषणः ॥ ५१९ ॥
इत्यन्तर्ध्यायतस्तस्यात्मनि स्थिरतरं मनः ।
अदीप्यत यथा दीपो निर्वाते वेश्मनि स्थितः ॥ ५२० ॥
शुक्लध्याने ऽवतीर्णे ऽथ घातिकर्मेन्धनानले ।

उत्पेदे केवलं लोकत्रयत्रैकाल्यदर्पणः ॥ ५२१ ॥
दत्तं शासनदेव्यैष मुनिवेषं समाश्रितः ।
तयैव विहिते तत्र काञ्चने ऽब्जे कृतासनः ॥ ५२२ ॥
त्वरायातैः सुरव्रातैः प्रणतः पुष्पवर्षिभिः ।
किमेतदिति साश्चर्यैः प्रेक्ष्यमाणः पुरीजनैः ॥ ५२३ ॥
अन्तःपुरीभिरेताभिरुद्भ्रान्तस्वान्तवृत्तिभिः ।
किमेतन्नाथ नाथेति मुहुरुत्तरमर्थितः ॥ ५२४ ॥
दशनांशुमिषात्पुण्यं मूर्तिमत्तन्वतीमिव ।
स जिनो वृजिनोच्छेदावेशिनीं देशनां व्यधात् ॥ ५२५ ॥
चतुर्भिः कलापकम् ॥
अहो महोद्धतैरेव भवसेवकजन्तवः ।
कर्मभिर्मर्मभिद्भूपैस्ताप्यन्ते सर्वथा कथम् ॥ ५२६ ॥
तानि जानीत हे सन्तः संगतानि सदात्मभिः ।
अष्टसंख्यानि संसारकारणं नामभेदतः ॥ ५२७ ॥
ज्ञानावरणं दर्शणावरणं वेदनीयकम् ।
मोहायुर्नामगोत्रान्तरायं तानीति नामतः ॥ ५२८ ॥
मतिश्रुत्यावधिमनःपर्यायकेवलाभिधैः ।
आवृतैः पञ्चभिर्ज्ञानैराद्यं पञ्चविधं स्मृतम् ॥ ५२९ ॥
निर्मलापि यथा दृष्टिः पटच्छन्नालपट्टश्वरी ।
तथात्माच्छादितस्तेन तत्तत्पटसमं विदुः ॥ ५३० ॥
सागराणां स्थितिस्तस्य स्यात्त्रिंशत्कोटिकोट्यः ।
ततो बध्नाति तत्कर्म पुनरात्मा सकल्मषः ॥ ५३१ ॥
दर्शनावरणीयं तु नवभेदैरिति स्मृतम् ।
पञ्चनिद्राश्च चत्वारः स्युश्चक्षुर्दर्शनादयः ॥ ५३२ ॥

तत्र निद्रा भवेद्यत्र प्रबोधः स्वल्पहेतुना ।
निद्रानिद्रात्मनो यस्यां भवेदुःखेन जागरः ॥ ५३३ ॥
ऊर्ध्वस्थितस्य जायेत या जन्तोः प्रचला हि सा ।
प्रचलाप्रचला सा तु भवेद्या पथि गच्छतः ॥ ५३४ ॥
चिन्तितस्यार्हि कार्यस्य स्त्यानर्द्धिः साधका निशि ।
सा पुनर्जायते जन्तोरुदये क्लिष्टकर्मणः ॥ ५३५ ॥
चक्षुरात्रियते येन तच्चक्षुर्दर्शनावृतम् ।
शेषेन्द्रियाणां वरणमचक्षुर्दर्शनावृतम् ॥ ५३६ ॥
अवधिः स्याद्रूपिवस्तुमर्यादा तेन दर्शनम् ।
करणानपेक्षो बोधरूपो वावधिरुच्यते ॥ ५३७ ।
दर्शनं तेन सामान्यार्थग्रहो ऽवधिदर्शनम् ।
तस्यावरणमवधिदर्शनावरणं स्मृतम् ॥ ५३८ ॥
विश्वं केवलसामान्यं लोकालोकस्य दर्शनम् ।
यदावृणोति तत्प्रोक्तं केवलदर्शनावृतम् ॥ ५३९ ॥
यथा राज्ञः प्रतीहारो नाभीष्टस्य जनस्य सः ।
अपि वीक्षितुकामस्य न दत्ते नृपदर्शनम् ॥ ५४० ॥
दर्शनावरणीयेन रुद्धो जीवो ऽप्यसौ तथा ।
न पश्येद्वस्तु तत्तेन प्रतीहारसमं विदुः ॥ ५४१ ॥ युग्मम् ॥
समवस्थितिरस्यापि दर्शनावृतिकर्मणः ।
सागरोपमकोटीनां स्युस्त्रिंशत्कोट्यः क्रमात् ॥ ५४२ ॥
सातासाताभिदा वेद्यं द्विधा मुख्यं तयोः पुनः ।
असातं तिर्यग्नरके सातं मर्त्यामरालये ॥ ५४३ ॥
मधुलिप्तासिधारायां लेहने सुखदुःखकृत् ।

अवस्थितिरमुष्यापि वेदनीयस्य कर्मणः ।
सागरोपमितीतां हि स्युस्त्रिंशत्कोटिकोटयः ॥ ५४५ ॥
मोहनीयं भवेद्द्वेधात्राद्यं दर्शनमोहकृत् ।
चारित्रमोहनीयं तु द्वितीयं परिकीर्तितम् ॥ ५४६ ॥
प्रथमं त्रिविधं सम्यग्मिश्रमिथ्यात्वभेदतः ।
द्वितीयं पञ्चविंशत्या भेदैस्तदिति कीर्त्यते ॥ ५४७ ॥
क्रोधमानमायालोभाः स्युः कषायाश्चतुर्विधाः ।
तत्रैकैकश्चतुर्भेदैर्ज्ञेयः संज्वलनादिभिः ॥ ५४८ ॥
पक्षस्थायी कषायो ऽसौ स्मृतः संज्वलनाह्वयः ।
प्रत्याख्यानः पुनर्मासचतुष्टयकृतस्थितिः ॥ ५४९ ॥
अप्रत्याख्यानकः प्रोक्तः स्थितः संवत्सरावधिः ।
यावज्जीवं कृतस्थानः स्यादनन्तानुबन्धकः ॥ ५५० ॥
घ्नन्त्यमी वीतरागत्वं यतित्वं श्राद्धतां क्रमात् ।
सम्यक्त्वमपि संसेव्यमाना जन्तोर्भवान्तरे ॥ ५५१ ॥
अमरत्वं मनुष्यत्वं तिर्यक्त्वं नरकं क्रमात् ।
यच्छन्त्येवंस्वरूपास्ते कषाया इति षोडश ॥ ५५२ ॥
तथा हासो भयं शोको जुगुप्सा रत्यरत्यपि ।
पुंनारीक्लीबवेदाश्च नोकषाया इमे नव ॥ ५५३ ॥
इत्यष्टविंशतिर्भेदा मोहनीयस्य कर्मणः ।
भव्यात्मनामपि प्रायो दुर्जराः स्युश्चिरं स्थिराः ॥ ५५४ ॥
मद्यपानाद्यथा जन्तुः कृत्याकृत्यानि वेत्ति न ।
मोहनीयादपि तथा तत्तन्मद्यसमं विदुः ॥ ५५५ ॥
तत्तदेतस्य कर्मभ्यः सर्वेभ्यो ऽप्यधिका स्थितिः ।
भवेयुः सागराणां हि सप्ततिः कोटिकोटयः ॥ ५५६ ॥

आयुश्चतुर्धा नरकतिर्यग्नृसुरसंभवैः ।
दुर्भेदबन्धभावेन तद्वन्निगडोपमम् ॥ ५५७ ॥
आयुषः कर्मणो ऽमुष्य स्थितिरित्थं प्रकर्षतः ।
सागरोपमितीनां हि त्रयस्त्रिंशद्भवे भवेत् ॥ ५५८ ॥
नामोक्तं प्रथमं भेदैर्द्विचत्वारिंशता ततः ।
सप्तषष्ट्या त्रिणवत्या ऽप्युत्तरेण शतेन वा ॥ ५५९ ॥
गतिजातिशरीराङ्गोपाङ्गबन्धननामकम् ।
संघातनं संहननं संस्थानं वर्णगन्धने ॥ ५६० ॥
रसस्पर्शागुरुलघु पराघातोपघातकौ ।
आनुपूर्वी तथोच्छ्वास आतपोद्योतमित्यपि ॥ ५६१ ॥
विहायोगतिस्त्रसाख्यं स्थावरं सूक्ष्मबादरम् ।
अपर्याप्तं च पर्याप्तं प्रत्येकानन्तकायकम् ॥ ५६२ ॥
सुभगं दुर्भगं चैव स्थिरास्थिरशुभाशुभम् ।
सुस्वरं दुःस्वरादेयमनादेयं ततः परम् ॥ ५६३ ॥
यशःकीर्त्ययशःकीर्तिनिर्माणं कीर्तितं ततः ।
नाम तीर्थकरं चैव चत्वारिंशद्द्व्याधिका ॥ ५६४ ॥
गतिश्चतुर्धा नरकतिर्यग्नृसुरलक्षणा ।
एकद्वित्रिचतुःपञ्चाक्षभेदैर्जातिपञ्चकम् ॥ ५६५ ॥
औदारिकं वैक्रियकमाहारकमतः परम् ।
तैजसं कार्मणं चेति शरीरं पञ्चधा स्मृतम् ॥ ५६६ ॥
अङ्गोपाङ्गं त्रिधा शीर्षं पृष्ठं च हृदयोदरौ ।
ऊरुद्वयं करद्वन्द्वमित्यष्टावङ्गमुच्यते ॥ ५६७ ॥
अङ्गुल्याद्यमुपाङ्गं स्यादङ्गोपाङ्गं च तद्वताः ।
रेखाः स्युस्त्रयमेतत्तु भवेदाद्ये वपुस्त्रये ॥ ५६८ ॥

षोढा संहननं वज्रर्षभनाराचमादिमम् ।
तस्माद्वृषभनाराचं नाराचं तु तृतीयकम् ॥ ५६९ ॥
चतुर्थमर्धनाराचं कीलिकाख्यं च पञ्चमम् ।
सेवार्तं भवेत्षष्ठमस्थ्यन्तःस्पर्शलक्षणम् ॥ ५७० ॥युग्मम्॥
आद्यं समचतुरश्रमथ न्यग्रोधमण्डलम् ।
तदन्यथा पुनः सादि वामनं कुब्जकं तथा ५७१ ॥
हुण्डं चेति शरीरस्य संस्थानानि भवन्ति षट् ।
एतान्यौदारिकस्यैव नान्याङ्गानामसंभवात् ॥५७२॥युग्मम्॥
आनुपूर्वी चतुर्धेत्थं यज्जन्तोर्गच्छतो ऽन्तरा ।
भवेषु नरकाद्येषु परिपाटिर्भवेद्गतेः ॥ ५७३ ॥
स्याद्विहायोगतिर्द्वेधा शुभाशुभविभेदतः ।
उपघातपराघातातपागुरुलघु स्मृतम् ॥ ५७४ ॥
उच्छ्वासोद्योतौ चत्वारो वर्णाद्यास्त्रसविंशतिः ।
निर्माणं तीर्थकृच्चेति सप्तषष्टिरुदाहृता ॥ ५७५ ॥
बन्धनं पञ्चधा पञ्च संघाता वर्णपञ्चकम् ।
अष्टौ स्पर्शा रसाः पञ्च गन्धद्वयमुदीरितम् ॥ ५७६ ॥
कृष्णो वर्णेषु स्पर्शेषु गुरुस्तिक्तो रसेषु च ।
गन्धयोः सुरभिश्चैते भेदास्त्याज्याः पुरोदिताः ॥ ५७७ ॥
प्रागुक्तायाः सप्तषष्टेरस्याः षड्विंशतेरपि ।
मेलने जायते सेयं नवतिस्त्रिभिरुत्तरा ॥ ५७८ ॥
पञ्चदशबन्धनेभ्यः पञ्च भेदा पुरोदिताः ।
शेषैस्तु दशभिः क्षिप्तैर्जायते त्र्युत्तरं शतम् ॥ ५७९ ॥
औदारिकौदारिकं तथौदारिकतैजसम् ।
औदारिककार्मणकं तुर्यमेतत्त्रयोद्भवम् ॥ ५८० ॥

वैक्रियवैक्रियाद्येवं ज्ञेयं बन्धचतुष्टयम् ।
इत्थमाहारकाहारकादिदेहचतुष्टयम् ॥ ५८१ ॥
तैजसतैजसं गात्रं ततस्तैजसकार्मणम् ।
कार्मणकार्मणं चेति बन्धाः पञ्चदश स्मृताः ॥ ५८२ ॥
त्रिभिर्विशेषकम् ॥
रम्यारम्याणि रूपाणि कुर्याच्चित्रकरो यथा ।
तथा नामापि जीवानां तच्चित्रकसमम् ॥ ५८३ ॥
एतस्य स्थितिरुत्कृष्टा भविनां नामकर्मणः ।
विंशतिः कोटिकोटीनां सागरोपममानतः ॥ ५८४ ॥
गोत्रं द्विधा धिया लक्ष्म्या हीनोऽप्यर्हो भवी भवेत् ।
तदुच्चं सहितो ऽप्याभ्यां नार्च्यो नीचं तदुच्यते ॥ ५८५ ॥
यथा कुलालान्मृत्पिण्डः पूर्णकुम्भः सुराघटी ।
स्तुत्यो निन्द्यस्तथातः स्यादात्मा तत्तेन तत्समम् ॥ ५८६ ॥
आत्मनि स्थितिरेतस्य गोत्रसंज्ञस्य कर्मणः ।
सागरोपमसंबद्धा स्यात्कोटिर्विंशतिः ॥ ५८७ ॥
अन्तरायाभिधं कर्म भेदैः पञ्चभिरष्टमम् ।
स्याद्दानलाभभोगोपभोगसामर्थ्यलक्षणैः ॥ ५८८ ॥
दानं विनीताद्दत्ते राड्भाण्डागारिकतो यथा ।
तथास्मादपि जीवोऽ तस्तद्भाण्डागारिकतोपमम् ॥ ५८९ ॥
अन्तरायाभिधानस्य स्थितिरेतस्य कर्मणः ।
सागरोपमसंख्यायां स्युस्त्रिंशत्कोटिकोट्यः ॥ ५९० ॥
इत्यल्पं जल्पितो ऽनल्पकालः कर्ममहागदः ।
शुद्धध्यानौषधप्राणैः सद्भिः शाम्यो ऽप्रमादिभिः ॥ ५९१ ॥
शुद्धं ध्यानमपि प्राप्यं कषायविषयोज्झनैः ।

संतोषरसिकैर्लोकैः स तु बीजं सुखस्य यत् ॥ ५९२ ॥
न सद्वाक्यात्परं वश्यं न कलायाः परं धनम् ।
नाहिंसायाः परो धर्मो न संतोषात्परं सुखम् ॥ ५९३ ॥
सेव्यसारस्य तस्यापि जननी विरतिर्ध्रुवम् ।
सापि केवलिभिः प्रोक्ता सर्वतो देशतो ऽपि वा ॥ ५९४
तदस्यां विरतौ सद्भिर्मतिमद्भिः सुखार्थिभिः ।
स्तुत्यकृत्यमहाविघ्नः प्रमादः कार्य एव न ॥ ५९५ ॥
आयुषः क्षण एको ऽपि नाप्यते रत्नकोटिभिः ।
तत्कथं हार्यते हन्त प्रमादरजसा नरैः ॥ ५९६ ॥
इति धर्मगिरं कर्मगिरिदम्भोलिसंनिभाम् ।
श्रुत्वा तत्त्वावबोधेन शुभः शस्यजनो ऽजनि ॥ ५९७ ॥
अन्तःपुर्यः सुबन्धुश्च तदा भेजुर्महाव्रतम् ।
घनैश्चान्ये जैनस्तत्र जगृहे गृहिणां व्रतम् ॥ ५९८ ॥
इत्थं प्रबोध्य सुहृदो विहृत्य वसुधां क्रमात् ।
वितत्य धर्मं भगवान् रतिसारः शिवं ययौ ॥ ५९९ ॥
इत्यद्भुतस्य दानस्य प्रभावाद्भुक्तभूतलः ।
कुशलो दलयत्याशु संसारं रतिसारवत् ॥ ६०० ॥
इति श्रीरतिसारस्य सारपुण्यपथां कथाम् ।
निशम्याभून्मुदां सद्म पद्मोत्तरमहीश्वरः ॥ ६०१ ॥
पात्रेण पार्थिवादिभ्यो दानं नादीयते क्वचित् ।
नित्यं शीलन्तु शीलं तु सर्वसाधारणं बुधाः ॥ ६०२ ॥
धत्ते यः सततोन्मीलं शीलं लीलारविन्दवत् ।
सकामं मुक्तिकामिन्या कुतुकेन विलोक्यते ॥ ६०३ ॥
अतश्चिन्तामणिप्रायसुकृतप्राप्तये जनः ।

विधत्ते शुद्धधीः शीलसुधाम्भोनिधिमज्जनम् ॥ ६०४ ॥
अघनाशाद्भुतच्छाये शीले नीलेतरा गुणाः ।
समायान्ति समुत्ताला मराला इव पल्वले ॥ ६०५ ॥
जनानुरक्तिर्भुक्तिश्च मुक्तिश्च नृषु शीलतः ।
सनत्कुमारशृङ्गारसुन्दर्योरिव जायते ॥ ६०६ ॥
तद्यथा सत्पथाध्वन्यपौरालिमालिनी ।
श्रीकान्तेति पुरी जम्बूद्वीपे भारतवर्षभूः ॥ ६०७ ॥
इह सिंह इति स्वाम्यग्रलपितद्युपतिर्नृपः ।
बभूव शुभ्रकीर्तिस्रग्राजिराजितदिग्गणः ॥ ६०८ ॥
नित्यमुद्यद्गुणग्रामः कलाग्रहकृताग्रहः ।
सनत्कुमार इत्यासीत्कुमारस्तस्य कीर्तिभूः ॥ ६०९ ॥
अदूषणकणैर्लक्ष्यमाणस्तादृक्षलक्षणैः ।
सहोत्थैः स गुणै रेजे शरीरावयवैरिव ॥ ६१० ॥
उपदेशावधिक्लेशाद्गुरुतस्तस्य गृह्णतः ।
हृदि न स्खलितं चक्रुः खिला अप्यखिलाः कलाः ॥६११॥
रूपं निशम्य निःसीम तस्य सीमन्तिनीजनैः ।
तदङ्गसङ्गिखुरलीरजो बहुमतं स्वतः ॥ ६१२ ॥
उरसि प्रेयसां कामचित्राभ्यासापदेशतः ।
अलिख्यत विदग्धाभिः स रहो विरहोदये ॥ ६१३ ॥
तस्मिञ्शरणसंप्राप्तप्राणभृद्व्रजपञ्जरे ।
दोर्दण्डमण्डलच्छायामीयुश्चापचराः शराः ॥ ६१४ ॥
सो ऽन्यदा क्षणदामध्ये वध्यमानस्य विद्विषा ।
निद्राणश्चन्द्रशालायां रावं शुश्राव कस्यचित् ॥ ६१५ ॥
अथैष रभसभ्रश्यन्निद्रोन्मुद्रदृगीदृशम् ।
खे वचः सचमत्कारः कारुण्यमसृणोऽशृणोत् ॥ ६१६ ॥
दुःखितः परदुःखेन दीनानाथोद्धृतिक्षमः ।
अहो स कापि कोऽप्यस्ति यः पापात्पाति मामितः ॥६१७॥

त्रिजगद्वीरजननीर्जननी येन सूनुना ।
हसत्यस्ति स को ऽपीह यः पापात्पाति मामितः ॥६१८॥
स्वजन्मतिथिनक्षत्रवारान्धैर्येण गर्वयन् ।
स कोऽप्यस्ति जगत्यस्मिन् यः पापात्पाति मामितः॥६१९॥
प्रेमार्द्राभ्यः प्रियाभ्यो ऽपि ये प्रियां मन्वते युधम् ।
तन्मुख्यः को ऽपि किं नास्ति यः पापात्पाति मामितः॥६२०॥
हा हा हतो हतो ऽहं मां त्रातुं को ऽपि न धावति ।
तदाकाशे धृतं कस्य सत्त्वेनेदं जगत्त्रयम् ॥ ६२१ ॥
विश्वे न सन्ति किं वीराः किं वा सन्तो ऽपि निःकृपाः ।
किं वा बाधिर्यभाजस्ते क्रन्दार्तं यन्न पाति माम् ॥ ६२२ ॥
निशि निद्रान्ति चेन्मर्त्यास्तदमर्त्येष्वभूत्किमु ।
यत्ते ऽपि शक्तिमन्तो ऽपि न कृपां मयि कुर्वते ॥ ६२३ ॥
न मानवो न गन्धर्वो न गीर्वाणो न दानवः ।
को ऽप्यस्ति साहसी यो मां त्रायते हा हतो ऽस्मि हा॥६२४॥
अथोच्चचञ्चद्रोमाञ्चश्चण्डोद्धूषितमूर्धजः ।
क्ष्मापस्य सूनुरुत्पश्यंश्चालयंश्चापमुत्थितः ॥ ६२५ ॥
विलक्षः खेचरं क्षोणिचारी रक्षितुमक्षमः ।
पक्षिणो ऽपि क्षणं धन्यान्सो ऽमन्यत खगामिनः ॥ ६२६॥
त्रैलोक्ये ऽप्यस्ति न त्राता वध्यमानस्य ते मया ।
मा क्रन्दीर्म्रियमाणस्तदित्यभूत्खे पुनर्ध्वनिः ॥ ६२७॥
हन्तुः स्वरानुसारेण शरासारं ततः कृती ।
साक्षेपं दिवि चिक्षेप स शरण्यशिरोमणिः ॥ ६२८ ॥
एको रिपुः कृपाणेन प्रहतः प्रापतत्ततः ।
पुमान्कुमारनाराचताडितस्त्वपरः पुरः ॥ ६२९ ॥

अथ तौ मूर्छितौ वीक्ष्य विस्मिते भूपतेः सुते ।
उत्ततार तडित्तारा कापि ताराध्वतो वधूः ॥ ६३० ॥
द्विषद्विखण्डिताङ्गस्य पुरुषस्य पुरः स्थिता ।
चक्रन्द सारसाधिक्यविकसत्करुणस्वरा ॥ ६३१ ॥
किं चरित्रमिदं चित्रमिति पृष्टाथ तेन सा ।
ऊचे ऽयरोष्टं सिञ्चन्ती शुचा शुष्यन्तमश्रुभिः ॥ ६३२ ॥
शोणरत्नप्रभापूरसिन्दूरचयाचित्रितः ।
गिरिर्वैताढ्य इत्यस्ति श्रीलीलारौप्यहस्तिवत् ॥ ६३३ ॥
तस्योपरि परिस्पन्दलक्ष्मीमन्दमरुत्पुरा ।
विशालाख्या विशालाक्षीमुखापास्तेन्दुरस्ति पूः ॥ ६३४ ॥
तत्रैष रत्नचूडाख्यो राजा खेलति खेचरः ।
अस्य प्रियास्मि कश्मीरदेवीति प्रीतिभाजनम् ॥ ६३५ ॥
दुष्टश्चन्द्रपुरीभर्ता चन्द्राख्यो ऽयं तु खेचरः ।
मया स्मररहस्यानि याचमानो ऽवमानितः ॥ ६३६ ॥
रविणा कौमुदीवेन्दोस्ततः पत्युः समीपतः ।
तेजःक्रूरेण सूरेण हृताहमसुनाधुना ॥ ६३७ ॥
अवस्थेयं कृता तेन मद्भर्तुरनुधावतः ।
दुश्चरित्रफलं वीर त्वयास्येदं च दर्शितम् ॥ ६३८ ॥
इत्युक्तेयं कुमाराय प्रियप्राणितकाङ्क्षिणी ।
आदिक्षदौषधीः सद्यो मूर्छाशतकृतच्छिदः ॥ ६३९ ॥
अथैनमोषधिस्यन्दैरमन्दीकुरुते स्म सः ।
कुमारः कैरवस्तोममिव सोमः करोत्करैः ॥ ६४० ॥
ततः कृपावतारेण कुमारेणौषधीरसैः ।
चन्द्रो ऽप्यजीवि कारुण्यं महतां प्रहतान्तरम् ॥ ६४१ ॥

ततो वर्णैर्विवेकाब्धिमौक्तिकैर्ग्रथितां गिरम् ।
कुमारो हृदि चन्द्रस्य हारहृद्यामिति न्यधात् ॥ ६४२ ॥
न दत्ते निर्वृतिं हन्ति पुण्यं पुष्णाति पातकम् ।
अहो हृतं परस्त्रैणं कुथितान्नमिवाहृतम् ॥ ६४३ ॥
परस्त्रीपरिरम्भेण समारम्भः सुखस्य यः ।
शीताम्भःस्नपनेनेव ज्वरदाहव्यपोहनम् ॥ ६४४ ॥
परनार्यो विभावर्य इवाकीर्तितमःप्रदाः ।
अदृष्टसत्पथान्पुंसः क्षिपन्ति नरकावटे ॥ ६४५ ॥
घाताधःकारबन्धार्तिमदान्धैर्बुध्यते न कैः ।
व्रजद्भिः परनारीषु वारीष्विव मतङ्गजैः ॥ ६४६ ॥
ततः स्वदारसंतुष्टिः पुण्यपुष्टिरसायनम् ।
सेवनीया सदा पुम्भिः गुणकुम्भिमहाटवी ॥ ६४७ ॥
तच्चन्द्र चन्द्रचारूणां यशसां जलदोपमम् ।
परनारीपरीरम्भारम्भं निर्दम्भधीस्त्यज ॥ ६४८ ॥
समं च रत्नचूडेन चूडारत्न खचारिणाम् ।
मा स्म पापघटाजन्म वत्सरं मत्सरं कृथा ॥ ४४९ ॥
रत्नचूड त्वयाप्येतच्चेतनीयं यतो ऽभवत् ।
प्रत्यक्षं वां परवधूचौर्यमात्सर्ययोः फलम् ॥ ६५० ॥
इति वाचं प्रतिज्ञाय तौ प्रीतौ खेचरौ मिथः ।
सनत्कुमारतेजोग्निसाक्षिकं सख्यमीयतुः ॥ ६५१ ॥
अदृश्यीकरणीं शिक्षागुरवे गुरुदक्षिणाम् ।
दत्त्वा भूपभुवे विद्यां तौ गतौ द्यां तया समम् ॥ ६५२ ॥
कदाप्यथ सदःसद्मभूषणं सिंहभूभुजम् ।
अत्यातुरश्वरः कश्चिदेत्य विज्ञप्तवानदः ॥ ६५३ ॥

स्वामिञ्जगज्जयारम्भजृम्भगाणप्रयाणकः ।
भूरिभूरमणच्छेदमेदस्विप्रसरन्मदः ॥ ६५४ ॥
नृपो रिपुद्विपक्रूरकेशरी शूरकेशरी ।
त्वां प्रत्युपैति काम्पील्यपुरायतनदेवता ॥६५५॥युग्मम्॥
इति वाक्श्रुतिसक्रोधः स्कन्धावाराय दुर्धरः।
रथसिन्धुरगन्धर्वभटाध्यक्षान्नृपो ऽदिशत् ॥ ६५६ ॥
प्रयाणकम्भुनादेषु काममम्बरचुम्बिषु ।
सज्जमानासु सेनासु भटेषूत्कटकेषु च ॥ ६५७ ॥
तां मत्वा जयिनीं यात्रामेत्य तत्राधिकोद्यमः ।
कुमारो मस्तकन्यस्तहस्तः क्ष्मापं व्यजिज्ञपत् ॥६५८॥युग्मम्॥
तात मा तव तत्रारिकीटे ऽस्तु कटकस्पृहा ।
किं तृणोत्पाटने कुम्भी कुण्डलीकुरुते करम् ॥ ६५९ ॥
अहमेव करिष्यामि तज्जयं त्वत्प्रसादतः ।
हन्त्यनूरुस्तमःपूरं किं न सूरप्रभावतः ॥ ६६० ॥
कटकं यदि तत्रापि शत्रावातनुषे स्वयम् ।
बलौ वाबलशत्रौ वा किं रोषिणि करोषि तत् ॥ ६६१ ॥
अथाह पृथिवीनाथो नीतिप्रीतिसखीं गिरम् ।
रोमाञ्चितवपुः सूनोः शौर्येण विनयेन च ॥ ६६ ॥
लीलासु लालितं शूरास्तनयं नयशालिनः ।
पुरः कुर्वन्ति भोगेषु रणाभोगेषु पृष्ठतः ॥ ६६३ ॥
हृदयानन्दनं दक्षा नन्दनं कुलदीपकम् ।
न प्रभञ्जनभूयिष्ठे भासयन्ति रणाङ्गणे ॥ ६६४ ॥
कुलालंकृतये रत्नं भूरिभाग्यार्जितं सुतम् ।
कः क्षिपत्यसिकल्लोलैरपारे समरार्णवे ॥ ६६५ ॥

वत्स मत्सरिणो जेतुं यामि तेनाहमाहवे ।
जगरो नगरस्यास्य भवान्भवितुमर्हति ॥ ६६६ ॥
अथाकिरद्भिरं गौरीमास्यगौरांशुकौमुदीम् ।
कुमारः कैरवाकारवीरमानसमोदीनीम् ॥ ६६७ ॥
त एव तात सत्पुत्राः स्वं मत्वा कवचक्षमम् ।
ये निर्बन्धात्पितुः स्कन्धादुद्धरन्ति धुरं युधः ॥ ६६८ ॥
शूरास्तानेव मन्यन्ते नन्दनान्कुलदीपकान् ।
येषां रिपुस्त्रीनिःश्वासैस्तेजः प्रत्युत वर्धते ॥ ६६९ ॥
कुलालङ्कारवत्रानि कुमारानुर्वरावरान् ।
उत्तेजयन्ति युद्धोर्व्यामसिपट्टघटाजुषि ॥ ३७० ॥
तत्प्रभो मां दिश द्वेषिपेषायेति ब्रुवन्नसौ ।
अग्रहीदग्रहस्ताभ्यां चरणौ धरणीशितुः ॥ ६७१ ॥
उत्थाप्य परिरभ्याथ प्रमोदी मेदिनीपतिः ।
कुमारमसुहृद्वीरवैराय स्वैरमैरयत् ॥ ६७२ ॥
कृतमाङ्गलिकः सो ऽपि रेणुगोपितगोपतिः ।
चचालोच्चचमूपूरः शूरकेशरिणं प्रति ॥ ६७३ ॥
भ्रश्यन्तीं निजभारेण भुवं धर्तुमिवाग्रतः ।
प्रलम्बमानहस्ताग्रैश्चलितं बलिभिर्द्विपैः ॥ ३७४ ॥
मा भूदस्मत्खुरापातैः खण्डशः क्षोणिमण्डलम् ।
इत्युड्डीन इवाचार्लाघ्योन्ना हयसमुच्चयः ॥ ६७५ ॥
नर्तयन्रथिनां कीर्तिं मूर्तां केतनकैतवात् ।
पवनानामनुप्रासः प्रासरद्रथसंचयः ॥ ६७६ ॥
हृदा कवलयन्तः स्वं ज्वलयन्तो दृशा दिशः ।
प्रतस्थिरे स्थिरागोलं लोलयन्तो गतैर्भटाः ॥ ६७७ ॥

इत्युपान्तं रिपोराप कुमारः सारसैनिकः ।
क्वचिदप्यकृतस्थानैः प्रस्थानैः कैश्चिदप्ययम् ॥ ६७८ ॥
अथान्तरचरद्दूतस्यूतक्रोधविरोधयोः ।
तयोः सेनाद्वयं जज्ञे संपरायपरायणम् ॥ ६७९ ॥
आसदत्सादिनं सादी निषादी च निषादिनम् ।
रथिनं च रथी पत्तिः पत्तिं च प्रोद्धतक्रुधः ॥ ३८० ॥
असहिष्णुः परतेजस्तेजस्वी वीरसंचयः ।
खण्डयामास चण्डांशुभासः काण्डौघमण्डपैः ॥ ६८१ ॥
जयश्रीपरिरम्भाय स्फायमानमनोरथैः ।
हृष्यद्भिर्वीक्षितं वीरै रणे रेणुमयं तमस् ॥ ६८२ ॥
सहुंकारैरथोदारैः प्रहारैर्बलशालिनाम् ।
आलम्भि समरारम्भः स्फूर्जत्तूर्यहतिश्रुतिः ॥ ६८३ ॥
स्फुलिङ्गैः स्फुरितं शत्रुशस्त्रापातेन वर्मसु ।
राज्ञां निस्तुष्यमाणस्य प्रतापस्य तुषैरिव ॥ ६८४ ॥
द्रवीभूयेव सूरेण रक्तपूरेण रेणवः ।
समरे समनीयन्त तमःसमरुचः शमम् ॥ ६८५ ॥
अश्वः को ऽप्यश्ववारं स्वं पनितं वर्मभारितम् ।
उपविश्यैनमारोप्य समुत्तस्थौ मृधोद्धतः ॥ ६८६ ॥
स्फुटितोदरनिर्याताः कश्चिदन्त्रावलीर्बली ।
धावन्नतुत्रुटद्वाजी खुरलग्ना लता इव ॥ ६८७ ॥
दष्टोष्ठो भृकुटीभीमः क्ष्मापातिन्यपि मूर्धनि ।
धृत्वा दोर्भ्यां रिपुं कश्चित्पतन्नश्वादपातयत् ॥ ६८८ ॥
वाहयित्वाग्रतो वाहं कुन्ते वक्षो विशत्यपि ।
युद्धक्षीणायुधो दन्तैः को ऽपि कण्ठं द्विषो ऽपिषत् ॥६८९॥

प्रतिद्विपं द्विपः को ऽपि कोपान्मूर्धन्यताडयत् ।
करेणोन्मूल्य तस्यैव रणक्षीणरदो रदम् ॥ ६९० ॥
पातितस्य द्विपः कोपी को ऽपीभस्य रिपोर्वपुः ।
रदाग्रेण विदार्योच्चैर्मत्तो रक्तासवं पिबन् ॥ ६९१ ॥
त्रस्यन्प्रतिद्विपान्मे ऽसौ जितारेरपि दुर्यशः ।
मा दादिति जघानैकः स्वहस्तेन स्वहस्तिनम् ॥६९२ ॥
हतस्य पततो युग्यनागस्योत्प्लुत्य पृष्ठतः ।
क्षितिमेत्य स्थितो ऽजैषीद्द्वेषिणं मार्गणैः परः ॥ ६९३ ॥
कश्चिद्रथी प्रथीयांसि शरजालानि लालयन् ।
अस्त्राण्येव द्विषो ऽकृन्तन्नाङ्गानि तु कृपान्वितः ॥ ६९४ ॥
शरैरेकस्य चक्रस्य च्छिन्ने ऽक्षे नमतो रथात् ।
विलुण्ठन्तं क्षितौ शत्रुं को ऽप्यलोकत कौतुकी ॥ ६९५ ॥
कर्णान्ताकृष्टकोदण्ड एवैकः खेदमासदत् ।
यं यं लक्षीचकारैष तूर्णं स स यदत्रसत् ॥ ६९६ ॥
मार्तण्ड इव कोदण्डपरिवेषधरः परः ।
दिशञ्शरमयीं वृष्टिं राजहंसभिये ऽभवत् ॥ ६९७ ॥
धृतासिस्त्रासयन्विश्वं मुक्तकेशः करालवाक् ।
शौर्यावतारतः कश्चिदभ्रमद्भ्रुदग्भटः ॥ ६९८ ॥
दलितस्य रिपोरन्त्रमालाभिः कृतमण्डनः ।
कुर्वन्किलकिलामेकः शेके केनापि नोक्षितुम् ॥ ६९९ ॥
द्विपान्निर्मदयामास त्रासयामास वाजिनः ।
भटान्विघटयामास क्ष्वेडयेवोद्धुरः परः ॥ ७०० ॥
विक्रम्य पतितस्याजौ कस्यचिद्रक्तबिन्दवः ।
वीरवारेण वीरश्रीमन्दिरेण ववन्दिरे ॥ ७०१ ॥

इत्याजिप्रसरे वाजिदन्तिस्यन्दनपत्तिषु ।
पतत्सु तुच्छतां गच्छद्बलं स्वं सैंहिरैक्षत ॥ ७०२ ॥
अथाहितहतत्रस्तसमस्तध्वजिनीजनः ।
गन्धसिन्धुरमारुह्य प्रसरच्चापचापलः ॥ ७०३ ॥
संरम्भी स्तम्भयन्दूरे शूरकेशरिणश्चमूम् ।
सनत्कुमारो नाराचधाराचयमचञ्चयत् ॥ ७०४ ॥ युग्मम् ॥
तद्बाणपातभीमासु रणसीमासु शात्रवः ।
न रथी न भटो नेभो न चाश्वः प्राविशद्भृशम् ॥ ७०५ ॥
इत्यस्मिन्नुग्रसंग्रामभरेण क्षीणमार्गणे ।
धीरा विरोधिनो ऽधावन्प्रधनायोद्धतायुधाः ॥ ७०६ ॥
मुञ्चन्नथ शरासारं भूरिशो रिपुभूपतीन् ।
न्यवारयदसावेको विवेको ऽरीनिवान्तरान् ॥ ७०७ ॥
वव्रुः कुमारमार्तण्डं तोयदा इव ते तदा ।
वर्षन्तो मङ्क्षु धारालैः शरजालैः समन्ततः ॥७०८॥
जीविताशां विमुच्याशु विधूतासिर्मृधाय सः ।
नन्दनो मेदिनीजानेर्यावदुत्तरति द्विपात् ॥ ७०९ ॥
हस्तस्रस्तसमस्तास्त्रं लालामालावृताननम् ।
तावन्निद्रामिलच्चक्षुर्विपक्षबलमैक्षत ॥ ७१० ॥ युग्मम् ॥
सुप्तानां विद्विषामन्तर्विरराज स राजसूः ।
आत्मेव ज्ञानिनो मूर्छत्कर्मपद्धतिमध्यगः ॥ ७११ ॥
तन्निद्राविस्मितं चन्द्ररत्नचूडौ खचारिणौ ।
नेमतुः संयतानीतशूरकेशरिणावमुम् ॥ ७१२ ॥
अथोत्फुल्लद्दगुन्मीलत्पुलकः परिरभ्य तौ ।
प्रीतः किमिदमित्येष पप्रच्छ पृथिवीशभूः ॥ ७१३ ॥

सद्यो ऽभ्युदयदानन्दरसोर्मिस्नानानिर्मलाम् ।
ऊचे वाचं तदा चन्द्रनामा खेचरशेखरः ॥ ७१४ ॥
कुमार मार्यमाणेषु खेचरेन्द्रेषु जीवतोः ।
पुनर्जन्मेव जज्ञे ऽद्य त्वदाज्ञापालनेन नौ ॥ ७१५ ॥
तथाहि हृदयग्राहिद्युतिविद्योति विद्यते ।
रथनूपुरचक्राख्यं वैताढ्यशिखरे पुरम् ॥ ७१६ ॥
तस्मिन्नस्ति मनस्तिग्मभावेन भुवनं द्विषन् ।
भृशं भीमात्मनां सीमा भीमाख्यः खेचराग्रणीः ॥७१७ ॥
तपोभिर्दुस्तपैरेष निःशेषखगपेषधीः ।
क्रूराक्षो राक्षसीं विद्यामसाधुः समसाधयत् ॥ ७१८ ॥
तत्ततः संकटं शङ्कमानाः क्वापि न निर्ववुः ।
नवोत्तरशतद्रङ्गसङ्गिनः खेचरेश्वराः ॥ ७१९ ॥
अद्य तद्भयचिन्तार्तिगतनिद्रस्य मे निशि ।
पुरो ऽभूत्कामिनी काचिदियत्ता रूपसंपदाम् ॥ ७२० ॥
मकरध्वजराजस्य राजधानीव जङ्गमा ।
दर्शयन्ती दृशं भावमयीमित्याह मामियम् ॥ ७२१ ॥
जानीहि मां महेन्द्रस्य महिषीं मोहदद्युते ।
मनो बद्धानुरागं तु सुभग त्वद्गुणेषु मे ॥ ७२२ ॥
तन्मदङ्गमनङ्गार्तं निवापय कृपामय ।
त्यज चिन्तां तवारतिं हुंकारेणैव भस्मये ॥ ७२३ ॥
क्षोभकैर्लोभकैश्चेति चेतोहृद्भिर्वचोभरैः ।
चिरमभ्यर्थायामास सा मां कामान्धिता भृशम् ॥ ७२४ ॥
परस्त्रीति निषिद्धैव त्वदाज्ञां ध्यायता मया ।
क्षणदान्ते विलक्षत्वं दधती सा तिरोदधे ॥ ७२५ ॥

सुहृद्यथ रथाङ्गानां दृक्पथाङ्गणभूषणे ।
आक्रन्दः श्रवणास्कन्दः को ऽपि व्याप दिशो ऽद्भुतः॥७२६॥
अथैत्य खेचराधीशपुरेभ्यः खेचरेश्वराः ।
क्रन्दसंरम्भसंभ्रान्तहृदि मय्यवदन्नदः ॥ ७२७ ॥
भीमेनाद्य पुरश्रेणिद्वयैश्वर्याय याचिता ।
हृद्यानि राक्षसी विद्या स्त्रीरूपाण्यभितः श्रिता ॥ ७२८ ॥
चटूक्तिभिः पतीकृत्य निखिलान्खेचराधिपान् ।
छलिनी तलिनीभूय बलिनी निजघान सा ॥ ७२९ ॥
द्वावेव बत जीवन्तौ दैवयोगेन केनचित् ।
भवांश्च रत्नचूडश्च दिष्ट्या दृष्ट्याद्य वीक्षितौ ॥ ७३० ॥
इति तद्वचनैर्मत्वा जीवन्तं सुहृदं निजम् ।
प्रीत्याहममृताम्भोधिमध्यमग्न इवाभवम् ॥ ७३१ ॥
अथ जीयात्कुमारस्य शिक्षा नौ जीवनौषधम् ।
विरुद्धराक्षसीरक्षासिद्धमन्त्रायितं यया ॥ ७३२ ॥
इति ब्रुवन्कुतो ऽप्येष तदा हृदि लुलोठ मे ।
वयस्य एष पीयूषतुषारलवहारवत् ॥ ७३३ ॥ युग्मम् ।
ततः प्रीतिभरस्यास्य भागं ते दातुमुद्यतौ ।
आवामिहागतौ दृष्टस्त्वं च युद्धसमुद्धतः ॥ ७३४ ॥
स्वापिता रिपवो बद्धा नीतश्चायं ततो ऽधुना ।
किं कुर्वो जीवदानैककल्पद्रुम समादिश ॥ ७३५ ॥
अथास्यकमलोन्मीलन्मधूच्चयमधं वचः
इदं गदितुमारेभे कुमारेण प्रमोदिना ॥ ७३६ ॥
युवां दिष्ट्याद्य निःक्रान्तौ राक्षसीकवलग्रहात् ।
अद्य दिष्ट्याहमाकृष्टो भवद्भ्यां संकटादितः ॥ ७३७ ॥

इदानीं तु क्षतैरार्त्ति क्षतरोहिलतारसैः ।
बलयोरङ्गिसंघातं सगुल्मोदयतं रयात् ॥ ७३८ ॥
इदं रचयतं निद्रादरिद्रं च द्विषां बलम् ।
अमुं च मुञ्चतं बन्धान्मा विषद्रुद्विपोरपि ॥ ७३९ ॥
इत्यादेशे कुमारेन्दोस्ताभ्यां तूर्णं विनिर्मिते ।
उत्तस्थौ दलिताशेषविकारं तद्बलद्वयम् ॥ ७४० ॥
दूरं त्रपानतः शूरकेसरी सिंहसूनुना ।
बहु सन्मान्य सत्कृत्य मुक्तः स्वनगमत्पुरम् ॥ ७४१ ॥
भीमतो भीमती मा भूद्भूर्या संभूय भास्वतोः ।
इत्युक्ताभ्यु कुमारेण महितौ प्रहितौ खगौ ॥ ७४२ ॥
अवलिप्त बलिष्ठानां धुर्यैः पुर्यैं ततः कृती ।
पदे पदे नृदेवानां वृन्दैर्वन्द्यपदाम्बुजः ॥ ७४३ ॥
प्रयाणान्ते पटावासविश्रान्तेः शान्तचेतसः ।
विज्ञप्तं प्रतिहारेण कुमारस्येदमन्यदा ॥ ७४४ ॥
केनापि सहितः पुंसा प्रहितः स्वामिना स्वयम् ।
जीमूतो नाम दूतो ऽस्ति कुमार द्वारि वारितः ॥ ७४५ ॥
विज्ञाय वेत्रभृन्नेत्रसंज्ञां भूपभुवस्ततः ।
दूतं च तं पुमांसं च दत्तसन्मानमानयत् ॥ ७४६ ॥
नरं तमग्रे कृत्वाथ दूतो नत्वेदमभ्यधात् ।
कुमार यदयं वक्ति तत्कार्यं राजवागियम् ॥ ७४७ ॥
उल्लसद्बूलतेनाथ कुमारेण निरीक्षितः ।
सो ऽभ्यधत्त सुधारोचिरौचित्यरुचिरं वचः ॥ ७४८ ॥
अस्ति संसारसारश्रीः स्वश्रीजितमरुत्पुरा ।
लक्ष्मीविलासवासो वासन्तीति श्रुता पुरी ॥ ७४९ ॥

तस्यां नाभाङ्कनामास्ति नाकनाथनिभो नृपः ।
पद्मवासेति यत्पाणिवासेनेवाभ्यधुः श्रियम् ॥ ७५० ॥
तस्य प्रिया श्रियामेकसदनं मदनावली ।
अस्ति राजीवजीवातुवदना मदनायुधम् ॥ ७५१ ॥
तदङ्गजा गजगतिर्जगति प्राप्तविश्रुतिः ।
आस्ते मुखानिलमिलद्भृङ्गा शृङ्गारसुन्दरी ॥ ७५२ ॥
त्रैलोक्यरमणीभ्यो ऽपि रमणीयतमामिमाम् ।
कन्यामनन्यस्पृहया ग्रहयांचक्रिरे गुणाः ॥ ७५३ ॥
भात्यसौ शशिलीलेन शीलेनैव मयात्र किम् ।
इतीवास्या बहिर्नास्यादेति प्रीत्यामपि स्मितम् ॥ ७५४ ॥
इयं बालापि शीलस्य परमां भूमिकां गता ।
कदापि न ददात्येव खिन्नेव त्वरितं पदम् ॥ ७५५ ॥
चन्दनाद्यपि सेव्यं सा सिषेवे स्वच्छया धिया ।
मनःकामनया हंसगमना न मनागपि ॥ ७५६ ॥
केलिषु सफलीचक्रे कदापीयं न मामिति ।
विमुक्ता कुपितेनेव सांप्रतं शैशवेन सा ॥ ७५७ ॥
यौवनं नलिनाक्षीषु विकारैककलागुरुम् ।
निर्विकारविलासेषु सा शिष्ययति संप्रति ॥ ७५८ ॥
भूपे तदनुरूपाय वराय विहितोद्यमे ।
सांप्रतं सर्वभूपानां रूपं चित्रेषु पश्यति ॥ ७५९ ॥
स्वमातृपितृसोदर्यवयस्याविरहासहा ।
विवाहं स्पृहये नाहमिति रमाह सखीषु सा ॥७६०। युग्मम्॥
तदाकर्ण्य तदाराध्येभ्यो निर्मोदा मदनावली ।
आरोप्य तन्यामङ्के सस्नेहं हृदावदत ॥ ७६१ ॥

विवाहोत्सववैमुख्यं वत्से धत्से कथं वृथा ।
शोच्या प्रियं विना रामा त्रियामा शशिनं विना ॥ ७६२ ॥
रमणी रमणीयापि रमणेन विवर्जिता ।
ज्ञानश्रीरिव चारित्ररहिता न हि राजते ॥ ७६३ ॥
अभर्तृका तृणेभ्योऽपि स्त्री पितॄणां गृहे लघुः ।
आयाति भ्रातृजायानामपि मुण्डीति वाच्यताम् ॥ ७६४ ॥
कलाहीनः पुमानग्निरज्वालो निर्जला नदी ।
विपतिर्युवतिश्चेति काप्यदर्यं न चतुष्टयम् ॥ ७६५ ॥
स्त्रीणां भवत्यनाथानां बन्धुरप्यभिभूतये ।
अब्जिनीनामिवाब्जोऽपि चन्द्रोऽनुद्गतभास्वताम् ॥ ७६६ ॥
श्रद्धेहि तद्विवाहाय पुत्रि मार्तिं विधेहि मे ।
गर्भवासेऽपि यद्दत्तः क्लेशलेशोऽपि न त्वया ॥ ७६७ ॥
इत्युक्तिमवधार्यैयमजेयममृतैर्वचः ।
आददे दीनशृङ्गाररसं शृङ्गारसुन्दरी ॥ ७६८ ॥
युक्तमुक्तमिदं मातर्जातनीतिलयं त्वया ।
दुःखाय तु गुणेनैकेनापि हीनः प्रियः स्त्रियाम् ॥ ७६९ ॥
कुलं यदि न तद्रूपं ते चेत्तन्नामलाः कलाः ।
चैत्ते च ताश्च तन्मातर्न शीलं सुलभं नृषु ॥ ७७० ॥
रूपशाली कलामाली कुलीनश्चैकरागभाक् ।
न प्राप्यश्चेत्प्रियो नारी तत्कुमार्यैव जीर्यतु ॥ ७७१ ॥
कर्तुं शक्यं वरे रूपकलाकुलनिरूपणम् ।
कस्त्वेदं वेद यत्तस्य मनः कुत्रापि रंस्यते ॥ ७७२ ॥
एकस्यां विरतः कन्यामन्यामप्युद्वहेत् पुमान् ।
नार्याः पतिविरक्ताया मरणं शरणं पुनः ॥ ७७३ ॥

इत्यादिगुणदोषैकविचाराचलचेतना ।
मातर्नाहं विवाहाय वाच्या किंचित्कदाचन ॥ ७७४ ॥
एवं निरुत्तरीकृत्य मातरं कातराशया ।
अह्नायोत्थाय वैलक्ष्यविलोपाय ननाम सा ॥ ७७५ ॥
ततो निरादरीभूते भूपे तन्महकर्मसु ।
कलावलिविलासैकसुखमग्नेव सा स्थिता ॥ ७७६ ॥
मुदा स्वप्ने ऽन्यदापश्यन्निशान्ते शान्तधीरियम् ।
आत्मानं कल्पवृक्षस्य वामतः कामतः स्थितम् ॥ ७७७ ॥
यथेप्सितप्रदो भावी वल्लभस्ते यथेप्सितः ।
इत्याचचक्षिरे तस्यै स्वप्नव्याख्यां विचक्षणाः ॥ ७७८ ॥
साचलन्नृविमानेन प्रातः प्रीतिमती ततः ।
नन्तुमुद्यानसज्ञानं पद्मानन्दनमुद्यता ॥ ७७९ ॥
केनचित्पथि विक्रीयमाणं माणिक्यपञ्जरे ।
कंचिद्वचनचातुर्यधीरं कीरं ददर्श सा ॥ ७८० ॥
तदिष्टवित्तदानेन तं क्रीत्वाकृष्य पञ्जरात् ।
कलयन्ती करे कीरं कामायतनमाप सा ॥ ७८१ ॥
ततो मरकतश्मश्रुभ्रूकुन्तलकनीनिकः ।
बालप्रवालनिष्पन्नपदपाणिरदच्छयः ॥ ७८२ ॥
पद्मरागदलश्रेणिपिनद्धनखपद्धतिः ।
कांचित्कांचित्क्रियामङ्गैर्जीवद्भिरिव कल्पयन् ॥ ७८३ ॥
हसन्निवाल्पभिन्नोष्ठदृश्यमौक्तिकदन्तरुक् ।
दृशा प्रसादस्मितया पश्यन्निव पुरःस्थितान् ॥ ७८४ ॥
जातरूपमयं बिभ्रज्जातरूपमयं वपुः ।
दृष्टश्च कामः कीरेण गलश्चोत्पत्य तत्पुरः ॥ ७८५ ॥
चतुर्भिः कलापकम् ॥

ततः कौतूहलाद्दृश्यमानः क्ष्मानाथकन्यया ।
काममूर्तिं प्रति प्रोचे वाचमित्युत्सुकः शुकः ॥ ७८६ ॥
कुमारराज यच्छाशु सुप्रियाणि फलानि मे ।
सुप्रियं ते पठाम्यार्याद्वयमेतन्निशम्यताम् ॥ ७८७ ॥
अभियुक्तिशुक्तिमुक्तागुणगणयुक्ताः श्रयन्त्कलाः सकलाः ।
उपलभरविपुलभारैः किमलंकारैः कृती कुरुते ॥ ७८८ ॥
फलमविकलदुर्जपजपदुस्तपतपसोर्यदर्जयन्ति जनाः ।
तत्कृतये निजयुवतिषु सुकृतकृतः सन्तु संतुष्टाः ॥ ७८९ ॥
तावन्मात्रियमेवेदमार्यायुग्मं शुकस्तु कः ।
इति ध्यानच्युते सिंहसुते सोऽकथयत्कथाम् ॥ ७९० ॥
इति कीरोक्तिमाकर्ण्य कन्यां कापि सखी जगौ ।
आस्ते भुवि युवा दुःखलोगी को ऽपीदृशो ऽप्यहो ॥ ७९१ ॥
स्मरं भ्रमात्कुमारेति संबोध्यार्यायुगं पठन् ।
रूपं कुलं वपः शीलं गुणान्यस्य शुको ऽभ्यधात् ॥ ७९२ ॥
अथ कीरकुमारासि त्वं कुमारस्य कस्य रे ।
तथ्यं वद यथा दद्यां ह्यां तव फलावलीम् ॥ ७९३ ॥
इति पृष्टः करे कृत्वा कीरः कन्यकया तया ।
स पपाठ सुवाक्तानि मुक्तान्येव मुहुर्मुहुः ॥ ७९४ ॥
ततस्तिरश्चां चैतन्यचातुरी केति चेतनी ।
किंचिदञ्चितपञ्चेषुः सा विचित्ता गृहं गता ॥ ७९५ ॥
न तल्पे न सखीजल्पे न वने न निकेतने ।
न जले न स्थले ऽप्यस्या मनः क्वचन निर्वृतम् ॥ ७९६ ॥
तुलितार्कच्छविरहो विरहोऽस्या हृदि ज्वलन् ।
ददौ निद्रापनोदाय मदनस्य दिनोदयम् ॥ ७९७ ॥

स कुमारः क्व रे कीर जल्पन्तीति प्रतिक्षणम् ।
मनो मनोभवभवव्याधिमत्तमधत्त सा ॥ ७९८ ॥
क्रमान्निहुतवह्निश्रीर्विरहस्तां व्यहस्तयत् ।
पुष्पचापधरापस्य प्रताप इव दुःसहः ॥ ७९९ ॥
तदङ्गेषु हिमं सख्यो यद्यदर्तिभिदे ददुः ।
तत्तत्तदूष्मणैवाशु पतदेवापदापदम् ॥ ८०० ॥
अमान्मन्ये मदङ्गेषु व्याप तापो ऽखिलं जगत् ।
उष्णाः किमन्यथा चन्द्रजलजन्मदलस्रजः ॥ ८०१ ॥
निशेश त्वं निशाहीनो दीनो भवसि तत्कथम् ।
वियुक्तान्दहसि स्युर्वा नराः सहजनिष्ठुराः ॥ ८०२ ॥
जले कुमुदिनीभिन्ना प्राप्तमादाय पाणिना ।
दलयध्वं विधुं सख्यः साक्षान्मत्तापकारिणम् ॥ ८०३ ॥
जानानापि वियोगार्तिं पद्मिनीशस्य पद्मिनि ।
किं मां दहसि हा कष्टं स्त्रियो ऽपि स्त्रीषु निष्कृपाः ॥८०४॥
सख्यः स्फुटति मे वक्षः साधु स्फुटतु वा जवात् ।
स कुमारः स्मराकारः प्रेक्ष्यते यदि हृद्गतः ॥ ८०५ ॥
इत्यादि बहु जल्पन्ती पतन्ती मूर्छया मुहुः ।
सुदती रुदतीभिः सा वयस्याभिरलोक्यत ॥ ८०६ ॥
षड्भिः कुलकम् ॥

रे कीर क्व कुमारो मां मुक्त्वा यात्यनुमीयताम् ॥
इति निद्रालयान्तेषु सा स्वप्नानलपन्मुहुः ॥ ८०७ ॥
तीव्रतापभृतस्तस्या वयस्याः परितः स्थिताः ।
अस्रैरधारयन्धारायन्त्रपुत्रीचयश्रियम् ॥ ८०८ ॥
अथेदं मेदिनीशेन मत्वा दिष्टैः पुरे चरैः ।

अवगन्तुं कुमारं तं व्यलोकि शुकविक्रयी ॥ ८०९ ॥
चिरं निरीक्ष्यमाणोऽपि कापि प्रापि नरैर्न सः ।
शुद्धधर्मोपदेष्टेव दूरभव्यैः शरीरिभिः ॥ ८१० ॥
सद्यः क्वचिदनासाद्य रसाविभुरसाविमम् ।
समारब्ध कुमारस्य लब्धये ऽस्य स्वयंवरम् ॥ ८११ ॥
सद्यो विमुच्य कौमार्यं ये राज्यं भेजिरे नृपाः ।
गुणोदाराः कुमाराश्च ये तान्भूपो ऽयमाह्वयत् ॥ ८१२ ॥
तनयो नयसारस्य मन्त्रिणः सागराभिधः ।
त्वामाह्वातुमहं नाथ प्रहितस्त्वत्पितुः पुरम् ॥ ८१३ ॥
आज्ञप्तोऽसि कृतिन्राज्ञा त्वज्जयोत्कर्षहर्षिणा ।
तद्वासन्तीं पुरीमेतुमुरीकुरुतरां त्वराम् ॥ ८१४ ॥
न तत्रायामि वामाक्ष्या तयान्यस्मिन्वृते यतः ।
ममाभिभव एव स्यादिदं वदति भूपजे ॥ ८१५ ॥
स जगौ वीरकर्य त्वं कर्य एव तया यतः ।
त्वयि दृष्टे ममाद्याभूदुद्यानमदनभ्रमः ॥ ८१६ ॥
ईदृग्रूपं विहाय त्वां कन्या सान्यं वृणोति चेत् ।
तत्का तव पराभूतिस्तया किमगुणज्ञया ॥ ८१७ ॥
इत्याद्युक्तिभरैः स्वस्य दर्शयन्मन्त्रिपुत्रताम् ।
कुमारः सागरः कीर्तिसागरं नगरे ऽनयत् ॥ ८१८ ॥
वासन्तीवासवेनाथ संमुखं समुपेयुषा ।
कृतसत्कृतिनास्थापि स धामनि सधामनि ॥ ८१९ ॥
यैर्न्यभालि प्रभालिप्तनभास्तत्र स भूपभूः ।
वृथान्यवीरागमनं ते नरा मेनिरेतराम् ॥ ८२० ॥
तदा शृङ्गारसुन्दर्यै चारवर्यैरुपागतः ।

कुमारः सो ऽयमाचख्ये व्याचख्ये च गुणे गुणे ॥ ८२१ ॥
अथ पृथ्वीशपुत्री सा प्रैषयच्चम्पिकां सखीम् ।
ज्ञातुं वृत्तानि वीराणां सर्वेषां शर्वरीमुखे ॥ ८२२ ॥
सा यात्वा यामिनीयामयमले समुपेयुषी ।
सुप्ताखिलसखीलोकां प्राह भूपसुतां प्रति ॥ ८२३ ॥
भूपप्रहितसत्कारधारिनारीशतान्विता ।
न्यभालयं भुजभृतः समस्तानपि तानहम् ॥ ८२४ ॥
कन्दर्पहस्तशस्त्रीषु स्त्रीषु तासु गतास्वमी ।
विविधां विदधुर्वीरा विकृतिं कृतिताकृते ॥ ८२५ ॥
कलाकलापरुचिरः सुरोचिर्लोचनप्रियः ।
कश्चिदात्मनि भूपेन्दुः खिंगतामकलङ्क्यत ॥ ८२६ ॥
कलानां पटलं रूपं गुणानां च गणं परः ।
मदेनादूषयन्मद्यबिन्दुनेव पयोघटीम् ॥ ८२७ ॥
कीर्तिं कलाधुनीधौतां गुणस्यूतां पटीमिव ।
व्यधान्मित्रक्रुधा कश्चिद्धूम्ययेव मलीमसाम् ॥ ८२८ ॥
किमप्यजल्पन्नद्याङ्गः को ऽपि स्तब्धत्वनिश्चलः ।
अविज्ञ एव विज्ञातो मया ग्रावपुमानिव ॥ ८२९ ॥
इति ताभिः समं राजलोकमालोकमानया ।
प्रथयन्त्या यथावस्थं मिथस्तत्कीर्तिकीर्तनम् ॥ ८३० ॥
श्रूयते यद्यशः शीलकुलरूपकलामयम् ।
सौधं सनत्कुमारस्य तस्य सोत्कण्ठमागतम् ॥ ८३१ ॥
॥ युग्मम् ॥
मध्येधाम वयं यामस्तन्मुखालोकनोन्मुखाः ।
यावत्तावन्महेन्द्रेणाप्यनुच्छिष्टं वहन्मदः ॥ ८३२ ॥

स कुमारः कलावद्भिर्भूरिभिर्भूषितान्तिकः ।
न्यभाल्यत सभावर्ती चक्रवर्ती शुभात्मनाम् ॥८३३॥युग्मम्॥
लोलमौलितया चञ्चच्चूडामणिमरीचिभिः ।
आरात्रिकमिवातन्वन्कवीनां काव्यसंपदः ॥ ८३४ ॥
चालयन्नङ्गुलीं रङ्गन्नखांशुवितताँशुकाम् ।
वाग्गेयकारिणां गीतेः पताकामिव कल्पयन् ॥ ८३५ ॥
चमत्कारकरानेवं स गृह्णन्गुणिनां गुणान् ।
चमत्कारकरं दानं ददानो ऽनृणतां ययौ ॥ ८३६ ॥
त्रिभिर्विशेषकम् ॥
मुधाकृतसुधावृष्ट्या दृष्ट्या प्रीतिप्रसन्नया ।
तदा सेवकतातापं सेवकानां लुलोप सः ॥ ८३७ ॥
तदा कुमारः कुतुकी यत्र यत्र दृशं ददौ ।
विज्ञानं दर्शयामास स्वं स्वं वैज्ञानिकः स सः ॥ ८३८ ॥
नृपपुत्रि क्षणे तत्र चित्रविद्याविशारदः ।
को ऽपि चित्रपटं पाणौ कुमारस्य समर्पयत् ॥ ८३९ ॥
तं वीक्ष्य विस्मितो ऽपृच्छन्नृपभूर्लिपिकारिणम् ।
चित्रसंवादिनी तस्या रूपश्रीरस्ति वा न वा ॥ ८४० ॥
स जगाद क संवादस्तस्याश्चित्रेण वर्तताम् ।
शक्या रचयितुं केन चित्रे चन्द्रस्य चन्द्रिका ॥ ८४१ ॥
दृग्लीलाद्युज्झितं कास्तु चित्रकर्म तया समम् ।
यस्या दृश्यार्धदेहत्वात्प्रतिबिम्बे ऽपि नोपमा ॥ ८४२ ॥
नेदृशी कापि कान्तास्ति कुमार त्रिजगत्यपि ।
विश्वरूपाणि नः पाणिवर्तीनि लिपिशास्त्रतः ॥ ८४३ ॥
इत्याकर्ण्य चिरं चित्रे पश्यन्कामपि तामयम् ।

कुमारः कामबाणार्त इव मौलिमकम्पयत् ॥ ८४४ ॥
क्षणं क्षुभितमात्मानमथ संयम्य धीरधीः ।
चित्रं संवृत्य चित्रज्ञं कुमारः सत्कार तम् ॥ ८४५ ॥
अस्मासु प्रतिहारोक्तिविदितासु ततः कृती ।
स न्ययुङ्क्त स्मितं हर्षिस्मितसंहर्षिलोचनम् ॥ ८४६ ॥
सो ऽस्माभिर्माल्यकर्पूरचन्दनाद्युपढाकितम् ।
जग्राह बहुमानेन गौरं स्वगुणवृन्दवत् ॥ ८४७ ॥
दापितेषु निविष्टाभिर्विष्टरेषूचितं ततः ।
चकार चिरमालापं सहास्माभिर्महाशयः ॥ ८४८ ॥
अस्ति शृङ्गारसुन्दर्याः क्रीडाकीरो विशारदः ।
त्वत्सभोचित एवेति विज्ञप्तो ऽसौ मया तदा ॥ ८४९ ॥
पश्चान्मुक्तो मयाप्यस्ति दत्तहृत्कौतुकः शुकः ।
इत्युक्ते ऽथ कुमारेण कश्चित्तस्य चरो जगौ ॥ ८५० ॥
कीरश्चौरैः स माणिक्यपञ्जरेण समं हृतः ।
इति श्रुतिवशात्किंचिच्चिन्तार्त इव स स्थितः ॥ ८५२ ॥
कलशीभवति व्योममण्डपस्येन्दुमण्डले ।
अस्मान्सत्कृत्य कर्तव्यप्रवीणः प्राहिणोत्ततः ॥ ८५२ ॥
ईदृक्सनत्कुमारः श्रीकेलिशैलो जयत्ययम् ।
जगत्त्रयचमत्कारिहारिचारित्रभाजनम् ॥ ८५३ ॥
कास्ते सनत्कुमारः किं माममद्यापि न भाषते ।
न पाठयति सूक्तानि न फलानि प्रयच्छति ॥ ८५४ ॥
तां श्रुत्वा चम्पिकावाचं तदित्थं भाषके शुके ।
आचचक्षे विलक्षेदं वचः शृङ्गारसुन्दरी ॥ ८५५ ॥

सखि यत्रानुरक्तं मे मनस्तावत्स एव सः ।
इत्यधीरस्य कीरस्य वाचा निश्चीयते मया ॥ ८५६ ॥
किं तु कान्तामसौ कांचिच्चित्रे यद्वीक्ष्य चुक्षुभे ।
मनः सपत्नीभीतं मे तेन संप्रति कम्पते ॥ ८५७ ॥
असावपीदृशश्चेत्तत्कमन्यं मन्यसे वरम् ।
स्वयंवरोत्सवादर्वाग्मृत्युरित्युचितो मम ॥ ८५८ ॥
इत्थमुक्त्वा सनिःश्वासं शयनीये लुलोठ सा ।
चम्पिकापि चिरं भ्रान्तिश्रान्ताशेत समीपतः ॥ ८५९ ॥
चित्रस्त्रीदृत्तदुःखौघसंघट्टाकुलमानसा ।
तदा बहुफलं मृत्युं जानती जीवितव्यतः ॥ ८६० ॥
निद्रापरं परीवारं मत्वा सत्त्वावलम्बिनी ।
शनैः शनैः समुत्थाय कायव्ययमनोरथा ॥ ८६१ ॥
तत्रैव केलिदोलायाः कटके नृपबालिका ।
पाशवत्कण्ठबन्धाय स्वं बबन्धोत्तरीयकम् ॥ ८६२ ॥
त्रिभिर्विशेषकम् ॥
नैवेहाभूद्भवे चेन्मे कान्तो जन्मान्तरे ऽपि तत् ।
मदेकासक्तचित्तो ऽस्तु तदेकासक्तचेतसः ॥ ८६३ ॥
इदं निगद्य सद्यो ऽथ कण्ठं पाशे ऽक्षिपच्च सा ।
बाले मा मेति चासीद्दीश्छिन्नः पाशः पपात च ॥ ८६४ ॥
युग्मम् ॥
चम्पिका तु तदा मुक्तनिद्रा तद्व्यतिकरक्षणम् ।
कर्षन्ती पाशतः कण्ठमालोकत कुमारिकाम् ॥ ८६५ ॥
ततः किमिदमित्यस्यै पृच्छन्त्यै सैव सत्वरम् ।
आचक्षत चमत्कारि कुमारी चरितं निजम् ॥ ८६६ ॥

किमेतत्पतितं क्ष्मायामित्युत्थायाथ चम्पिका ।
करेणादाय पश्यन्ती हृष्यन्तीदमुवाच सा ॥ ८६८ ॥
देवि देवि स एवायं वामाचित्रपटः स्फुटः ।
दिष्ट्या च वर्धसे देवि यत्त्वमेवात्र चित्रगा ॥ ८६८ ॥
सनत्कुमारं त्वय्येवासक्तं कथयितुं पुनः ।
चित्रस्थिता त्वमेवात्र कथमार्तासि कथ्यताम् ॥ ८६९ ॥

इति वागमृतं तस्याः स्फीतं पीत्वा पतिंवरा ।
तमादाय करे चित्रपटमित्याददे वचः ॥ ८७० ॥
श्लाघ्यासि लब्धतत्सङ्गा चित्रशृङ्गारसुन्दरि ।
शोचनीयासि च रुचं धत्से तद्विरहे ऽपि यत् ॥ ८७१ ॥
धन्यास्मि तत्करस्पर्शं प्राप चित्रगतापि यत् ।
इतीयमुद्यत्पुलकं मुमुदे कुमुदेक्षणा ॥ ८७२ ॥
प्रियं परिरभे किं न पटान्तरितमप्यहम् ।
सेत्यदात्तं परीरम्भमित्रं चित्रपटं हृदि ॥ ८७३ ॥
करगोचरमप्येनामनयश्चित्रसुन्दरीम् ।
कुमारवर नायासि किं चक्षुर्गोचरे ऽपि मे ॥ ८७४ ॥
एवं तयोक्ते शून्ये ऽपि सत्यः प्रत्यक्षतामगात् ।
सनत्कुमारो धामौघधौतधामान्तरः पुरः ॥ ८७५ ॥

गृहीत करकं दत्ताचमनं मुञ्चतासनम् ।
कुमारः सो ऽयमायातीत्यूचे क्षीरो निरूप्य ताम् ॥ ८७६ ॥
अथाभ्युत्थाय हर्षोर्मिप्रणुन्नेवाशु चम्पिका ।
ददावासनमासीने कुमारे चेदमब्रवीत् ॥ ८७७ ॥
अद्य नः सफलं जन्म सुमुहूर्तोद्य यामिनी ।
यदस्मद्धाम्नि देवेन स्वयं पादो ऽवधारितः ॥ ८७८ ॥

अयं ते देवि स प्राणदयितो यस्त्वदिच्छया ।
तूर्णमाज्ञाविधायीव जज्ञे लोचनगोचरः ॥ ८७९ ॥
एतदालोकपीयुषपानविघ्नां त्यज त्रपाम् ।
अस्याननेन्दौ हृद्याङ्गि कुरङ्गीकुरु लोचनम् ॥ ८८० ॥
इत्युक्त्यासकृदुल्लास्य दृशं भूपालबालया ।
दृष्टास्यं हृष्टमनसं कुमारं स्माह चम्पिका ॥ ८८१ ॥
हर्षाश्रुवारिहारिण्या स्फारतारांशुदूर्वया ।
इयं ते वीर दत्ते ऽर्घं दृशा प्रसृतिदीर्घया ॥ ८८२ ॥
अस्ति त्वदुचितं नान्यदातिथ्यं त्रिजगत्यपि ।
त्रिजगन्महनीयेयमेवातिथ्यं तवास्तु तत् ॥ ८८३ ॥
स्वागतं वीरकोटीर तवास्मिन्नस्मदोकसि ।
विशतः स्खलितं नासीत्कथमुद्दामयामिके ॥ ८८४ ॥
अथोदितस्मितव्याजराजद्युतिततीरिति ।
कुमारस्तोषदुग्धाब्धिमुक्ताली रुज्जगार गाः ॥ ८८५ ॥
सखीं शृङ्गारसुन्दर्यास्त्वां मत्वा कीरकीर्तनात् ।
सहैवाहमिहागच्छमदृशीभूय विद्यया ॥ ८८६ ॥
कण्ठपाशं कुरङ्गाक्ष्याः कृन्ततो ऽत्र करान्मम ।
च्युतश्चित्रपटो हीण इवास्यां दृक्पथस्पृशि ॥ ८८७ ॥
स्वं च धन्यममन्ये ऽहमिह स्नेहवशंवदाम् ।
इमामालोकयँल्लोकत्रयलोचनचन्द्रिकाम् ॥ ८८८ ॥
इति वर्षति कर्णेषु कुमारे सूनृतामृतम् ।
नृपतिप्रतिहारेण गर्जिवद्गदितंबहिः ॥ ८८९ ॥
रे किंकरा धराजानिर्युष्मानाज्ञापयत्यदः ।
ह्यः संपाद्यतामद्य स्वयंवरणमण्डपः ॥ ८९० ॥

अयि दिक्करिकाः कार्यं कुमार्याः स्नापनादिकम् ।
स्वयंवरमुहूर्तो हि स्वो ऽस्ति स्वस्तिप्रदः प्रगे ॥ ८९१ ॥
त्वरध्वं मरुदध्वानमधुना विधुनाशकः ।
आरोहति क्षपाक्षेपी पश्यतामेव वो रविः ॥ ८९२ ॥
इत्युक्त्वा विरते तत्र धात्रीकमितुः सुतः ।
ऊचे प्रेमसुधावीचिं वाचं नृपसुतां प्रति ॥ ८९३ ॥
त्वद्गुणासक्तचित्तो ऽहमन्वहं नृपनन्दनि ।
मा स्म मामन्यथा स्वप्नसंकथास्वपि शङ्किथाः ॥ ८९४ ॥
यामि संप्रति वामाक्षि स्थातुमत्रोचितं न मे ।
मयात्मनो मनो मुक्तमस्ति सेवामयं त्वयि ॥ ८९५ ॥
इत्युक्त्वा स तिरोभूच्च तामीयुश्च समुत्सुकाः ।
प्रतिकर्मविनिर्माणचारिकाः प्रतिचारिकाः ॥ ८९६ ॥
किंकराश्च त्वराचण्डगतयो मण्डपं ययुः ।
तं च मण्डनमण्डल्या मण्डयामासुराशु ते ॥ ८९७ ॥
स्वयंवरोत्सवे तस्मिन्पताकापाणिभिश्चलैः ।
शुशुभे ककुभामीशानाह्वयन्निव मण्डपः ॥ ८९८ ॥
तस्मिन्विश्वमनोमोहदिवसोदयभास्कराः ।
निशातकान्तयः शातकुम्भकुम्भा विरेजिरे ॥ ८९९ ॥
तत्रोरुतोरणस्तम्भभाजो चन्दनमालिकाः ।
लक्ष्म्याः स्वभावलोलायाः केलिदोलाकलां ललुः ॥ ९०० ॥
मुक्तापालम्बनक्षत्रहृद्या विद्योतितद्युतः ।
स्मरप्रसरनिस्तन्द्रास्तत्र चन्द्रोदया बभुः ॥ ९०१ ॥
चञ्चदुच्चपटश्रेषु तत्र मञ्चेषु दिद्युते ।
स्फारैः पुष्पगृहैः पुष्पायुधयन्त्रायुधैरिव ॥ ९०२ ॥

मुक्ताव्यतिकरोच्चिष्णुकस्तूरीमण्डलच्छलात् ।
ईयुस्तत्र सनक्षत्राः स्मरमित्राणि रात्र्यः ॥ ९०३ ॥
मङ्गल्यकलशास्तत्र विश्वानन्दाभिनन्दिनः ।
अभजञ्शशभृल्लीलां नीलाम्भोजभृतः सिताः ॥ ९०४ ॥
श्यामशोणसितैः सैष रत्नस्तम्भांशुभिर्बभौ ।
रजःसत्त्वत्रयीरिव हृतैर्नृणाम् ॥ ९०५ ॥
समाकृष्ट इवोत्कृष्टैः पुण्यैः पुंसां [illegible] ।
स पुरीमण्डनो जज्ञे स्वःखण्ड इव मण्डपः ॥ ९०६ ॥
ध्वानस्तूर्यस्य प्रस्फूर्जन्दूरमूर्जस्वलोदयः ।
मण्डपान्तःसमुद्भ्रान्तस्मरार्णवरवच्छविः ॥ ९०७ ॥
तं मण्डपमखण्डश्रीमालमालोकितुं तदा ।
पूर्वशैलशिरोभूषा पूषाभूत्कुतकादिव ॥ ९०८ ॥
दूतालिभिः समाहूताः पुरुहूतास्ततः क्षितेः ।
सशृङ्गाराः कुमाराश्च मञ्चसंचममाश्रयन् ॥ ९०९ ॥
निशाचरितरोचिष्णुप्रगुणद्विगुणद्युतिः ।
मञ्चसिंहासनं सिंहभूपभूरप्यभूषयत् ॥ ९१० ॥
पतिंवरा निराशैस्तैर्म्लानं वीरैरिहागते ।
विमुक्तश्रीस्पृहैरब्जैरिव कैरवबान्धवे ॥ ९११ ॥
पृष्ठतो ललितं गीतं गायन्तीभिस्तदालिभिः ।
अग्रतो बन्दिनीष्टन्दैर्यदद्भिर्विंशदाः स्तुतीः ॥ ९१२ ॥
वंशवीणादि तद्विद्यैर्वादयद्भिरितस्ततः ।
आनन्द्यमानहृदया हृद्यालुभिरमन्दैः ॥ ९१३ ॥
यनामयोगदग्धानि श्यामरूपाणि पाणिना ।
धुन्वाना धावमानानि मनांसि स्वगलिच्छलात् ॥ ९१४ ॥

अमान्तमन्तरुद्भान्तं कश्मीरजरजश्छलात् ।
सनत्कुमाररूपश्रीरागमङ्गेषु बिभ्रती ॥ ९१५ ॥
विभूषणज्झणत्कारैर्नर्तयन्तीव मन्मथम् ।
स्मितया हासयन्तीव रतिं लोचनलीलया ॥ ९१६ ॥
पीयमानमुखेन्दुश्रीर्लोकचक्षुश्चकोरकैः ॥
जीवादिशेति जल्पद्भिः सेव्यमाना सखीजनैः ॥ ९१७ ॥
चम्पिकाहस्तविन्यस्तस्वयंवरणमालिका ।
विवेश नृविमानस्था मण्डपं नृपनन्दिनी ॥ ९१८ ॥

सप्तभिः कुलकम् ॥

अभूवन्नुद्भवद्भावविसंस्थुलहृदां तदा ।
तद्विलोकादधीराणां वीराणां विविधाः क्रियाः ॥ ९१९ ॥
तथाहि ।

प्रसन्नीकर्तुमिव तां कश्चित्तत्पादसोदरम् ।
आरोपयन्नृपो मूर्ध्नि लीलातामरसं रसी ॥ ९२० ॥
अस्य धात्रि निधास्ये त्वामित्यस्यै कथयन्निव ।
कश्चित्करेण निःसीमं सीमन्तमणिमस्पृशत् ॥ ९२१ ॥
कङ्कणे पाणिपुष्पाणि को ऽपि न्यधित लीलया ।
ग्रहान्नवापि तां लब्धुं तज्जुषः पूजयन्निव ॥ ९२२ ॥
रेजे सख्युः पुरस्थस्य वेणिं पाणौ धरन्परः ।
स्वं तस्यै वशगं वक्तुं कुर्वन्दिव्यमिवोरगम् ॥ ९२३ ॥
कश्चिज्जगाद पादान्तजुषो नीचैर्मुखः सखीन् ।
नमन्मौलितया तस्याः सामनि प्रविशन्निव ॥ ९२४ ॥
अपरः कम्पयामास मौलिमालोकयन्निमाम् ।
पुष्पबाणेन बाणेन बाढं हत इवोरसि ॥ ९२५ ॥

हृदि स्वगरजसा कीर्णे चिक्षेपान्यो मुखानिलम् ।
तामनात्मोचितां मत्वा न्यग्मुखो निःश्वसन्निव ॥ ९२६ ॥
तवेन्दुसुन्दरं वक्त्रमिति तां ज्ञापयन्निव ।
मुष्ट्या न्यमीलयल्लीलापद्मपत्रावलीं परः ॥ ९२७ ॥
सुवर्णकेतकीपर्णमपरः करजाङ्कुरैः ।
विलिलेख तदङ्गेषु दत्तदक्पुलकाङ्कितः ॥ ९२८ ॥
कश्चित्तदर्शनोद्भिन्नस्वेदबिन्दुचयाञ्चितः ।
अहो संयदयं धर्मो ऽयमित्यूचे ऽन्तःस्मितान्सखीन् ॥ ९२९ ॥
तां निरीक्ष्य कुरङ्गाक्षीं दृशं को ऽपि हृदि न्यधात् ।
तत्कालमिह कामेन क्षिप्तं काण्डमिवेक्षितुम् ॥ ९३० ॥
एवं विकुर्वतामुर्वीपतीनामग्रवर्त्मनि ।
आनिनाय जया नाम प्रतिहारी पतिंवराम् ॥ ९३१ ॥
अथो निवार्य तूर्यादि दर्शयन्ती धरापतीन् ।
इयमूचे विलोलभ्रूशृङ्गा शृङ्गारसुन्दरीम् ॥ ९३२ ॥
अमी समीयुस्त्वद्दृश्या विश्वे विश्वम्भराधराः ।
चन्द्रीकुरु कमप्येषु चक्षुःकुमुदकौमुदि ॥ ९३३ ॥
अयं स हंससंज्ञः श्रीनाभिसूनुकुलाङ्कुरः ।
राशीकृतयशा देवि काशीपुरपुरन्दरः ॥ ९३४ ॥
दिवा विश्वसमक्षाणि निशि स्वप्नमयानि च ।
न विश्राम्यति देवार्चादानानि जनयन्नयम् ॥ ९३५ ॥
एष धर्मैकनिर्माणव्यसनी शक्तिमानपि ।
अन्यैरपि नृपैर्भुज्यमानामुर्वीमुपेक्षते ॥ ९३६ ॥
अस्मै गमनलालित्यवरले तरले वृणु ।
रङ्गद्गङ्गातरङ्गेषु हंसैकसहचारिणी ॥ ९३७ ॥

याति पूज्यस्य कुल्यो ऽपि पूज्यतुल्यो नमस्यताम् ।
कुमार्या मन्दमित्युक्ते ऽभिसृत्याग्रे जगौ जया ॥ ९३८ ॥
अयं जयन्त इत्युर्वीजानिर्विजयते युवा ।
जेता द्विषामयोध्यानामयोध्यानायको बली ॥ ९३९ ॥
कान्दिशीकारिदुःकीर्तिकस्तूरीपूरिताश्रियाम् ।
अयं यात्राविहारी स्वं हारीचक्रे दिशां यशः ॥ ९४० ॥
अमुं वृणु विलासेषु देवि सेविष्यसे यदि ।
सरयूतीरवानीरसमीरसरसा निशाः ॥ ९४१ ॥
स्मरश्रीभासुरे ऽप्युद्यदहर्पतिमहस्यपि ।
कन्यास्मिन्नाभजद्भावं वसन्ते मालतीव सा ॥ ९४२ ॥
दत्तद्वित्रिपदावादीत्तामुद्दिश्य जया ततः ।
प्रथितो ऽयं पृथुर्नाम पृथुश्रीर्मथुरापतिः ॥ ९४३ ॥
शक्यते लेखितुं नैष चित्रे चित्रकरैरपि ।
स्रष्टुं चित्तेऽपि चिद्रूपैरेतद्रूपं न पार्यते ॥ ९४४ ॥
अयं स्वतेजःसप्ताश्वसंतप्तामन्वहं महीम् ।
अमन्दैश्चन्दनस्यन्दैरिव सिञ्चति कीर्तिभिः ॥ ९४५ ॥
अमुं वृणीष्व रन्तुं चेदुचिता रुचिता तव ।
उद्यत्कलिन्दजाविन्दुवृन्दा वृन्दावनावनिः ॥ ९४६ ॥
राज्ञो ऽस्य मुखमश्रीकमालोक्य शिबिकावहाः ।
इहाबद्धस्पृहां कन्यां मन्वाना जग्मुरग्रतः ॥ ९४७ ॥
जगादाथ जया देवि जयनामा जयत्ययम् ।
उज्जयिन्या विभुर्विश्वजयिन्याः संपदां पदम् ॥ ९४८ ॥
अयं दिग्विजयोदारबलप्राग्भारभारिणीम् ।
मृणालनाललीले ऽपि महीं बाहौ वहत्यहो ॥ ९४९ ॥

अमुं तृणीकृतारातिं वृणीष्व वरवर्णिनि ।
सपत्नी रत्नगर्भा ते भातु रत्नाकराम्बरा ॥ ९५० ॥
रत्नदण्डप्रतिमितां भूपे ऽस्मिन्नस्मितेक्षणाम् ।
तां वीक्ष्य कन्यकां निन्युर्विमानं ते ऽन्यतो नराः ॥ ९५१ ॥
अथावदज्जया देवि पश्यामुं दर्पकाभिधम् ।
पाण्ड्यं कोदण्डपाण्डित्यचण्डमाखण्डलं भुवः ॥ ९५२ ॥
द्विषः स्वप्नेषु वीक्ष्यामुमुदस्रं जातजागराः ।
नमन्त्यस्य भ्रमाच्चित्रमन्मथं चित्रवेश्मसु ॥ ९५३ ॥
एलावनसहेलासु वेलासु पयसां निधेः ।
ताम्रपर्णीसरिन्मुक्तासिकतासु रतिर्यदि ॥ ९५४ ॥
तदेनं वृणु वामाक्षि मदयन्तु मनस्तव ।
कर्पूरचन्दनामोदकलया मलयानिलाः ॥ ९५५ ॥
इतो ऽस्या सरलं वीक्ष्य तरलाक्ष्या निरीक्षणम् ।
चलित्वा किंचिदित्यूचे वचः सुविनया जया ॥ ९५६ ॥
देवि चित्राङ्गदो नाम विचित्रगुणगौरवः ।
असौ ददाति नानन्दं कस्मै कश्मीरभूपतिः ॥ ९५७ ॥
शुद्धान्तमस्य किं श्लाघे श्लाघ्यास्ता अपि योषितः ।
स्वप्ने प्रतिमितौ चित्रे ऽप्येनं कान्तं स्पृशन्ति याः ॥ ९५८ ॥
अमुं कलय लोलाक्षि त्वत्कपोले लिखत्वयम् ।
पत्रं शुद्धान्तकान्तासु चित्रमभ्यस्तमन्वहम् ॥ ९५९ ॥
रागोचिताः स्तुतीरस्य शारदार्चनसत्कवे ।
नित्यं निधेहि काश्मीरकलिका इव कर्णयोः ॥ ९६० ॥
स मे परः पुमानेव यः पुरात्परिग्रहः ।
इत्यर्थाह्व प्रतीहारीं कुमारीयं मृदुस्वरा ॥ ९६१ ॥

नुत्वा नुत्वा ततो भूपमन्यमन्यं ययौ जया ।
आलोक्यालोक्य कुसुमं वनभृङ्गीव सुस्वरा ॥ ९६२ ॥
सनत्कुमाररक्ता सा तेषु तस्थौ न कन्यका ।
जलाशयेषु हंसीव सिद्धसिन्धुनदोन्मुखी ॥ ९६३ ॥
सा ययौ यस्य यस्याग्रं स स भूपो ऽभजत्प्रभाम् ।
यं यं लक्ष्मीरिवासुञ्जज्ञे स स मलीमसः ॥ ९६४ ॥
वृतं प्रागेव दृष्ट्यैव बालया वरमालया ।
सनत्कुमारमासाद्य निजगाद जया ततः ॥ ९६५ ॥
जम्बुद्वीपश्रियो भाल इव खण्डे ऽत्र भारते ।
पुरी किरीटसादृश्यं श्रीकान्ता परिगच्छति ॥ ९६६ ॥
सिंहनामा गतत्रासः कलाभिर्मुकुरीकृतः ।
तत्र नायकमाणिक्यनिभतां लभते नृपः ॥ ९६७ ॥
अयं तस्याङ्गभूरंशुप्रकाश इव काशते ।
सनत्कुमारस्तारुण्यरूपयोरुचितस्तव ॥ ९६८ ॥
अमान्तः काममस्यान्तः सुवृत्ता विशदा गुणाः ।
एतच्चित्त इव व्यूढे व्योम्नि तस्थुरुडुच्छलात् ॥ ९६९ ॥
अनन्यशोभमम्भोजमिवास्योद्भासुरं करम् ।
समेति पद्मवासेति युधि लक्ष्मीर्विपक्षतः ॥ ९७० ॥
कलानां ग्रहणे रक्तः सक्तश्चायं गुणार्जने ।
तद्भङ्गपातभीत्येव न पुराभूत्परिग्रही ॥ ९७१ ॥
वरमाला वरेण्याङ्गि तत्कण्ठे ऽस्य निवेश्यताम् ॥
अनुरूपस्य वरणात्त्वां नुवन्तु दिवौकसः ॥ ९७२ ॥
अथोद्यत्पुलकं स्वेदलवार्द्रं दधती वपुः ।
बाल्ये न्यस्य कराम्भोजं कम्पि चम्पिकयार्पिते ॥ ९७३ ॥

बद्धवाष्पां दृशं कन्या वरे च शनकैर्ददौ ।
सनत्कुमारयुग्मं च मञ्चस्थमियमैक्षत ॥ ९७४ ॥ युग्मम् ॥
अथ सद्यस्तदाश्चर्यव्याकुले क्षितिभृत्कुले ।
कन्यायां कं वृणोमीति ध्यायन्त्यां वीक्ष्य तौ मुहुः ॥९७५॥
मत्पार्श्ववर्ती धूर्तोऽयं कोऽपि कन्ये वृणीष्व माम् ।
इति तुल्यं तयोरास्यादुल्ललास तदा वचः ॥ ९७६ ॥
युग्मम् ॥

ततः सनत्कुमारो यः स मदीयहृदि स्थितः
स्वकण्ठन्यस्तयैवाहं मालया तद्वृणोमि तम् ॥ ९७७ ॥
एवं वचो दृढारावं श्रावयन्तो सभासदः ।
स्वकण्ठकन्दले बाला वरमालामलालयत् ॥ ९७८ ॥
इति तन्मतिलीलाभिर्वैलक्ष्याद्विलयं गते ।
मायासनत्कुमारेऽभूदद्वितीयः स भूपभूः ॥ ९७९ ॥
गुणिनो वरणादस्यां गुणज्ञायाममत्सरैः ।
चक्रे नृपकुलैर्मायाजयाज्जयजयारवः ॥ ९८० ॥
तादृक्षदक्षताहृष्टैः स्वयंवरणदर्शिभिः ।
तस्या मूर्ध्नि मरुच्चक्रैश्चक्रिरे पुष्पवृष्टयः ॥ ९८१ ॥
अथानन्दपथामन्दपान्थो नाभाकभूविभुः ।
सन्मानावर्जितैः सर्वैर्जगतीजानिभिर्युतः ॥ ९८२ ॥
तयोः स्मेरस्मरोत्साहं तं विवाहोत्सवं व्यधात् ।
यद्विलोकादिवेन्द्रोऽपि सहस्रनयनोऽजनि ॥ ९८३ ॥
॥ युग्मम् ॥

बभौ शृङ्गारसुन्दर्या करम्बिकरपल्लवः ।
कुमारः कल्पवल्ल्येव पारिजातमहीरुहः ॥ ९८४ ॥

वासन्तीवासवेनाथ सत्कृताः कृतिना नृपाः ।
तदुत्सवोच्छ्वसच्चित्ताः पुरं जग्मुर्निजं निजम् ॥ ९८५ ॥
दिनानि कानिचित्प्रीयमाणो नवनवोत्सवैः ।
तस्थौ कुमारः शृङ्गारसागरे श्वशुरौकसि ॥ ९८६ ॥
कथं ज्ञेयः स मायाकृदिति चिन्तैकलाञ्छनः ।
तस्येन्दुवदहर्नन्दः प्रावर्धत दिने दिने ॥ ९८७ ॥
अथो कथंचिदापृच्छ्य वासन्तीशं प्रियान्वितः ।
तत्कृतोदारसत्कारः सैंहिः स्वपुरे ऽचलत् ॥ ९८८ ॥
मार्गे क्रमादतिक्रामन्कतिभिश्चित्प्रयाणकैः ।
स्वर्गाभिरामे ग्रामे ऽगात्स नन्दिग्रामनामनि ॥ ९८९ ॥
इहाधिग्रामगुदामस्वाम्यम्बुवटिनीतटे ।
भूवल्लभभुवो ऽभूवन्नावासाः सान्द्रशाद्वले ॥ ९९० ॥
तत्र कल्लोलिनीलोलकल्लोलकृतमज्जनः ।
समं शृङ्गारसुन्दर्या सुन्दराम्भोजभूषणः ॥ ९९१ ॥
यावद्भोक्तुमुपाविक्षत्कुमारः सपरिच्छदः ।
कुतो ऽपि तावद्विरसं वाद्यं शुश्राव दुःश्रवम् ॥९९२॥युग्मम्॥
किमेतदिति दुःखार्तैस्त्यक्तभोजनभाजनैः ।
परिवारजनैरूर्ध्वीकृते जवनिकाञ्चले ॥ ९९३ ॥

हा स्वगोत्रगृहस्तम्भ नेत्रनन्दन नन्दन ।
क्व गतो ऽसीति तातेन शोच्यमानं मुहुर्मुहुः ॥ ९९४ ॥
हा भ्रातः स्वगुणख्यात बन्धुत्रातममुं किमु ।
त्यक्त्वा यासीति साक्रन्दैर्भ्रातृवृन्दैः कृताट्टतिम् ॥ ९९५ ॥
रे दैव किमकाण्डे ऽपि सममस्मन्मनोरथैः ।
अमुं संहरसीत्युच्चैःपूत्कारैः स्वजनैर्वृतम् ॥ ९९६ ॥

करिष्ये कस्य मङ्गल्यं हा हतास्मि हतास्मि हा ।
एवं विलापान्कुर्वन्त्या स्वस्रा साश्रुदृशान्वितम् ॥ ९९७ ॥
रे कठोर न किं यासि हृदय त्वं सहस्रधा ।
इत्युरस्ताडयन्तीभिर्बन्धुस्त्रीभिर्गुरूकृतम् ॥ ९९८ ॥
हा वत्स देहि मे वाचं मुखं हा वत्स दर्शय ।
एवं लपन्त्या मूर्छन्त्या मुहुर्मात्रानुधावितम् ॥ ९९९ ॥
रूपं त्रपा सुवाक् शीलं सत्त्वं दानमिमानि षट् ।
अस्मिन्गते गतान्यस्माद्ग्रामादिति जनैः स्तुतम् ॥ १००० ॥
कृतशृङ्गारया दानं तन्वत्या तुरगस्थया ।
कान्तयानुगतं गन्तुं सार्धं वैधव्यभीतया ॥ १००१ ॥
उत्पाटितं स्वजातीयैश्छन्नं कौसुम्भवाससा ।
कुमारः सप्रियो ऽपश्यत्पुमांसं मृतमर्चितम् ॥ १००२ ॥

॥ दशभिः कुलकम् ॥

तस्मिन्किंचिदतिक्रान्ते शोकानुत्पत्तिसत्तमम् ।
मृत्युयोगो ऽस्य नास्त्येवेति ब्रुवन्तं सहानुगैः ॥ १००३ ॥
शान्ताकृतिगतिस्वान्तं प्रत्यासत्तिचरं नरम् ।
स्वयमेव कृताह्वानं पप्रच्छेति नृपाङ्गभूः ॥ १००४ ॥

युग्मम् ॥

ग्रामवास्यपि किं पश्चात्त्वमागाः किं शुचोज्झितः ।
मृत्युयोगो ऽस्य नास्तीति किमेभिर्भाष्यते ऽनुगैः ॥ १००५ ॥
अथ ध्रुवं धराधीशसुतः को ऽपि गुणैः स्तुतः ।
अर्हो ऽयमर्हद्भक्तानां वार्तानामिति सो ऽवदत् ॥ १००६ ॥
भवतः कुलमाकारादेव देव विभाव्यते ।
त्वं लक्ष्यते साक्षात्प्रवृत्तिप्रश्नतः पुनः ॥ १००७ ॥

कु०

तद्वार्ताकथनस्थानमसमानमसि प्रभो ।
सकर्णाकर्णय त्वं मे विचारकवचं वचः ॥ १००८ ॥
धर्मे ऽहं विहितानन्द आनन्द इति नामतः ।
नन्दिग्रामे ऽत्र वास्तव्यो वस्तुव्यवहृतिस्थितिः ॥ १००९ ॥
गृहिव्रतानि सम्यक्त्वमूलानि प्रतिपालयन् ।
वहिष्ये प्रतिमास्तास्तु भवन्त्येकादशेत्यमूः ॥१०१० ॥
सम्यक्त्वे निरतीचारस्त्रिकालं पूजयेज्जिनम् ।
मासं यावद्गृही सा स्याद्दर्शनप्रतिमादिमा ॥ १०११ ॥
स्याद्व्रतप्रतिमा शुद्धाणुव्रतानि वितन्वतः ।
मासद्वयेन प्राच्योक्तक्रियायुक्तस्य गेहिनः ॥ १०१२ ॥
सामायिकप्रतिमा सा यत्र सामायिकं गृही ।
द्विसंध्यं सेवते मासत्रयं पूर्वक्रियान्वितः ॥ १०१३ ॥
पौषधप्रतिमा यत्र श्राद्धो मासचतुष्टयम् ।
सत्क्रियः पौषधं धत्ते चतुष्पर्व्यां चतुर्विधम् ॥ १०१४ ॥
श्राद्धः शुद्धाशयस्त्यक्तस्नानः प्राशुकभोजनः ।
ब्रह्मवानह्नि रात्रौ च कृतमानः स्वयोषिति ॥ १०१५ ॥
पौषधस्थश्चतुष्पर्व्यां प्रतिमामेकरात्रिकीम् ।
प्रपन्नः पञ्चभिर्मासैः प्रतिमा पञ्चमी भवेत् ॥१०१६॥युग्मम्॥
पूर्वोदितविधेः षष्ठी षण्मासैर्ब्रह्मचारिणः ।
सप्तमी सप्तभिर्मासैः सचित्तं त्यजतो ऽखिलम् ॥ १०१७॥
त्यक्ते स्वयंसमारम्भे मासैरष्टभिरष्टमी ।
नवमी नवभिर्मासैरनारम्भे परैरपि ॥ १०१८ ॥
यत्रोद्दिष्टकृताहारत्यागी मुक्तधनः शिखी ।
मुण्डीव जायते श्राद्धो दश मासान्दशम्यसौ ॥ १०१९ ॥

यत्रैकादश मासांस्तु लुञ्चितो मुण्डितो ऽथवा ।
रजोहरणसंयुक्तः पतद्ग्रहपरिग्रहः ॥ १०२० ॥
किं चैकादशप्रतिमाभृते भिक्षां हि देहि मे ।
इत्युक्त्या विचरत्यात्मजातौ सैकादशी भवेत् ॥ १०२१ ॥
युग्मम् ॥

तदेतासु स सम्यक्त्वाणुव्रतानि प्रपालयन् ।
अधुना वर्द्धमानो ऽस्मि दर्शनप्रतिमामहम् ॥ १०२२ ॥
तत्र प्रभातमध्याह्ने सायं कालत्रये जिनः ।
पूज्यते त्रिजगत्पूज्यो यावन्मासं यथाविधि ॥ १०२३ ॥
ततो ऽहमद्य मध्याह्ने पूजां कृत्वा जिनेशितुः ।
आगां ग्रामजनाचारे पश्चाद्रतिरतो ऽभवम् ॥ १०२४ ॥
को ऽपि कुत्रापि केनापि संबन्धेन स्वकर्मतः ।
अभूद्वाननन्तान्मे भ्रमतः श्रमतस्करान् ॥ १०२५ ॥
अतः कस्य विपन्नस्य शोकं कुर्वे कृते ऽत्र वा ।
किं भवेत्तन्न शोको ऽयमस्तोको ऽपि दुनोति माम् ॥१०२६॥
युग्मम् ॥

मृत्युयोगो ऽस्य नास्तीति यदुक्तं प्रस्तुतं मया ।
तत्र धात्रीपतेः पुत्र समाकर्णय कारणम् ॥ १०२७ ॥
नन्दिग्रामे ऽस्ति सारङ्गनामा ग्रामाग्रणीरिह ।
कौटुम्बिको ऽम्बिकासंज्ञभार्यावर्यगृहस्थितिः ॥ १०२८ ॥
तज्जन्मा नागनामासीत्संध्यायां ह्यस्तने दिने ।
अयं पुष्पोच्चयं तन्वन्दष्टो दुष्टाहिना वने ॥ १०२९ ॥
ततो विषभिषग्वृन्दैरमन्दैर्मन्त्रसंमदैः ।
चाल्यमानो ऽप्ययं प्राप दीर्घस्वापवशां दशाम् ॥ १०३० ॥

मया पुनरमायेभ्यस्तत्त्वज्ञेभ्यः कथान्तरे ।
गुरुभ्य इति सर्वज्ञशासने विश्रुते श्रुतम् ॥ १०३१ ॥
तिथयः पञ्चमी षष्ठ्यष्टमी नवमिका तथा ।
चतुर्दश्यप्यमावास्याहिना दष्टस्य मृत्युदा ॥ १०३२ ॥
दष्टस्य मृतये वारा भानुभौमशनैश्चराः ।
प्रातःसंध्यास्तसंध्या च संक्रान्तिसमयस्तथा ॥ १०३३ ॥
भरणी कृत्तिकाश्लेषा विशाखा मूलमश्विनी ।
रोहिन्यार्द्रा मघा पूर्वात्रयं दष्टस्य मृत्यवे ॥ १०३४ ॥
वारि स्रवन्तश्चत्वारो दंशा यदि सशोणिताः ।
वीक्ष्यन्ते यस्य दष्टस्य स प्रयाति भवान्तरम् ॥ १०३५ ॥
रक्तवान्दंश एको वा छिद्री काकपदाकृतिः ।
शुष्कः श्यामस्त्रिरेखो वा दष्टे स्पष्टयति व्ययम् ॥ १०३६ ॥
सावर्तः सर्वतः शोफावृतः संकुचिताननः ।
दंशः शंसति दष्टस्य विनष्टमिह जीवितम् ॥ १०३७ ॥
केशान्ते मस्तके भाले भ्रूमध्ये नयने श्रुतौ ।
नासाग्र ओष्ठे चिबुके कण्ठे स्कन्धे हृदि स्तने ॥ १०३८ ॥
कक्षायां नाभिपद्मे च लिङ्गे संधौ गुदे तथा ।
पाणिपादतले दष्टः स्पष्टो ऽसौ यमजिह्वया ॥१०३९॥युग्मम्
एषां मध्याद्विरुद्धं न जातमस्यास्ति किंचन ।
येनासौ नाशमभ्येति नागः पुंनाग नागतः ॥ १०४० ॥
ग्रामे ऽत्र मान्त्रिकः को ऽपि नास्ति लोकोत्तरः परम् ।
किं कर्पूरश्रियः पूरं पूरयेल्लवणाकरः ॥ १०४१ ॥
वदन्तामिति दिग्दन्तिदन्तद्युतिमतिः स तम् ।
उवाच रचितानन्दमानन्दं नृपनन्दनः ॥ १०४२ ॥

त्वया लोकोत्तरः को ऽयं कलाकुशल कीर्त्यते ।
मान्त्रिको ऽत्रेति धात्रीशपुत्रप्रश्ने ऽभ्यधादसौ ॥ १०४३ ॥
मान्त्रिको लोकसामान्यः सतां मान्यः स मन्यते ।
विषाणामौषधैर्मन्त्रैर्यश्चिकित्सां चिकीर्षति ॥ १०४४ ॥
यस्य शुद्धतपोध्यानैः सिद्धलब्धैः प्रभावतः ।
विषदोषा विलीयन्ते स्पर्ष लोकोत्तरः परम् ॥ १०४५ ॥
किमीदृशो ऽपि दृश्यो ऽस्ति स्वस्तिदः क्वापि को ऽप्यहो ।
इति जल्पति भूपालभवे साश्चर्यचेतसि ॥ १०४६ ॥
हर्षकोलाहलः को ऽपि शोककोकनिशाकरः ।
तूर्यवर्यरवोद्दामो दूरादाविरभून्महान् ॥ १०४७ ॥ युग्मम् ॥
किमेतदिति भूभर्तुश्चुवा पृष्टः पुरः पथि ।
त्वरां त्यक्त्वा जगौ कश्चित्पुरुषो ऽपरुपाक्षरैः ॥ १०४८ ॥
ग्रामे ऽत्र नागनामा मे बन्धुर्विषधरान्मृतः ।
विशञ्छ्मशानमुत्तस्थौ तरसा शिबिकान्तरात् ॥ १०४९ ॥
तदैव दैवतो मर्त्यलोकासंभवसौरभः ।
उल्ललास कृतोच्छ्वासनासास्वाद्यः सदागतिः ॥ १०५० ॥
किमेष निर्विषः कौतस्कुतो वायुरसाविति ।
संलापः समभूत्तत्राशोके लोके तदा मुदा ॥ १०५१ ॥
यावद्विक्षिप्यते दक्षैर्दिक्षु चक्षुरितस्ततः ।
तावद्भावभरोद्भासिसभागर्भविभूषणः ॥ १०५२ ॥
देवनिर्मितनिष्काब्जरत्नसिंहासनासनः ।
दृष्टो धर्मं दिशन्दूरादवनीपावनो मुनिः ॥ १०५३ ॥ युग्मम् ॥
अहो महामुनिस्पर्शमाहात्म्यामोदमेदुरः ।
नागस्यास्य बभूवैष विषदोषहरो मरुत् ॥ १०५४ ॥

इत्याकाशगिरं वारं वारं श्रुत्वा जनो मुदा ।
आगान्नागं पुरस्कृत्य कृत्यविद्वन्दितुं मुनिम् ॥ १०५५ ॥
॥ युग्मम् ॥

सुरासुरनरस्तूयमानातिशयवैभवम् ।
मुनिं नत्वात्तधर्मो मे भ्रातार्भ्येति महोत्सवैः ॥ १०५६ ॥
रयान्मया नयाधीश गत्वौकः प्रति संप्रति ।
वस्तु विस्तार्यमेवास्ति तोरणस्वस्तिकादिकम् ॥ १०५७ ॥
एवमुक्त्वा गते तस्मिन्नानन्दं सुन्दराननः ।
भूपभूभूतसद्भावः प्रागल्भीगर्भमभ्यधात् ॥ १०५८ ॥
ईदृग्लोकोत्तरः पूर्वं न मया मान्त्रिकः श्रुतः ।
आगमार्थ इवोन्निद्रस्तन्द्रामुद्रितचेतसा ॥ १०५९ ॥
धन्यस्त्वं सिद्धवाक्यो ऽसि विवेकिन्येन वर्णितः ।
अलक्ष्यो ऽर्थः क्षणात्साक्षादेवं मे दर्शयिष्यते ॥ १०६० ॥
तदेहि देहि पावित्र्यमस्माकं मुनिदर्शनात् ।
इत्युक्त्वा मार्गगं नागं सत्कृत्यानन्ददर्शितम् ॥ १०६१ ॥
समं शृङ्गारसुन्दर्या शुद्धश्रद्धानुबन्धया ।
आनन्देन द्विधा सार्धं मुनिं नन्तुमगादसौ ॥१०६२॥युग्मम्॥
मुनिनाथं नमस्कृत्य लब्धाशीर्वचनस्ततः ।
शक्रश्चिरलंचक्रे संसदः सपरिच्छदः ॥ १०६३ ॥
अन्तःप्रसत्तिपीयूषं वर्षन्पर्षदि वीक्षणैः ।
तत्त्वार्थं मुख्यमाचख्यौ तदा यतिपतिस्त्विति ॥ १०६४ ॥
अर्थेषु श्लाघ्यते धर्मो गुणेषु विनयो यथा ।
पुरुषस्तं विना व्यर्थः कायो जीवं विना यथा ॥ १०६५ ॥
न वर्ण्यः सर्वरूपो ऽपि विना धर्मं नृणां भवः ।

हृद्यो ऽप्यदेवः प्रासादः कोविदैर्न नमस्यते ॥ १०६६ ॥
सुखं चिन्तितमल्पं यो दत्ते ऽनल्पमचिन्तितम् ।
धर्मश्चिन्तामणिर्धत्ते सो ऽस्माच्चित्ते चमत्कृतिम् ॥ १०६७ ॥
संसारग्रीष्मदुःखोर्मिघर्मसंतापिता यदि ।
ततो धर्मामृते सन्तु सज्जनाः सज्जमज्जनाः ॥ १०६८ ॥
क्षणे ऽस्मिन्विस्मयस्मेरनयनो मुनिदर्शनात् ।
सनत्कुमारः सद्भक्तिरुवाच रचिताञ्जलिः ॥ १०६९ ॥
एवं यः स्तूयते धर्मः प्रभो युष्माभिरद्भुतः ।
देहिभिर्गेहिभिः सो ऽयं क्रियमाणो भवेन्न वा ॥ १०७० ॥
भवेद्भव्यात्मनां धर्मः सर्वेषां विधिना कृतः ।
श्रुत्वेति श्रुतिपीयूषं मुनिवाचमुवाच सः ॥ १०७१ ॥
यद्येवं तत्कथंकारमिदं सारतरं वयः
हृद्यं रूपमिदं मान्यैरवमन्य व्रतं वृतम् ॥ १०७२ ॥
अथ प्रथितपाथोधिधीरध्वानकिरं गिरम् ।
जगाद जगदानन्ददायकः साधुनायकः ॥ १०७३ ॥
दुःकर्मबन्धवंशोत्थः संमोहोद्धुरधूमभृत् ।
दक्षपक्षिगणद्वेष्यः समीपस्थात्मतापकः ॥ १०७४ ॥
दुर्गरोगस्फुलिङ्गोग्रः कलहत्राट्कृतारवः ।
मिथ्याज्ञानमरुत्प्रेर्यः सर्वेषां शोषपोषकः ॥ १०७५ ॥
अशक्यस्त्यक्तुमत्यन्तं मिथ्यादृष्टिजडालसैः ।
मृतिज्वालाभिरुत्फुल्लान्मनोरथतरून्दहन् ॥ १०७६ ॥
निरातङ्कं सदानन्दं पदं गन्तुं शुभे ऽध्वनि ।
व्रते भवदवस्तावदेको हेतुर्ममाभवत् ॥ १०७७ ॥
चतुर्भिः कलापकम् ॥

द्वितीयः कः प्रभो हेतुर्भक्तां भक्तान्तिभित् ।
इति पृष्टे सतामिष्टे कुमारेण मुनिर्जगौ ॥ १०७८ ॥
अस्तीह स्तुतविस्तारा ताराख्या रुचिरा पुरी ।
यार्कतापेन न क्लिष्टा कीर्णा कोटिध्वजाञ्चलैः ॥ १०७९ ॥
तत्र शास्त्रपवित्रार्थकृतार्थीकृतचेतनः ।
तारापीड इति क्ष्मापः स्थापको नयधर्मयोः ॥ १०८० ॥
तन्मित्रं संपदां पात्रं पुत्रः श्रीपतिमन्त्रिणः ।
श्रीषेणसंज्ञः स्वप्रज्ञाज्ञातज्ञातव्यवैभवः ॥ १०८१ ॥
अन्यदा प्रमदालोकलोललोचनलोकितः ।
वसन्ते रन्तुमुद्यानं स ययौ नवयौवनः ॥ १०८२ ॥
ललन्ती ललना तत्र नेत्रपत्रसुधाञ्जनम् ।
ददृशे पुण्यलावण्यपण्यापणमिवामुना ॥ १०८३ ॥
एषा श्रीषेणमेणाक्षी वीक्ष्य साक्षान्मनोभवम् ।
दक्षं कटाक्षविक्षेपलक्षैरुत्क्षिप्य हृद्यधात् ॥ १०८४ ॥
अन्योन्यं दर्शनातृप्तावन्योन्यमनुरागिणौ ।
स्वस्वावसथमस्तस्थौ जग्मतुस्तौ दिनात्यये ॥ १०८५ ॥
ग्रस्तस्तत्र मृगीनेत्रावियोगेन स मन्त्रिभूः ।
निशि निद्रादरिद्रोऽयमित्यमुद्रमचिन्तयत् ॥ १०८६ ॥
अहो रूपमहो कान्तिरहो नयनविभ्रमः ।
अहो स्नेहानुबन्धश्च तस्याः शस्यावधेर्मयि ॥ १०८७ ॥
कुलस्यालंकृतिः कस्य किं नाम स्तावयत्यसौ ।
क्व मया द्रक्ष्यते केनोपायेन श्वस्तने दिने ॥ १०८८ ॥
पार्थिवेन वृथा मैत्री व्यर्था मे मन्त्रिपुत्रता ।
निरर्थकं च जन्मेदं यदि तस्या न संगमः ॥ १०८९ ॥

इत्याधनल्पसंकल्पसंतापितमनाः स ना ।
प्रतियामं युगोन्मानादक्षिपद्दुःक्षिपां क्षपाम् ॥ १०९० ॥
चतुर्भिः कलापकम् ॥
द्वितीये ऽह्नि स मध्याह्ने रहस्युपवने गतः ।
कात्यायन्या कयाप्यूचे चिन्ताचुम्बितचेतनः ॥ १०९१ ॥
इहास्ति पुरवास्तव्यः स्तोतव्यगुणभूषणः ।
तारापीडधराधीशोपाध्यायस्तारकाभिधः ॥ १०९२ ॥
पूर्वपत्न्यां प्रमीतायां कुलश्रीशीलशालिना ।
एतेनोद्वाहिता रूपमहिता रोहिताह्वया ॥ १०९३ ॥
जराजर्जरगात्रो ऽहमियं तु नवयौवना ।
चलान्यक्षाणि चेत्येष दत्ते नास्या बहिर्गतिम् ॥ १०९४ ॥
गतः शारदापुरे राज्ञादिष्टो ऽसौ ह्यस्तने दिने ।
मया धात्र्या समं चेयमुद्यानं कथमप्यगात् ॥ १०९५ ॥
सुभग त्वं तया तत्र दृष्टो दृष्टिप्रियस्तथा ।
स्मरज्वरभरार्ता सा रोहिता मोहिता यथा ॥ १०९६ ॥
तदर्तिं हर्तुमद्यास्मद्धितुर्देहि दर्शनम् ।
विधेहि वाचिकं चेदं हारयष्ट्या सहागतम् ॥ १०९७ ॥
स्फुरत्कान्तरुचिं कान्तां कृतस्वातिरसप्रियाम् ।
धेहि मां हारयष्टिं च हृदये हृदयेश्वर ॥ १०९८ ॥
ततो हारलतां कण्ठे न्यस्य सा मे प्रियेत्यहो ।
विशेषादेष शिश्लेष कामिनः क्व विवेकिता ॥ १०९९ ॥
क्षणं श्रान्तिः क्षणं भ्रान्तिः क्षणं चिन्ता क्षणं धृतिः ।
क्षणं त्रासः क्षणं ह्रासस्तमत्रीडं व्यडम्बयत् ॥ ११०० ॥
इत्यस्मिन्स्मरदोषेण श्रीषेणे विषमीकृते ।

दुष्टचेष्टाघटापोषः प्रदोषः समभूत्ततः ॥ ११०१ ॥
एहि तद्भवनं तस्या यौवनं कुरु पावनम् ।
एवमुक्तस्तया नार्या सो ऽनार्याशो मुदाचलत् ॥११०२॥
असन्मार्गोज्ज्वलत्कामस्तमच्छन्नो ऽपरिच्छदः ।
स तया दुर्धिया सार्धं तां प्रापात्मेव दुर्गतिम् ॥११०३॥
दुर्दैवद्रोहितां यावद्रोहितां वार्तयत्यसौ ।
तावद्धावत्परीवारस्तारको द्वारमागमत् ॥ ११०४ ॥
कात्यायन्या स भीत्यार्तः प्रक्षिप्तः क्षालकूपके ।
अस्थात्प्रस्थानके गन्तुमिवायं निरयं हहा ॥ ११०५ ॥
दुर्गन्धबहुले कीटसंकुले पङ्किले जले ।
गलदग्रे घनं मग्नः स तटीघर्षणव्रणः ॥ ११०६ ॥
तत्र शूकाकृतोत्कारवान्ताहाररयाहतैः ।
उत्थितैः कुथितैः क्षालजलैर्विशद्भिराननं ॥ ११०७ ॥
लालाभिर्वान्तलालाभिः पिच्छलाभिर्वृतोऽभितः ।
सशृङ्गारोऽपि बीभत्सरसो ऽङ्गीव बभूव सः ॥ ११०८ ॥
युग्मम् ॥
वदने मशकैर्दंशैः कृमिभिस्तिमिभिस्तनौ ।
तले ऽसौ कर्परैः कीलैस्तदात्यर्थं कदर्थितः ॥ ११०९ ॥
विशत्यम्बुनि नासायामनाशो ऽयं स्वजीविते ।
कूपकण्ठे क्षिपन्हस्तौ तीक्ष्णालेनालिना हतः ॥ १११० ॥
इत्थं निशीथकाले ऽसौ नरको नरकाधिकम् ।
सहमानो महादुःखमश्रौषीत्तुमुलं गृहे ॥ १११ ॥
तदार्धवृद्धा दक्षासौ क्षालतः सज्जरज्जुना ।
तमाचकर्ष दुःकर्मत्रुटिर्जीवमिवाशिवात् ॥ १११२ ॥

आगत्योपवने तत्र ज्ञापयिष्यामि भाविनम् ।
वृत्तान्तं तु नितान्तं त्वां व्रज द्वारे ऽस्ति को ऽपि च ॥१११३॥
एवमुक्तस्तया क्षालजलाविलतनुस्ततः ।
प्रणनाश स कीनाशपाशच्युत इव द्रुतम् ॥ १११४ ॥
नरैरारक्षकैः कोलाहलं श्रुत्वा त्वरागतैः ।
नश्यन्दृष्टः सकोदण्डदण्डैर्हत्वा न्यबध्यत ॥ १११५ ॥
गर्ताशूकरवत्को ऽयं दिग्धो दुर्गन्धकर्दमैः ।
इति दीपकरैरेभिरीक्षितः सोपलक्षितः ॥ १११६ ॥
युक्तो मोक्तुममोक्तुं वा मित्रं क्षितिपतेरसौ ।
इत्यालोचपराः सर्वे नरा मूढत्वमागमन् ॥ १११७ ॥
तदावदातधीर्वीरचर्यया संचरन्नृपः ।
आययौ तुमुलाकृष्टो दृष्टवान्पथि तं तथा ॥ १११८ ॥
ज्ञात्वा तं कृतिनां सीमा श्रीमान्भूमानचिन्तयत् ।
मन्ये ऽसौ मदुपाध्यायालये तुमुलकारणम् ॥ १११९ ॥
संसारे स्खलितं कस्य न स्यान्मतिमतो ऽपि वा ।
किं तु मे मित्रमा बाल्यात्तन्न युक्तमुपेक्षितुम् ॥ ११२० ॥
दृष्ट्वा मां त्वस्य लज्जा स्याद्धाधाकृद्धन्धनादपि ।
इति निश्चित्य कृत्यार्थं प्रकृत्या निभृतोपकृत् ॥ ११२१ ॥
आरक्षकाणामात्मानं ज्ञापयित्वैष सत्वरम् ।
श्रीषेणं मोचयांचक्रे तारापीडः स्वपीडया ॥ ११२२ ॥
चतुर्भिः कलापकम् ॥
वपुःप्रमाणात्प्रच्छन्नोपकृतिप्रकृतित्वतः ।
स्वस्य द्राग्बन्धमोक्षाच्च नृपस्तेनोपलक्षितः ॥ ११२३ ॥
ततो दर्शयितुं स्वास्यमशक्तः सैष लज्जया ।

राज्ञादिष्टैर्भटैर्दूरादाहृतः स्वगृहे ऽगमत् ॥ ११२४ ॥
धौताङ्गः स प्रगे तत्रोपवने ऽस्थाल्लतागृहे ।
आरामपालकेभ्यश्च वार्त्तां शुश्राव दुःश्रवाम् ॥ ११२५ ॥
अद्य रात्रिंतया रात्रौ पत्युर्निद्राजुषः श्रमात् ।
गलं छेत्तुं समुत्क्षिप्तः क्षुरिकादुर्धरः करः ॥ ११२६ ॥
तदाभूत्क्षुरिकास्तम्भस्तारकः सहसोत्थितः ।
रोहिता हृद्गरे बद्धा बन्धनै रज्जुवर्जितैः ॥ ११२७ ॥
अदृष्टैः सा हता घातैरारराट तथा कटु ।
यथास्य पत्तयो ऽन्ये च दधावुस्तुमुलाकुलाः ॥ ११२८ ॥
कुतो ऽप्यगाद्धराधीशः स्वोपाध्यायममत्वतः ।
स क्षणाद्रूपमुत्क्षिप्य नम्रस्तामित्यभाषत ॥ ११२९ ॥
महामभावे कासि त्वं तत्त्वं देहि ममादिश ।
स्त्रीमात्रे ऽत्र कृपापात्रे किममर्षः प्रकर्षितः ॥ ११३० ॥
एताभिर्भक्तिभाषाभिस्तयोक्तास्तोकतरां रुषम् ।
नभःप्रभावया काया बभाषे देवता नृपम् ॥ ११३१ ॥
सम्यग्दृष्टिरहं देवी भक्ता सर्वज्ञशासने ।
धर्मकर्मप्रवृत्तानां सतां विघ्नानि वारये ॥ ११३२ ॥
तत्तं दुष्टमभ्यक्तं परदारपराङ्मुखम् ।
स्वपतिं निघ्नती क्रूरा मया बद्धेयमस्ति तत् ॥ ११३३ ॥
किमसौ स्वपतिं हन्तीत्युक्ता राज्ञाह देवता ।
तमेव रमणं कर्तुं यो बद्धो मोचितस्त्वया ॥ ११३४ ॥
युग्मम् ॥
सर्वज्ञाज्ञास्ति ते ऽमुष्य भाषसे यदि दूषणम् ।
मकाशयसि नामापि राज्ञ देवीति वारिता ॥ ११३५ ॥

किं तूक्ता तारकेणासौ सकृपेण नृपेण च ।
देव्युद्धश्राति नाद्यापि रोहितां रमणाहिताम् ॥ ११३६ ॥
एवमाकर्ण्य कर्णेषु तस्यत्रपुसमं वचः ।
श्रीषेणश्चिन्तयांचक्रे बलाद्वैराग्यसंगमः ॥ ११३७ ॥
मन्ये ऽस्मिन्नेव संजाते तुपुले मलसंकुलः ।
क्षालतः क्षणतः क्षिप्तस्तया बहिरहं तदा ॥ ११३८ ॥
दुराचारद्रुमारामवनीरेता नितम्बिनीः ।
दुर्मेधाः किं व्यधाद्वेधाश्चिन्ता वासौ वृथा मम ॥ ११३९ ॥
नार्यः कुकार्यकर्तृत्वान्निन्द्याश्चेत्तत्पुमानपि ।
महानिन्द्यो ऽस्मि दुःकर्ममूलदुःशीलभाग्यतः ॥ ११४० ॥
मम धिग्मानुषं जन्म कुलं येन कलङ्कितम् ।
सावद्या सापि विद्याभूत्पापे मय्यपि या स्थिता ॥११४१॥
क्षितौ जितेन्द्रियत्वं हि मूलं गुणलतातते: ।
कुशीलत्वकुशीघातैर्मयोत्क्षिप्तं तदद्य हा ॥ ११४२ ॥
मामकृत्यमतिं मत्वा त्रस्ता सापि त्रपा तदा ।
तिष्ठेदविरलं किं वा वारला पङ्किले जले ॥ ११४३ ॥
स्तुत्यः स सत्यमित्रत्वपात्रं क्षत्राशिरोमणिः ।
तारापीडो ऽखिलां पीडां जह्रे यो हीकरीं मम ॥११४४॥
अश्रोतव्यचरित्रो ऽहमपावित्र्यधनो ऽधुना ।
स्वमुखं दर्शयिष्यामि कथं तस्योपकारिणः ॥ ११४५ ॥
धन्यास्ते ये स्मिताम्लानमानमाल्यधरा नराः ।
स्वकीर्तिमुक्ताभरणैर्विभूष्य भुवनान्यगुः ॥ ११४६ ॥
इत्थं चिन्तयतो ऽत्यर्थं तस्य संविग्नचेतसः ।
तारकौकःप्रदेशे ऽभूज्जयकोलाहलो ऽम्बरे ॥ ११४७ ॥

तमाकर्ण्य स ऊर्ध्वास्यो यावत्तिष्ठति विस्मितः ।
तावदाभाष्यतागत्य कात्यायन्या विरक्तया ॥ ११४८ ॥
मया वत्स स्ववत्साया वात्सल्यान्मूढचेतसा ।
ह्यस्तने ऽहनि सद्बुद्धिधिकृतं दुःकृतं कृतम् ॥ ११४९ ॥
तत्त्वदीयमहाकष्टैः स्वपुत्र्या दुष्टचेष्टितैः ।
अनुभूतमिदं दुःखं सद्यो ऽवद्यफलं मया ॥ ११५० ॥
त्वत्कृते यत्तया पत्युरहितं विहितं निशि ।
तल्लोकज्ञातमप्यत्र मम वक्तुं न युज्यते ॥ ११५१ ॥
तन्निःशेषं श्रुतं मातः भ्रातरुद्यानपालतः ।
कस्त्वयं तद्गृहोद्देशगगने मङ्गलध्वनिः ॥ ११५२ ॥
इति श्रीषेणपृष्टेयमाचष्टे स्म सविस्मया ।
इदं वत्स स्वधर्मस्य स्वल्पस्यापि फलं शृणु ॥ ११५३ ॥
युग्मम् ॥
सकृपेण नृपेणापि प्रोक्ता शासनदेवता ।
बद्धक्रोधा विधत्ते न मत्पुत्र्या बन्धमोक्षणम् ॥ ११५४ ॥
पृथ्वीनाथो ऽप्यथ व्यर्थाभ्यर्थनः सव्यथो हृदि ।
ययावस्तोकलोकेन स्वमोकः शोकसंकुलः ॥ ११५५ ॥
संप्रत्यकस्मादस्माकं सुकृतैः प्रेरितं गृहे ।
साध्वीयुगलमध्वेक्षादक्षं भिक्षाकृते ऽविशत् ॥ ११५६ ॥
दृष्ट्वा तदुच्चरोमाञ्चकञ्चुका साश्रुलोचना ।
बन्धनाभावतो ऽकुण्ठा भूमिपीठे लुठत्यसौ ॥ ११५७ ॥
शरणं मे त्वदीयौ स्तश्चरणाविति वादिनी ।
अनमच्च सुता साध्वीमभवच्चाम्बरे वचः ॥ ११५८ ॥
युग्मम् ॥

शुद्धा श्रद्धा त्वया दध्रे साध्वीं नन्तुं मुदा यदा ।
तदैव दैवता बन्धाः संहृता रोहिते मया ॥ ११५९ ॥
यत्त्वया सुव्रताख्येयमजिह्मब्रह्मचारिणी ।
साध्वी नता पवित्रासि तत्त्वं साधर्मिका मम ॥ ११६० ॥
इत्युदीर्य चिरं वर्यतूर्यध्वानेन मिश्रितम् ।
जयकोलाहलं कृत्वा तिरोधत्ते स्म देवता ॥ ११६१ ॥
त्रिभिर्विशेषकम् ॥
अथात्मचरितोद्विग्नं व्रते तस्थौ मनो मम ।
वह्निना व्यथितः पाथस्यमृतः पारदो यथा ॥ ११६२ ॥
पापतापच्छिदे देहि देहिनो मे व्रतामृतम् ।
इत्थमभ्यर्थितात्यर्थं सुव्रता मामवीवदत् ॥ ११६३ ॥
भाग्यवत्यसि भद्रे त्वं तत्त्वज्ञश्चेतनस्तव ।
कर्मद्रुमभिदे वज्रं ययाचे यत्त्वया व्रतम् ॥ ११६४ ॥
किं तु मे गुरवः सन्ति श्रीशीलभद्रसूरयः ।
लीलोद्यानतटे ऽभ्येत्य तदभ्यर्णे व्रतं भज ॥ ११६५ ॥
इत्युक्ताहं तया हन्त तवान्तिकमिहागमम् ।
ममापराधः सोढव्यो ऽनुमन्यस्व व्रताय माम् ॥ ११६६ ॥
एवं निशम्य रम्यार्थं वचः सचिवसंभवः ।
दध्यावुत्तुङ्गवैराग्यतरङ्गच्छन्नमानसः ॥ ११६७ ॥
अहह प्रहतज्ञानह्रीयशोभययामिकैः ।
विषयैर्मुषितं मे ऽद्य तस्करैः सुकृतं धनम् ॥ ११६८ ॥
तानेव पुरुषान्मन्ये न येषां विषमेषुणा ।
स्त्रीविभ्रमेषुभिर्भित्त्वा चित्तं धृतिरगृह्यत ॥ ११६९ ॥
सुव्रताया व्रतस्याहो माहात्म्यमभवत्कियत् ।

यदेवं मुदिता देवी वितनोति प्रभावनाम् ॥ ११७० ॥
ततः स्वस्य व्रतिन्याश्चाब्रह्मणो ब्रह्मणोऽन्तरम् ।
विज्ञाय स्यान्ममादातुं साम्प्रतं साम्प्रतं व्रतम् ॥ ११७१ ॥
किं चैतत्कुर्वतः स्यान्मे मुखच्छविरिहोज्ज्वला ।
अमुत्र च भवे भद्रं भूरिभाग्यभवं भवेत् ॥ ११७२ ॥
एवं चित्ते स निश्चित्य कृत्यं कात्यायनीं जगौ ।
स्वाभिप्रायं वदन्त्याम्ब त्वयाहं साधु बोधितः ॥ ११७३ ॥
ममाकृत्यकृतः कर्मोन्मूलने मूढचेतसः ।
उपायं ज्ञापयांचक्रे भवती भवतीरदम् ॥ ११७४ ॥
आत्मा प्रमादपर्यङ्के शयानो मोहनिद्रया ।
कथं जागर्ति चेन्न स्यादुपदेशपरः पुरः ॥ ११७५ ॥
ततः श्राद्धे त्वया सार्धं श्रद्धया गुरुसंनिधौ ।
ध्वंसाय स्वापराधस्य ग्रहीष्ये व्रतमार्हतम् ॥ ११७६ ॥
इति प्रतिज्ञां कृत्वा सोऽतस्तस्या व्रतस्पृहः ।
आपृच्छ्यातुच्छविच्छेदकातरौ पितरौ बलात् ॥ ११७७ ॥
वन्द्यमानन्द्य तच्चज्ञं क्षत्रं मित्रमकृत्रिमम् ।
संबोध्य बान्धवान्कृत्वा कृतार्थानर्थिनो जनान् ॥ ११७८ ॥
परिवारपरित्यागं कृत्वा कात्यायनीयुतः ।
श्रीशीलप्रभसूरीणां संनिधौ व्रतमाददे ॥ ११७९ ॥

त्रिभिर्विशेषकम् ॥

विहरन्गुरुभिः सार्धं श्रीषेणः कर्मशोषणः ।
तपांसि तन्वन्सिद्धान्तं शुद्धान्तःकरणोऽपठत् ॥ ११८० ॥
काले कियत्यपि क्रान्ते गुर्वादेशमवाप्य सः ।
इहैव स्थण्डिले तस्थौ शुद्धध्यानरतिर्यतिः ॥ ११८१ ॥

दृष्टब्रह्मानुभावापि रोहिता तुच्छमोहिता ।
श्रीषेणे नात्यजत्कामं स्नेहबन्धो हि दुस्त्यजः ॥ ११८२॥
पत्युरावर्जनायासौ तन्वती गृहिणां व्रतम् ।
अक्षीणरागा क्षीणाङ्गी मृत्वाभूद्व्यन्तरी वरा ॥ ११८३ ॥
अवधिज्ञानतो ज्ञात्वा तं मुनिं स्थानके ऽत्र सा ।
आगमत्प्राग्भवप्रेमपूरपूरितमानसा ॥ ११८४ ॥
हावैः प्रीतिगिरां भावैर्व्यन्तर्योपहृतो ऽपि सः ।
नाचलद्ध्यानतो दन्तिदन्तघातैरिवाचलः ॥ ११८५ ॥
किं त्वस्य क्षपकश्रेण्यामारूढस्य मुनीशितुः ।
केवलज्ञानमुत्पेदे विच्छेदे घातिकर्मणाम् ॥ ११८६ ॥
तन्मत्वा व्यन्तरी मुक्तमोहा भक्तिमिमां व्यधात् ।
सुगन्धानिलहेमाब्जरत्नसिंहासनादिकम् ॥ ११८७ ॥
जाते च निर्विषे नागे व्योम्नि वाग्निर्ममे ऽनया ।
भवेत्प्रभावनायां हि सम्यग्दृष्टेरभीष्टता ॥ ११८८ ॥
सो ऽहं श्रीषेणनामास्मि यतिर्नृपतिनन्दनः ।
विनीता व्यन्तरी चेयं तव दक्षिणतः स्थिता ॥ ११८९॥
पप्रच्छे यत्त्वया सौम्य द्वितीयं व्रतकारणम् ।
तदेतदिति वैराग्यं ज्ञेयं विषयदोषजम् ॥ ११९० ॥
इत्थं कथायास्तत्त्वार्थमवबुध्य धियां निधिः ।
सनत्कुमारः संसारकान्तारातिक्रमोद्यमः ॥ ११९१ ॥
उन्मीलितमुखाम्भोजः केवलज्ञानभास्करम् ।
गुरुं विज्ञपयामास नत्वा सत्त्वाधिकाधिपः॥११९२॥युग्मम्॥
सच्चारित्र चरित्रं ते पवित्रं यन्मया श्रुतम् ।
तस्योचितं ततः स्याच्चेद्व्रतमासेव्यते परम् ॥ ११९३ ॥

तत्कर्तुं नास्म्यलं वोढुमिव वत्सतरो रथम् ।
किं तु स्वदारसंतोषं कुर्वे ऽनर्थनिवारणम् ॥ ११९४ ॥
ततो दन्तांशुसंसूच्यमानादेशविधूदयः ।
अवोचदौचितीकल्पलतारोहावनिर्मुनिः ॥ ११९५ ॥
स्वबुद्ध्याभिग्रहश्चक्रे यस्त्वया ज्ञाततत्त्वया ।
शममेष्यति तेनैव कृतिन्भवदवस्तव ॥ ११९६ ॥
परदारपरीहारस्तन्यते येन मेहिना ।
तेन सिद्धचङ्गनालीलं शीलं शीलितमुज्ज्वलम् ॥ ११९७ ॥
यस्तु स्वदारसंतोषी विषयेषु विरागवान् ।
गृहस्थो ऽपि स्वशीलेन यतिकल्पः स कल्पते ॥ ११९८ ॥
विश्वप्रीतिप्रदास्त्रेकं शीलं भूषासु शस्यते ।
जायते येन जीवो ऽयं भूषितो निर्वृतेः प्रियः ॥ ११९९ ॥
तत्कुमार त्वया सारतरं व्रतमगृह्यत ।
विशेषादप्रमत्तेन भव्य भाव्यमिहान्वहम् ॥ १२०० ॥
इत्युक्तो गुरुणावादीददीनमिति भूपभूः ।
नियमस्त्वत्प्रसादान्मे प्रभो प्रामाण्यमेष्यति ॥ १२०१ ॥
अत्रान्तरे पवित्रान्तःकरणा करुणार्णवम् ।
गुरुं प्रणम्य शृङ्गारसुन्दरीति व्यजिज्ञपत् ॥ १२०२ ॥
मनोवचनकायेन शुद्धं श्रद्धानबन्धुरा ।
परपुंसः परित्यागं विधास्ये जीवितावधि ॥ १२०३ ॥
गुरुरित्याह वत्से त्वं सत्यं शृङ्गारसुन्दरी ।
शीलं स्त्रीणां हि शृङ्गारः क्षान्तिर्दर्शनिनामिव ॥ १२०४ ॥
इत्थं कृत्वा स्थिरीकारमग्राहयदभिग्रहम् ।
सनत्कुमारशृङ्गारसुन्दर्योर्विधिना मुनिः ॥ १२०५ ॥

भवतां दर्शनं भूयात्पुनर्मे सुलभं प्रभो ।
इति नत्वा गुरुं स्तूयमानः सभ्यैर्नृपाङ्गभूः ॥ १२०६ ॥
सभार्यो ऽथ सभागर्भादात्तपुण्यो ऽगमन्मुदा ।
स्वस्थानं व्यवसायीवार्जितवित्तो ऽन्यदेशतः ॥ १२०७ ॥
युग्मम् ॥

तत्र निर्मितनिःशेषकृत्यः सत्कृत्य धार्मिकान् ।
आनन्दप्रमुखांश्चक्रे स प्रस्तावे प्रयाणकम् ॥ १२०८ ॥
स मङ्गल्यान्यतुल्यानि प्रतीच्छन्प्रतिपत्तनम् ।
अखण्डगमनैश्चण्डदोर्दण्डः स्वपुरीमगात् ॥ १२०९ ॥
तत्र चित्राट्टशोभायां क्षोभाकुलितयोषिति ।
श्रीकान्तायां सक्रान्तो ऽसौ प्रविवेश महोत्सवैः ॥१२१०॥
शृङ्गारसुन्दरीं नार्यो नराधिपसुतं नराः ।
तौ धन्यौ मेनिरे पाणिपीडनक्रीडया मिथः ॥१२११॥
चन्द्रिकामिव चन्द्रस्य पश्यन्पुत्रस्य तां प्रियाम् ।
समुद्र इव भूमीन्द्रः परमुल्लासमासदत् ॥ १२१२ ॥
अनङ्गमङ्गलोत्फुल्लमालया सह बालया ।
केन केन विलासेन विललास रसी न सः ॥ १२१३ ॥
स्मरस्य सरतेः सख्युर्भ्रमेणेव प्रियान्वितम् ।
तदा कुमारनाराद्धुमुत्तीर्णः क्ष्मां मधुर्मुदा ॥ १२१४ ॥
पीतपुष्पमधुर्गायन्भृङ्गारावैरितस्ततः ।
चचार शनकैर्मत्तःकलया मलयानिलः ॥ १२१५ ॥
गृहीतवसुसर्वस्वः शिशिरेण विरोधिना ।
श्रीदस्य प्रतिमासाद्य सश्रीकस्तपनो ऽजनि ॥ १२१६ ॥
ग्रहीतुमिव पुष्पाणि द्रुमेषु किसलच्छलात् ।

काममङ्गुलयः काममवीरेण प्रपञ्चिताः ॥ १२१७ ॥
वनीरङ्गावनीरङ्गाः कुहूकण्ठीकुहूरवाः ।
कन्दर्पकेलिनाट्यस्य नान्दीनादा इवाभवन् ॥ १२१८ ॥
गायति स्मरभूकीर्तिं भृङ्गशृङ्गारिणी जने ।
रतिर्ननर्त सिञ्जानमञ्जीरहंसकूजितैः ॥ १२१९ ॥
दहन्विरहिणीर्विश्वव्यापी पुष्पकलापतः ।
परागः पुष्पचापस्य प्रताप इव निर्ययौ ॥ १२२० ॥
जगज्जययशांसीव कुसुमानि मनोभुवः ।
जितानां दुर्यशोजालैरिवालिंग्यन्त षट्पदैः ॥ १२२१ ॥
पुष्पजातैर्जगत्प्राणान्सुरभिः सुरभीन्सृजन् ।
कस्यै कस्यैष नानन्दसंदर्भाय व्यजायत ॥ १२२२ ॥
तदा हृद्यां वसन्तेन वासन्तीशसुतायुतः ।
स विनोदवनीमापद्वनीपतिनन्दनः ॥ १२२३ ॥
द्युजलस्थलदेवीभिर्मुहुः सस्पृहमीक्षितः ।
अयं सफलयामास विलासान्प्रियया सह ॥ १२२४ ॥
असावितस्ततः खेलन्वसन्तेन विलोकितः ।
कलिताङ्ग इवानङ्गः सुहृत्कुसुमहासिना ॥ १२२५ ॥
लीलाद्रिरत्नशृङ्गेषु लीलावापिजलेषु च ।
कष्टं कुमारः सस्मार तां मायामात्मविम्बनाम् ॥ १२२६ ॥
विलासस्य परां भूमिमथ गन्तुमिवोत्सुकः ।
कुमारोऽयं समारोहद्दोलां कामविमानवत् ॥ १२२७ ॥
शृङ्गारसुन्दरीहस्तलोलया दोलया तया ।
सुकृती यां मुदां प्राप वेत्ति तन्मन एव ताम् ॥ १२२८ ॥
हारस्रजः कुमारस्य दोलाकेलियुताश्च्युताः ।

तत्पादप्रहतस्योडुनिवहा नु विहायसः ॥ १२२९ ॥
अहो प्रेम्णैकचित्तत्वं बाला दोलामियेष च ।
अमूं रमयितुं तत्र कुमारः प्रोत्ततार च ॥ १२३० ॥
इमां दोर्भ्यामुदस्यैष पुलकी पुलकाञ्चिताम् ।
स्वमिवानन्दचूलायां दोलायामध्यरोपयत् ॥ १२३१ ॥
कुमारो दोलया बालां दिवि दूरं व्यलासयत् ।
यन्त्रेणेव स्मरः शक्तिमन्तःक्षामां मरुज्जये ॥ १२३२ ॥
दोलागतागतैस्तस्याः कान्तिरेखाकरं वपुः ।
हेमेव कषपाषाणनिभे नभसि दिद्युते ॥ १२३३ ॥
द्यां मुहुर्दोलया गत्वा हत्वा गर्वं द्युयोषिताम् ।
उत्तरन्ती कुमारेण कुतुकेन व्यलोकि सा ॥ १२३४ ॥
दोलाहलाभरव्युत्क्षिप्तमुक्तावलिविस्तृतौ ।
दृष्टं सनत्कुमारेण दिवा तारकितं नभः ॥ १२३५ ॥
तादृग्विलाससंरम्भजृम्भमाणस्मरोदयः ।
आलिङ्गितुं प्रियाङ्गानि रङ्गद्गाढमनोरथः ॥ १२३६ ॥
दिवो दोलावतारस्य निमेषार्धमपि क्षणम् ।
उत्सुको गणयन्नद्धशतादप्यधिकं तदा ॥ १२३७ ॥
दोलामस्थिरयद्यावत्तावन्नास्त्येव तत्र सा ।
वदन् हा हेति हत्वा हृत्कुमारेन्दुर्मुमूर्छ सः ॥ १२३८ ॥
त्रिभिर्विशेषकम् ॥
किं किमेतदिति व्यग्रगिरा परिजनेन सः ।
प्रसूनरससेकेन मूर्छन्मूर्छः कृतस्ततः ॥ १२३९ ॥
हा प्रिये क्व गतासीति गद्गदां गिरमुद्गिरन् ।
आस्फाल्य भुवि मूर्धानमगच्छन्मूर्छनं पुनः ॥१२४०॥

समाश्वसिहि वीरेन्द्र समाश्वसिहि धीनिधे ।
इत्युक्तयो ऽस्य सचिवाः शीतकर्म व्यधुः पुनः ॥ १२४१॥
मूर्छामयं तमो हित्वा श्रितः शोकमयं तमः ।
कुमारो विललापाथ तरूनपि विलापयन् ॥ १२४२ ॥
अथागत्य पुरो लीनान्दीनान्साश्रुदृशो भृशम् ।
लीलाखगमृगानूचे गिरा रोदनदीर्घया ॥ १२४३ ॥
रे हंस कंसजित्कान्ताकमले ऽपि कथं तव ।
तत्कराग्रवियुक्तस्य वराक भविता रतिः ॥ १२४४ ॥
स्मर्तव्येष्वधुना स्नाततत्केशस्यन्दबिन्दुषु ।
कथं दीनो ऽम्बुदादम्बु रे वप्पीह समीहसे ॥ १२४५ ॥
क्व नृत्ये तादृशीः केकिन् शृणोषि करतालिकाः ।
यत्केकिरथमातापि जाता शूलभृताधिता ॥ १२४६ ॥
भजन्वायुतुरङ्गत्वं सारङ्ग त्वं हि सर्वगः ।
लालयिष्यति सा धन्यं त्वां कुत्रापि वयं हताः ॥ १२४७॥
[रे कोकिल कलध्वानं किं तनोषि न गर्वितः ।
दूरीभूतो ऽद्य यत्तस्याः सर्वगर्वहरः स्वरः ॥]
इत्यार्तं विलपन्तं तं धीराणां योगिनामपि ।
पश्यतां धैर्यमुत्सार्य पूत्कारा निर्ययुर्मुखात् ॥ १२४८ ॥
अथ प्रियावियोगार्तिं स दृढां सोढुमक्षमः ।
प्रेङ्खन्त्या प्रेङ्खयात्मानं क्षिप्त्वा खे मृत्युमैहत ॥ १२४९ ॥
इहान्तरे परिज्ञाततत्प्रवृत्तिः परत्वरः ।
कुमारमाश्वासयितुं वनमाप क्षमापतिः ॥ १२५० ॥
पितुः प्रणामव्याजेन लज्जया नमयञ्शिरः ।
कुमारः संववार स्वमथ गूढदृग्व्यर्थः ॥ १२५१ ॥

क्रोडे कुमारमारभ्य परिश्लिष्यन्मुहुर्मुहुः ।
ययौ नरविमानेन नरेन्दुर्मन्दिरं ततः ॥ १२५२ ॥
धिग्धिग्मे शूरतामस्य प्रिया यन्मे ऽग्रतो हृता ।
एवं ह्रियैव निस्तेजा ययौ द्वीपान्तरं रविः ॥ १२५३ ॥
ततः संध्यारुणं रेजे लोहगोलनिभं नभः ।
कुमारविरहज्वालामालाभिरिव तापितम् ॥ १२५४ ॥
उद्भ्रान्त इव शोकाब्धिः कुमारस्य हृदस्तदा ।
तमःस्तोममिषाद्व्योमकुक्षिम्भरिरलक्ष्यत ॥ १२५५ ॥
कुमारस्फारनिःश्वासज्वालावलिवशादभूत् ।
ताराकुलच्छलाद्व्योम्नः स्फुटं पिटकपेटकम् ॥ १२५६ ॥
मनस्तस्य रतेर्गेहं दहतो विरहानलात् ।
स्फुलिङ्गा इव निष्पेतुः प्रदीपाः प्रतिमन्दिरम् ॥ १२५७ ॥
दूरात्तारापथे तारापतिः पतितवानथ ।
क्षिप्तः कुमारे मारेण यन्त्रोपल इवोज्ज्वलः ॥ १२५८ ॥
यथा यथा रुचिश्चान्द्री सान्द्रीभूता भुवस्तले ।
तथा तथाभवत्तस्य म्लानमाननपङ्कजम् ॥ १२५९ ॥
सुधारश्मेः सुधाधाराकारा अपि करोत्कराः ।
कुमारस्यादहन्देहं प्रियास्नेहगृहं मुहुः ॥ १२६० ॥
अथारतिकरं दूरे परित्यज्य परिच्छदम् ।
भीतः शीतरुचेः कामं चित्रधाम जगाम सः ॥ १२६१ ॥
स दुःखी यावदेकान्ते कान्ताचिन्तामयो ऽभवत् ।
तावत्पुरः सुरस्त्रीव काप्यभूदृक्पथे सुदृक् ॥ १२६२ ॥
साक्षात्काक्षविक्षेपदक्षां प्रेक्षाम्बुधिः स ताम् ।
आह तत्सहसाक्षिप्तमना मानपराङ्मुखीम् ॥ १२६३ ॥

कासि कल्याणि केन त्वं कार्येणेहागता कुतः ।
इति पृष्टामुना हृष्टा स्पष्टमाचष्ट सा रसात् ॥ १२६४ ॥
शृणु सौभाग्यभाग्यैकसिन्धो नेत्रविधूदय ।
रथनूपुरचक्राख्यं वैताढ्ये ऽस्ति गिरौ पुरम् ॥ १२६५ ॥
तत्रास्ति धैर्यनिःसीमो भीमो भीमोहिताहितः ।
विश्वविद्यानिधिर्विद्याधरचक्री बलोद्धुरः ॥ १२६६ ॥
तत्पट्टमहिषी भानुमतीसंज्ञा कृतीश्वर ।
त्वद्गुणायत्तचित्ताहमिहायाता विहायसा ॥ १२६७ ॥
एकदा विशदानन्दः सविमानी समं मया ।
खेलन्खे तत्र वासन्तीपुर्यां धुर्यो नृणां ययौ ॥ १२६८ ॥
अन्तरिक्षे स्थितो ऽद्राक्षीदेष शृङ्गारसुन्दरीम् ।
अलंकर्तुम्भवत्कण्ठं सोत्कण्ठां वरमालया ॥ १२६९ ॥
चिद्रूपः स भवद्रूपमायां निर्माय कौतुकात् ।
त्वदर्धासनमासीनस्तस्थावास्थानमोहकृत् ॥ १२७० ॥
स्वकण्ठन्यस्तमालायां बालायां स विलक्षधीः ।
अलब्धपिण्डः काकोल इवोत्पत्य वियत्यगात् ॥ १२७१ ॥
मया सह सहर्षो ऽयमद्य खेलन्निहागतः ।
ददर्श दर्शनीयाङ्गीं दोलालोलां तव प्रियाम् ॥ १२७२ ॥
किमेतदिति संमोहमरोहद्रोहितस्वरा ।
हृता धृतानुरागेण ततस्तेनाङ्गना तव ॥ १२७३ ॥
तत्र तद्व्यसनव्यग्रे तव रागग्रहादहम् ।
त्वत्सेवावसरं यावदद्राक्षमेव दिवि स्थिता ॥ १२७४ ॥
स्वानुरागः स्वतन्त्रेण मुहूर्तं तेन पूरितः ।
पुनर्मे परतन्त्रायास्त्वमीशो रागजागरे ॥ १२७५ ॥

तन्नाथ मान्मथैर्बाणैर्मथ्यमानहृदो मम ।
कारुण्यहरिणारण्य शरण्य शरणीभव ॥ १२७६ ॥
त्वदसंगानलज्वालावलीढाया दृढं मम ।
चित्तेश चारुतारुण्य शरण्य शरणीभव ॥ १२७७ ॥
अतुच्छवाञ्छापाथोधिमध्यमग्नस्य मे हृदः ।
कन्दर्पकेलिनैपुण्य शरण्य शरणीभव ॥ १२७८ ॥
ममान्यासक्तचित्तेन पत्या संतप्तचेतसः ।
अगण्यपुण्यलावण्य शरण्य शरणीभव ॥ १२७९ ॥
इत्याकर्ण्य सुवर्णश्रीः सकर्णामृतवर्णिकाम् ।
तत्त्वज्ञः सत्त्ववानूचे वाचं वाचंयमोचिताम् ॥ १२८० ॥
मुग्धे धर्मस्य सर्वस्वं न वेत्सीति वदस्यदः ।
तत्त्वज्ञैरिन्दुलीलस्य रक्षा शीलस्य शस्यते ॥ १२८१ ॥
परस्त्रीसंगनामानमुल्लसत्पङ्कसंकुलम् ।
तत्कथं सुपथां पान्थैस्त्यक्तं पन्थानमाश्रये ॥ १२८२ ॥
वाञ्छन्ति पररम्भोरूपरिरम्भेण ये सुखम् ।
उदारैः खदिराङ्गारैः शृङ्गारं स्पृहयन्ति ते ॥ १२८३ ॥
यदि सत्येन चित्ते ऽहं तव प्रिय इति स्थितः ।
तत्किमर्थयसे दुःखसंमुखाय सुखाय माम् ॥ १२८४ ॥
अहो परनरासक्तिर्व्यक्तं युक्ता तवापि न ।
कुलीनापि विलीनासि किमस्मिन्कश्मले मले ॥ १२८५ ॥
तदिदं धर्महृत्कर्म विद्याधरि परित्यज ।
भज शीलं यतः कीर्तिरत्रामुत्र च निर्वृतिः ॥ १२८६ ॥
सद्धर्ममूलं या शीलं सेवते देवतेव सा ।
महनीया महेच्छानामप्यत्रापि भवे भवेत् ॥ १२८७ ॥

सौख्यं भर्तृभयान्नात्र नामुत्र दृजिनव्रजात् ।
तत्त्वं वद हृदस्तत्त्वं किं वरं परपूरुषे ॥ १२८८ ॥
एवं वचःसुधासारैः कुमारेन्दोरुदित्वरैः ।
तस्या मनसि विध्यातो वह्निर्मारविकारजः ॥ १२८९ ॥
चिन्तयामास साप्येवमहो मे भाग्यसंचयः ।
पापारम्भो ऽप्ययं पुण्यव्रजाय यदजायत ॥ १२९० ॥
अयं धर्मगुरुर्मे ऽभूत्तदस्मै गुरुदक्षिणाम्
दास्ये त्रिद्यावलीं विद्याधरैश्वर्यपदप्रदाम् ॥ १२९१ ॥
स्वभाववलिना विद्याबलोग्रेणाधुनामुना ।
प्रियाहतिविरोधेन सक्रोधेन धुतो युधि ॥ १२९२ ॥
सर्वथा वितथारम्भो मत्पतिर्निरहंकृतिः ।
यदि श्रयति सन्मार्गमहो सो ऽपि महो मम ॥ १२९३ ॥
युग्मम् ॥
इति निश्चित्य चित्ते साभ्यर्थ्य समश्रयोक्तिभिः
कुमारायानवद्याय ददौ विद्या यथाविधि ॥ १२९४ ॥
सा तस्माद्धर्ममासाद्य सद्योविद्यास्ततश्च सः ।
अहम्पूर्विकयान्योन्यं गुरुत्वान्नेमतुर्मुदा ॥ १२९५ ॥
अथापृच्छ्य कुमारं सा रंहसा स्वपुरीमगात् ।
दधौ च तद्वचः स्मृत्वा वपुः सपुलकं मुहुः ॥ १२९६ ॥
सिद्धां विद्येश्वरीं प्राज्ञः प्रज्ञप्तिं स्मरणागताम् ।
स पप्रच्छ प्रियालापैः प्रियावृत्तान्तमुन्मनाः ॥ १२९७ ॥
कुमारकर्णपीयूषसारणीसारया गिरा ।
अवोचदुचितं वाच्यमथ विद्याधिदेवता ॥ १२९८ ॥
नीत्वा निजपुरारामे भीमेन भवतः प्रिया ।

इत्यूचे खेचरेन्द्रेण पटुभिश्चटुभाषितैः ॥ १२९९ ॥
मुग्धे मुधा सुधारश्मिसमानं कथमाननम् ।
कलङ्कयित्वा कुरुषे दृग्जलैः सज्जकज्जलैः ॥ १३०० ॥
मयि दासे ऽप्यविश्वासान्निश्वासानलकेलिभिः ।
किं बाले ज्वालयस्यङ्गं शिरीषसुमकोमलम् ॥ १३०१ ॥
किमादेशकरं देवि मामिन्दीवरलोचने ।
नालोकयस्यमूल्लोकान्कुर्वतीन्दीवराकरान् ॥ १३०२ ॥
नाविष्करोषि किं तोषाद्वदने सुदति स्मितम् ।
मदङ्गे ऽनङ्गदाहार्ते सुधासेचनसन्निभम् ॥ १३०३ ॥
धात्रीशमात्रपुत्रस्य विरहे ऽप्यातुरासि किम् ।
इदं विद्याधरैश्वर्यं भुजिष्येण मया भज ॥ १३०४ ॥
इत्यालापी तया पापी मौनेनैव न्यवेधि सः ।
वार्यो ऽवगुण्ठनेनैव सरजस्को हि मारुतः ॥ १३०५ ॥
विद्याछेदभयात्तस्याः सत्याः शापभयाच्च सः ।
शीललीलाविलोपाय बलात्कारं चकार न ॥ १३०६ ॥
श्रुत्वेति भीमरोषेण प्रियाशीलमदेन च ।
द्वौ संक्रीणौ रसौ भेजे स मगल्भो यथा नटः ॥ १३०७ ॥
अथायं विद्यया सद्यो विद्याधरगिरिं गतः ।
रथनूपुरचक्राख्यपुरोद्यानं समासदत् ॥ १३०८ ॥
तत्र चित्रगिरः श्रुत्वा निष्ठुराः करुणाश्च सः ।
पश्यन्नदृश्यभूयाग्रे भीमं भार्यां च दृष्टवान् ॥ १३०९ ॥
काले ऽस्मिन्करवालेन भीमो भीमो ऽभ्यधादिमाम् ।
न मन्यसे मां हन्यासि तदिष्टां देवतां स्मर ॥ १३१० ॥
अथाभाषत नाभाकतनया नयनायिका ।

शरणं सिंहसूनुर्मे स्त्रियो हि पतिदेवताः ॥ १३११ ॥
सैंहिनामग्रहादेष विशेषकुपितस्ततः ।
निस्त्रिंशः कृष्टनिस्त्रिंशस्तद्वधायोद्धतो ऽस्फुरत् ॥१३१२॥
आः पाप कुरुषे किं रे म्रियसे म्रियसे ऽधुना ।
इत्युच्चैरुच्चरन् राजसूनुरासीन्निरभूत्तदा ॥ १३१३ ॥
आकस्मिकभयाद्भ्रष्टः खड्गो भीमस्य हस्ततः ।
परदाररिरंसूनामूना हि बलसंपदः ॥ १३१४ ॥
कृपाणं पाणिना वीर गृहाण विगृहाण माम् ।
एवमग्रहरन्नेव क्षत्रपुत्रो रिपुं जगौ ॥ १३१५ ॥
ततः प्रततलज्जेन रणासज्जेन चेतसा ।
अचिन्तयदयं विद्याधरनाथस्तथा स्थितः ॥ १३१६ ॥
खुरलीमध्यमध्यास्य सकलो ऽखकलोत्करः ।
आजन्म यो मयाभ्यस्तः प्रस्तावे त्रस्त एव सः ॥१३१७॥
अकृत्यं तावदेकं मे परस्त्री यदियं हृता ।
द्वितीयं तु त्रपाकारि भ्रष्टं युधि यदायुधम् ॥ १३१८ ॥
तदहं निरहंकारः कथमाननमात्मनः ।
दर्शयिष्यामि वश्यासु निजं स्वान्तःपुरीष्वपि ॥ १३१९ ॥
तदीदृशीं दशां नीतो यैरहं हन्त कर्मभिः ।
तान्येव रिपुरूपाणि जेतुमुद्यममाश्रये ॥ १३२० ॥
इति ध्यात्वा कुमारं तं क्षमयित्वा प्रियायुतम् ।
पुण्ये विद्याधरारण्ये व्रतं तापसमाप सः ॥ १३२१ ॥
निशम्य भीमवृत्तान्तं क्षणादारामरक्षकात् ।
भ्रान्ता भानुमती यावत्तदुद्यानं समासदत् ॥ १३२२ ॥
पुरतः पुरतस्तावद्भावमानजनोत्थितः ।

तुमुलः समभूद्भीष्मो ग्रीष्मे ऽम्भोधिरिवाधिकः ॥१३२३॥
युग्मम् ॥

इतः सनत्कुमारो ऽपि प्रियालापशतैः प्रियाम् ।
शुद्धशीलां समाश्वास्य स्वपुराभिमुखो ऽभवत् ॥१३२४॥
तं तथा प्रस्थितं प्रेक्ष्य भीता भीमप्रियावदत् ।
विपक्षेभ्यः कृपादक्ष रक्ष रक्ष पुरीमिति ॥ १३२५ ॥
इमं मद्भर्तृवृत्तान्तं जानन्तः खेचरेश्वराः ।
भीमारयो रयोत्तुङ्गाः पुरभङ्गार्थमागमन् ॥ १३२६ ॥
इत्युक्तः स तया सद्यो दयाह्यो दयाशयः ।
पुरीरक्षामुरीकृत्य ववले प्रबलायुधः ॥ १३२७ ॥
म्रियध्वं मा म्रियध्वं मा रे रे पत्तनभञ्जकाः ।
तमित्युग्रगिरं चन्द्ररत्नचूडौ प्रणेमतुः ॥ १३२८ ॥
एतयोः पृच्छतोः प्रीत्या शेखरीकृतहस्तयोः ।
स्ववृत्तान्तं निवृत्तान्तस्तापः क्ष्मापजनिर्जगौ ॥ १६२९ ॥
कुमारमथ तौ हर्षपथतूर्यत्विषा गिरा ।
तमूचतुश्चतुर्वर्गसंवर्गणगुणोदयम् ॥ १३३० ॥
अन्वहं नन्वहंकारभृता खेचरचक्रिणा ।
वैरिणा कारणाभावादावामेतेन ताडितौ ॥ १३३१ ॥
तदीदृशदशस्यास्य द्रङ्गभङ्गार्थमागतौ ।
ऋणस्येव न वैरस्य यतो जायेत जीर्णता ॥ १३३२ ॥
त्वं चेत्पुनः पुरस्यास्य त्रायकः क्षत्रनायकः
तत्त्राता भव दासेरभावयोरावयोरपि ॥ १३३३ ॥
इत्युक्त्वा तौ मुदाभोगभासुरौ भूपजन्मनः ।
तस्य खेचरचक्रित्वाभिषेकं तत्र चक्रतुः ॥ १३३४ ॥

सनत्कुमारसाम्राज्यप्रेक्षाप्राज्यप्रमोदभाक् ।
पथिका पथिकान्तस्य जाता भानुमती ततः ॥ १३३५ ॥
स्वल्पैरपि दिनैस्तस्य चक्रिणः खेचरेश्वराः ।
निग्रहानुग्रहारम्भैरवश्यं वश्यतां गताः ॥ १३३६ ॥
पितृपादवियोगार्तिः खेचरालीवृतो ऽथ सः ।
समं शृङ्गारसुन्दर्या प्रतस्थे स्वपुरं प्रति ॥ १३३७ ॥
पुर्याः पर्यन्तमायाति स यावत्तावदैक्षत ।
धूमस्तोमं ससंरम्भो नभस्याम्भोदविभ्रमम् ॥ १३३८ ॥
किमेतदिति चिन्तार्तः सो ऽवनौ नयनं नयन् ।
पुरीसरित्तटे ऽपश्यदसंख्यं दुःखिनं जनम् ॥ १३३९ ॥
तन्मध्ये चानलज्वालामालाभिर्निचितां चिताम् ।
लोकयन्नाकुलस्वान्तो विमानादुत्ततार सः ॥ १३४० ॥
सोत्कर्षतुमुलैः सैष प्रेक्ष्यमाणः प्रजाकुलैः ।
चितोपान्तजुषो मातुः पादयोरातुरो ऽपतत् ॥ १३४१ ॥
इयन्तं समयं वत्स क्व स्थितो ऽसीति वत्सला ।
सूनोः कण्ठे लगित्वासौ रुदत्परिजनारुदत् ॥ १३४२ ॥
मातः श्रीतातपादेभ्यः क्षेम इत्यस्य पृच्छतः ।
ज्ञातपुत्रागतिस्तत्राययौ भूपः पुरः पुरात् ॥ १३४३ ॥
पतन्तमेव पादाग्रे तमुत्सुकतमो नृपः ।
आलिलिङ्ग मुहुर्दोर्भ्यां मुहुर्मूर्ध्नि चुचुम्ब च ॥ १३४४ ॥
कथं चितेति पुत्रस्य शङ्कातङ्कस्य पृच्छतः ।
जगादं जगतीजानिर्वत्स किं वेत्सि दूरगः ॥ १३४५ ॥
तदा त्वयोज्झिता पुत्र चित्रशाला शुचे ऽभवत् ।
विमुक्ता जीवितव्येन स्वजनस्य तनूरिव ॥ १३४६ ॥

पुरं पुरन्दरावाससदृशं सुदृशां पदम् ।
यमवेश्मेव भूतानामास्पदं तदभूत्तदा ॥ १३४७ ॥
अमन्दाक्रन्दसंदर्भे दूरं पौरजने तदा ।
शुचेव प्रतिशब्देन चक्रन्दे मन्दिरैरपि ॥ १३४८ ॥
कृत्याकृत्याद्यजानन्तो वत्स त्वत्संगमं विना ।
हा जीवन्तो ऽप्यजीवन्त इव जाता वयं तदा ॥ १३४९ ॥
~~रम्यरामारमारामधामकामकलादयः ।~~
अकृतार्थाः पदार्थास्ते तदासन्विषसोदराः ॥ १३५० ॥
तद्वियोगाग्निकीलार्ता धर्तुं जीवितमक्षमा ।
अजनिष्ट परित्यक्तभोजना जननी तव ॥ १३५१ ॥
कुलालंकारभूतस्य तवादर्शनदुःस्थिता ।
कुलाधिदेवतामेव सेवमानाग्रतः स्थिता ॥ १३५२ ॥
तपसः साष्टमस्यान्ते नितान्तं भक्तिनिर्भरा ।
आदिश्यत स्वयं स्वप्ने कुलदेवतया तया ॥ १३५३ ॥
लब्धविद्याधरैश्वर्यः शीलवर्यः प्रियायुतः ।
स ते सति सुतः सत्यं मासस्यान्ते मिलिष्यति ॥१३५४॥
तत्तादृशसुतासङ्गसमुत्सुकतमानिमान् ।
प्राणान्धारयितुं वत्से विधत्से किं न भोजनम् ॥ १३५५ ॥
इयं स्वप्नमिति प्रातर्निवेदितवती मया ।
कथंचिदुपरोधेन प्रतिबोधेन भोजिता ॥ १३५६ ॥
मासस्यान्तदिनं प्रातरद्य प्राप्य महाग्रहा ।
मयात्यर्थं निषिद्धापि मर्तुमेषा चितां व्यधात् ॥ १३५७ ॥
गाः सत्यापयितुं देव्याः स्पृहां पूरयितुं मम ।
अस्याश्च रक्षितुं प्राणाञ्जातस्तात तवागमः ॥ १३५८ ॥

अधुना विधुना तुल्यं वदनं सदनं श्रियः ।
पौरचक्षुश्चकोराणां स्वं दर्शय महाशय ॥ १३५९ ॥
अथ पुत्रावृतोत्सङ्गः पट्टमातङ्गसंगतः ।
पट्टदेव्या सस्नुषया वशावाहनयान्वितः ॥ १३६० ॥
चारुपार्श्वद्वयश्चन्द्ररत्नचूडादिखेचरैः ।
अमन्दैर्बन्दिनां वृन्दैर्वर्ण्यपुण्यमहोदयः ॥ १३६१ ॥
माविशत्परमानन्दसुधापूरपरिप्लुतम् ।
भूजानिः स्वजनैः साकमुत्पताकमसौ पुरम् ॥ १३६२ ॥
त्रिभिर्विशेषकम् ॥
अस्मिन्नेव क्षणे क्ष्मापः क्षणदायिनि दक्षिणः ।
अभिषिच्याङ्गजं राज्ये सभार्यो ऽगात्तपोवनम् ॥ १३६३ ॥
अवाप्य पैत्रिकं राज्यं मुदितो मित्रयोरयम् ।
विद्याधरपुरश्रेणिद्वयं खेचरयोर्ददौ ॥ १३६४ ॥
ततो विद्यावशेनाशं वशीकृतमहीतलः ।
यशोभिः शोभयामास भासुरैर्भुवनत्रयम् ॥ १३६५ ॥
सलीलशीलमाधुर्ये धर्मधुर्ये ऽत्र भूभुजि ।
जज्ञे धर्ममयं शश्वद्विश्वं विश्वम्भरातलम् ॥ १३६६ ॥
शृङ्गारसुन्दरीजानिं शीलादुन्मीलितोदयम् ।
भूचरैः खेचरैः सेव्यं पश्यन्को ऽभून्न शीलभाक् ॥१३६७॥
इत्थं पृथ्वीश्रियं भुक्त्वा जन्मान्ते ऽनशनोत्तमः ।
सभार्यः स ययौ राजा विमाने ऽनुत्तरे ऽजिते ॥ १३६८ ॥
शीलमूले गुणस्तम्बे राज्यपत्रे यशःसुमे ।
धर्मकल्पद्रुमे सैष लब्ध्वा शिवफलं क्रमात् ॥ १३६९ ॥
सनत्कुमारशृङ्गारसुदरीचरितश्रुतेः ।

नव्याद्भुतश्रिये भव्याः सेव्यतां शीलमुज्ज्वलम् ॥ १३७० ॥

॥ इति शीलधर्मे सनत्कुमाराद्भुतशृंगारसुन्दरीकथा ॥

सत्कर्माभ्युदये हेतुं शीलं सेव्यमिदं सताम् ।
दुःकर्मदारि सत्कर्मकारि सेव्यतमं तपः ॥ १३७१ ॥
अनादिसिद्धदुःकर्मद्वेषिसंघातघातकम् ।
इदमाद्रियते धीरैः खड्गधारोपमं तपः ॥ १३७२ ॥
ज्ञानचक्षुषि नैर्मल्यं तत्त्वातत्त्वावलोकनम् ।
तपस्तपनवद्दत्ते तमःशमनतः सताम् ॥ १३७३ ॥
कर्मैधांसि दहन्पुष्टस्तपोवह्निरयं नवः ।
हरते देहिनां दाहं यः संसारसमुद्भवम् ॥ १३७४ ॥
तत्तपः सेव्यतां दक्षा दुःकर्मक्षालनोदकम् ।
यत्सेवया रयादेव सेव्यो ऽभूद्भुवि संवरः ॥ १३७५ ॥

तथाहि हृदयग्राहिगुणसागरनागरा ।
जम्बूद्वीपे ऽस्त्ययोध्याभूर्भरतक्षेत्रभूषणम् ॥ १३७६ ॥
ईहाजनि महीजानिर्महासेन इति श्रुतः ।
चिन्तामणिषु यद्दानश्रियो बिम्बमिवैक्ष्यत ॥ १३७७ ॥
अभूद्भूपस्य मान्यो ऽस्य सार्थेशो धनदाभिधः ।
मूर्ता तृषा इव तृषा रेजुर्यस्य धनार्जने ॥ १३७८ ॥
धनश्रीरिति तस्यासीत्प्रेयसी श्रेयसी गुणैः ।
बभौ प्रथमसख्यस्य या तीर्थं रूपशीलयोः ॥ १३७९ ॥
दुर्गतेर्निर्गतः को ऽपि जीवः पीवरदुःकृतः ।
कैश्चिद्भाग्यैरभाग्यानां तस्या गर्भमवातरत् ॥ १३८० ॥
शये पांशुजुषि क्ष्मायां मुण्डिता खण्डितांशुका ।
इत्यस्या गर्भनिर्भाग्यैर्दुःखदो दोहदो ऽजनि ॥ १३८१ ॥

नाविष्करिष्ये निःशेषद्रोहदं दोहदं क्वचित् ।
अपत्यमेनमुत्पन्नमेव त्यक्ष्यामि च क्षणात् ॥ १३८२ ॥
इति ध्यानवती यावद्दिनानि गमयत्यसौ ।
तावद्विधिनियोगेन धनदो निधनं ययौ ॥ १३८३ ॥
युग्मम् ॥

धनं यद्यस्य हस्ते ऽभूत्तत्तेन जगृहे ऽखिलम् ।
दोहदो ऽस्याः स्वभावेन पूर्णस्तूर्णतरस्ततः ॥ १३८४ ॥
पूर्णैर्दुर्दिवसैस्तस्या जातः पातकधान् सुतः ।
पिङ्गाक्षिकेशः कृष्णाङ्गः कुब्जो न्युब्जः खरस्वरः ॥१३८५॥
सदुःखा सूतिरोगार्ता मुक्ता परिजनेन सा ।
ईदृग्गात्रे सुते जातमात्रे तत्र मृता ततः ॥ १३८६ ॥
तस्या दत्तः शिखी तुल्यजातिभिः प्रातिवेश्मकैः ।
पयांसि कृपया सो ऽपि पायितः प्राणितश्च तैः ॥१३८७॥
उत्पन्नेनामुना सर्वं श्रीकुटुम्बादि संवृतम् ।
ततः संवर इत्यस्य जनैर्नाम विनिर्ममे ॥ १३८८ ॥
अज्ञानजनदुर्वाक्यताडनैर्वव्रृधे ऽधिकम् ।
ग्रीष्मवातरजःपातैर्यवासक इवासकौ ॥ १३८९ ॥
वैरूप्यमेव तस्याभूत्पत्तने वर्तनं शिशोः ।
विटानां विटविद्यैव जीवनं जायते यतः ॥ १३९० ॥
तारुण्येनापि वैरूप्यं हतं नास्य मनागपि ।
लेष्टुं वैकटिको यस्मादुत्तेजयितुमक्षमः ॥ १३९१ ॥
उलूक इव काकोलैर्लोलैः कोलाहलोल्बणैः ।
पुरि भ्राम्यन्नसौ डिम्भैः संभूय स्माभिभूयते ॥ १३९२ ॥
दुर्बलानां बलं राजकुलमित्येष चिन्तयन् ।

तत्र चेद्याति तद्राजपुत्रकैः पीड्यते ऽभितः ॥ १३९३ ॥
खेदात्त्यक्तपुरो ऽताडि पथिकैः पथिकैर्न सः ।
ग्राम्यैर्ग्रामे विशल्लेष्टुयष्टिमुष्टिभिरप्यथ ॥ १३९४ ॥
इत्यसौ सर्वतः सर्वैरप्यत्यर्थं कदर्थितः ।
निचितं चिन्तयामास निश्वासोच्छ्वासिताननः ॥१३९५॥
धन्या वन्या मृगास्तेऽपि पक्षिणस्तेऽपि दक्षिणाः ।
विशन्त्यपि न ये कर्मदानवे मानवे जने ॥ १३९६ ॥
अहमप्यहते स्थाने मानवैर्यामि सर्वथा ।
इति ध्यायन्नयं कापि कान्तारे सत्वरं ययौ ॥ १३९७॥
त्यक्तजातिविरोधेन जातबोधेन साश्रुणा ।
मृगवर्गेण संवर्ग्यमाणपर्यन्तभूतलः ॥ १३९८ ॥
अमुना शमिनां मध्ये सिद्धसेनो मुनीश्वरः ।
स्वाध्यायध्वनिमाधुर्यवश्यविश्वो व्यलोक्यत ॥१३९९॥
युग्मम् ॥
आगच्छागच्छ वत्स त्वमिति तं यतिनां पतिः ।
वर्णैः कर्णैकपीयूषगण्डूषैः स्वयमाह्वयत् ॥ १४०० ॥
अहो उक्तिरपूर्वास्य ध्यात्वेति पदयोर्यतेः
स निपत्य पराभूतः सुतः पितुरिवारुदत् ॥ १४०१ ॥
संभाष्य मुनिना पृष्टः संनिकृष्टफलोदयः ।
अथाचष्ट निजं कष्टचरितं परितो ऽपि सः ॥ १४०२ ॥
अथादिशदसौ साधुस्तमुद्दिश्य दयाशयः ।
प्रीणयन्सर्वसत्त्वानि तथ्यैकरुचिरं वचः ॥ १४०३ ॥
कियन्मात्रमिदं दुःखमत्र ते ऽस्ति नृजन्मनि ।

सहन्ते ऽमी यथात्मानो ऽनन्तं दुःखं तथा शृणु ॥१४०४॥
कषायविषयासक्तः सक्तः प्राणिवधादिषु ।
तदर्जयति दुःकर्म येन जन्तुर्भवान्तरे ॥ १४०५ ॥
भेदनच्छेदनोत्तप्तत्रपुपानासिपत्रजैः ।
क्षेत्रजैश्च महादुःखैः पीड्यते नरकेष्वसौ ॥ १४०६ ॥
युग्मम् ॥
लब्धतिर्यग्भवो ऽप्येष जलस्थलनभोगतिः ।
व्यथ्यते ऽत्यर्थमात्मोष्णशीतानिलानलैः ॥१४०७॥
मर्त्यत्वे ऽपि महारोगनैःस्व्यदास्यवियोगजैः ।
दुःखैर्दन्दह्यते जन्तुर्नारकमतिहस्तकैः ॥ १४०८ ॥
किल्बिषकिंकराल्पर्धिभावात्कुद्वेन्द्रवव्रतः ।
युद्धेर्ष्याच्यवनाज्जीवो देवत्वे ऽपि न सौख्यभाक् ॥१४०९॥
एवं कर्मविपाको ऽस्मिन्भवे जीवान्कदर्थयेत् ।
लक्ष्यन्ते ऽस्य फलान्येव न स्वरूपं जनैर्यतः ॥ १४१० ॥
माहात्म्यं ध्यानयोगानां सामर्थ्यं परमात्मनाम् ।
विपाकं कर्मणां वेत्ति न सर्वज्ञं विनापरः ॥ १४११ ॥
अमुं कर्मविपाकं तु शुभीकर्तुमिहोद्यतः ।
एक एवास्ति सद्धर्मः शिवशर्मनिबन्धनम् ॥ १४१२ ॥
विनामुना तु धर्मेण जन्तुः कर्माख्यवैरिभिः ।
पात्यते तेषु दुःखेषु येषां त्वदुःखमञ्चलः ॥ १४१३ ॥
परं नैवाचरन्त्येते मूढास्तत्किंचन क्वचित् ।
येन क्षिपन्ति दुःकर्मबीजं तदुःखभूरुहाम् ॥ १४१४ ॥
अथ प्रभूतदुःकर्माभिभूतः संवरो गुरून् ।
करौ किरीटतां नीत्वा पप्रच्छातुच्छवाञ्छनः ॥ १४१५ ॥

प्रभो प्रभवति प्रायः को ऽप्युपायः स किं क्वचित् ।
येन स्याद्विषतामन्तो हन्त दुःकर्मणामपि ॥ १४१६ ॥
अथाभ्यधात्सुधापूरसोदरीं स गुरुर्गिरम् ।
तप एवास्ति दुःकर्ममर्मनिर्मथनिष्ठुरम् ॥ १४१७ ॥
धत्ते तदपि तीव्रत्वमङ्गनिःसङ्गताभृताम् ।
निःसङ्गता तु दीक्षाया दाक्षिण्येन यदि स्थिरा ॥ १४१८॥
चेतसो निश्चलत्वेन प्राप्यते सा महाशयैः ।
कर्मदावानलज्वालाविध्यापनघनाघनः ॥ १४१९ ॥
इति श्रुत्वाथ तत्त्वार्थं सत्त्वभाक्संनिधौ गुरोः ।
साग्रहः सो ऽग्रहीद्दीक्षां संमदी क्षान्तितत्परः ॥१४२० ॥
सिद्धान्ताध्ययनोद्रेकाद्विवेकाञ्चितचेतनः ।
तपः कपटनिर्मुक्तमारेभे संवरो मुनिः ॥ १४२१ ॥
असौ सद्धर्मचातुर्थस्तुर्यषष्ठाष्टमैर्व्यधात् ।
तपोभारैः शरासारैर्जर्जरं कर्मपञ्जरम् ॥ १४२२ ॥
पुरिमार्धमेकभक्तं नैर्विकृत्यं च कृत्यवित् ।
आचाम्लमुपवासं च सेवमानः प्रतीन्द्रियम् ॥ १४२३ ॥
दिवसैः पञ्चविंशत्या जितेन्द्रियशिरोमणिः ।
स इन्द्रियजयं नाम तपश्चक्रे यथाविधि ॥ १४२४ ॥
युग्मम् ॥
एकभक्तं नैर्विकृत्यमाचाम्लं भक्तवर्जनम् ।
एवं षोडशभिर्घस्रैः स कषायजयं व्यधात् ॥ १४२५ ॥
निर्विकृतिकमाचाम्लमभक्तं विदधन्मुनिः ।
योगानां शुद्धये योगशुद्धिं नवदिनैर्व्यधात् ॥ १४२६ ॥
अभक्तमेकाशनकमेकसिक्थकमप्यथ ।

एकस्थानमेकदत्तिं विकृत्या रहितं ततः ॥ १४२७ ॥
आचाम्लमष्टकवलमित्येकैकस्य कर्मणः ।
हृते तपो व्यधादष्टकर्मसूदनमेव च ॥ १४२८ ॥
॥ युग्मम् ॥
ज्ञानस्य दर्शनस्यापि चारित्रस्य च सेवनम् ।
चक्रे निरन्तरं साधुरुपवासैस्त्रिभिस्त्रिभिः ॥ १४२९ ॥
शुक्लास्वेकादशीष्वेकादशसंख्यासु सो ऽकरोत् ।
मौनोपवासकरणैः श्रुतदेवीतपः शुभम् ॥ १४३० ॥
शुक्लपक्षे ऽष्टभिरुपवासैराचाम्लपारणैः ।
दिनैः षोडशभिः सो ऽथात्तपः सर्वाङ्गसुन्दरम् ॥ १४३१ ॥
इत्येतत्कृष्णपक्षे तु ग्लानपालनलालसः
सो ऽकार्षीद्विषयद्वेषी नीरुक् सिंहाभिधं तपः ॥ १४३२ ॥
मुनिर्द्वात्रिंशदाचाम्लैरेकान्तरितपारणैः ।
विदधे शुद्धबोधो ऽयं तपः परमभूषणम् ॥ १४३३ ॥
अङ्गान्येकादशाप्येष पूर्वाणि च चतुर्दश ।
द्विधा चन्द्रायणं न्यूनोदरतादितपो व्यधात् ॥ १४३४ ॥
अथैका प्रतिपद् द्वे च द्वितीये तिथयो ऽखिलाः।
यावत्पञ्चदश ज्ञेयाः पूर्णमास्यो निरन्तरम् ॥ १४३५ ॥
उपवासैर्विशुद्धाः स्युर्यत्र तत्तप उज्ज्वलम् ।
व्यातेने मुनिना सर्वसौख्यसंपत्तिनामतः ॥ १४३६ ॥
॥ युग्मम् ॥
जिनानां नव पद्मानि प्रतिपद्मं निरन्तरैः ।
उपवासैस्तु सो ऽष्टाभिश्चक्रे पद्मोत्तरं तपः ॥ १४३७ ॥
पञ्चसप्तत्युपवासैः पञ्चत्रिंशति पारणैः ।

भद्रनाम तपश्चक्रे सच्चक्रे रतचेतसा ॥ १४३८ ॥
षण्णवत्या शतेनोपवासैः सद्धर्मवासनः ।
स महाभद्रमेकोनपञ्चाशत्पारणैर्व्यधात् ॥ १४३९ ॥
उपवासैरसौ पञ्चसप्तत्या च शतेन च ।
पारणैः पञ्चविंशत्याभजद्भद्रोत्तरं तपः ॥ १४४० ॥
द्विनवत्यधिकेनोपवासानां त्रिशतेन सः ।
सर्वतोभद्रमेकोनपञ्चाशत्पारणैर्व्यधात् ॥ १४४१ ॥
षष्ठेनादौ ततः षष्ट्या ह्युपवासैरनारतम् ।
एकान्तरैर्मुनिर्धर्मचक्रवालं तपोऽतनोत् ॥ १४४२ ॥
आचाम्लैरुपवासान्तैरेकाद्येकैकवर्धितैः ॥
शतसंख्यैः स आचाम्लवर्धमानं व्यधात्तपः ॥१४४३॥
तच्चतुर्दश वर्षाणि त्रिमासीं दिनविंशतिम् ।
तपः तन्वन्नसौ चक्रे कृशमङ्गं च कर्म च ॥ १४४४ ॥
एकदासौ नमस्कृत्य शुभकृत्यप्रकाशकम् ।
द्वादशभिक्षुप्रतिमावहने पृष्टवान्गुरुम् ॥ १४४५ ॥
दशपूर्वधरो धीरः सारसंहननः शमी ।
तत्सौ योग्य एवास्य दुःकरस्यापि कर्मणः ॥ १४४६ ॥
इति ध्यात्वा चिरं सिद्धसेनाचार्यस्तमादिशत् ।
वत्सायपुचितो ऽयंस्ते तद्विधेहि समीहितम् ॥ १४४७ ॥
तदा मुदा गुरूक्तत्वानुज्ञाप्य च गणं क्षणात् ।
गच्छान्निष्क्रम्य तेनाथ प्रारेभे प्रतिमादिमा ॥ १४४८ ॥
एकैकां भोजने पाने दत्तिं गृह्णात्यसौ मुनिः ।
यावन्मासं ततः पूर्णे मासे गच्छे ऽविशत्पुनः ॥ १४४९ ॥
एवं सप्तैर्मासस्य वृद्धिमेकैकशो ऽकरोत् ।

तावद्यावदियं सप्त मासैरजनि सप्तमी ॥ १४५० ॥
एकान्तरोपवासैश्च विहिताचाम्लपारणैः ।
पानाहारोज्झितैर्ग्रामाद्बहिरुत्तानशायिना ॥ १४५१ ॥
निःप्रकम्पेन सर्वोपसर्गवर्गसहिष्णुना ।
अष्टमी प्रतिमा सप्ताहोरात्रैर्विदधे ऽमुना ॥ १४५२ ॥
युग्मम् ॥
इत्थं निष्ठामरिष्टेन प्रतिमा सप्तभिर्दिनैः ।
उत्कटिकासनस्थेन तेन तेने नवम्यपि ॥ १४५३ ॥
एवं सप्तदिनैरेव दशमी प्रतिमामुना ।
चक्रे वीरासनस्थेन सद्ध्यानस्थिरचेतसा ॥ १४५४ ॥
कृत्वा षष्ठमहोरात्रं स्थित्वा वीरासने ध्रुवे ।
प्रतिमैकादशी चक्रे तेन लम्बितपाणिना ॥ १४५५ ॥
कृताष्टमः स संकोच्य पादौ लम्बकरः स्थिरः ।
चक्रे मुक्तिशिलादृष्टिर्द्वादशीमेकरात्रिकीम् ॥ १४५६ ॥
इत्थं यथोक्तविधिना तप्यमानो ऽद्भुतं तपः ।
विजहार महीपीठे सो ऽनल्पे कल्पकल्पनैः ॥ १४५७ ॥
अथैकदा पदाम्भोजद्वयं सूरेरयं मुनिः ।
प्रणम्य शिरसि न्यस्य पाणी वाणीमिमां जगौ ॥ १४५८ ॥
अनन्येदयसद्धर्मबोधदायक नायक ।
जिनकल्पकृते ऽनुज्ञां यच्छ योग्यो ऽस्मि यद्यहम् ॥ १४५९ ॥
श्रुतज्ञानाम्बुधिर्जीनन्नाराधकममुं गुरुः ।
आदिशज्जिनकल्पाय मुक्तिश्रीकल्पभूरुहे ॥ १४६० ॥
अथैष नवतत्त्वज्ञः सत्त्वभाजां शिरोमणिः ।
लब्धत्रिजगती राज्यीमवात्मानममन्यत ॥ १४६१ ॥

अथ निर्मलचारित्रो वस्त्रपात्रादिकं मुदा ।
गुरोः पुरो ऽखिलं मुक्त्वा परिपृच्छ्य परिच्छदम् ॥१४६२॥
निःससार महासारः सैष सूरेः समीपतः ।
हन्तुं कर्मततीः कुम्भिपङ्क्तीरिव हरिर्गिरेः ॥ १४६३ ॥
॥ युग्मम् ॥
चरन्मार्गे ऽपवर्गस्य बलाद्विषयतस्करे ।
तपोधनो ऽयमस्ते ऽर्के न पदात्पदमप्यदात् ॥ १४६४ ॥
कृतार्द्रवैरः क्रूरेण सह मोहमहीभुजा ।
तस्थौ नैकत्र कुत्रापि सो ऽयमुद्यच्छवौ रवौ ॥ १४६५ ॥
स जाग्रत्कर्मसंग्रामव्यग्रीभूतमना इव ।
उद्बभ्रे पदयोर्भग्नान्नोत्कटानपि कण्टकान् ॥ १४६६ ॥
उदासीन इव स्थाने कृतरागापराधयोः ।
चकर्ष चक्षुषोरेष न तृणं न रजःकणम् ॥ १४६७ ॥
आसन्नविलसन्मुक्तिवधूलीनमना इव ।
चरन्मार्गे न तत्याज तीव्रकर्करमप्यसौ ॥ १४६८ ॥
स्वदेहे ऽपि निरीहो ऽयमिति शुद्धमतिर्यतिः ।
पुरः स्फुरति सिंहे ऽपि सहजां नात्यजद्गतिम् ॥१४६९॥
कदाचित्क्वचिदौचित्यचतुरैर्ढौकितं नरैः ॥
स धीरस्तुषसौवीरतक्राद्यं त्याज्यमग्रहीत् ॥ १४७० ॥
एवमप्रतिबद्धेन स्वविहारक्रमेण सः ।
प्रतिकर्मविमुक्ताङ्गो निन्ये धात्रीं पवित्रताम् ॥१४७१॥
एवं विहरतस्तस्य गते काले कियत्यपि ।
अभूल्लाभान्तरायस्योदयः कश्चन कर्मणः ॥ १४७२ ॥
क्वचिन्न लभते भिक्षामकल्प्यां क्वापि नेच्छति ।

कल्प्यमानामपि कापि नादत्ते ऽन्यैरपेक्षिताम् ॥ १४७३ ॥
इत्थं यथा यथा क्लिष्टो हृष्टः सो ऽभूत्तथा तथा ।
क्षयो हि कर्मणां मङ्क्षु मुनीनामुत्सवो महान् ॥ १४७४ ॥
अस्योद्यतविहारस्य निराहारस्य सर्वथा ।
सत्तामात्रशरीरस्य षण्मासा व्यतिचक्रमुः ॥ १४७५ ॥
कदापि कापि कान्तारे दिनान्ते शान्तचेतनः ।
तस्थौ धर्मद्विषालानस्तम्भायिततनुर्मुनिः ॥ १४७६ ॥
संसारतापनिर्वापसज्जपीयूषमज्जनम् ।
अथ प्रापदयं कायोत्सर्गध्यानलयं मुनिः ॥ १४७७ ॥
ततो नखंपचीभूतभूतलक्षोदमण्डलः ।
तं को ऽप्यतापयत्तापो निशीथसमये महान् ॥१४७८॥
किमेतदित्ययं यावद्विभावयति फुल्लदृक् ।
ललाटंतपतेजस्कं तपनं तावदैक्षत ॥ १४७९ ॥
पुरस्तुङ्गतरुस्तोमच्छायालीनामलोकत ।
भुञ्जानजनसंतानामसौ शकटमण्डलीम् ॥ १४८० ॥
विहातुमुद्धतं दग्धमन्नं तन्मध्यगो नरः ।
तदैवात्युत्सुको निर्यन्नरेणान्येन भाषितः ॥ १४८१ ॥
अस्मिन्महामुनौ मुक्तविकल्पे जिनकल्पिनि ।
कल्प्यमन्नमिदं देहि भिक्षाकालो हि संप्रति ॥ १४८२ ॥
दग्धेनान्नेन दत्तेन क्षीणासि सुकृतं न किम् ।
कृष्णाङ्गारेण किं लभ्यमानो नादीयते मणिः ॥ १४८३ ॥
इत्यस्य वाक्यमाकर्ण्य प्रहृष्यन्पुलकाञ्चितः ।
इदं प्रभो गृहाणेति सो ऽन्नहस्तो ऽभ्यधान्मुनिम् ॥१४८४॥
अथ साधुः सुधीर्दध्यौ किमियं मे प्रमत्तता ।

न ज्ञाता यामिनी यान्ती न व्योमान्तर्व्रजन्रविः ॥ १४८५ ॥
स्वप्नो ऽयमिन्द्रजालं वा किं वा को ऽपि मतिभ्रमः ।
चक्रे देवेन केनापि माया मायाविनाथवा ॥ १४८६ ॥
किमनल्पैर्विकल्पैर्वा ममैभिर्निर्ममात्मनः ।
संदेहे सति देहार्थं न गृह्णे ऽन्नमिदं ध्रुवम् ॥ १४८७ ॥
इति निश्चित्य शुद्धात्मा स पटुः प्राह तौ प्रति ।
शमामृतसमुद्रोर्मिच्छटाभिर्वर्णराजिभिः ॥ १४८८ ॥
मया ध्यानं निशारम्भे समारेभे ऽधुनैव च ।
अधुनैव च तिग्मांशुश्चरत्यम्बरशेखरः ॥ १४८९ ॥
तत्सत्यो ऽयमसत्यो वाभ्युदयः कर्मसाक्षिणः ।
इति संदेहदोलार्तमना नैवान्नमाददे ॥ १४९० ॥
युग्मम् ॥

गिरेरधिकमाहारं पयोधेरधिकं पयः ।
जीवोऽ ग्रहीदहोरात्रमज्ञातेषु भवेष्वपि ॥ १४९१ ॥
तत्तैर्यदि न तृप्तोऽ स्मि तदन्नेनामुनाद्य किम् ।
यास्यामि तृप्तिमात्तेन दिवसस्यापि संशये ॥ १४९२ ॥
इत्युदीर्य तपोवीर्यवर्यो धैर्यधुरन्धरः ।
स यावल्लीयते ध्याने शुद्धश्रद्धानमानसः ॥ १४९३ ॥
न तावदनसां राजी न च राजीवबान्धवः ।
किंतु व्यलोकि मुनिना यथावस्था निशीथिनी ॥१४९४॥
युग्मम् ॥

नदैव दैवते मार्गे दूरं दुन्दुभयो ऽनदन् ।
शुद्धगन्धोदकैर्मिश्राः प्रससृपुः पुष्पवृष्टयः ॥ १४९५ ॥
लीलाचलज्झलत्कारतारमाणिक्यकुण्डलः ।

आस्येन्दुस्यन्दिपीयूषबिन्दुसुन्दरहारभृत् ॥ १४९६ ॥
मौलिन्यस्तकरद्वन्द्वद्विगुणीकृतसौष्ठवः ।
एनमेनस्छिदं कश्चिदमरो मुनिमानमत् ॥ १४९७ ॥
युग्मम् ॥
प्रभो जय जय प्रौढज्ञानशुद्ध तपोनिधे ।
यस्त्वं मयापि दुष्टेन सत्त्वं न त्याजितः क्वचित् ॥१४९८॥
सुधर्मायां सुधर्मात्मा निविष्टो हृष्टमानसः ।
कदाप्यकस्मात्पुलकी न्यधान्मूर्ध्नि हरिः करौ ॥ १४९९ ॥
तव कौतस्कुतः स्वामिन्नद्य हर्षो ऽयमीदृशः ।
इति पृष्टो ऽम्बराख्येन सुरेण द्युपतिर्जगौ ॥ १५०० ॥
किं को ऽप्यस्ति तपःपात्रं धरित्रीपीठपावनः ।
इत्यद्य भरतक्षेत्रे हृन्नेत्रेण गतं मया ॥ १५०१ ॥
मुनीन्दुः संवरो नाम तत्र भूखण्डभूषणम् ।
अदर्शि तपसां राशिस्तिग्मांशुरिव तेजसाम् ॥ १५०२ ॥
तस्य विश्वैकवन्द्यस्य दार्ढ्ये तपसि दुष्करे ।
पश्यतो मे मुदावेशः सर्वक्लेशहरो ऽभवत् ॥ १५०३ ॥
केनापि चाल्यते नायं सत्त्वात्तत्त्वविदां वरः ।
इत्युत्कर्षेण हर्षस्य मयास्य प्रणतिः कृता ॥ १५०४ ॥
सो ऽथ क्रुधाभ्यधादिन्द्रमिन्द्रसामानिकः सुरः ।
मर्त्यो न चाल्यते सत्त्वादेषा भाषा मृषा तव ॥१५०५॥
स्वेच्छया स्वाम्यतः स्वामी वदन्केनेह वार्यते ।
तं षण्मासान्तरे सत्त्वभ्रष्टं स्पष्टं करोम्यहम् ॥ १५०६ ॥
असाविति मतिज्ञाय सत्त्वभङ्गाय ते ऽचलत् ।
मुहुर्मुहुर्महेन्द्रेण वार्यमाणो ऽपि मूढधीः ॥ १५०७ ॥

स्वपुण्यनिवहस्येव स भिक्षाग्रहणेषु ते ।
प्रत्यूहव्यूहमत्युग्रं धिक् षण्मासावधिं व्यधात् ॥ १५०८ ॥
निशि पापेन तेनेह तेने मायामयो रविः ।
सभोज्यजनसंघट्टा शकटानां घटा पुनः ॥ १५०९ ॥
महाकपटनाट्येन नानेनाप्यसि चालितः ।
यद्वा संसारनाट्येनाचालितः केन चाल्यते ॥ १५१० ॥
तन्मुने पापिना येन विरुद्धमिति ते कृतम् ।
स एवास्मि प्रभो विश्वमपराधं क्षमस्व मे ॥ १५११ ॥
इत्युक्त्वा दुःखहर्षाश्रुमिश्रदृष्टिरयं सुरः ।
बहुस्तुतिमहानादः पादयोरपतन्मुनेः ॥ १५१२ ॥
अथात्तधर्मलाभोक्तिर्यतिर्नतिपरं सुरम् ।
तमुवाच विचाराब्धिचञ्चच्चन्द्रिकया गिरा ॥ १५१३ ॥
नापराधं त्वया किं तु कृतिन्नुपकृतिः कृता ।
तव साहाय्यमाहात्म्याद्यद्दुःकर्म क्षितं मया ॥ १५१४ ॥
अपराधस्त्वया हन्त क्षन्तव्यः किं तु मामकः ।
यत्तवैवं बभूवाहं दुःकर्मार्जनकारणम् ॥ १५१५ ॥
एवं निश्छद्मनोर्धर्मसंलापं तन्वतोस्तयोः ।
उदयाचलचूलायां चण्डरोचिररोचत ॥ १५१६ ॥
एनं मुनिं विनम्याथ विबुधोऽयं तिरोदधे ।
ईर्यासमितिसंचारचारुर्मुनिरथाचलत् ॥ १५१७ ॥
स्वापराधानुतापेन तं मुनीन्द्रमनिन्द्रधीः ।
असेवत धृतान्तर्धिः स्वधामा शुद्धभावनः ॥ १५१८ ॥
स मुनिर्भुवि शुद्धायां यत्र यत्र ददौ पदम् ।
तां तां स चक्रे प्रागेव देवोऽकण्टककर्कराम् ॥ १५१९ ॥

अमायिनः समायान्तं मुनिमुरुयस्य संमुखम् ।
हिंस्रं प्राणभृतां वारं स दूरेण न्यवारयत् ॥ १५२० ॥
घर्मे समीरणीभूय छत्रीभूयोष्णदीधितौ ।
शिशिरीभूय तत्तोर्व्यां सांनिध्यं स व्यधान्मुनेः ॥१५२१॥
एवं स विरहन्नाप ग्रामं रामपुराभिधम् ।
यावत्तावदलंचक्रे नभोगर्भं नभोमणिः ॥ १५२२ ॥
कुटुम्बिनो धनाख्यस्य धन्या नाम कुटुम्बिनी ।
त्याज्येनान्नेन दग्धेन तं मुनिं प्रत्यलाभयत् ॥ १५२३ ॥
अहो दानमहो दानमिति जल्पन्नसौ तदा ।
चकार सुमनोवृष्टीरम्बरादम्बरः सुरः ॥ १४२४ ॥
एवं पदे पदे तन्यमानधर्मप्रभावनः ।
तपो ऽब्धारया कर्म प्रहरन्व्यहरन्मुनिः ॥ १५२५ ॥
अथायमायुषः शेषे विहितानशनः कृती ।
सशुचा तेन देवेन सेव्यमानपदाम्बुजः ॥ १५२६ ॥
स्मृत्वा पञ्चनमस्कारान्पादपोपगमस्थितिः ।
शुद्धध्यानरसोल्लासलयसंलीनमानसः ॥ १५२७ ॥
आसन्नमुक्तिसौख्यौघनिष्यन्दैरिव पूरितम् ।
सर्वार्थसिद्धनामानं विमानं मुनिरासदत् ॥ १५२८ ॥

॥ त्रिभिर्विशेषकम् ॥

तथ्यां तदित्थमाकर्ण्य संवरस्य मुनेः कथाम् ।
कर्ममर्मभिदे ऽमुष्मै यतध्वं तपसे जनाः ॥ १५२९ ॥

॥ तपश्चरणे संवरमुनीश्वरकथा ॥

प्रभावनाद्यलंकाराकृष्टविष्टपचेतसः ।
दानशीलतपो ऽङ्गस्य जीवो धर्मस्य भावना ॥ १५३० ॥
अज्ञानध्वान्तसंधाने ध्याने सिद्धिपुराध्वनि ।
अध्वगस्यात्मनो भाति भावना रत्नदीपिका ॥१५३१॥
सद्दानशीलतपसां भवयुद्धाय धावताम् ।
अग्रेसरी भवत्येका भावनैव महाभटी ॥ १५३२ ॥
सतां दमक्षमामुख्यधर्ममुक्तावली हृदि ।
अन्तर्भावनया धत्ते कान्तिं नायककान्तया ॥ १५३३ ॥
दानशीलतपोभाजामप्याश्चर्यकरं फलम् ।
दत्ते चन्द्रोदरस्येव विधर्मस्यापि भावना ॥ १५३४ ॥
तथाहि संपदुद्वाहिकरैः स्फीता वरैर्नरैः ॥
चतुर्धर्मचतुर्वेदिरस्ति हस्तिपुरी पुरी ॥ १५३५ ॥
तत्रामित्रकलत्राश्रुधारातप्तयशोलतः ॥
श्रीरामो नाम सद्वृत्तकृतार्थः पार्थिवो ऽभवत् ॥१५३६॥
सतीशतशिरोरत्नं स्त्रीरत्नं तस्य वल्लभा ।
धाम्ना कलितनाकश्रीजयाजानि जयावली ॥ १५३७ ॥
जितस्वर्णं तनूवर्णं निन्दितेन्द्रपदं पदम् ।
सकलं सफलं मेने तयैव प्रियया नृपः ॥ १५३८ ॥
प्रियेण प्रीतिभिर्लाल्यमाना लोकेषु विश्रुतम् ।
देहार्धदाननिर्भोगं शिवयोः प्रेम साहसत् ॥ १५३९ ॥
अद्वितीयेन तौ प्रेमगुणेन विनियन्त्रितौ ।
मिथो विघटितुं दूरे नैव शेकतुरेवतः ॥ १५४० ॥

सा भूभुजि समाभाजि भ्राजिताल्पपरिच्छदा ।
कदाचिन्नन्तुमुद्यानसदनं मदनं ययौ ॥ १५४१ ॥
पूजया श्रीतनूजस्य धन्यंमन्या व्यलोकत ।
सा रामरमणी काममारामरमणीयताम् ॥ १५४२ ॥
दर्शयन्ती वयस्याभ्यो वयस्याभिश्च दर्शितम् ।
सा हृद्यं हृद्यमासाद्य मुमुदे कुमुदेक्षणा ॥ १५४३ ॥
पश्यन्ती प्रीतिमोहेन मुहुर्ललितया दृशा ।
हेलया खेलयन्ती स्वान्पृष्ठतः पार्श्वयोः शिशून् ॥ १५४४ ॥
धरणीं चरणाग्रेण विलिख्योल्लासितैर्मुहुः ।
आनन्दकुष्कुनादेन भोजयन्ती च तान्कणैः ॥ १५४५ ॥
संचरन्ती वने ऽदर्शि कापि भूकान्तकान्तया ।
पुत्रिणीष्वात्तचूडेव ताम्रचूडस्य वर्णिनी ॥ १५४६ ॥
त्रिभिर्विशेषकम् ॥
तां विलोक्य वने लीलाशालिनीं सुतमालिनीम् ।
अदृष्टनन्दनास्येन्दुर्दध्यौ सेन्दुमुखी शुचा ॥ १५४७ ॥
धिग्जन्म जीवितं भोगान्सुप्रियमापणं च मे ।
न यन्नयनसत्तायाः फलमालोकये सुतम् ॥ १५४८ ॥
किं धनैः सैव धन्या स्त्री डिम्भस्यात्मभुवो मुखम् ।
या चुम्बति चिरं धूलिधूम्रमङ्गणरङ्गणैः ॥ १५४९ ॥
अपि रङ्कप्रियामङ्कशयानतनयां स्तुवे ।
हारभारभृदुत्सङ्गां न पुनर्भूभृदङ्गनाम् ॥ १५५० ॥
उत्पतान्निपतन्निङ्खन्हसँल्लीलावलोर्वमन् ।
कस्याश्चिदेव धन्यायाः क्रोडमायाति नन्दनः ॥ १५५१ ॥
स्फारभूषणभारापि न भाति स्त्री सुतं विना ।

उदारतरतारापि निशेव शशिवर्जिता ॥ १५५२ ॥
तद्धातस्तात किं भूरिभूषापाषाणवाहिकाम् ।
मां व्यधाः सुतरत्नेन नैकेनापि व्यभूषयः ॥ १५५३ ॥
तिर्यग्नार्यो ऽपि पर्यन्तलीलालोलसुता वरम् ।
उत्सङ्गसंगतसुता वरं ग्रावस्त्रियो ऽपि ताः ॥ १५५४ ॥
धिग्ममोत्सङ्गमक्षीणि पाणी कण्ठं च यैर्मुदा ।
नाध्यासितो न दृष्टो नाश्लिष्टो नालम्बितः सुतः ॥ १५५५ ॥
किं करोमि क्व गच्छामि निर्भाग्याहं हहा मम ।
सर्वेषामपि सौख्यानां स्थाने नैको ऽप्यभूत्सुतः ॥ १५५६ ॥
इति दुःखौघसंघट्टस्फुटद्वक्षःस्थलेव सा ।
तले रसालसालस्य भुवि न्यविशतालसा ॥ १५५७ ॥
शोषयन्तीव निःश्वासैर्वासो बाष्पपरिप्लुतम् ।
स्थगयन्तीव निःश्वासोद्धूतं बाष्पैर्महीरजः ॥ १५५८ ॥
करयुग्मेन जानुस्थकूर्परेण धृतं शिरः ।
हृत्पद्मदुःखशल्येयं घूर्णन्तीव व्यकम्पयत् ॥ १५५९ ॥
युग्मम् ॥
दुःखं प्रष्टुमशक्ताभिर्बद्धपालिभिरालिभिः ।
साश्रुदृग्भिः सनिःश्वासमुखीभिर्वीक्षितैव सा ॥ १५६० ॥
तदा विसृज्य भूजानिर्विरहव्यथितः सभाम् ।
ययावन्तःपुरं कान्तापरिरम्भोत्सवोत्सुकः ॥ १५६१ ॥
जयावलीमनालोक्य तत्र तस्थौ न पार्थिवः ।
निशावियुक्तो राकेन्दुः कियद्वियति दीव्यति ॥ १५६२ ॥
एत्य लीलावनोत्सङ्गमुत्सुको निःपरिच्छदः ।
पुरः स्थितो ऽपि भूपालो नालोकि कान्तया तया ॥ १५६३ ॥

तादृग्रूपां निरूप्यालं भूपालोऽप्यश्रुतव्यथः ।
उपसृत्य शनैरेनामूचे दुःखार्द्रया गिरा ॥ १५६४ ॥
किं देवि हृदि ते दुःखमिति वाक्श्रवणादियम् ।
सुप्तोत्थितेव वीक्ष्याग्रे भूपं संभ्रमभागभूत् ॥ १५६५ ॥
आगते जीवितेशे ऽपि नोचितं रचितं मया ।
इति दुःखे ऽतिदुःखं सा दग्धे पिटकवद्दधौ ॥ १५६६ ॥
अथ चाटुचमत्कारचाटूक्तिः पृथिवीपतिः ।
ऊचे तां जनचेतांसि कर्णातिथ्ये नयन्नयम् ॥ १५६७ ॥
मदागमनसंरम्भमम्भोरुहमुखि त्यज ।
भज वाचं दिवाचन्द्रसख्यं त्वन्मुखमाप किम् ॥ १५६८ ॥
नापराद्धं मया किंचित्को ऽन्यस्त्वय्यपराध्यति ।
जानामि चरचारेण कुशलं त्वत्पितुः कुले ॥ १५६९ ॥
कौतस्कुतेन तद्भग्ना विलासतरवस्तव ।
साञ्जनाश्रुमदौघेन मार्यता दुःखदन्तिना ॥ १५७० ॥
इत्थं यथा यथापृच्छत्पृथ्वीनाथस्तथा तथा ।
उद्भाष्पबिन्दुरेवाभूदियं नोवाच किंचन ॥ १५७१ ॥
सा भूस्तदा तदालिभिः पञ्चालीभिरिवाभितः ।
धारालैर्दृग्जलैर्दुःखकेलिधारागृहं कृता ॥ १५७२ ॥
मुञ्चद्बाष्पाणि पाणिभ्यां प्रमृज्य नयनद्वयम् ।
अत्याग्रही महीकान्तस्तामपृच्छन्मुहुर्मुहुः ॥ १५७३ ॥
अथो कथंचिदालम्ब्य सा धैर्यमिदमभ्यधात् ।
हा निःपुत्राहमित्युक्तमात्रे तारं रुरोद सा ॥ १५७४ ॥
इत्युक्तिश्रवणादेव नृदेवस्यापि चक्षुषी ।
पूरयामासतुः प्रावृण्मासाविव जलैरिलाम् ॥ १५७५ ॥

चिरादथ धरानाथो धैर्यं संधाय कष्टतः ।
दुःखमग्नां प्रियामाह गलितार्गलताश्रुदृक् ॥ १५७६ ॥
आहिताग्निरहं देवि नित्यं दुःखाग्निनामुना ।
त्वया सद्धर्मचारिण्या सयुक्तं प्रकटीकृतः ॥ १५७७ ॥
तद्भाग्यं कास्ति ये येन त्वयि पुत्रं लभे शुभे ।
को जीवः पुण्यवांस्तादृगस्ति यस्ते सुतीभवेत् ॥ १५७८ ॥
तत्खेदमरविन्दाक्षि मन्दीकुरु करिष्यते ।
सत्किंचन तपो येन भविष्यति सुतस्तव ॥ १५७९ ॥
तद्वाक्यस्यानुसारेण भविष्यति सुतस्तव ।
इत्याददे गिरं कीरो ऽप्याम्रद्रुमशिरश्चरः ॥ १५८० ॥
मुदानुमोदमानौ तौ तद्वचःसदुपश्रुतिम् ।
दम्पती यावदुत्पश्यौ जातौ तावदपश्यताम् ॥ १५८१ ॥
पूरिते जलभृज्जालैर्जम्बालैरिव वर्त्मनि ।
भीतमप्कायसंघट्टाच्चरन्तं गगनाङ्गणे ॥ १५८२ ॥
स्वच्छन्दं गच्छतामिच्छाविच्छेदो भूदमीषु मा ।
इति दूरात्पुरो मार्गं मुञ्चन्तं दिवि पत्रिणाम् ॥१५८३ ॥
विकाशयन्तं लोकानां लोचनानि सरोजवत् ।
रविगर्भादिवोत्कीर्णं कीर्णं कान्तिकदम्बकैः ॥ १५८४ ॥
खेलतीनां चिरं पञ्चमहाव्रतमयश्रियाम् ।
विलाससद्मपद्मायमानक्रमकराननम् ॥ १५८५ ॥
रङ्गदङ्गनखज्योतिर्लीलया लज्जितैरिव ।
अचित्तैरपि तैः स्वर्णरत्नभारैरभूषितम् ॥ १५८६ ॥
सहामुनैव यास्यामि मोक्षे ऽपीति मनोरथात् ।
लाघवार्थमिव क्षामीभवताङ्गेन भासुरम् ॥ १५८७ ॥

क्रियमाणतपस्तारं मूर्तीभूतैश्च सेवितम् ।
कृतैः करिष्यमाणैश्च तपोभिरिव साधुभिः ॥१५८८॥
विनयंधरनामानं विद्याधरमुनीश्वरम् ।
उत्तरन्तं पुरोभागे स्वस्य भाग्यमिवाद्भुतम् ॥१५८९॥
नवभिः कुलकम् ॥
पदं ददौ च स क्ष्मायां ननाम च जनाधिपः ।
तं त्रिः प्रदक्षिणीकृत्य सानन्दः सपरिच्छदः ॥१५९०॥
अथाधाय करौ मूर्ध्नि पृथिवीपालपुङ्गवः ।
मुनिं व्यजिज्ञपद्दत्ताशिषं कृत्ताशुभद्विषम् ॥ १५९१ ॥
प्रभो नभोङ्गणस्यास्य किमभाग्यं विजृम्भितम् ।
किं भाग्यं मद्भुवो वा यत्तन्मुक्त्वा त्वमिमां श्रितः॥१५९२॥
अद्य नाथ कृतार्थोऽहमद्य मे सफलं जनुः ।
अद्य मे जीवित श्लाघ्यमद्य राज्यं च मे ऽनघम् ॥१५९३॥
तव स्तवामृते वाचि दर्शने श्वाससौरभे ।
पदस्पर्शे मिथोहत्या ममाक्षैः क्रियते कलिः ॥ १५९४॥
तद्ध्वानिनीं सितां शीतां सुरभिं मधुरां गिरम् ।
यच्छ देशमसादेन पश्चाक्षप्रीतये प्रभो ॥१५९५॥ युग्मम् ॥
अथ तीर्थेशसिद्धान्तकल्पद्रुकुसुमैर्मुनिः ।
वचोभिः शोभयामास वसुधावासवश्रवः ॥ १५९६ ॥
चिरादघौघसंघट्टविपाटनपटीयसीम् ।
नभःपथेन मे तीर्थयात्रामुर्वीश कुर्वतः ॥ १५९७ ॥
इदमद्यैव देवाधिदेवमन्दिरमण्डलैः ।
भद्रश्रमद्विपालानस्तम्भैरिव विभूषितम् ॥ १५९८ ॥
जिनेशधूपधूमोर्मिनाशितैर्मेशकैरिव ।

त्वच्चरित्रकुशैः पापव्रजैरव्यथितप्रजम् ॥ १५९९ ॥
पौषधग्राहिणां भित्तिलम्बितै रत्नभूषणैः ।
अपि पौषधशालासु निशि ध्वस्ततमस्तति ॥ १६०० ॥
बभूव भुवनोद्दामरोचिर्लोचनगोचरम् ।
व्यक्तमुक्तावलीपुष्पप्रकरं नगरं तव ॥ १६०१ ॥
पञ्चभिः कुलकम् ॥
तदेतदवनीनेतर्दूरतः पश्यतो मम ।
प्रीतिप्रतिष्ठचित्तस्य चिन्ताभूदिति चेतसि ॥ १६०२ ॥
दूरतो दुरितं जेता नेतास्य नगरस्य यः ।
आरामिकेण नारामो रामः स्याद्यमात्मना ॥ १६०३ ॥
तत्तमत्र महात्मानं पश्यामीत्याशया मया ।
निक्षिप्तचक्षुषादर्शि भवानीदृक्षदुःखभूः ॥ १६०४ ॥
तत्तज्ज्ञातुमिहायातो महीधव जयादहम् ।
को न स्याद्धर्मधीराणां सतां दुःखेन दुःखितः ॥ १६०५ ॥
तज्जल्प भुवनाकल्प दुखं किं धर्मिणोऽपि ते ।
स्यादिन्दुधामधौतस्य काप्यर्तिः कुमुदस्य किम् ॥ १६०६ ॥
अथाभ्यधत्त भूभर्ता प्रभो दुःखतमो मम ।
सुतेन नयनाम्भोजसहस्रच्छविना विना ॥ १६०७ ॥
इदनीं तत्परित्रस्तं तदभ्युदयसूचकः ।
यदेष वीक्षितो युष्मच्चरणावरुणोदयः ॥ १६०८ ॥
अथ पृथ्वीपतेः स्पष्टमिष्टार्थफलवल्लिकाम् ।
गिरमुल्लासयामास स मुनिः स्मितपुष्पिताम् ॥ १६०९ ॥
भविष्यति शुभं भूप सर्वमेव तव ध्रुवम् ।
यदस्मिन्पथि पान्थानां फलमिष्टं पदे पदे ॥ १६१० ॥

इहार्थे शृणु दृष्टान्तमस्ति विस्तीर्णवैभवम् ।
भूर्भुवःस्वस्त्रयीख्यातं दूरपाराभिधं पुरम् ॥ १६११ ॥
यस्य भूमिगृहाण्याहुरधोलोकं विचक्षणाः ।
उच्चैःशिरोगृहाण्यूर्ध्वलोकमालोकशालिनः ॥ १६१२ ॥
महारम्भवशीभूतसुरासुरनरोरगः ।
उग्रशासन इत्येतत्पुरं पाति जनाधिपः ॥ १६१३ ॥
दत्तमुच्चैःपदं येन तुष्टेनेव सुपर्वणाम् ।
अर्पितं कुपितेनेव द्विजिह्वानामधःपदम् ॥ १६१४ ॥
बभूव सचिवः शुद्धबुद्धिरित्यस्य विश्रुतः ।
अशेषतत्पुरोदारसर्वव्यापारपारगः ॥ १६१५ ॥
प्रभोरादेशतो नित्यं पुरे ऽस्मिंश्चरतश्चिरात् ।
पुरुषाश्रय इत्यस्य मिलितः सुहृदन्यदा ॥ १६१६ ॥
स को ऽपि परमस्थेमा प्रेमास्मिन्नस्य विद्यते ।
बभूव भोजने येन भाजनस्यापि नान्तरम् ॥ १६१७ ॥
प्रीतिं बभार तेनैव स्नातेनालंकृतेन सः ।
न कदापि स्वयं स्नातो नालंकारं चकार वा ॥ १६१८ ॥
स्वयं कुसुमकर्पूरकस्तूरीचन्दनादिभिः ।
अमुं स वासयामास न चक्रे वासमात्मनः ॥ १६१९ ॥
दुःखितो दुःखितस्यास्य स्पृहां पूरयितुं सदा ।
सो ऽभ्रमद्भुवने बाढं मूढः स्वार्थनिरुद्यमः ॥ १६२० ॥
वयस्यो ऽपि समं शेते समं जागर्ति तेन सः ।
समं याति समं तिष्ठत्याधिक्यं प्रेम्णि दर्शयन् ॥ १६२१ ॥
इति तस्य महोद्दामप्रेममसरपेशलम् ।
नित्यासक्ततया नित्यमित्रमित्यमुमभ्यधुः ॥ १६२२ ॥

किं चैष पितृपूज्यो ऽयमिति दाक्षिण्यतः श्रुतिम् ।
दत्ते विश्वहिताख्यस्य पुंसो वाचि कदाचन ॥ १६२३ ॥
अयमुल्लासमत्तो मां मन्यते ऽथ न मन्यते ।
इति द्विधामना विश्वहितः प्राह कदापि तम् ॥ १६२४ ॥
उदारस्फाररूपश्रीर्महाकुलसमुद्भवः ।
सुहृत्तवैष नो कस्य प्रयाति स्पृहणीयताम् ॥ १६२५ ॥
किं तु त्वमनुरक्तो ऽसि यथास्मिन्न तथा त्वयि ।
अयमन्तःकुशुद्धत्वाद्वारयत्यनुरागिताम् ॥ १३२६ ॥
यतः स्नानेन भोज्येनालंक्रियेत यदैव न ।
कदाप्यसत्कृत इव स्याद्विरूपस्तदैव सः ॥ १६२७ ॥
तद्यावदैवतो न स्याद्वैचित्यममुना सह ।
दुःखे ऽप्याश्वासकस्तावत्कर्तुं को ऽप्युचितः सुहृत् ॥१६२८॥
यदा विघटसे दैवात्सहानेन तदा तव ।
नान्यो भावी सुहृल्लोकैर्दूरस्थैस्तु हसिष्यसे ॥ १६२९ ॥
एकं नेत्रमनेत्रेषु सूनुमेकमसूनुषु ।
एकं मित्रममित्रेषु जगुर्मित्राणि तत्कुरु ॥ १६३० ॥
इति विश्वहितोक्त्यासौ किंचिदञ्चितचेतनः ।
चक्रे मित्रं कृतज्ञाख्यमपरं शिथिलादरः ॥ १६३१ ॥
तमन्नवस्त्रालंकारगन्धताम्बूलमण्डलैः ।
सो ऽप्रीणयत्कृतज्ञाख्यं मित्रं पर्वणि पर्वणि ॥ १६३२ ॥
पूज्यमानं समालोक्य तेन सर्वेषु पर्वसु ।
समाचचक्षिरे पर्ववयस्य इति तं जनाः ॥ १६३३ ॥
ईदृग्विधसुहृद्द्वन्द्वनिविडद्वन्द्वपातिनम् ।
स विश्वमहितो विश्वहितो ऽमुं पुनरभ्यधात् ॥ १६३४ ॥

त्वद्दुःखे दुःखितो भावी सैष पर्वसुहृत्क्षणम् ।
भव्यो ऽयमपि किं त्वीदृग्मित्रार्थं न दिशाम्यहम् ॥१६३५॥
यः स्यादल्पेन संतुष्टो नत्या वा स्तवनेन वा ।
दुःखेभ्यः क्षम उद्धर्तुं स को ऽपि क्रियतां सुहृत् ॥१६३६॥
विहस्य शिरसि न्यस्य शुद्धबुद्धिः करौ ततः ।
केदृग्मया सुहृल्लभ्यो ऽपृच्छद्विश्वहितादिति ॥ १६३७ ॥
अथैष श्रवणानन्दप्रवणामन्दवाग्भरः ।
शुद्धबुद्धेः पुरो विश्वहितं विश्वहितो जगौ ॥ १६३८ ॥
विभावरीविभुविभासंनिभामलकुन्तलम् ।
रङ्गद्भङ्गातरङ्गायमानश्रीवरचीवरम् ॥ १६३९ ॥
मुक्ताचन्दनकर्पूरपूरगौरतरद्युतिम् ।
तारकोटीरताडङ्कहारकेयूरकङ्कणम् ॥ १६४० ॥
आनाभिकूर्चमुत्तुङ्गविस्तीर्णाङ्गं सदा स्मितम् ।
दृशा प्रसन्नया पुंसः पश्यन्तं नमतो ऽग्रतः ॥ १६४१ ॥
मध्येपुरं परिभ्राम्यञ्शुद्धबुद्धे कदाचन ।
पुमांसं मांसलश्रीकमीदृशं क्वापि पश्यसि ॥ १६४२ ॥
चतुर्भिः कलापकम् ॥
अथ सो ऽभिदधे तात कदापि जिनसद्मनि ।
कदापि मुनिशालायां कदापि सदने सताम् ॥ १६४३ ॥
कदापि राजमार्गान्तः संचरन्तं नरोत्तमम् ।
संचरन्पथि पश्यामि सेव्यमानं वरैर्नरैः ॥१६४४॥युग्मम्॥
इत्याकर्ण्य जगौ विश्वहितस्तत्तं सुहृत्कुरु ।
अङ्ग तत्संगमाधाने दुखं न स्यात्कुतो ऽपि ते ॥ १६४५ ॥
स हि सिद्धः पुमाल्लोकनाथाख्यः सर्वगो महान् ।

आश्रितं पाति भूपाग्निकूपसर्पाद्यपायतः ॥ १६४६ ॥
इत्यस्य शिक्षया सख्यं तेन साकं चिकीर्षति ।
प्रमादाद्विस्मरत्येव शुद्धबुद्धिर्दिने दिने ॥ १६४७ ॥
अभियोगे ततो विश्वहितेन विहिते मुहुः ।
तं ननामैकदा लोकनाथं यानस्थ एव सः ॥ १६४८ ॥
कदापि कार्यतो गच्छन्दूरे दृष्टस्य वर्त्मनि ।
तस्य प्रणामसंदेशं प्रेषयामास पार्श्वगैः ॥ १६४९ ॥
फलपुष्पादिकं चारु केनचिद्ढौकनीकृतम् ।
यस्य कस्यापि हस्तेन तस्मै प्रैषीत्कदापि सः ॥१६५०॥
दूरस्थो पि स्वयं गत्वा युग्यादुत्तीर्य नम्यते ।
स महात्मा स्वयं चास्मै ढौक्यं पुष्पफलादिकम् ॥१६५१॥
इत्थमाराध्यमानो ऽयमतिदाक्षिण्यपूरितः ।
दक्ष रक्षिष्यति स्पष्टं भवत्कष्टं कुतो ऽपि ते ॥ १६५२ ॥
एवं पुनरसौ विश्वहितेनाभिहतो मुदा ।
यानादुत्तीर्य तं पुष्पफलैरर्चति वन्दते ॥ १६५३ ॥
त्रिभिर्विशेषकम् ॥
अयमालोकितं मार्गे नियमेन नमत्यमुम् ।
इति प्रणामसुहृदं जगदुस्तस्य तं जनाः ॥ १६५४ ॥
इति मित्रत्रयीमेनामेष संतोषयन्सदा ।
उग्रशासनभूपस्य शासने सुचिरं स्थितः ॥ १६५५ ॥
एकदा नित्यमित्रेण सहैकशयने स्थितः ।
सुखं स एष सुष्वाव भूरिभोगविभूषणः ॥ १६५६ ॥
यावन्निद्रां मुमोचायं तावत्पार्श्वेष्वलोकत ।
श्यामाञ्शोणदृशः क्रूरान्नरानुद्गर्वमुद्गरान् ॥ १६५७ ॥

क्रुद्धस्य भर्तुरादेशकृतो यूयं किमागताः ।
मयि केनापराधेन कारितं प्रभुणास्ति किम् ॥ १६५८ ॥
एवमेतेन ते पृष्टाः प्राहुर्भर्तैव दोषवित् ।
त्वं तु स्वाम्यादतः कृत्वा क्षेपितो ऽस्यद्य कूपके ॥१६५९ ॥
युग्मम् ॥

इति तद्वाक्यमाकर्ण्य सो ऽयं भयभराकुलः ।
नित्यमित्रं प्रति प्रोचे गिरा मन्दत्वगुप्तया ॥ १६६० ॥
सखे सखे समुत्तिष्ठ कथंचिदपि रक्ष मम् ।
उग्रशासनधात्रीशः क्रुद्धवानधुना मयि ॥ १६६१ ॥
कति संपदि मित्राणि न स्युर्लुब्धानि देहिनाम् ।
दृश्यते ऽपि विपत्तौ यः क्षितिस्तेनैव रत्नभूः ॥ १६६२ ॥
पितृमातृप्रियाभ्रातृपुत्रादिभ्यो ऽपि वत्सलः ।
सुहृन्ममासि सन्मित्रं दुःखोद्धाराय धार्यते ॥ १६६३ ॥
तदिदानीं ममानेन क्लिश्यमानस्य भूभुजा ।
अपारदुःखकूपारतारणाय तरीभव ॥ १६६४ ॥
अथो म्लाननानो नित्यसुहृदित्याह किं नु भोः ।
नृपं दिशसि मे क्रुद्धं संबन्धः क इवावयोः ॥१६६५ ॥
किं नोपलक्षते ऽसौ मामिति भ्रान्त्येव शुद्धधीः ।
कस्ते चित्तभ्रमः किं मां न जानासीति तं जगौ ॥१६६६॥
अथायमूचे ज्ञातो ऽसि राजद्विष्टं किमप्यधाः ।
तत्त्वां न्यग्राहयन्न्यायाभिग्रहो ऽप्युग्रशासनः ॥१६६७ ॥
तन्मे राजविरुद्धेन न कार्यं किमपि त्वया ।
स्वकृतस्य प्रमाणेन सहस्वैको ऽपि निग्रहम् ॥ १६६८ ॥
ऊचे सो ऽथ सखे नित्यमकृत्यं त्वत्कृते कृतम् ।

सर्वं ह्युपकृतं तुभ्यमुक्तान्युपकृतानि हा ॥ १६६९ ॥
अथातिविधुरो नित्यसुहृदभ्यधित क्रुधा ।
किमुद्घुष्यसि निर्लज्ज मत्कृते किं कृतं त्वया ॥१६७०॥
यथा यथाहं त्वदत्तमाहरामि तथा तथा ।
प्रीतिस्ते ऽभूत्ततः स्वस्मै त्वया सर्वं कृतं न मे ॥१६७१॥
मिथ्यावादिन्न मे कार्यं राजद्विष्टकृता त्वया ।
तन्मे पार्श्वं विमुञ्चेति धिक्स तेन गले धृतः ॥१६७२॥
इहान्तरे गृहान्तर्द्राक्पार्वणः सुहृदाययौ ।
उग्रशासनसंरुद्धं शुद्धबुद्धिं निशम्य सः ॥१६७३॥
नित्यमित्रे विमुक्ताशो दीनं चक्षुर्जलाविलम् ।
किंकर्तव्यत्वमूढो ऽसौ पर्वमित्रं प्रति न्यधात् ॥१६७४॥
जातं मित्र किमेतत्ते कथंचिच्छुठ संप्रति ।
दत्त्वा मदीयं सर्वस्वं दुःखे ऽस्मिन्मां नियुज्य वा ॥१६७५॥
एवं गलज्जलभरं कलयन्नयनद्वयम् ।
पर्वमित्रस्य गां श्रुत्वा दध्यौ शुद्धमतिस्तदा ॥ १६७६ ॥
पोषितः प्रोषितस्वेन धिग्मया पुरुषाश्रयः ।
हहा कृतं कृतज्ञस्य न कदाचन किंचन ॥ १६७७ ॥
इत्ययं चिन्तयन्नेव नित्यमित्रेण शुद्धधीः ।
गले बाढतरं धृत्वा द्रुतं दूरीकृतः स्वतः ॥ १६७८ ॥
मैनं नयध्वं स्थाने ऽस्य मां नयध्वं रयादिति ।
पर्वमित्रे कृताक्रन्दे सो ऽग्राहि नृपकिंकरैः ॥ १६७९ ॥
तैस्तस्मिन्बलतः कृष्टे कष्टं पर्वसुहृद्यभूत् ।
चिरात्पुत्रीं विवाह्येवाशेत नित्यसुहृत्पुनः ॥ १६८० ॥
द्वादशार्कप्रभाचक्रकर्कशेन कृशानुना ।

दीप्तक्रोडस्य कूपस्य पार्श्वे ऽसौ तैरनीयत ॥ १६८१ ॥
हहामुष्मिन्नहं क्षेप्यो ऽमीभिः क्रूरतराशयैः ।
तत्कथं नु भविष्यामीत्युत्कम्पो ऽयमचिन्तयत् ॥१६८२॥
मयि विश्वहितेनोक्तं यदा दुःखे पतिष्यसि ।
त्वां सिद्धः सर्वगो लोकनाथः पास्यत्यसौ तदा ॥१६८३॥
स मे संप्रति कालो ऽयं करालो ऽतिभयंकरः ।
तदसौ भवतु श्रीमाञ्शरणं करुणार्णवः ॥ १६८४ ॥
इत्यस्मिन्ध्यायति स्फायमानमङ्गुलतेजसः ।
हीरचीरपरीधानदृढबन्धकृशोदराः ॥ १६८५ ॥
शुभ्रवज्रशिलागर्भमयदण्डोग्रपाणयः ।
अत्युदारहृदस्तारदृष्टयः स्फारमूर्तयः ॥ १६८६ ॥
मुक्तादामदृढग्रन्थिग्रहावलितवेणयः ।
उत्तरस्या दिशः केचिदीयुः सारत्वरा नराः ॥ १६८७ ॥
॥ त्रिभिर्विशेषकम् ॥
अमुं मुञ्चत रे योद्धुं मत्ता धत्तायुधानि वा ।
इति तेषां गिरा भूपकिंकरैः समरे स्थितम् ॥ १६८८ ॥
ततस्तेषां च तेषां च दूरोद्धूतरजस्तमाः ।
प्रकम्पितजगच्चित्तः समरः समभून्महान् ॥ १६८९ ॥
तैर्महापुरुषै राजपुरुषाः परुषायुधाः ।
उच्चैःस्थितस्य लोकस्य पश्यतो जघ्निरेतराम् ॥ १६९० ॥
त्रासिताः पातिताः क्षुण्णा हारिता मारिताश्च ते ।
तैः सिद्धपुरुषैः पश्चाच्चक्रे विजयनर्तनम् ॥ १६९१ ॥
त्वत्प्रणाममुहल्लोकनाथस्त्वामाह्वयेदिति ।
तं शुद्धबुद्धिं कूपान्तात्करेणादाय ते ऽचलन् ॥ १६९२ ॥

स तैः समं व्रजन्नग्रे शिखरोल्लिखिताम्बरम् ।
अतुल्योल्लासिकल्याणमयसर्वाङ्गसुन्दरम् ॥ १६९३ ॥
अवचूलमिलन्मुक्तावलीवलयमङ्गुलम् ।
स्वविस्तारगुणैर्भूरिपूरिताशासमुच्चयम् ॥ १६९४ ॥
अङ्गीकृतमहारङ्गतुरङ्गरथकुञ्जरम् ।
आलक्ष्यं प्रीतिमानेकं स्वविवेकं व्यलोक्यत् ॥ १६९५ ॥
त्रिभिर्विशेषकम् ॥
अथ कचित्कुरङ्गाक्षीशृङ्गारैर्नयनोत्सवे ।
कचिद्गीतसुधासिन्धुतारणोत्तरलश्रुतौ ॥ १६९६ ॥
कचिद्बृहद्वृहारामसौरभ्योल्लासिनासिके ।
कचित्स्वाद्यशताल्लोकप्रचलद्रसनाञ्चले ॥ १६९७ ॥
कचिद्विलासरसरसीमरुत्पुलकिताङ्गके ।
तस्मिन्समये निश्छद्मप्रमोदः प्रविवेश सः ॥ १६९८ ॥
त्रिभिर्विशेषकम् ॥
अथारात्रिकसंकाशभ्रमन्मार्तण्डमण्डलम् ।
दूर्वाराजितरौप्यार्घपात्राभमृगलाञ्छनम् ॥ १६९९ ॥
मङ्गलाक्षतसंभारनिभव्याकीर्णतारकम् ।
प्रणम्यमानं हृष्यद्भिः सुरासुरनराधिपैः ॥ १७०० ॥
स्तूयमानं स्वधीशक्त्या सर्वदर्शनसूरिभिः ।
प्रसादविशदां दृष्टिं ददतं सेवकान्प्रति ॥ १७०१ ॥
युते चतुर्भिश्चरणैर्भाग्येनापि सुदुर्लभैः ।
निविष्टं विष्टरे लोकस्पृहणीये महीयसि ॥ १७०२ ॥
तस्य विश्वहितस्याङ्के कृतावष्टम्भसुस्थिरम् ।
प्रणामभिन्नं दीप्ताङ्गं लोकनाथमलोकयत् ॥ १७०३ ॥
पञ्चभिः कुलकम् ॥

तद्वीक्ष्य विस्मितो ऽथायमध्यायद्विग्ममौचितीम् ॥
सर्वस्वं नित्यमित्राय दत्तं नो सत्कृतो ऽप्ययम् ॥१७०४॥
अभविष्यद्गतिः का मे कामेन चरतः क्षितौ ।
नतिमप्यकरिष्यं चेन्नास्य विश्वहितोक्तिभिः ॥१७०५॥
इति चिन्तार्तचित्तो ऽयं लोकनाथं ननाम च ।
तेनालिङ्ग्य धृतश्राङ्के सप्रमोदवशंवदः ॥ १७०६ ॥
किं मित्र विधुरो ऽसीति पृष्टस्तेन महात्मना ।
शुद्धधीरभ्यधादात्मन्युग्रशासनतो भयम् ॥ १७०७ ॥
अथामुं स महात्माह किं भयं ते श्रितस्य माम् ।
क उग्रशासनस्तस्य दुःखं मूर्ध्नि मुखे रजः ॥ १७०८ ॥
न सचक्रे मया किंचिदयमित्यपि मा शुचः ।
सत्कृतिभ्यः समस्ताभ्यो महती सत्कृतिर्नतिः ॥१७०९॥
सेवकानां ददल्लक्ष्मीं शौर्यादेः स्यान्नृपो ऽनृणः ।
ननु तेषां प्रणामस्य कथमप्यनृणो भवेत् ॥ १७१० ॥
ततः कृतप्रणामस्य न भवामि तवानृणः ।
पदं त्रैलोक्यसाम्राज्यादप्युत्तरमनर्पयन् ॥ १७११ ॥
कृतिर्किंचिदणस्यास्य ददे यावत्कलान्तरम् ।
तावत्तिष्ठैव मत्पार्श्वे मा कुतो ऽपि भयं कृथाः ॥१७१२॥
इत्युक्त्वा स गृहस्याग्रभूमौ तेनाधिरोपितः ।
तस्थौ सुखस्पृहातुल्यकालपूर्णमनोरथः ॥ १७१३ ॥
कैरप्यथ दिनैरेनं लोकनाथो ऽभ्यधादिति ।
ज्ञातो ऽसीह चिरात्तिष्ठन्नुग्रशासनकिंकरैः ॥ १७१४ ॥
वञ्चयित्वैव ये सन्मार्गदृष्टिं दुष्टकचेष्टिताः ।

कदाचिच्छलयित्वामी त्वां ग्रहीष्यन्ति शत्रवः ॥ १७१५॥
तन्मुञ्च मित्र कुत्रापि भवन्तं यत्र तत्र ते ।
संमुखालोकने ऽपि स्युर्न समर्थाः कथंचन ॥ १७१६ ॥
किं तु कष्टतरः पन्थाः सुदूरं तत्र गच्छताम् ।
क्षुत्तृष्णादिमहादुःखं सहमानैर्विलङ्घ्यते ॥ १७१७ ॥
तद्विधेहि दृढं क्लेशसहने गहने मनः ।
मामन्वेहि कृतिन्देहि कण्ठपीठे पदं द्विषाम् ॥ १७१८ ॥
मनोहारिभिराहार्यैर्लोभयित्वा पदे पदे ।
पथि त्वामाह्वयिष्यन्ति स्नेहमारभ्य वैरिणः ॥ १७१९ ॥
अङ्गेन वाचा चित्तेन संभावयसि तान्यदि ।
तच्छलाद्गृह्यमाणं तैस्त्वां रक्षिष्याम्यहं न हि ॥ १७२० ॥
इत्यमुं शिक्षयित्वैष लोकेशः प्रस्थितः पथि ।
तद्भद्रनिश्चयः शुद्धबुद्धिरन्वचलन्मुदा ॥ १७२१ ॥
तृषितो यत्र यत्रैष विषमे ऽजनि वर्त्मनि ।
तत्र तत्र पयः शीतं पिबागच्छेति भाषिणीः ॥ १७२२ ॥
स्फारहाराद्यलंकाराः शृङ्गारस्येव देवताः ।
आलोकत पयःशालापालिका वरबालिकाः ॥ १७२३ ॥
॥ युग्मम् ॥
पान्थसंघातपादाग्रपातरुग्णे रजोजुषि ।
तृणे च तत्र स्रैणे च सदृशस्तदृशो ऽपतन् ॥ १७२४ ॥
क्षुत्क्षामकुक्षिर्यत्राभूत्तत्रालोकत सो ऽग्रतः ।
सज्जाः षड्रसानिर्मज्जद्भोजना भाजनावलीः ॥ १७२५ ॥
अध्वन्यमण्डलीखेदप्रस्वेदजलपिच्छले ।
रजोभारे ऽप्यसौ तत्र हारे ऽपि समदर्श्यभूत् ॥ १७२६ ॥

रविच्छविप्रतापेन जातो यत्रायमाकुलः ।
तत्र च्छायातरून्पुष्पगायद्भृङ्गानवैक्षत ॥ १७२७ ॥
दावाग्नौ च ज्वलज्ज्वाले विशाले च द्रुमोच्चये ।
तस्मिन्विस्मेरयामास दृशं समरसामसौ ॥ १७२८ ॥
आकरयत्सु तद्रक्षामनुष्येषु मृदूक्तिभिः ।
नासौ प्रपञ्चयामास हेलयापि विलोचनम् ॥ १७२९ ॥
इति शुद्धमतिः सिद्धप्रतिज्ञः सत्वरं व्रजन् ।
अनन्यसदृशाकारं केवलैः स्फटिकैः कृतम् ॥ १७३० ॥
अदृष्टपूर्वं निर्भाग्यैः सभाग्यैश्च महद्गृहम् ।
पुरो निरूपयामास लोकनाथेन दर्शितम् ॥ १७३१ ॥
युग्मम् ॥
तदालोकनसंजातपरमानन्दमग्नहृत् ।
स तृणं गणयामास चक्रिशक्रादिसंपदः ॥ १७३२ ॥
प्रविशाशु महासौधं तदेतत्ते ऽकुतोभयम् ।
तमित्युक्त्वाचलल्लोकनाथो लोकेष्टसिद्धये ॥ १७३३ ॥
इति सर्वेष्टदं सर्वकष्टपिष्टकरं प्रभुम् ।
त्वमप्येनं महीनाथ लोकनाथं सुहृत्कुरु ॥ १७३४ ॥
मुञ्च दुःखं न दुःखेन भवन्तीष्टानि कुत्रचित् ।
आराधुहि रयाल्लोकनाथमिष्टार्थसिद्धये ॥ १७३५ ॥
अथापृच्छत्प्रियः पृथ्व्या लोकनाथः स कः प्रभो ।
कथं चाराध्यते ऽसौ तमाराधोमि प्रियासखः ॥ १७३६ ॥
इत्थमुक्ते नृपेणायं मुनिराचष्ट खेचरः ।
अन्तरङ्गधिया राजन्विचारय कथामिमाम् ॥ १७३७ ॥
संसार एव दुःपारो दूरपाराभिधं पुरम् ।

उग्रः कर्मपरीणामो राजास्मिन्नुग्रशासनः ॥ १७३८ ॥
शुद्धात्मा जीव एवैतन्मन्त्री शुद्धमतिर्मतः ।
नित्यमित्रं पुनस्तस्य यथोदितगुणं वपुः ॥ १७३९ ॥
जनो जनितसौजन्यस्तस्य पर्वमुहन्मतः ।
गुरूपदेश एवास्य पूज्यो विश्वहिताभिधः ॥ १७४० ॥
तच्छिक्षयामुना राजन् यः प्रणाममुहत्कृतः ।
तं विद्धि लोकनाथाख्यं धर्ममेवाद्भुतं प्रभुम् ॥ १७४१ ॥
दृष्टाः सुप्तोत्थितेनाग्रे तेन ये निष्ठुरा नराः ।
ते दुःकर्मगणा व्याधिमृत्युदुर्गतिहेतवः ॥ १७४२ ॥
तै रुद्धो निःक्रियं वीक्ष्य जीवः शुद्धमतिर्वपुः ।
तस्मिन्नुपकृतं मेने भस्मनि क्षिप्तवत्तदा ॥ १७४३ ॥
कदाचित्किंचिदप्येष यददौ स्वजने जने ।
तदा धावति दुःखार्ते तदमन्यत साध्विव ॥ १७४४ ॥
कृष्टो ऽङ्गेन गले धृत्वा क्रन्दति स्वजने शुचा ।
नीतो यत्रैष कूपो ऽसौ नरको दुःखसाग्निकः ॥ १७४५ ॥
शरणं लोकनाथो ऽस्तु ममेति गदिते ऽमुना ।
ईयुर्ये पुरुषाः कर्मगणास्ते धर्मसाक्षिकाः ॥ १७४६ ॥
जितदुःकर्मभिर्निन्ये यत्र सत्कर्मभिस्त्वसौ ।
लीलावासः स धर्मस्य विवेकाख्यो ऽतिनिर्मलः ॥१७४७॥
दानशीलतपोभावसत्पादोपशमासनम् ।
गुरूपदेशावष्टम्भं तत्रासौ धर्ममैक्षत ॥ १७४८ ॥
श्रीधर्मेण स्वसौधाग्रभूमौ कालं कमप्ययम् ।
देवेषु सम्यग्दृष्टित्वपदे सौख्येन लालितः ॥ १७४९ ॥
ततः शिक्षास्थिरं मार्गे विषयैरप्रलोभितम् ।

धर्मस्तं मन्दिरे मुक्तौ मुक्तवानकुतोभये ॥ १७५० ॥
येन प्रणाममात्रेण प्रसन्नेनेति निर्मितम् ।
स धर्मो विधिनाराद्धो राजन्किं किं न यच्छति॥१७५१॥
अथाभ्यधाद्धरित्रीन्द्रस्तत्क्रियोन्निद्रमानसः ।
धर्मस्याराधने देवीसखं शिक्षयताशु माम् ॥ १७५२ ॥
शमामृतसमुद्रोर्मिशीकरप्रकरैस्ततः ।
अक्षरैः शिक्षयामास साधुर्धर्मविधौ नृपम् ॥ १७५३ ॥
धर्मस्य तस्यार्हत्सिद्धाचार्योपाध्यायसाधवः ।
यथा पञ्चेन्द्रियाणीव तुष्यन्ति नृप तत्कुरु ॥ १७५४ ॥
सुखसाध्यमसंभाव्यप्रत्यूहकणमप्यहो ।
पृथिवीप्रिय तत्प्रीतेरुपायं विपुलं शृणु ॥ १७५५ ॥
जयत्यम्भःशिखिविषस्तम्भनः प्रियलम्भनः ।
महामन्त्रो नमस्कारः पञ्चानां परमेष्ठिनाम् ॥ १७५६ ॥
मर्त्यामर्त्यासुरश्रेणीकर्षणेऽस्य किमद्भुतम् ।
यत्करोति नमस्कारः संमुखीं मुक्तिमप्यसौ ॥ १७५७ ॥
राजन्सैष शुचीभूय त्रिकालं जप्यते यदि ।
तदयं प्रीयते धर्मः प्रसन्नसकलेन्द्रियः ॥ १७५८ ॥
इत्युदीर्य मुनीन्द्रोऽयं सरहस्यं रहस्यदात् ।
राज्ञे पञ्चनमस्कारमन्त्रं पावित्र्यशालिने ॥ १७५९ ॥
मन्त्रमाप्य धरित्रीन्दुः प्रीतश्च प्रियया सह ।
गतश्च गगनं देहद्युतिद्योतितदिग्मुनिः ॥ १७६० ॥
मुनीन्द्रदर्शनानन्दरसास्वादविचेतनः ।
चिरं स्थित्वैव तत्रैव भवनं भूविभुर्ययौ ॥ १७६१ ॥
अथो यथाविधि धराधिपतिः प्रतिवासरम् ।

चक्रे पञ्चनमस्कारमन्त्रध्यानं वधूसखः ॥ १७६२ ॥
यथाकालपतन्नीरो नीरोगो निरुपद्रवः ।
सरसान्नसमुद्देशो देशो ऽमुष्य तदाभवत् ॥ १७६३ ॥
दुग्धैः क्षरद्भिर्धेनूनां धारालैरूधसः पथि ।
यशोभिरिव भूपस्य तदा तस्य व्यभूषि भूः ॥ १७६४ ॥
आविर्बभूवुः सर्वेषु शैलेषु मणिखानयः ।
आसन्सर्वेष्वरण्येषु तदा तद्भुवि दन्तिनः ॥ १७६५ ॥
इत्थं महर्द्धिवर्धिष्णुनिःशेषविषयव्रजः ।
कदाचिदपि निद्रान्ते निशान्ते ऽचिन्तयन्नृपः ॥ १७६६ ॥
अहो महत्त्वं मन्त्रस्य यत्प्रसादवशादभूत् ।
राज्यं मम मनोहारि स्पृहणीयं हरेरपि ॥ १७६७ ॥
नयनानन्दसंदोहमन्दिरं नन्दनस्तु माम् ।
नाधुनापि धिनोतीन्दुरिव दुग्धपयोनिधिम् ॥ १७६८ ॥
इति ध्यानभृतं धात्रीभृतं सद्यो विनिद्रदृक् ।
राज्ञी विज्ञपयामास संमदोल्लाससंपदा ॥ १७६९ ॥
पीयमानसुधापूरं जनिताञ्जलिभिर्जनैः ।
वर्षन्कर्षन्करैर्बिम्बान्मलिनं लक्ष्म निर्मलैः ॥ १७७० ॥
योगीन्द्रैरपि साक्षेपं लक्ष्यमाणो ऽधुना मया ।
स्वप्ने ऽदर्शि प्रविश्येन्दुर्वदनेनोदरं स्थितः ॥ १७७१ ॥
॥ युग्मम् ॥
इत्याकर्ण्याद्भुतस्वप्नसोमां रोमाञ्चितः कथाम् ।
राजा वदनराजीवमरन्दमसृजद्गिरम् ॥ १७७२ ॥
अकलङ्ककलाशाली धर्मात्मा मधुराकृतिः ।
जगतामुपजीव्यस्ते भविता देवि नन्दनः ॥ १७७३ ॥

एवमस्त्विति बध्नत्यामेतस्यां ग्रंन्थिमंशुके ।
बहिर्बभूव कम्बूनां मातस्त्यो मङ्गलध्वनिः ॥ १७७४ ॥
अथोद्यत्प्रमदामोदः सत्रियो मेदिनीपतिः ।
क्षणं स्थितो नमस्कारमन्त्रध्यानस्थमानसः ॥ १७७५ ॥
एतौ विशेषतस्तत्र मन्त्रे प्रसृमरादरौ ।
शमयामासतुर्दुःखं गमयामासतुर्दिनान् ॥ १७७६ ॥
दिनेषु परिपूर्णेषु पूर्णेन्दुवदनस्ततः ।
सूनुर्जज्ञे जयावल्या शुभे ऽह्नि शुभलक्षणः ॥ १७७७ ॥
पुत्रजन्मोत्सवं यो यः कथयामास भूभुजे ।
स ददावुद्यदानन्दस्तस्य तस्याधिकाधिकम् ॥ १७७८ ॥
तत्कालं नृपतेर्मुक्तबन्धबन्धुरचेतसाम् ।
तत्र पुत्रे तदोत्पन्ने द्विषामप्युत्सवो ऽभवत् ॥ १७७९ ॥
अस्मिन्गर्भस्थिते चन्द्र उदरे दृष्टश ऽम्बया ।
इति स्वप्नाद्दौ भूपस्तस्य चन्द्रोदराभिधाम् ॥१७८०॥
समं राज्यश्रिया बालः सो ऽवर्धत दिने दिने ।
परा परिणतिः पञ्चपरमेष्ठिनमस्कृतेः ॥ १७८१ ॥
स पञ्चवर्षदेशीयः सहर्षमवनीभुजा ।
कलागुरुभ्यो निःशेषकलाशिक्षार्थमर्पितः ॥ १७८२ ॥
काममभ्यस्यतस्तस्य प्रज्ञातिशयमीक्षितुम् ।
कलाः कौतूहलेनेव तदुपान्तमुपागताः ॥ १७८३ ॥
बालो ऽयं लालयन्तीभिः प्रहृष्टाभिर्मुहुर्मुहुः ।
कलाभिः कुतुकात्काममङ्कादङ्कमनीयत ॥ १७८४ ॥
तथा कथंचिदक्षाभिः कलाभिर्लालितः शिशुः ।
यथा ताभिर्विना नायं क्वचित्क्षणमपि स्थितः ॥ १७८५ ॥

क्रमात्कलाकलापेषु निर्भराभ्यासभासुरः ।
जज्ञे बोधविशेषेण गुरूणामप्ययं गुरुः ॥ १७८६ ॥
खिन्नं लक्षणमार्गे ऽर्कतीव्रतर्कातुरं मुहुः ।
साहित्यामृतवापीषु पान्थवत्तन्मनो ऽविशत् ॥ १७८७ ॥
दानहृद्यं सुविद्यं च तं देशान्तरकोविदाः ।
जङ्गमं श्रीसरस्वत्योः संगमं तीर्थमागमन् ॥ १७८८ ॥
अभ्यासाद्भ्रमयन्नक्षीमङ्गस्य परितो ऽपि सः ।
लोहपञ्जरमध्यस्थ इवालोकि विलोककैः ॥ १७८९ ॥
अभ्यासकुतुकेनापि को ऽप्यस्य न पुरः स्थितः ।
स दक्षो लक्षमाधाय स्तम्भमेव व्यजृम्भत ॥ १७९० ॥
निर्विशेषपदन्यासः पुष्पाद्भिम्लपातिनः ।
त्वरावेशादविज्ञातपूर्वपश्चात्पदक्रमः ॥ १७९१ ॥
खेलन्खुरालिकाधान्नि वामदक्षिणमण्डलैः ।
स नाङ्गसादं न स्वेदं न च श्वासमदर्शयत् ॥ १७९२ ॥
नीरसं नखमश्वस्य शतं च महिषत्वचाम् ।
सगुडेभभिदाभ्यासे शरैर्योधो विवेध सः ॥ १७९३ ॥
शरैरलक्षितादानसंधानाकर्षमोक्षणैः ।
वेध्यानि विद्धवान्दूरचलसूक्ष्मदृढान्ययम् ॥ १७९४ ॥
सर्वेषु सैष चित्रेषु दुःकरेषु च दुर्धरः ।
अगीयत धराधीशैर्धनुर्धरधुरंधरः ॥ १७९५ ॥
मेचके ज्याकिणश्रेणी भुजयोस्तस्य रेजतुः ।
हृद्धद्धशौर्यदन्तीन्द्रमदलेखाद्वयोपमे ॥ १७९६ ॥
बभौ स भूपतेः सूनुः प्रचलेषु परिस्फुरन् ।
तुरङ्गेषु तरङ्गेषु प्रतिबिम्बं रवेरिव ॥ १७९७ ॥

इतस्ततस्तरलितैर्वालितैर्मधु चालितैः ।
द्विपैः सो ऽरमत स्वैरं समीर इव नीरदैः ॥ १७९८ ॥
ऊरुसंदंशकापीड्यमानग्रीवो यदृच्छया ।
अचाल्यत प्रमत्तो ऽपि नागो नाग इवामुना ॥ १७९९॥
इत्यशेषकलाश्लेषविशेषशुभगाकृतिः ।
पूर्णचन्द्रोपमां चन्द्रोदरः स्म भजते युवा ॥ १८०० ॥
सद्धर्मगतिसारस्य मतिसारस्य मन्त्रिणः ।
राज्ञा नीतिलयज्ञस्य शिक्षार्थमयमर्पितः ॥ १८०१ ॥
अतीव सान्द्रयन्कूर्चकुन्तलान्दन्तकान्तिभिः ।
मन्त्री पुरः कुमारस्य नर्तयामास भारतीम् ॥ १८०२ ॥
वत्स यच्छिक्षयामि त्वामर्कमुज्ज्वालयामि तत् ।
आज्ञा राज्ञो न लङ्घ्येति किंचिद्वच्मि तथाप्यहम्॥१८०३॥
सुस्थूलंकरणः काममिह लोकश्रियां नयः ।
परलोकश्रियां धर्म इव तीर्थेशदेशितः ॥ १८०४ ॥
पूर्यः सेवाकृतां राज्ञा धर्मेणेव मनोरथः ।
न देयः पातकेनेव प्रत्युत व्यसनोदयः ॥ १८०५ ॥
कल्पद्रुः प्रार्थितं वेगाद्धर्मस्त्वप्रार्थितं चिरात् ।
द्रुतं च प्रार्थितं चैको दत्ते सेवाभृतां नृपः ॥ १८०६ ॥
श्रीषु स्त्रीषु च नो रक्तिर्न विश्वासश्च रच्यते ।
जीवतां व्यसनायोच्चैर्मृतानां नरकाय या ॥ १८०७ ॥
कीर्तये धर्ममूलायै रक्षणीयः सदोद्यमः ।
स्थलमूर्ध्नि तृणालीव कीर्तिरन्याशु नश्यति ॥ १८०८ ॥
नृणां रूपं न रूपं स्यादानं रूपं जगन्मुदे ।
वर्षन्नब्दो वरं कृष्णो ऽप्यवर्षन्विशदो ऽपि न ॥१८०९ ॥

रक्षणीयः सदा दक्षैः पुरे ऽपि व्यसनी वसन् ।
पापानां व्यसनं मूलं पापं दुःखततेरिव ॥ १८१० ॥
धर्मस्याव्यसनं मूलं धर्मः सर्वसुखश्रियाम् ।
व्यसने सुखमिच्छन्ति मूढाः शैत्यमिवानले ॥ १८११ ॥
सर्वव्यसनमुक्तेषु युक्तेषु सुकृतोत्सवैः ।
पुरुषेषु त्वया तात रचनीया रतिस्ततः ॥ १८१२ ॥
इत्यसौ सचिवाचार्यवाचा प्रीतो नृपात्मजः ।
मेने सुधा सुमनसः सुधयाप्युन्मुदः सुरान् ॥ १८१३ ॥
कदाचन सभागर्भे भूपो भास्वरसेवकम् ।
अलंचकार सत्तारमिव ताराविभुर्नभः ॥ १८१४ ॥
नृपाननदिनाधीशस्मितस्य सचिवेशितुः ।
अङ्के पङ्केरुहस्येव हंसो भूपालभूरभूत् ॥ १८१५ ॥
वितन्वानं कलावद्भिः कलालापमिलापतिः ।
सुतं पश्यन्व्रतं स्वस्मै तस्मै राज्यर्द्धिमैहत ॥ १८१६ ॥
तद्विवाहं स्वदीक्षायामन्तरायं धरापतिः ।
अमन्यतावनम्रेण विज्ञप्तश्चाशु वेत्रिणा ॥ १८१७ ॥
स्वामिन्नामितसर्वारेः काम्पील्यनगरेशितुः ।
राज्ञः श्रीरत्नसेनस्य दूतो ऽस्ति द्वारि वारितः ॥ १८१८ ॥
चक्षुस्त्वन्मुखचन्द्रे ऽस्य प्रमोदयितुमिच्छतः ।
प्रभो पूरय संकल्पयवनीकल्पपादप ॥ १८१९ ॥
इत्याकर्ण्य नियुक्तो ऽयं राज्ञा भ्रूवल्लिसंज्ञया ।
तं द्रुतं वेत्रभृद्दूतं सभादेशमवेशयत् ॥ १८२० ॥
आविर्भूतमदो दूतस्तदोत्तंसस्फुरत्करः ।
नत्वा नृपमथादिष्टे निविष्टो विष्टरे पुरः ॥ १८२१ ॥

श्रीरत्नसेनः कुशली वयस्यः परमो मम ।
किमर्थं पार्थिवोत्तंसः स त्वां मयि नियुक्तवान् ॥१८२२॥
इत्थं पृथ्वीभुजङ्गेन स पृष्टो हृष्टचेतसा ।
स्वाभिभूतजीमूतो दूतो वचनमाददे ॥ १८२३ ॥ युग्मम् ॥
कस्तस्य कुशलप्रश्नो यस्ते हस्ते ऽर्पितोदयः ।
स्वामिन्संकुचति क्वापि किं रवेः केलिवारिजम् ॥ १८२४॥
न स्वस्य किंचिदप्यल्पं स भूधव भवद्वशः ।
विधोरन्तःपुरक्रीडाचकोर इव मन्यते ॥ १८२५ ॥
मर्त्यलोकार्य यत्कार्यमस्ति तस्यास्मदीशितुः ।
तत्समाकर्णय क्षोणिवर्णिनीकर्णकुण्डल ॥ १८२६ ॥
अस्ति श्रीरत्नसेनस्य कलत्रं रत्नमञ्जरी ।
या विराजति तत्पुण्यपादपस्येव मञ्जरी ॥ १८२७ ॥
कलावती तु तत्कुक्षिकमलैकमरालिका ।
अस्ति तस्य महीनेतुस्तनया नयनोत्सवः ॥ १८२८ ॥
अदृष्टपूर्वं शीलस्य रूपस्या संस्तुतेरपि ।
तत्तदस्यां तदालोकधृतोत्कण्ठमिवागतम् ॥ १८२९ ॥
तस्या धियं समालोक्य स्वतो ऽप्युपरिवर्तिनीम् ।
ह्रियेव हृदये लीना छन्नं तस्थौ कलावलिः ॥ १८३० ॥
राजत्यसौ जिनग्रन्थजिनाज्ञाजिनभक्तिभिः ।
व्याप्तकर्णशिरोहृद्भिर्गौणाखिलविभूषणा ॥ १८३१ ॥
दिद्युते नन्दनैर्नायं तथा भूपो यथा तया ।
नावश्यायैस्तथा भाति गिरीन्द्रो गङ्गया यथा ॥ १८३२ ॥
नरेन्दुना सभादानदेवावसरभूमिषु ।
सहैव संचरत्येषा नित्यं कान्तिरिवात्मजा ॥ १८३३ ॥

उत्सङ्गसङ्गिनीमेनां कदापि कलयन्नृपः ।
भूषितां भूरिभिर्भूपैः सभामुभवमभासयत् ॥ १८३४ ॥
अस्या रूपकलाशीलैः समः को ऽस्ति क्षितौ वरः ।
इत्यपृच्छन्नृपो दूतान्प्रभूतावनिचारिणः ॥ १८३५ ॥
यावद्वदन्त्यमी किंचित्तावन्नृपतिनन्दनी ।
नाहं विवाहं वाञ्छामीत्याह सा हर्षशालिनी ॥ १८३६ ॥
अथैनामभ्यधाद्भूमिविभुर्वैलक्ष्यलक्षणः ।
पाणिग्रहस्य विमुखी वत्से त्वच्छेमुषी कथम् ॥ १८३७ ॥
न रतिः स्फुरति स्वान्ते येन केन विना तव ।
स त्वया श्वशुरावासे कायच्छायवदेष्यति ॥ १८३८ ॥
चेन्म्लायसि वियोगे मे तडागस्येव पद्मिनी ।
आनेष्यामि तदत्रैव मरालमिव ते वरम् ॥ १८३९ ॥
काम्यं यत्किंचिदन्यद्वा दूरं तत्पूरयामि ते ।
वत्से विवाहमात्सर्यमुत्सार्य मदिच्छया ॥ १८४० ॥
इत्याग्रहमहीयस्या महीपस्यापि भाषया ।
सेयं विवाहवार्तामप्यमन्यत न कन्यका ॥ १८४१ ॥
ततः कन्येयमेकान्ते पृथिवीकान्तकान्तया ।
विवाहाय मुहुः प्रार्थ्यमानादत्त गिरं चिरात् ॥ १८४२ ॥
राधावेधं विधाता यो याता नार्यन्तरं न यः ।
मातर्मी तेन केनापि कृतिना परिणायय ॥ १८४३ ॥
इति तद्वचनं देवीमुखादाकर्ण्य पार्थिवः ।
राधावेधकृते वीरानाह्वातुं प्रैषयच्चरान् ॥ १८४४ ॥
अहं तु गन्तुमनसा सौहृदस्य परां धराम् ।
इहास्मि प्रहितो राज्ञा विज्ञापितमिदं वचः ॥ १८४५ ॥

यदेव कन्यया राधावेधे वरपणीकृते ।
चन्द्रोदरस्य योधत्वसिद्ध्यास्मि स्मितमानसः ॥१८४६॥
चन्द्रोदरं विना को ऽपि राधावेधाय न क्षमः ।
इत्यस्यैव यशो व्यङ्क्तुमाहूता दोर्भृतः परे ॥ १८४७ ॥
तदादिश विशामिन्द्र चन्द्रोदरमिहोद्यमे ।
अधिकं दधतां स्नेहग्रन्थिर्दार्ढ्यमिहावयोः ॥ १८४८ ॥
इति श्रीरत्नसेनस्य याचिकेनाश्चितस्मयः ।
हर्षोपचितरोमाञ्चकञ्चुकः क्षितिकामुकः ॥ १८४९ ॥
राधावेधोत्सुकं लज्जमानं पाणिग्रहोक्तिभिः ।
अस्मिन्महोत्सवे चन्द्रोदरं सादरमादिशत् ॥ १८५० ॥
युग्मम् ॥
प्रसाददानादानन्दस्यूते दूते गते च सः ।
चतुरङ्गचमूवारः कुमारः प्राचलन्मुदा ॥ १८५१ ॥
महत्त्वनिर्जितेनौच्चैरब्धिनेव करीकृतम् ।
व्यञ्जयन्त्या ध्वनिं विश्वे धृतः पृतनयाभितः ॥ १८५२॥
पश्यन्नलंकृतान् रत्नैर्निर्गलन्मदनिर्झरान् ।
जयश्रीजङ्गमक्रीडाभूधरान्गन्धसिन्धुरान् ॥ १८५३ ॥
त्वराभराभिरामाणि मुहुर्जनमनांस्यपि ।
आकर्षन्तीषु वेगेन दत्तदृग्वाजिराजिषु ॥ १८५४ ॥
गङ्गालहरिभिर्धुर्यहरिभ्यः शिक्षितुं त्वराम् ।
ध्वजव्याजादुपेताभिः कान्तानालोकयन् रथान् ॥१८५५॥
गणयद्भिस्तृणं प्राणांस्त्रिलोकीं च स्वधैर्यतः ।
अभिन्नात्मपरैर्वीरैर्वृतो यतिवरैरिव ॥ १८५६ ॥
द्रष्टुं श्वभ्रदिवोः कन्याः श्रुतताद्रूप्यतिंवराः ।

खनन्हरिखुरैः क्षोणीं कुर्वन्पद्यां रजोभरैः ॥ १८५७ ॥
ग्रामरामाभिराकृष्टहृष्टिभिः स्मितदृष्टिभिः ।
असंस्कृतमनोज्ञाभिरनाकूतं निरीक्षितः ॥ १८५८ ॥
दधिसारदधिक्षीरैः स्वैर्मनोभिरिवोज्ज्वलैः ।
प्रथितोपायनान्ग्रामवृद्धान्संमानयन्पथि ॥ १८५९ ॥
सिञ्चन्द्विरदवृन्दानां दानाम्भोभिर्वनद्रुमान् ।
दुस्तराः सुतराः कुर्वन्नुर्वीधूलीभरैर्धुनीः ॥ १८६० ॥
गिरिमध्याध्ववैषम्यं भिन्दन्स्यन्दननेमिभिः ।
क्षोभयन्नटवीसिंहान्सिंहनादैर्भुजाभृताम् ॥ १८६१ ॥
अज्ञातपथसंचारो विदग्धानां कथारसैः ।
क्रमात्कुमारः काम्पील्यपत्तनाभ्यासमासदत् ॥ १८६२ ॥
॥ एकादशभिः कुलकम् ॥
सन्मान्य रत्नसेनेन कुमारः स्थापितस्ततः ।
सुधाकरकरध्वंसोद्दामधामनि धामनि ॥ १८६३ ॥
धनुर्धरैकधौरेयमन्यैरन्यैरपि द्रुतम् ।
अपूरि पूरियं वीरै राधावेधाय धावितैः ॥ १८६४ ॥
ततो ऽलंकृतमालोलध्वजच्छायाहिरक्षितैः ।
कलशैर्मन्मथस्पष्टनिधानकलशैरिव ॥ १८६५ ॥
विलासमण्डपं भूमिमण्डलाखण्डलस्ततः ।
अकारयन्मणिश्रेणिश्रीहसन्मञ्चसंचयम् ॥ १८६६ ॥युग्मम्॥
तत्राहूय न्यवेश्यन्त भुजभाजो महीभुजा ।
बभौ तेषु त्विषा चन्द्रोदरश्चन्द्र इवोडुषु ॥ १८६७ ॥
कक्षसयोर्व्योम्नि यन्त्राग्रे षोडशद्वादशारयोः ।
सृष्टिसंहाररूपेण भ्राम्यतोरधऊर्ध्वयोः ॥ १८६८ ॥

चक्रयोरुपरि न्यस्य भ्रमन्तीं काष्ठकच्छपीम् ।
अधस्तत्तु भूतले पात्रं हैममच्छैर्भृतं घृतैः ॥ १८६९ ॥ युग्मम् ॥
ऊर्ध्वीकृत्य करं भूपः पश्यतां सर्वदोष्मताम् ।
सनीरनीरभृद्धीरगम्भीरध्वनिरभ्यधात् ॥ १८७० ॥
वेगाभोगभ्रमच्चक्रद्वयारान्तः खवर्त्मना ।
क्षिप्त्वेषुं दत्तदृग्लक्ष्ये घृतान्तःप्रतिबिम्बिते ॥ १८७१ ॥
प्रभ्रमत्कच्छपीवामविलोचनकनीनिकाम् ।
यो भेत्स्यति स एवास्मत्तनयां परिणेष्यति ॥ १८७२ ॥
॥ युग्मम् ॥
इत्याकर्ण्य गिरं को ऽपि क्ष्मापश्चापमुदञ्चयन् ।
राधायन्त्रतलं प्राप योधविद्यैकदुर्मदः ॥ १८७३ ॥
तन्मुक्तः खं ययौ बाणश्चक्रमुन्मुच्य वामतः ।
द्रुतभ्राम्यदरोद्धृादङ्गभङ्गभयादिव ॥ १८७४ ॥
वेध्याध्वानं मुहुः सैष रुण्द्धीतीव कोपतः ।
बाणः कस्यापि भूभर्तुररं चक्रस्य विद्धवान् ॥ १८७५ ॥
अस्माभिः सह वेगेन स्पर्धते ऽसाविति क्रुधा ।
अरैर्भ्रमद्भिश्चक्रस्य कस्यापीषुर्विखण्डितः ॥ १८७६ ॥
कच्छपीदृग्भिदे मुक्तश्चक्रारैः स्खलितः पतन् ।
कस्याप्यूर्ध्वमुखस्येषुर्दृशं तस्यैव विद्धवान् ॥ १८७७ ॥
कश्चिद्विगुप्यतो वीक्ष्य हस्यमानाञ्जनैर्नृपान् ।
प्राप्तो ऽहं द्रष्टुमेवेति मञ्चाग्रादपि नोत्थितः ॥ १८७८ ॥
स्त्रीकृते किं न लज्जे ऽहमभ्यस्तां दर्शयन्कलाम् ।
इत्युत्तरकरो राधां को ऽप्यवज्ञातवान्हसन् ॥ १८७९ ॥
उत्तरेष्वपि रुद्धेषु राधावेधनिषेधिभिः ।

ययावकथयन्नेव कश्चिदुत्थाय मञ्चतः ॥ १८८० ॥
इत्थं विसंस्थुले राजकुले काम्पील्यपार्थिवः ।
एत्य चन्द्रोदरस्याग्रे जाग्रदुद्गूर्जगीर्जगौ ॥ १८८१ ॥
उत्तिष्ठोत्तिष्ठ कोदण्डकलाधुर्य दधुर्यतः ।
वीरा मुखेष्वयोधत्वदुःकीर्तिमिव कालिकाम् ॥ १८८२ ॥
सन्ति वीरास्त्वमेवासि राधावेधविधौ बुधः ।
सन्ति तेजस्विनो भास्वानेव राविक्षये क्षमः ॥ १८८३ ॥
मानवेन न केनापि वेध्या राधेति निश्चयम् ।
मिथो लज्जापहं राज्ञां हर साम्यश्रिया सह ॥ १८८४ ॥
इत्यस्य वाग्भिरुत्थाय वहल्लीलायितं गतौ ।
जगाम रामसू राधां हसद्भिर्वीक्षितो नृपैः ॥ १८८५ ॥
षोडशे धन्वनि स्वैरमात्तवन्दितसज्जिते ।
संदधौ तत्र सूच्यग्रशिखं स विशिखं कृती ॥ १८८६ ॥
धृते प्रतिमितं लक्ष्यं भ्रमदालोकयन्नयम् ।
इदं मुहुरिहायातीत्यारचय्य स्थिरां दृशम् ॥ १८८७ ॥
दृग्लक्ष्यसंमुखीं धृत्वा विशिखस्य शिखामसौ ।
चिरमाकृष्टकोदण्डश्चित्रन्यस्त इव स्थितः ॥१८८८॥युग्मम्॥
तद्बाणाग्रे च लक्ष्ये च हृदयस्पर्धया रयात् ।
राज्ञां विधत्ते दृग्युग्ममेहि रे याहि रां मुहुः ॥ १८८९ ॥
न स मुञ्चञ्शरं प्रैक्षि न च खे संचरञ्शरः ।
वेध्यमेव तदा विद्धं विस्मितैर्वीक्षितं नृपैः ॥ १८९० ॥
नृपेष्वथ महाश्चर्यलीलाधामसु राममूः ।
अपायि श्रमभेदाय कैर्न श्लाघासुधारसम् ॥ १८९१ ॥
औचित्याधानसन्मानसहानीतान्यभूभुजा ।

पूःप्रवेशं नरेशेन कुमारः कारितस्ततः ॥ १८९२ ॥
राजलोके ततः पाणिग्रहमाङ्गलिकोत्सुके ।
आनन्दसुन्दरे ऽधत्त सा कन्या म्लानमाननम् ॥१८९३॥
तादृशोदयदानन्दमन्थमन्थरया गिरा ।
अथैनामभ्यधादुःखपञ्जरी रत्नमञ्जरी ॥ १८९४ ॥
वत्से कृत्स्नपरीवारमुखवारिरुहक्षपाम् ।
कालिकां कलयस्येवमद्यापि वदने कथम् ॥ १८९५ ॥
रूपे निरुपमः काम्यकलावलिविलासभूः ।
अपूरयत्तव श्रद्धां शुद्धान्वयनृपात्मजः ॥ १८९६ ॥
धीरोदात्ताकृतिर्लक्ष्यदाक्ष्यदाक्षिण्यभूषणः ।
नायं सपत्नीदुखं ते कदाचिद्दर्शयिष्यति ॥ १८९७ ॥
वत्से तन्मुञ्च वैमुख्यं स्मितं भातु भवन्मुखम् ।
क्षणे ऽत्र स्वजनानन्दक्षीरनीरनिधेर्विधुः ॥ १८९८ ॥
इत्याकर्ण्य गिरं मातुः सा तुषारकरानना ।
ऊचे भ्रूचेष्टितैरन्तः सूचयन्ती शुचं पराम् ॥ १८९९ ॥
मातः कातरता नास्ति सपत्नीभ्यः कदापि मे ।
मत्तश्चेत्कर्मबन्धं ताः कुर्युरीर्ष्यासु तद्भयम् ॥ १९०० ॥
यद्यथैता भविष्यन्ति तदतिप्रीतिरीतिभिः ।
चिन्तयिष्यामि ता भर्तुसुन्दरीः सोदरीरिव ॥ १९०१ ॥
तदेतच्चेतसि न मे मातर्मालिन्यकारणम् ।
धत्ते ऽब्जिन्यस्तामिस्रारिः किं संकोचनिमित्तताम्॥१९०२॥
किं तु प्रतिज्ञा मे ऽपूरि राधावेधेन नामुना ।
अन्यः स राधावेधो ऽस्ति येन मे हृन्महोत्सवः ॥१९०३॥
अरैः सत्कर्मदुःकर्मचक्रयोर्वेदनामयैः ।

भ्रमद्भिः सृष्टिसंहारक्रमेणान्तरितं द्रुतैः ॥ १९०४ ॥
भ्रान्तं संदेहयन्त्रेण विचारविशिखेन यः ।
सूक्ष्मं भिन्द्यात्परं तत्त्वं राधावेधी स मे प्रियः ॥ १९०५ ॥
॥ युग्मम् ॥

इत्यस्यां विकसद्वाचि श्लोको ऽयमुदभूद्भुवः ।
लीलावातायनतलात्सहसा राजमार्गतः ॥ १९०६ ॥
ईदृक्षराधावेधेन कलावत्या मनःप्रियः ।
एकश्चन्द्रोदरो विश्वमौलिवर्ती जयत्ययम् ॥ १९०७ ॥
इत्युपश्रुतिमेवानुमोदमाना प्रमोदिनी ।
ददौ जालान्तरे नेत्रं पुत्र्या सह नृपप्रिया ॥ १९०८ ॥
असौ पुरःपठद्बन्दिनिवहं वाहवाहनम् ।
पथि चन्द्रोदरं वीरं संचरन्तमलोकत ॥ १९०९ ॥
चन्द्रोदरस्य पुत्र्याश्च वीक्षमाणा मुखं मुहुः ।
अनुषङ्गाच्छिरःकम्पमन्वभूद्वनमञ्जरी ॥ १९१० ॥
कार्यं कृतीन्दुर्यातीति पृष्टा दिक्करिका तया ।
कापि गत्वाशु विज्ञाय समागत्य व्यजिज्ञपत् ॥ १९११ ॥
अद्यायं देवि मन्त्रीन्दुमतिसारगिराचलत् ।
पुरान्तस्तीर्थकृच्चैत्यपरिपाटीविधित्सया ॥ १९१२ ॥
वार्तया च तया चन्द्रोदरश्रीदर्शनेन च ।
प्रीता कलावती किंचिद्धेजे पाणिग्रहस्पृहाम् ॥ १९१३ ॥
अथाकारयदावार्धिमिलितस्वजनव्रजम् ।
चन्द्रोदरकलावत्योर्नृपः पाणिग्रहोत्सवम् ॥ १९१४ ॥
विदुषो ऽपि पठन्मूर्ख तिष्ठेत्याक्षिप्य संभ्रमात् ।
आचारं कारयन्तीषु गोत्रवृद्धासु हर्षतः ॥ १९१५ ॥

ताम्बूलपूरणस्थूलकपोलासु पुरन्ध्रिषु ।
लसत्कुङ्कुमकौसुम्भशोभासूद्यदुलूलुषु ॥ १९१६ ॥
पठत्यन्वयमुत्ताले वैतालिककुले ऽभितः ।
वाद्यमानेषु वाद्येषु सान्द्रमन्द्रतरस्वरम् ॥ १९१७ ॥
ह्रिया न्यग्मुखयोः स्वैः स्वैरुन्मुखीक्रियमाणयोः ।
वधूटीवरयोर्जायमाने तारेक्षणे मुहुः ॥ १९१८ ॥
आपूर्णगगनो मग्नमुन्नतश्रवणेन्द्रियः ।
उदभूत्तुमुलः को ऽपि दिग्भित्तिभ्रंशभूरिव ॥ १९१९ ॥
पञ्चभिः कुलकम् ॥
ततः किमिदमित्युच्चभ्रूलते ततचक्षुषि ।
उत्कन्धरे धराधीशचन्द्रे चन्द्रोदरे ऽपि च ॥ १९२० ॥
को ऽपि राजपुमानेत्य वैधुर्यग्लपितस्वरम् ।
ऊचे वाचा त्वराचारकण्ठशोषेण रूक्षया ॥ १९२१ ॥
समासो गगनस्येव व्यासो विन्ध्यगिरेरिव ।
स्वामिन्क्रूरत्वदीक्षादिगुरुः पितृपतेरिव ॥ १९२२ ॥
शुण्डावलितदन्ताग्रो गर्जितर्जितदिग्गजः ।
दृग्गोचरस्य नामापि नाशयन्गात्रघट्टनैः ॥ १९२३ ॥
पुराट्टश्रेणिकायुग्मकूलङ्कषमहारयः ।
हिंसामहापगापूर इव दूरसमुन्नतः ॥ १९२४ ॥
वन्यः कश्चिदुपायातः कुतो ऽपि नगरान्तरम् ।
भृङ्गैर्गीतयशा लुब्धैर्दानवारिणि वारणः ॥ १९२५ ॥
चतुर्भिः कलापकम् ॥
तद्भिया स्तम्भमुन्मूल्य गजा गर्वमिवात्मनः ।
पलायांचक्रिरे न्यस्य कर्णेभ्यों ऽह्रिषु चापलम् ॥ १९२६ ॥

पलायमाना हस्त्यो रयोपहतमारुताः ।
ललङ्घिरे मिथो मार्गरोधक्रोधसमुद्धुराः ॥ १९२७ ॥
क्षणत्करोत्यपि जगन्न येषां पतितं दृशि ।
वीरैस्तैरप्यहो हस्तस्रस्तशस्त्रैः पलायितम् ॥ १९२८ ॥
किं वा बहु वदाम्येष प्राप्त एवेक्ष्यतां स्वयम् ।
नदन्नकालकल्पान्तकालमेघ इव द्विपः ॥ १९२९ ॥
इत्युक्त्वा सपरीवारौ तौ कुमारधरापती ।
रभसाभ्युत्थितौ नागमैक्षेतां कथिताधिकम् ॥ १९३० ॥
यावत्पश्यति भूजानिस्तावद्वातात्तृणैरिव ।
द्विपात्रस्तैर्जनैः शून्यं कृतं भूतलमग्रतः ॥ १९३१ ॥
द्विपे ऽस्मिन्दलयत्यट्टजालाट्टालकमालिकाः ।
पुरस्य कृपया कम्पमानो भूपतिरभ्यधात् ॥ १९३२ ॥
को ऽप्यस्ति क्षत्रियापुत्रः कुत्रचिन्मच्चमूचये ।
दोर्बलेन पुरं पाति पात्यमानं द्विपेन यः ॥ १९३३ ॥
इत्युक्त्वा पार्थिवः चक्षुर्यस्य यस्य मुखे ददौ ।
वीरः सद्यो नवोढेव स स न्यग्मुखतां दधौ ॥ १९३४ ॥
ततः कृतमहाक्रन्दे तस्मिन्नत्यातुरे पुरे ।
बद्धं वधूत्तरीयेणोत्तरीयं प्रोज्झ्य रंहसा ॥ १९३५ ॥
पर्युत्प्लुत्योच्चरोमाञ्चकञ्चुको रामनन्दनः ।
रे रे मा मेति मातङ्गं कण्ठीरवरवो ऽगदत् ॥ १९३६ ॥
तन्नादभयसंभ्रान्तः स्थित्वा स्तब्ध इव क्षणम् ।
स्वं चेतः पर्यवस्थाप्य क्रुधा तं प्रत्यधावत ॥ १९३७ ॥
न कुम्भी वामभागेन शक्नोति वलितुं जवात् ।
इत्यस्याश्रित्य तत्पार्श्वं कुमारः पेचकं गतः ॥ १९३८ ॥

तमन्वचलत क्रोधाद्बलेन प्रबलो गजः ।
पुच्छमूलस्थ एवासुं व्यथयन्नभ्रमद्भटः ॥ १९३९ ॥
इत्यभ्रामि चिरं कौतूहलाद्वीरेण वारणः ।
क्रोधद्वेषादिदोषाढ्यः क्षेत्रज्ञ इव कर्मणा ॥ १९४० ॥
उद्दामवामपार्श्वातिभ्रान्तिश्रान्तिस्फुटद्वपुः ।
क्रुद्ध एव तदा तस्थौ स कृत्रिम इव द्विपः ॥ १९४१ ॥
खेदाच्छुष्यन्मदं प्रोद्यन्निःश्वासं मीलदीक्षणम् ।
उपेत्याग्रे कुमारस्तं करेणाताडयत्करे ॥ १९४२ ॥
क्रोधतापाद्गलद्रक्ते इव रक्ते दधद्दृशौ ।
चिक्षेपास्मिन्करं कुम्भी दुष्टः फणमिवोरगः ॥ १९४३ ॥
नश्यंस्तिष्ठन्पतन्नुद्यन्नृपजन्मा तमग्रहः ।
गजमाकुलयद्दुष्ट ऋणिको धनिकं यथा ॥ १९४४ ॥
वेगाददृष्टोत्पतनः स्थिरं किल शिलामयम् ।
कुमारो ऽथ तमारोहल्लोकाग्रमिव योगवित् ॥ १९४५ ॥
तद्वीक्षाकौतुकोत्ताले जाते जाले ऽङ्गिनां ततः ।
पक्षीवोदपतत्पृथ्वीभागान्नागाग्रणीर्दिवि ॥ १९४६ ॥
तैरदर्शि दिवि श्यामधामश्रीः सामजो लसन् ।
कुमारद्युतिभिस्तारतडित्वानिव तोयदः ॥ १९४७ ॥
एष यात्येष यातीति जने जाग्रदनस्वने ।
करी कुमारमाणिक्यतस्करो ऽयं तिरोऽभवत् ॥ १९४८ ॥
किमेतदिति चिन्तार्तैर्निश्चलैश्चित्रगैरिव ।
जनैरजनि दुःखस्य चित्रशालेव सा पुरी ॥ १९४९ ॥
नयनैकप्रिये तत्र कुमारे करिणा हृते ।
स्वसर्वस्वमिवामोचि जनानां नयनैः पयः ॥ १९५० ॥

तदन्तिगमनाद्द्वेष्यं न्यग्मुखो निःश्वसञ्जनः ।
आकाशसावकाशत्वं हन्तुं धूलिमुदक्षिपत् ॥ १९५१ ॥
आयूरुद्धदशद्वारे देहे गेहे ऽभितो ऽभ्रमि ।
प्रियं कुमारमन्वेतुमाकुलैरसुभिर्नृणाम् ॥ १९५२ ॥
तदा तेन कुमारेण सममेव गते हृदि ।
मूर्छामगच्छदुचितं नन्दिनी मेदिनीपतेः ॥ १९५३ ॥
विलोक्य पिटकोद्भेदं दग्धस्योपरि तं नृपः ।
मज्जन्दुःखभराम्भोधौ किंकर्तव्यजडो ऽजनि ॥ १९५४ ॥
पुनश्चैतन्यमापन्ना तदन्तिपथदत्तदृक् ।
हा जीवेश क्व यातो ऽसीत्युक्तिगर्भं रुरोद सा ॥१९५५॥
तदा वदामः किं दुःखं महोदग्रमहो जने ।
तस्यां रुदत्यां जज्ञे ऽतिर्यद्द्रुमेषूपलेष्वपि ॥ १९५६ ॥
मुक्त हा तात हा मातर्हा दैवेत्यादि शब्दितः ।
चक्रन्द विस्मृताक्रन्दकारणो ऽपि जनो ऽथ सः ॥ १९५७ ॥
शुचा रसीभवन्त्याथ समं विलसतः सतः ।
तज्जनस्य जगामाहस्त्रुटिमाहात्म्यभृत्तदा ॥ १९५८ ॥
चक्राह्वनादैः क्रन्दन्ती ताराभिर्बाष्पबिन्दुभृत् ।
तमोभिर्मुक्तकेशा च दुःखिनीव निशाप्यभूत् ॥ १९५९ ॥
चन्द्रे ऽप्युदयमाने ऽथ कुमारमुखशङ्कया ।
जनस्य हृष्यतो विघ्नं लक्ष्मलेखैव निर्ममे ॥ १९६० ॥
चक्षुष्याकलयन्कण्ठविलग्नां रोदनक्रियाम् ।
मोहसुप्तो जनो यान्तीमजानीत्त निशां न सः ॥ १८६१ ॥
ततो गतसिताभीशुजीवितेशवियोगिनीः ।
रविच्छविचिता चक्रे पतन्तीर्वीक्ष्य तारकाः ॥ १९६२ ॥

चित्तप्रियवियोगार्ता सापि भूपालकन्यका ।
दुःखौषधं ममास्त्वग्निरित्युच्चैरादद्दे वचः॥१९६३॥युग्मम्॥
आभूपरङ्कपर्यन्तं जनानां मरणार्थिनाम् ।
तदा तदेव वचनं समं वक्त्रेष्वजायत ॥ १९६४ ॥
इत्येकमतमाश्रित्य प्रत्यक्षे कर्मसाक्षिणि ।
जनो ययौ चितातीर्थं नदीतीरमहीतलम् ॥ १९६५ ॥
व्यभज्यत जनैर्दूरादिह स्वस्य चिताकृते ।
खण्डं खण्डं भुवः खड्गाकर्षणैर्मितमङ्गुलैः ॥ १९६६ ॥
कल्याणतुल्यमूल्यात्तैः काष्ठखण्डकदम्बकैः ।
अहम्पूर्विकया तत्र व्यरच्यन्त जनैश्चिताः ॥ १९६७ ॥
तच्चिताजालमालोक्य भविष्यत्तापशङ्कया ।
समक्रमन्त तत्सीमद्युजलस्थलदेवताः ॥ १९६८ ॥
विन्यस्य तृणपूलेषु वह्निं तस्मिञ्जनस्ततः ।
जीवितस्येव नासीरं समीरं मुखतो ऽक्षिपत् ॥ १९६९ ॥
मुखमारुतवीचीभिः प्रेरिताभिर्मुहुर्मुहुः ।
विलक्षो ऽजनि लोको ऽयं नाज्वलज्ज्वलनः पुनः॥१९७०॥
जनितज्वालनोपायव्रजेनापि जनेन सः ।
नाग्निर्ज्वालयितुं शेके कुतुकीवानिलैर्हसन् ॥ १९७१ ॥
विलक्षा दिक्षु विक्षिप्तचक्षुः क्ष्मापसुता ततः ।
ददर्श दूरतः कायोत्सर्गसंवर्गितं यतिम् ॥ १९७२ ॥
दध्यौ च युक्तं कारुण्यसुधाब्धेरस्य संनिधौ ।
एतावज्जनतामृत्युहेतुर्ज्वलति नानलः ॥ १९७३ ॥
तद्वन्दे ऽहमसंदेहं स्वार्थसिद्ध्यै जवादमुम् ।
भान्तीच्छाकल्पतरवो मुखो भृशमीदृशाः ॥ १९७४ ॥

इत्यगच्छदियं स्वच्छमतिर्यतिनतिस्पृहा ।
साधुदर्शनसानन्दैर्जनैरनुगताखिलैः ॥ १९७५ ॥
तं नत्वाथ मुनेर्व्यक्तभक्तिभासुरमानसा ।
जगाद जगतीनाथसुता दुःखोचितं वचः ॥ १९७६ ॥
किं कृपाब्धे त्वयारोधि तपःशक्त्या ज्वलच्छिखी ।
निर्विजित्वरतापार्तं न किं जानास्यमुं जनम् ॥१९७७॥
ईदृक्तापातुरं तर्हि संयमामृतसागरे ।
इमं निमज्जय जनं भगवज्जगतां हित ॥ १९७८ ॥
पारयित्वाथ संसारपारदृश्वा मुनीश्वरः ।
जगौ साक्षादवज्ञातद्राक्षावलीफलं वचः ॥ १९७९ ॥
दानशीलतपोभावजित्वरी पुण्यसंपदा ।
गार्हस्थ्ये भाविनी त्वत्तः शासनस्य प्रभावना ॥१९८०॥
तत्कल्याणिनि मा कार्षीरिदानीं संयमोद्यमम् ।
भूरिभोगफलं कर्म त्वयि किंचिच्च शेषति ॥ १९८१ ॥
उद्यमोऽयं यदर्थं स चतुर्थे ऽह्नि समेष्यति ।
राजपुत्रः स तु यथा विद्यते श्रूयतां तथा ॥ १९८२ ॥
अस्ति पूः स्वस्तिपूर्णश्रीर्वैताढ्याचलमण्डनम् ।
विदिता मल्लिका नाम्ना पुरचक्रमतल्लिका ॥ १९८३ ॥
नयी रत्नाङ्गदो नाम महोदामपराक्रमः ।
विद्याधरवरस्तारविद्याशक्तिर्भुनक्ति ताम् ॥ १९८४ ॥
तस्य लीलावतीकुक्षिनलिनैकमरालिका ।
सुतास्ति रुक्मिणी नाम रूपश्रीरिव रूपिणी ॥ १९८५ ॥
तां क्रोडे क्रीडयन्सभ्यानुवाच ह्यस्तने ऽह्नि सः ।
वरो ऽस्ति कश्चिदप्येतदनुरूपः क्षितावितिं ॥ १९८६ ॥

ततः खेचरवक्त्रेभ्यः श्रुत्वा तदधिकश्रियम् ।
त्वत्प्रियं खेचराधीशः स कुमारमहारयत् ॥ १९८७ ॥
तेन कन्याविवाहार्थं कुमारो ऽभ्यर्थितस्ततः ।
नयधर्मसदाचारसत्यधीरभ्यधादिदम् ॥ १९८८ ॥
अद्यैव दैवमर्यादोल्लङ्घिरूपमयश्रियम् ।
दृग्लीलारूयातशीलादिगुणां पर्यणयं वधूम् ॥ १९८९ ॥
सतीं रूपवतीं चैकामङ्गीकृत्य मृगीदृशम् ।
कस्मै सुखाय सुमुखी द्वितीया परिणीयते ॥ १९९० ॥
वरं कारागृहक्षिप्तो वरं देशान्तरभ्रमी ।
वरं नरकसंचारी न द्विभार्यः पुनः पुमान् ॥ १९९१ ॥
अभूषितो गृहाद्याति नाम्नोत्यम्बुच्छटामपि ।
अक्षालितपदः शेते भार्याद्वयवरो नरः ॥ १९९२ ॥
दुर्भगापि विरूपापि सपत्नी सुभ्रुवामपि ।
गात्रमात्रं सदाप्यन्तस्तापायःशल्यमुद्धरेत् ॥ १९९३ ॥
तत्तादृक्प्रेयसीप्रेमरसव्यसनिना मया ।
पुत्रीसंबन्धबन्धस्ते रुचितो ऽप्युचितो ऽपि न ॥१९९४॥
इत्युक्त्वा विरते धर्मनिरते नृपजन्मनि ।
विद्याधराधिपो जिह्मदोलयान्दोलयद्गिरम् ॥ १९९५ ॥
मत्पुत्री परिणीयासौ द्रष्टव्यापि कदापि न ।
किं तूद्वह महाभाग भाग्यमेतावतापि मे ॥ १९९६ ॥
इत्यादिभिर्गिरं भारैरुपरोध्य विवाहितः ।
कृत्वा मण्डपराजिं स सकलत्रः समेष्यति ॥ १९९७ ॥
त्रिभिर्विशेषकम् ॥

इति तत्कृत्यमादिश्य सो ऽभिस्तम्भं कथां च ताम् ।

चचार चारणमुनिर्मनुष्याग्रहते पथि ॥ १९९८ ॥
इहैव हि स्थितैः पाल्यः कुमारागमनोत्सवः ।
इत्यालोच्य जनैस्तस्थे तटिनीतट एव तैः ॥ १९९९ ॥
एष्यत्यत्र कुमारेन्दुर्नान्यथा मुनिवागिति ।
चतुर्थाहर्निशीथे ऽपि स जनो जागरी स्थितः ॥२०००॥
रे रे मया हृतां कन्यां व्यूह्य नीत्वा क्व यास्यसि ।
अयं न भवसि क्षिप्रमस्त्रमस्त्रज्ञ सज्जय ॥ २००१ ॥
रे रे वधूं मया व्यूढामेतामाच्छेत्तुमिच्छसि ।
एभिरेव पदैरेहि पातयामि शिरस्तव ॥ २००२ ॥
एवं वधूविरोधेन क्रोधेन व्याप्ति धावतोः ।
कयोश्चन जनेनोच्चैरुक्तिप्रत्युक्तयः श्रुताः ॥ २००३ ॥
त्रिभिर्विशेषकम् ॥

किमेतदिति संभ्रान्तः स जनो दिवि दत्तदृक् ।
खड्गप्रहारखाट्कारान्सहुंकारानकर्णयत् ॥ २००४ ॥
मा भूदिह कुमारेन्दुः स्याच्चेत्तज्जयतादसौ ।
इत्यासन्नुक्तयो ऽन्योन्यं जनस्याकुलचेतसः ॥ २००५ ॥
एतस्मिन्नन्तरे खड्गक्षतक्षतजदृष्टिकृत् ।
पपात पुरुषः को ऽपि दिवो दीप्तवपुर्द्युसुः ॥ २००६ ॥
हा नाथ मां द्विषानेन ह्रियमाणां न पासि किम् ।
रणाग्रमरणो ध्यानसिद्धसिद्धिः सुरो ऽसि यत् ॥२००७॥
एवं रुदत्याः कस्याश्चिद्दूरं दूरं मृगीदृशः ।
शुश्रुवे ह्रियमाणाया इव व्योमाध्वनि ध्वनिः ॥ २००८ ॥
युग्मम् ॥

पुमांसं पतितं यावद्दर्शनक्षत भूपतिः ।

उपालक्षत तावत्तं कुमारं पूत्कार च ॥ २००९ ॥
निन्दन्तस्तामहर्षेण महर्षेरपि भारतीम् ।
कुमारमरणं वीक्ष्य प्रापुः पौराः परां शुचम् ॥ २०१० ॥
रराज राजपुत्री तु बहिःस्था शोकहर्षयोः ।
रचयन्ती चितामेवोपचितामिन्धनैर्घनैः ॥ २०११ ॥
मृत्युव्यवसितिव्यग्रां क्ष्मापमुख्या निरीक्ष्य ताम् ।
सर्वे तत्कर्मनिर्माणसरसास्तरसाभवन् ॥ २०१२ ॥
चितां कुमारमारोप्य प्रज्वाल्य ज्वलनं ततः ।
स्नात्वा नृपतिभूस्त्यक्तकम्पा झम्पाकृते स्थिता ॥२०१३॥
सत्त्वेन केचिदौचित्याचरणेनापरे ऽपरे ।
लज्जया सज्जयामासुश्चितामाशु निजां निजाम् ॥२०१४॥
क्षणे सत्त्वस्य निकषे तत्र सत्रासचेतसः ।
सिन्धुस्नानविधानादिच्छलात्के ऽपि पलायिताः॥२०१५॥
त्रपाभयद्वयीकूलंकषया चिन्तयाकुलाः ।
मन्दं मन्दं परे चक्रुश्चिताचक्रप्रपञ्चनम् ॥ २०१६ ॥
दधुः सत्त्वभृतः के ऽपि कपोलपुलकोत्तरम् ।
द्विगुणं राजपुत्रीतः प्रीतचित्ताश्चितारसम् ॥ २०१७ ॥
धूमं क्रौर्यजिताद्दण्डमिवाच्छिद्य कृतान्ततः ।
भ्रमयन्तः शिरस्युच्चैर्ज्वलन्ति स्म चिताग्नयः ॥ २०१८ ॥
तापयन्तस्तलैरुर्वीं ज्वालाजालैर्नभस्तलम् ।
स्फुलिङ्गैर्दिवमप्यासन्नामी कस्य भिये ऽग्नयः ॥ २०१९ ॥
ततश्चित्तस्फुरत्पञ्चपरमेष्ठिनमस्कृतिः ।
रोमाञ्चिताङ्गी तत्राग्नौ यावज्झम्पति भूपभूः ॥ २०२० ॥
तावदायात एवाहं हव्यवाहं भजस्व मा ।

प्रिये त्वमेव मे प्राणाश्चित्तं चेत्युदभूद्वचः ॥२०२१॥युग्मम्॥
ततः खे दत्तनयना नयनानन्दकं प्रियम् ।
समायान्तं विमानेन सापश्यत्प्रेयसीयुतम् ॥ २०२२ ॥
प्रियासौ मत्प्रियस्यापि तन्ममातिप्रिया ध्रुवम् ।
इति सा प्रीतिसरसां सपत्न्यामप्यदादृशम् ॥ २०२३ ॥
किं जीवितं किमानन्दः किमुल्लासः किमुत्सवः ।
आयात्यसाविति स्मेरदृशा केनैष नेक्ष्यत ॥ २०२४ ॥
पादन्यासैः कुमारोऽथ भूमिमभूषयत् ।
स्मेरयञ्जनवक्त्राणि कमलानीव भास्करः ॥ २०२५ ॥
प्रणमन्व्योमयुद्धादि पृष्टो राज्ञा जगाद सः ।
अभूत्कस्याप्यसौ मायाप्रपञ्चो वञ्चनाय वः ॥ २०२६ ॥
ततः क्षितिपतिः कल्पद्रुमागमनोत्सवः ।
दानैरानन्दयन्नर्थिकरान्नाविशत्पुरीम् ॥ २०२७ ॥
चिरं विरचितौत्सुक्यमज्जामातृगतैरवः ।
ततः कृती कृतार्थं स पार्थिवः स्वममन्यत ॥ २०२८ ॥
मुहुरापृच्छ्यमानोऽथ पृथ्वीशेन स भूपभूः ।
बद्धबाष्पेण सत्कृत्य प्रेषितः प्रेयसीयुतः ॥ २०२९ ॥
यान्ती पत्या समं पादौ प्रणिपत्य पितुस्ततः ।
विनयेन विराजन्ती राजपुत्रीदमब्रवीत् ॥ २०३० ॥
यो धर्मरुचिनामा वो धर्मामात्योऽस्ति धर्मवित् ।
स प्रेष्यतां धर्मकथासंवादाय मया समम् ॥ २०३१ ॥
निवेद्याथ कुमाराय कुमारब्रह्मचार्यसौ ।
प्रैषि धर्मशुचिर्धर्मरुचिः पुत्र्या सहामुना ॥ २०३२ ॥
संत्यक्तान्दुःखयन्देशानाहतानेष हर्षयन् ।

ततः कलत्रद्वयवानवाप स्वां पुरीं वरः ॥ २०३३ ॥
समायातं तमालोक्य पुत्रं प्रीतो ऽथ पार्थिवः ।
राज्ये बलेन योग्यत्वादभिषिच्यादित व्रतम् ॥ २०३४ ॥
मन्त्रिन्यस्तमहीभारो महीपालसुतावशः ।
विद्याधराधिपसुतां स नाचष्टे न चेक्षते ॥ २०३५ ॥
महीपातुः सुता सा तु शीलशीलनशालिनी ।
दध्यौ सद्धर्मकर्मैकविचारविशदा तदा ॥ २०३६ ॥
पत्युर्भवन्ति यावत्यो युवत्यः पाणिपीडिताः ।
पतिर्वारक्रमात्तासां सो ऽह्नि तावद्दिनान्तरे ॥ २०३७ ॥
विलुप्य वारमन्यस्या रागादागमुकः स्वयम् ।
स्पृश्यो ऽपि शीलवत्या न स्त्रियोपपतिवत्पतिः ॥२०३८॥
ततो विद्याधराधीशसुतावारनिवारणः ।
मामय कामयन्नुर्वीपतिः पापाय जायते ॥ २०३९ ॥
केनाप्युपायेन न्यायेन च बलेन च ।
तद्वारे वार्य आगच्छन्नागतो नेक्ष्यते ऽपि सः ॥ २०४० ॥
इति चेतसि निश्चित्य शीललीलावती नृपम् ।
सावदद्विनयानम्रवदना सदनागतम् ॥ २०४१ ॥
कुलीना निष्कलङ्का च कनिष्ठा सा मम स्वसा ।
निरूप्यते ऽपि नो भूपरत्न किं रूपवत्यपि ॥ २०४२ ॥
धर्मो ऽप्यसौ न धर्मज्ञ नयज्ञ न नयो ऽप्ययम् ।
गोत्राचारज्ञ नो गोत्राचारो ऽप्येष करोषि यम् ॥ २०४३ ॥
प्रभो पाणिगृहीतां तां युक्त्या युक्तिज्ञ पालय ।
शुद्धधर्मनयाचारविचारिषु यशः स्पृश ॥ २०४४ ॥
इति प्रभृतिभिर्भाषाभङ्गीभिर्भाषितो ऽमितः ।

नाङ्गीचकार तत्कर्म तद्गुणोर्मिवशो नृपः ॥ २०४५ ॥
अनन्यहृदया सेयममेयमहिमोज्ज्वला ।
दिनेनैकान्तरेणाथ महीनाथमसेवत ॥ २०४६ ॥
रुक्मिणीवारयोग्ये तु वासरे सा नरेश्वरम् ।
आयातमपि नो ऽपश्यद्धर्मवश्येन चेतसा ॥ २०४७ ॥
तादृग्धर्मकथालापकलापकलयैव सा ।
तां क्षिपां क्षिपयत्येषा प्रत्याख्यानविधायिनी ॥ २०४८ ॥
सपत्न्यामपि वात्सल्यं सतीत्वमपि तादृशम् ।
तां प्रति क्ष्मापतिर्ध्यायन्मुहुः पुलकितो ऽभवत् ॥ २०४९ ॥
प्रभावभाजनं भान्ति स्त्रियश्चारित्रदेवताः ।
वैमनस्यमहो तासां यः करोति स पातकी ॥ २०५० ॥
वयं मुदे तदेतस्याः कुर्मः कर्मेति भूपतिः ।
रुक्मिण्या अप्यदाद्वारमेकान्तरमनन्तरम् ॥ २०५१ ॥
ततः सतीनां मुख्येयं पुण्यलब्धानमन्यत ।
प्रदत्तधर्मावसरान् रुक्मिणीवारवासरान् ॥ २०५२ ॥
धन्यंमन्या पुनर्मेने पतिमित्या पतिव्रता ।
घटितान्पुण्यसारेण स्ववारदिवसानसौ ॥ २०५३ ॥
निजवारे ऽपि राजेन्दो राजकार्यक्षणेषु सा ।
आत्मानं सफलीचक्रे सुकृतस्यैव केलिभिः ॥ २०५४ ॥
सा धर्मरुचिना तेन पूर्णोपकरणव्रजा ।
त्रिकालं जनयामास पूजनानि जिनेशितुः ॥ २०५५ ॥
जिनाधिनाथशेषाभिरेव द्रव्यैः सुगन्धिभिः ।
सा कल्पसुकृताभोगानङ्गभोगानपि व्यधात् ॥ २०५६ ॥
यद्वस्तु कल्प्यमाहार्यं यतीन्द्रेषु वितीर्य तत् ।

आजह्रे च विजह्रे च पथा दृक्शुचिनैव सा ॥ २०५७ ॥
सप्तक्षेत्रीमहादानवितानविघसैरसौ ।
धन्यैरन्यानि कार्याणि चकार न चकार वा ॥ २०५८ ॥
इति शीले च दाने च भवन्ती सा निदर्शनम् ।
दूरतो ऽपि वयस्येव मुक्त्यालिङ्गितुमैच्छयत ॥ २०५९ ॥
तपोभिः शोषितः स्वात्मा तुर्यषष्ठाष्टमादिभिः ।
तेषु धर्मेषु बन्धुत्वं तस्या धर्मरुचिर्दधौ ॥ २०६० ॥
तया पितेव भ्रातेव स मेने मनसा शुचिः ।
सदामन्यत तेनापि मातेव भगिनीव सा ॥ २०६१ ॥
स तस्यास्तस्य सा धर्मक्रियां पातुं प्रमादतः ।
दूरीबभूवतुर्नैव चिरकालं कदाचन ॥ २०६२ ॥
इयं धर्मे धियं शुद्धामतीव दधती सती ।
स्ववारलुप्तये नेम रुक्मिणयां पत्युरैहत ॥ २०६३ ॥
रुक्मिणी तु सदा दध्यौ कदा वध्या सपत्न्यसौ ।
दोषं दत्त्वानृतमपि च्छलादपि बलादपि ॥ २०६४ ॥
सा नित्यमित्यसद्ध्याना दासीरासीनमत्सरा ।
तत्कलङ्कच्छलं कर्तुमूचे विगसतां धियम् ॥ २०६५ ॥
रुक्मिणीपार्श्वगो ऽन्येद्युर्भूपालो जालवर्त्मना ।
दृष्ट्वा धर्मरुचिं चैत्यपरिपाटीविहारिणम् ॥ २०६६ ॥
उवाच व्यक्तरोमाञ्चो धर्माधाने ऽस्ति को ऽपि न ।
अस्य पट्टमहादेवीधर्मबन्धोः समः सुमान् ॥ २०६७ ॥
॥ युग्मम् ॥

इत्युक्तिभाजि निर्व्याजं राजनि व्याजनिश्चला ।
मुखं सखीनां वीक्ष्याधोमुखास्मयत रुक्मिणी ॥ २०६८ ॥

तासां मुखे विकारं स वीक्ष्य व्याचष्ट विस्मितः ।
किं व्यलोकि क्वचिद्धर्मलोपो धर्मरुचेरपि ॥ २०६९ ॥
ततः सस्मितमैक्षन्त तद्वयस्याः परस्परम् ।
किंचिद्विवक्षव इव क्षणकम्पोत्तराधराः ॥ २०७० ॥
एका तासु जगौ ज्ञाता धर्मे धर्मरुचे रुचिः ।
यत्ते पट्टमहादेवीं ख्यात्येष भगिनीं जने ॥ २०७१ ॥
विजने त्विति जल्पन्ती रुक्मिण्या भङ्गुरभ्रुवा ।
भ्रमयन्त्या दृशौ मौलिमकम्पेन न्यषेधि सा ॥ २०७२ ॥
अर्धोक्तचैतदभिप्रायं जानन्राजा तु संजगौ ।
धिक्तत्र दोषमथनं धिगर्के लक्ष्मभाषणम् ॥ २०७३ ॥
सतां गुणोऽपि दोषत्वं प्रयात्यसहने जने ।
सुधारुचेरपि रुचिश्चक्राह्वे दहनायते ॥ २०७४ ॥
अथाह रुक्मिणी कोपकपिशोद्भ्रान्तलोचना ।
सत्या यो यत्र लीनः स क्षीणस्तत्रेति लोकवाक् ॥२०७५॥
असतां हन्त दोषोऽपि गुणः स्यात्तत्प्रिये जने ।
अन्धकारोऽपि घूके हि वहत्यालोककारिताम् ॥ २०७६ ॥
यदुक्तमनया तच्चेत्प्रत्यक्षं दर्शयामि ते ।
प्रत्येषि न तथापीष्टरागलुप्तविवेकदृक् ॥ ३०७७ ॥
युक्त्या यत्र घटामेति तत्र प्रत्येति कः सुधीः ।
खे वीक्ष्य पुष्पितां वल्लीमिन्द्रजालं न वक्ति कः ॥ २०७८ ॥
तथापि तत्र प्रत्यक्षीकुरुषे यदि दूषणम् ।
तद्विचार्य किमप्युच्चै रचयिष्यामि तौ प्रति ॥ २०७९ ॥
एवमुक्तवति क्षोणिसुश्रोणिहृदयाधिपे ।
सायं तच्चरितं ते ऽद्य दर्शयामीति सावदत् ॥ २०८० ॥
॥ त्रिभिर्विशेषकम् ॥

इतश्च पश्चिमामौलिमणीभूते विभाविभौ ।
भेजे पट्टमहादेवी जिनपूजनसज्जताम् ॥ २०८१ ॥
सा धर्मरुचिसंकल्पसर्वोपकरणक्रमाम् ।
पूजां तृतीयकालार्हामर्हति व्यतनोत्ततः ॥ २०८२ ॥
पूजां समाप्य तीर्थेशशेषाकुसुममालया ।
धम्मिल्लं धर्मरुचिना साथ मूर्धन्यबन्धयत् ॥ २०८३ ॥
देवीमूर्धनि धम्मिल्लवैचित्र्यं रचयन्नयम् ।
सायं नृपाय रुक्मिण्या जालद्वारेण दर्शितः ॥ २०८४ ॥
चण्डे ऽथ कोपचण्डाले विवेकवृषखण्डिनि ।
रक्तच्छटाभिरिव दृग्युगलं पाटलं दधत् ॥ २०८५ ॥
नृपः कृपाणीमाकृष्य प्रविश्यान्तर्निकेतनम् ।
धम्मिल्लमच्छिनद्देव्यास्तौ च धर्मरुचेः करौ ॥ २०८६ ॥
॥ युग्मम् ॥

रे रे सतीत्वधर्मित्वच्छद्मना मम सद्मनि ।
धिगकारि विकारो ऽयमिति जल्पंश्च निर्ययौ ॥ २०८७ ॥
कोपाग्निं चाटुपीयूषै रुक्मिणी शमयन्त्यथ ।
निनाय नायकं तं स्वे सद्मनि च्छद्मनिर्वृता ॥ २०८८ ॥
ततः कलावती दध्यौ दुःखनीरौघदीर्घिका ।
धिग्धिक्पुरा कृतं कर्म कथं परिणतिं गतम् ॥ २०८९ ॥
तन्मे मुदे शिरःकेशा यच्छिन्ना दुरितद्युतः ।
व्रतस्य मुक्तिद्वारस्य पिधानत्वतितां गताः ॥ २०९० ॥
जिनांह्रिनखविद्योतविमलं मलिनीकृतम् ।
कुलं मृषाकलङ्केन यदुःखाय तदेव मे ॥ २०९१ ॥
हा हा धिग्धिग्जिनाधीशपदद्वन्द्वार्चनोचितौ ।

धर्मामृतसरोम्भोजरुचौ धर्मरुचेः करौ ॥ २०९२ ॥
तस्य शासनदेवीनां पश्यन्तीनामपि क्षणात् ।
उद्दामसामर्थ्यभृता दुःकर्मकरिणा हृतौ ॥ २०९३ ॥युग्मम्॥
नेन्द्रो ऽपि कर्मसु बलीत्यशोचत्करविच्युतिम् ।
चञ्चत्पञ्चनमस्कारध्यानो धर्मरुचिस्त्वभूत् ॥ २०९४ ॥
गृहगर्भे ऽतिपुष्टानि दुःखश्यामैर्मुखांशुभिः ।
तमीतमांसि पुष्णन्ती सा तु तापवती सती ॥ २०९५ ॥
किं करोमीति चिन्तार्तो पुरो ऽकस्मात्परिस्फुरत् ।
मार्तण्डमण्डलमिव द्युतिमण्डलमैक्षत ॥ २०९६ ॥युग्मम्॥
किमेतदिति संभ्रान्तां नृपकान्तामथावदत् ।
प्रभागर्भगता कापि स्त्री दिव्याकारधारिणी ॥ २०९७ ॥
नाम्ना पद्मवतीं तीर्थेशितुः शासनदेवताम् ।
तद्भक्तभक्तां जानीहि मां हिमांशुसमानने ॥ २०९८ ॥
ये जिनैकरसास्तेषां पुण्यश्रीरिव संनिधिम् ।
न मुञ्चे दुरितानीव व्यसनानि निरासितुम् ॥ २०९९ ॥
मयि सत्यां तवेदृक्स्यान्निविडं न विडम्बनम् ।
मया तु सोढुमिच्छन्त्या शासनस्य प्रभावनाम् ॥ २१०० ॥
धर्मप्रभावनाम्भोभिः कलङ्कः पङ्कवत्तव ।
इदानीं क्षालनीयो ऽयमप्रक्षालितनिर्मले ॥२१०१ ॥युग्मम्॥
तस्या इत्यापमित्युक्त्या हत्वा देवी तिरोऽभवत् ।
भूमेर्ग्रीष्मजमूष्माणं वृष्ट्येव जलदावलिः ॥ २१०२ ॥
प्रतिरोमभ्रमत्तप्ततर्कुस्तोमविजित्वरी ।
अतिराकस्मिकी काचिदेतश्चाभूदिलाविभोः ॥ २१०३ ॥
पराक्रमैकशक्तो ऽयं बाढं संक्रन्दनीभवन् ।

स्वं जीवितं तयाप्यर्त्या मेने दुश्यवनं नृपः ॥ २१०४ ॥
तस्यार्तो ऽन्तर्विशन्तीभिर्व्यथ्यमान इवार्तिभिः ।
शब्दौघः कण्ठकूलानि कषन्वक्त्रेण निर्ययौ ॥ २१०५ ॥
स्वयं मुखेन ग्रहितो राज्ञः शब्दः स दूतवत् ।
दूरौकसो ऽपि सचिवानाह्वयत्प्रथितव्यथः ॥ २१०६ ॥
विदधुर्वैद्यकं वैद्या मन्त्रवादं च मान्त्रिकाः ।
यथा यथास्य पृथ्वीन्दोर्व्यथापुष्यत्तथा तथा ॥ २१०७ ॥
अद्वैतवादिवादैकजयालम्बनभूतया ।
आकुल्यभूदथ क्ष्मापव्यथया व्यथितो जनः ॥ २१०८ ॥
न शय्यायां न च क्ष्मायां न हिमैरहिमैर्न च ।
स न मृष्टान्न चामृष्टान्निर्वृतिं नृपतिर्ययौ ॥ २१०९ ॥
जनैरसाध्ये रोगे ऽस्मिन्दैवात्किंचन दैवतम् ।
ख्याति यद्यौषधं किंचित्तज्जीवति महीपतिः ॥ २११० ॥
इत्यादिव्याधिनं पूर्वमपूर्वध्वनिना जनम् ।
सावधानं विधायाभूदेषाम्बरसरस्वती ॥ २१११ ॥ युग्मम्
कस्याश्चन जिनस्वामिभक्तिकेतनचेतसः ।
सतीशतनमस्यायाः केशस्नपनवारिभिः ॥ २११२ ॥
जिनार्चकस्य कस्यापि कुमारब्रह्मचारिणः ।
हस्तात्तैः स्नपयित्वास्तरुजं कुरुत भूभुजम् ॥ २११३ ॥
॥ युग्मम् ॥
श्रुत्वेति सचिवैः प्रीतैरानीतः पुरविश्रुतः ।
अर्हद्भक्तः सतीवर्गो गणश्च ब्रह्मचारिणाम् ॥ २११४ ॥
तस्मिन्कर्मणि राज्ञो ऽथ कार्यमाणे क्रमेण तैः ।
प्रत्येकं नरकव्रीडाकरी पीडा व्यवर्धत ॥ २११५ ॥

अथाह भूपः पीडाया मूर्तैरवयवैरिव ।
दीनमन्दातुरैर्वर्णैः पीडयद्भिः परिच्छदम् ॥ २११६ ॥
उपचारचयैरेभिः शमाय प्रथितैर्व्यथा ।
वर्धते प्रत्युतैवासौ लोभो लाभवतामिव ॥ २११७ ॥
तदेवमेव स्थातव्यं यद्भविष्यतयाधुना ।
असावहमियं पीडा क्रीडावः किं भवेदिति ॥ २११८ ॥
उदासे जिनदासेन वागथो वृद्धमन्त्रिणा ।
खजल्पः क्वापि नासत्यः सत्यस्तु भुवि दुर्लभाः ॥२११९॥
पुनस्ताश्चिन्तयामीति क्षणं स्तब्धीकृताकृतिः ।
अभिनीय स्मृतिं चैष सचिवः प्रोचिवान्नृपम् ॥ २१२० ॥
महासती महादेवी जिनधर्मधुरंधरा ।
कुमारब्रह्मचारी च स धर्मरुचिरुच्चकैः ॥ २१२१ ॥
तयोर्गृहजुषोर्यत्नस्तद्गुणालोकनं बहिः ।
सा भिक्षा सद्व्रतयोः कामधुक्कल्पवृक्षयोः ॥ २१२२ ॥
अथ व्यथावशो ऽप्यूचे हा सहासमुखो नृपः ।
तयोर्मन्त्रिन्कुथा मैवं मिथो विप्लुतयोः कथाम् ॥ २१२३॥
इति श्रुत्वा बहिर्गेहाद्गत्वा वीक्ष्य सुधाकरम् ।
एत्यान्तः पाणिना दीपं स्पृष्ट्वा च सचिवो ऽब्रवीत्॥२१२४॥
विधुः सुधामयो ऽप्यापि दहत्यद्यापि पावकः ।
तत्कथं भाषसे गोप शुद्धयोर्विप्लवं तयोः ॥ २१२५ ॥
दर्शयाम्यधुनैवाहं तयोर्व्रतमविप्लुतम् ।
उक्तेन नीरयोगेन नीरोगं त्वां सृजन्नवात् ॥ २१२६ ॥
राजाप्युवाच किं रच्यं वन्मया दोषशङ्कया ।
देव्याः केशोच्चयः कृत्तः कृत्तौ धर्मरुचेः करौ ॥२१२७॥

उवाच सचिवो ऽप्युच्चैर्हा महाराज किं कृतम् ।
तयोर्मुधासि शापेन पापे ऽस्मिन्पतितो ध्रुवम् ॥ २१२८ ॥
तत्तस्याः स्नानपानीयमुपानीय तथाप्यहम् ।
त्वां धर्मरुचिपाणिभ्यां छिन्नाभ्यामपि सेचये ॥ २१२९ ॥
इत्युक्त्वा त्वरितं गत्वा दीर्घदुःखोर्मिकल्मषाम् ।
स पट्टराज्ञीमाचष्ट मन्त्री मधुरया गिरा ॥ २१३० ॥
त्वद्विडम्बनपापेन देवि तापे ऽपतन्नृपः ।
अस्तु त्वदीयस्नानाम्बुस्पर्शपुण्येन निर्व्यथः ॥ २१३१ ॥
इति क्षितिपतिक्लेशश्रुतिपुष्टमहाशुचः ।
पुत्र्याः पितेव स्नानाय देव्या मन्त्री शिरोञ्चलम् ॥२१३२॥
यावच्चकर्ष स प्राग्वत्तावद्धम्मिल्लमैक्षत ।
पूर्वच्युतं च धम्मिल्लं रत्नोर्व्यां तस्य बिम्बवत् ॥ २१३३ ॥
॥ युग्मम् ॥
अहो शीलमहो शीलमिदं देवि तवाद्भुतम् ।
कृत्तो ऽपि केशपाशः स्राग्येनाजनि पुनर्जनिः ॥२१३४॥
इति स्तुतिं सृजन्देव्याः केशान्प्रक्षाल्य तज्जलम् ।
स्वर्णकुम्भस्थमादाय सो ऽगाद्धर्मरुचेः पुरः ॥ २१३५ ॥
अक्षतावेव तस्यापि मन्त्री हस्तौ व्यलोकयत् ।
निर्जितारुणपद्माभौ प्राग्हस्तौ च तयोरधः ॥ २१३६ ॥
अहो ते ब्रह्मचारित्वमहो ते निर्मलं तपः ।
यत्पुण्यामृतसेकेन सद्यः कन्दलितौ करौ ॥ २१३७ ॥
स्नपयाशु स्वपाणिभ्यां देवीस्नानजलैर्नृपम् ।
त्वत्कलङ्कप्रदानोत्थव्यथं निर्व्यथय द्रुतम् ॥ २१३८ ॥
इत्युक्ते सो ऽचलद्यावज्जलकुम्भं सुधीर्दधत् ।

देवतातिशयात्तावद्भिक्षुकुम्भजलं तदा ॥ २१३९ ॥
अभूच्छत्रं निराधारं चारुचामरकीजनम् ।
पुष्पवृष्टिर्जयारावो गगने दुन्दुभिध्वनिः ॥२१४० ॥युग्मम्॥
इत्थं महोत्सवैर्गत्वा तैर्धर्मरुचिरम्बुभिः ।
असिञ्चद्भूपतिं चन्द्रः किरणैरिव कैरवम् ॥ २१४१ ॥
तेनाम्बुना यथौ भूपादद्भूत इव रुग्भरः ।
सद्यः पवनदीप्ताग्निज्वालयेवालिबालधेः ॥ २१४२ ॥
तच्चरित्रचमत्कारवीचीनिचयलीलया ।
चिरं लोलमुखाम्भोजः सो ऽजनिष्ट जनेश्वरः ॥ २१४३ ॥
क्षमयित्वा क्षमाधीशो धीमान्धर्मरुचिं ततः ।
तां च क्षमयितुं देवीं स रुक्मिण्या समं ययौ ॥ २१४४ ॥
सर्वं मम क्षमस्वेति पाणिलग्ने महीभुजि ।
देव्याः पद्द्वये लग्ना रुक्मिणी बाष्पदृग्जगौ ॥ २१४५ ॥
यदेवि पाणिग्रहणे हारिनस्त्वत्कृतिर्मया ।
त्वन्मृत्युकाङ्क्षयादर्शि व्योमयुद्धशवं च यत् ॥ २१४६ ॥
अतुच्छमपि वात्सल्यं बिभ्रत्या मयि सर्वदा ।
मुधा कलङ्कमुत्पाद्य यत्ते ऽकारि विडम्बनम् ॥ २१४७ ॥
विप्रियं यच्च ते ध्यातं नित्यं दुश्चिन्तया मया ।
तन्मम क्षम्यतां सर्वं क्षमावति महासति ॥ २१४८ ॥
॥ त्रिभिर्विशेषकम् ॥
तत्पृष्ठदत्तहस्ताह देवी किं मे त्वया कृतम् ।
सर्वः पूर्वकृतानां हि कर्मणां लभते फलम् ॥ २१४९ ॥
अथ बाहुधृतां देवीं सानुतापो नृपो ऽवदत् ।
अहं ते मूर्तिमत्कर्म येनेदं दर्शितं फलम् ॥ २१५० ॥

सपत्नीमत्सराच्चक्रे वक्रतां रुक्मिणी वरम् ।
प्रिया प्रियेण प्रथका यदराधासि हतो ऽस्मि तत् ॥ २१५१ ॥
निःकृत्रिमप्रेमवती सती हृदयवल्लभा ।
कथं मया विराद्धासि धिग्मां धर्मबहिर्मुखम् ॥ २१५२ ॥
तस्य प्रेमानुबन्धस्य कीदृगाचरितं मया ।
अश्रोतव्यचरित्रो ऽहमद्रष्टव्यमुखो ऽस्मि तत् ॥ २१५३ ॥
एवं जल्पत्यपि क्ष्मापे सा नैवोर्ध्वं शिरो ऽकरोत् ।
प्रियापमानप्राग्भारभारितेव कलावती ॥ २१५४ ॥
ततश्चन्द्रोदरश्चक्रे चित्ते चिन्तामचञ्चले ।
यः स्यादस्या मयि क्रोधः सो ऽल्पः कारणमानतः ॥ २१५५ ॥
तत्प्रसत्तिं प्रिया केनोपायेनासौ विधास्यति ।
यद्वा का मम चिन्तास्याः स्वं तावच्चिन्तयामि न ॥ २१५६ ॥
यमाप्रसत्तेरेषाभूदप्रसन्नाधुना ध्रुवम् ।
स्वयं दाहस्वरूपो ऽग्निर्दहतीन्धनमन्तिके ॥ २१५७ ॥
तत्किमात्मन्प्रसन्नत्वं न त्वं धत्से सदा हृदि ।
यतः प्रसन्ने त्वय्येव प्रसन्नमखिलं जगत् ॥ २१५८ ॥
नं चिन्नयसि चिद्रूप यदि त्वं हितमात्मनः ।
ततस्ते को ऽस्ति यः पीडां धृत्वा तत्कथयिष्यति ॥ २१५९ ॥
त्वमेकः कर्मणां कर्ता भोक्तैकस्तत्फलस्य च ।
अन्ये संयोगजाः सर्वे भावाः कर्मविनिर्मिताः ॥ २१६० ॥
मातृपुत्रपितृभ्रातृकलत्रस्वजनादयः ।
सर्वे स्वार्थाय ताम्यन्ति स्वदर्थाय न कश्चन ॥ २१६१ ॥
सर्वभूतहिता या तु सद्गुरोर्धर्मदेशना ।
संसारव्यवहाराधिगाधे त्वयि न सा स्थिता ॥ २१६२ ॥

तदावेदय वेद्यज्ञ भवान्तं लप्स्यसे कथम् ।
त्वमद्यापि कियत्कर्मा किंस्वरूपः किमुद्यमः ॥ २१६३ ॥
इति चिन्तयतस्तस्य प्रशस्तोज्ज्वलभावनाम् ।
चिक्रीड चेतने चित्तं चिरं वैराग्यरङ्गतः ॥ २१६४ ॥
यथा यथा स्थितं चित्तं ज्योतीरूपे ऽस्य चेतने ।
तथा तथागाद्विलयमातपे करको यथा ॥ २१६५ ॥
विलीने मनसि क्षीणेष्वभितो घातिकर्मसु ।
दग्धरज्जुसमानेषु भवोपग्राहिकर्मसु ॥ २१६६ ॥
सद्ध्यानामृतसिक्तायाः भावनाव्रततेः फलम् ।
चन्द्रोदरो ऽवनीपालः केवलज्ञानमासदत् ॥ २१६७ ॥
॥ युग्मम् ॥

ततः कृते महोत्साहे पुष्पवृष्टिपुरःसरे ।
पद्मावत्या वितीर्णे च मुनिवेषे यथाविधि ॥ २१६८ ॥
कलावत्या धर्मरुचेर्जिनदासस्य मन्त्रिणः ।
दत्त्वा दीक्षां विहृत्योर्व्यां कृत्वा तत्त्वप्रकाशनम् ॥२१६९॥
विधायानशनं मासपर्यन्ते पुण्यभूतले ।
देहं त्यक्त्वा ययौ मुक्तिं चन्द्रोदरमहामुनिः ॥ २१७० ॥
त्रिभिर्विशेषकम् ॥

दानशीलतपोधर्मरहितो ऽपि शिवं पुमान् ।
चन्द्रोदर इवाप्नोति भावनायाः प्रभावतः ॥ २१७१ ॥

इति भावनायां चन्द्रोदरनृपतिकथा ॥

तं चिद्रूपश्चतूरूपं धर्मं सम्यग्निशम्य सः ।
अथ पद्मोत्तरो राजा व्याजहार मुनीश्वरम् ॥ २१७२ ॥
धर्मेश धन्य एवास्मि यस्य भाग्योदयैर्भवान् ।
धर्ममीदृशमाचख्यौ मोक्षश्रीसौख्यकारणम् ॥ २१७३ ॥
मच्चेतसि चमत्कारं विचारस्त्वत्कृतो ऽकृत ।
स्वामिन्नेकस्तु संदेहः प्ररोहं कुरुते हृदि ॥ २१७४ ॥
व्रतं हि गृह्यते सद्भिर्भेत्तुं दुःकर्मणां गणम् ।
ध्यानतः केवलज्ञाने संपन्ने किं फलं व्रतात् ॥ २१७५ ॥
आलोकाय गृहे लोका दीपयन्ति हि दीपकम् ।
स चेच्चण्डांशुतो जातः किं कार्यं तेन तद्दिने ॥ २१७६ ॥
ततः प्रत्युत्तरं प्राह पृथ्वीनाथार्थितो मुनिः ।
उक्तं युक्तं त्वया राजन्किं तु तत्कारणं शृणु ॥ २१७७ ॥
गोत्रवृद्धैर्नरैर्नैव सद्गुणो ऽपि प्रणम्यते ।
अलंकृतनृपश्रीस्तु वन्द्यते नम्रमौलिभिः ॥ २१७८ ॥
एवं न केवलज्ञानी गृहस्थो नम्यते जनैः ।
गृहीतचारुचारित्रः शक्रैरपि स पूज्यते ॥ २१७९ ॥
अतो दिशन्ति चारित्रं केवलज्ञानतो ऽधिकम् ।
तस्मिल्लब्धे ऽपि तल्लब्धुं तेन धावन्ति धीधनाः ॥२१८०॥
एवं निशम्य सम्यक्तत्त्वगौरीं गुरोर्गिरम् ।
अप्रमत्ते चिरं चित्ते धत्ते स्मेति नृपस्तदा ॥ २१८१ ॥
आचख्यौ चतुरो धर्माञ्श्रीमान्यानेषु मे गुरुः ।
संपूर्णमेकमप्येषु न कर्तुमहमीश्वरः ॥ २१८२ ॥
पात्रे क्षेत्रे ऽनुकंप्ये च देयं दानमिति स्थितिः ।
महाव्रतधरा राज्ञो मम दानं न गृह्णते ॥ २१८३ ॥

विषयायत्तचित्तस्य क्रियायामवनीपतेः ।
क्व मे सर्वोत्तमं शीलमजिह्मब्रह्मजीवितम् ॥ २१८४ ॥
उपवासकृतावासमङ्गभङ्गकरं तपः ।
धरोद्धरणधुर्यस्य धवलस्येव मे कुतः ॥ २१८५ ॥
निरन्तरचरच्चिन्ताचान्तस्वान्तस्य सर्वतः ।
मम संयमलीनाया भावनायाः कथा कुतः ॥ २१८६ ॥
यदि राज्यं परित्यज्य द्रुतं गृह्णे महाव्रतम् ।
शुद्धं चतुर्विधं धर्मं कर्तुं स्यां तदहं क्षमः ॥ २१८७ ॥
एवमुद्वेलसंवेगः संप्रधार्य बुधार्यमा ।
स व्यजिज्ञपदिष्टार्थदायकं मुनिनायकम् ॥ २१८८ ॥
प्रभो ज्ञानप्रभाधीश धर्मोद्धरणकारणम् ।
अतुल्यं मातृवात्सल्यमिवादिष्टं त्वयाखिलम् ॥ २१८९ ॥
आनृण्यं पुण्यवाल्लोके भजत्प्रत्युपकारतः ।
भवभ्रमभिदस्तत्त्वोपदेशस्य न ते पुनः ॥ २१९०
आतपोत्तापितस्येव सुधाधाराभिषेचनम् ।
दारिद्र्योपद्रुतस्येव चिन्तारत्नोपलम्भनम् ॥ २१९१ ॥
महान्धकारविवरप्रविष्टस्येव दीपिका ।
पयोधिमध्यनिक्षिप्तस्येव प्रवहणं वरम् ॥ २१९२ ॥
विकटाटविकागर्भभ्रष्टस्येवेष्टसार्थपः ।
अस्ताघकूपपतितस्येवोद्धरणयञ्चिका ॥ २१९३ ॥
अनन्तसंसृतिभ्रान्तिश्रान्तदान्तस्य मे ऽधुना ।
बभूव मुक्तिसंप्राप्यै वाहनं तव दर्शनम् ॥ २१९४ ॥
चतुर्भिः कलापकम् ॥
ततो विस्तारितोपज्ञ श्रीसर्वज्ञगणीतया ।

मम निर्ममनाथ त्वं दीक्षयानुग्रहं कुरु ॥ २१९५ ॥
पुत्रं निवेश्य राज्ये ऽस्मिन्यावदायाम्यहं पुनः ।
सप्रसादैः प्रभो पादैः स्थेयं तावदिहैव हि ॥ २१९६ ॥
सद्गुरूनिति विज्ञप्य प्रविश्य नगरं नृपः ।
राज्ये धनोत्तरं नाम पुत्रमस्थापयन्निजे ॥ २१९७ ॥
मर्त्यान्विमोच्य काराभ्यो निखिलान्भग्नशृङ्खलान् ।
क्रीडामृगांश्च पाशेभ्यः पञ्जरेभ्यः पतत्रिणः ॥ २१९८ ॥
बन्धुवर्गं व्यवस्थाप्य कृतस्नानविलेपनः।
बन्दिभिर्वर्ण्यमानोऽयं गीयमानगुणो जनैः ॥ २१९९ ॥
तूर्यतारस्वरैर्भेरीभाङ्कारैः पूरयन्नभः ।
चैत्येष्वभ्यर्चयन्देवान्ददानो दानमद्भुतम् ॥ २२०० ॥
भर्तृमार्गानुसारिण्यो धन्या एताः क्षितावितिं ।
श्लाघ्याभिः स्वजनैरन्तःपुरीभिः शोभितो ऽभितः ॥२२०१॥
व्रतार्थिभिर्वृतो भूपैरन्वितो नवभूभुजा ।
चचालोदारशृङ्गारः सारकुञ्जरवाहनः ॥ २२०२ ॥
अस्मान्मुक्त्वा ह हा स्वामी व्रतायैवं व्रजेदिति ।
दुःखार्तैर्वीक्षितः पौरैः क्ष्मापः प्राप वनान्तिकम् ॥२२०३॥
षड्भिः कुलकम् ॥
मुक्त्वा हस्तिपरिस्यन्दं त्यक्त्वा छत्रं सचामरम् ।
अनुयातां क्षरद्बाष्पां क्षमयित्वा प्रजां निजाम् ॥ २२०४ ॥
इदं ते ऽङ्गं कथं वत्स व्रतकष्टं सहिष्यते ।
इति जल्पदनुच्छ्वासश्रुमापुच्छचान्तःपुरं पितुः ॥ २२०५ ॥
अहो सत्त्वमहो सत्त्वमिति साधुजनैः स्तुतः ।
प्रविश्योद्यानभाकल्पममुञ्चन्निर्ममो नृपः ॥ २२०६ ॥
त्रिभिर्विशेषकम् ॥

राज्यबन्धं परित्यज्य दक्षः पक्षीव पञ्जरम् ।
आत्मारामाभिरामां स दीक्षाशां शिश्रिये मुदा ॥२२०७॥
कृतकेशोद्धृतिर्नत्वा वज्रनाभगुरुं तदा ।
छत्रीभूते गुरोः पाणौ पपाठेति क्षमापतिः ॥ २२०८ ॥
करोमि भगवन्नेवं सामायिकमिह व्रतम् ।
सर्वं सावद्यकं योगं प्रत्याख्यामि ध्रुवं त्रिधा ॥ २२०९ ॥
तदा केवलिनं राजमुनिं चानम्य भक्तितः ।
साश्रुनेत्रः समं राज्ञा सर्वो लोकः पुरे ऽगमत् ॥ २२१० ।
लब्धसंयमसाम्राज्यो यथाकल्पमनल्पधीः ।
विनयी विजहारैष राजर्षिर्गुरुभिः समम् ॥ २२११ ॥
आचाराङ्गं तथा सूत्रकृच्च स्थानाङ्गमप्यथ ।
समवायाङ्गं विवाहप्रज्ञप्तिर्भगवत्यसौ ॥ २२१२ ॥
ज्ञाताधर्मकथा तस्मादुपासकदशा तथा ।
अथान्तकृद्दशा चानुत्तरौपपातिका दशा ॥ २२१३ ॥
प्रश्नव्याकरणं चात्र विपाकश्रुतमेव च ।
सूत्रादर्थादपीत्येकादशाङ्गान्यथ सो ऽपठत् ॥ २२१४ ॥
त्रिभिर्विशेषकम् ॥

उपवासोनोदरते वृत्त्यल्पत्वं रसोज्झनम् ।
संलीनता वपुःक्लेश इति बाह्यं तपश्चरन् ॥ २२१५ ॥
प्रायश्चित्तं वैयावृत्यं स्वाध्यायो विनयस्तथा ।
कायोत्सर्गश्च सद्ध्यानं तन्वन्नित्यान्तरं तपः ॥ २२१६ ॥
स सद्वीर्यः स्फुरद्धैर्यः सुश्लिष्टान्यपि हेलया ।
कर्माणि जर्जरीचक्रे काननानीव कुञ्जरः ॥ २२१७ ॥
त्रिभिर्विशेषकम् ॥

शुद्धश्रद्धानिधिः साधुर्विंशतिस्थानकान्यथ ।
संस्पृशन्नर्जयामास तीर्थकृन्नामकर्म सः ॥ २२१८ ॥
तथाहि ।
सर्वज्ञे सर्वजन्तूनां बन्धौ श्रेयोध्वदर्शिनि ।
नमनं स्तवनं पूजानुमोदनमसौ व्यधात् ॥ २२१९ ॥
क्षीणकर्मसु लोकाग्रस्थितेषु स्थिरमानसः ।
अयं ध्यानविधानेन सिद्धेष्वाराधनां दधौ ॥ २२२० ॥
श्रीसङ्घरूपे सिद्धान्तरूपे प्रवचने मुनिः ।
आज्ञानतिक्रमेणैष स्वशक्त्या भक्तिमानभूत् ॥ २२२१ ॥
अयं महाव्रताधारे शुद्धधर्मोपदेशिनि ।
आदेशवश्यचित्तत्वादर्चां व्यचरयद्गुरौ ॥ २२२२ ॥
समवायाङ्गविज्ञेषु वयोव्रतमहत्स्वपि ।
स्थविरेषु स्थिरामेष भक्तिं भेजे भवच्छिदे ॥ २२२३ ॥
श्रेयान्सूत्रधरादर्थधरः सूत्रार्थभृत्ततः ।
इति क्रमाद्व्यधाद्भक्तिं कृती श्रुतधरेष्वसौ ॥ २२२४ ॥
तपस्तीव्रं वितन्वत्सु तपस्विषु तपोनिधिः ।
शुश्रूषामेष निःशेषां शुद्धश्रद्धाधरोऽकरोत् ॥ २२२५ ॥
पठने गुणने ऽर्थे च सिद्धान्तस्य मुहुर्मुहुः ।
चिरं तदेकचित्तत्वादुपयोगमयं दधौ ॥ २२२६ ॥
सर्वज्ञधर्मसर्वस्वे सिद्धिसंधिविधायिनि ।
अयं विरचयामास सम्यक्त्वे निश्चलं मनः ॥ २२२७ ॥
ज्ञानस्य ज्ञानपात्रस्य विनये गुणचक्रिणि ।
नातिचारं चकारायमन्तरायं शिवश्रियः ॥ २२२८ ॥
भवकूपारपारेषु व्यपारेषु व्रतश्रियाम् ।

आवश्यकेषु सो ऽक्ष्यं नातिचारपरो ऽजनि ॥ २२२९ ॥
शीले पुण्यलतामूले मूलोत्तरगुणेष्वपि ।
अयं दधार धर्मैकरतिनिरतिचारताम् ॥ २२३० ॥
अयं काले क्षणलवप्रमाणे ऽप्यप्रमत्तधीः ।
ध्यानासेवनसंवेगभावनादीनि नामुचत् ॥ २०३१ ॥
निक्षिप्तमङ्गमूषायां ज्वलितेन तपोग्निना ।
असौ सुवर्णमात्मानमहर्निशमशोधयत् ॥ २१३२ ॥
वस्त्रपुस्तकपात्रान्नमुरुयं स मुनिशेखरः ।
आनीयानीय साधुभ्यः शुद्धं श्रद्धाश्रयो ददौ ॥२१३३॥
एष ग्लानेषु बालेषु गुरुषु स्फुरितादरः ।
नित्यं सर्वजनस्तुत्यं वैयावृत्त्यं व्यधत्त सः ॥ २२३४ ॥
केनापि करणेनोच्चैरसमाधिगतं मनः ।
सर्वेषां ज्ञापयामास समाधिमयमग्निभित् ॥ २२३५ ॥
नित्यं नवनवं ज्ञानं ज्ञानावरणकर्महृत् ।
श्रवणाध्ययनव्याख्यानुग्रहैरयमग्रहीत् ॥ २२३६ ॥
आनन्दमग्नो रोमाञ्चस्तोमाञ्चिततनुश्चिरम् ।
श्रुते भक्त्या ददौ चित्तं लोलमौलिर्मुहुर्मुहुः ॥ २२३७ ॥
धर्मव्याख्यान्यवादीन्द्रप्रत्याख्याकवितादिभिः ।
गुणैर्जज्ञे स सर्वज्ञशासनस्य प्रभावकः ॥ २२३८ ॥
इत्युपार्जिततीर्थेशनामकर्मा समाहितः ।
व्रतिव्रातवृतो विश्वं बोधयन्विजहार सः ॥ २२३९ ॥
दक्षाः साक्षात्पुरो लक्षास्तस्यामृतकिरं गिरम् ।
पातुमीयुः खगोत्तंसा हंसा इव नदीं दिवः ॥ २२४० ॥
तपोलब्धिभिराकृष्टाः सुरासुरनरोरगाः ।

तमसेवन्त विनयं विषणादिगुणा इव ॥ २२४१ ॥
एवं धात्रीं चरित्रेण पवित्रीकृत्य स प्रभुः ।
भवाभोगमहारोगभङ्गायानशनार्ह्यभूत् ॥ २२४२ ॥
विज्ञाय केवलज्ञानी वज्रनाभः प्रभुस्ततः ।
तत्पुण्यैस्तत्तदा स्थानं प्राप पापहरो गुरुः ॥ २२४३ ॥
तस्यानशनचित्तस्य मुदे ऽभूद्गुरुदर्शनम् ।
यथा चन्दनसिक्तस्य मलयानिलसंगमः ॥ २२४४ ॥
अथ हर्षोल्लसद्रोमहर्षो राजर्षिशेखरः ।
गुरुपादाब्जयोर्भृङ्गभङ्गीमङ्गीचकार सः ॥ २२४५ ॥
असावनशनं साधुराधाय गुरुसंनिधौ ।
चक्रे ललाटघटिताञ्जलिरालोचनामिति ॥ २२४६ ॥
चिरमव्यवहाराख्यराशौ निवसता मया ।
अनन्तजन्तुसन्तानं यद्दुःखं क्षमयामि तत् ॥ २२४७ ॥
व्यवहाराख्यराशौ च पृथ्वीकायभृता मया ।
लोहलोष्ठोपलीभूय ये हताः क्षमयामि तान् ॥ २२४८ ॥
नदीनदीशकूपेषु जलरूपेण ये मया ।
जन्तवः संश्रिताः के ऽपि संहृताः क्षमयामि तान् ॥२२४९॥
प्रदीपनतडिद्दावदीपप्रभृत्तिमूर्तिना ।
ये मया जघ्निरे तेजस्कायेन क्षमयामि तान् ॥ २२५० ॥
महावृष्टिहिमग्रीष्मधूलिदुर्गन्धबन्धुना ।
ये मया वायुकायेन व्यथिताः क्षमयामि तान् ॥ २२५१ ॥
पीडिता दण्डकोदण्डकाण्डस्यन्दनलाभृता ।
ये वनस्पतिनात्मानो मयात्र क्षमयामि तान् ॥ २२५२ ॥
अथ कर्मवशादाप्यत्रसतामसता मया ।

रागद्वेषमदान्धेन ये ऽर्दिताः क्षमयामि तान् २२५३ ॥
अपराधं क्षमन्तां मे ते ऽपि सर्वत्र जन्तवः ।
सर्वभूतेषु मे मैत्र्यमास्तां वैरं न कुत्रचित् ॥ २२५४ ॥
महाव्रतेषु यः कश्चिदतीचारः कृतो मया ।
मिथ्या मे दुष्कृतं तत्र भवताद्गुरुसाक्षिकम् ॥ २२५५ ॥
राशावव्यवहाराख्ये ऽनन्तजन्तुप्रघट्टनात् ।
यया मे कर्म कृत्तं तां पीडामप्यनुमोदये ॥ २२५६ ॥
जिनानां प्रतिमाचैत्यभृङ्गारमुकुटादिषु ।
यो मे पृथ्वीमयः कायो जज्ञे तमनुमोदये ॥ २२५७ ॥
जिनस्नानेषु पात्रेषु दैवादुपकृतो भवेत् ।
यो मे जलमयः कायः प्रायस्तमनुमोदये ॥ २२५८ ॥
धूपाङ्गारे च दीपे च जिनानां पुर एव यः ।
मम तेजोमयः कायो जातस्तमनुमोदये ॥ २२५९ ॥
धूपोत्क्षेपे ऽर्हतां सङ्घे श्रान्ते वा तीर्थवर्त्मसु ।
यो मे वायुमयः कायो ववौ तमनुमोदये ॥ २२६० ॥
मुनीनां पात्रदण्डेषु जिनार्चाकुसुमेषु च ।
मम द्रुममयः कायो यो ऽभूत्तमनुमोदये ॥ २२६१ ॥
क्वापि सत्कर्मयोगेन जिनधर्मोपकारकः ।
आसीत्त्रसमयः कायो यो मे तमनुमोदये ॥ २२६२ ॥
इत्यनन्तभवोपात्तं दुष्कृतौघमगर्हत ।
कदाचिद्व्रचितं किंचित्सुकृतं चान्वमोदत ॥ २२६३ ॥
शरणं तीर्थकृत्सिद्धसाधुधर्मा भवन्तु मे ।
इत्यालापमथः सो ऽथ चतुःशरणमाश्रितः ॥ २२६४ ॥
परित्यक्तनिदानो ऽसौ मृत्युजीवितनिःस्पृहः ।

भवमोक्षनिराकाङ्क्षः समाधिं साधुरासदत् ॥ २२६५ ॥
वारं वारं नमस्कारानुच्चरन्परमेष्ठिनाम् ।
गतप्रमोदो निस्तापः प्राप साधुरयं लयम् ॥ २२६६ ॥
एवं समाधिलब्धस्य मृत्योर्बाधामसंविदन् ।
पूर्णमासोपवासो ऽयं प्रापेदं प्राणतं दिवम् ॥ २२६७ ॥
सुरश्चन्द्रप्रभासाख्ये विमाने ऽतिमहर्द्धिकः ।
अन्तर्मुहूर्तात्पर्याप्तसर्वपर्याप्तिवैभवः ॥ २२६८ ॥
तल्पमच्छादनं प्रातः संध्याकालमिवार्यमा ।
उत्सार्यातिरभूदेष प्रभाप्राग्भारभासुरः ॥ २२६९ ॥
॥ युग्मम् ॥
कैः पुण्यैरियमुत्पन्ना ममर्द्धिरिति विस्मितः ।
अवधिज्ञानविज्ञानं प्राग्भवं सो ऽन्वमोदत ॥ २२७० ॥
तद्विमानपरीवारः सुरवारस्तदोत्सवान् ।
चकार तत्पुरः स्फारस्फुरज्जयजयारवः ॥ २२७१ ॥
नाथ नस्त्वमनाथानां नाथः पुण्यैः प्रकल्पितः।
चिरं जय चिरं जीव चिरं पाह्यनुजीविनः ॥ २२७२ ॥
इत्यादिवादी देवानां देवीनां च समुच्चयः ।
तं ननाम प्रतेने च पञ्चशब्दोदयं मुदा ॥ २२७३ ॥
रङ्गदुत्तुङ्गमङ्गल्यः पल्यङ्कादुत्थितस्ततः ।
कृतवैक्रियरूपर्द्धिः क्रीडावापीमवाप सः ॥ २२७४ ॥
सस्नौ स तत्र विक्षोभोल्लोलकल्लोलपाथसि ।
तन्मुखालोकनव्रीडामग्नहेमपयोरुहि ॥ २२७५ ॥
दृष्ट्वा सुरविधेयानां निधानं सो ऽथ पुस्तकम् ।
भक्त्या विमानचैत्यस्थं नित्यार्हन्तमपूजयत् ॥ २२७६ ॥

सिंहासनं विमानश्रीकिरीटमभिभूष्य सः ।
अथानन्दोर्मिमग्नाक्षो दिव्यं प्रेक्षणमैक्षत ॥ २२७७ ॥
कदापि केलिवापीषु कदाचिन्नन्दने वने ।
विललास स कान्ताभिर्विलास इव मूर्तिमान् ॥ २२७८ ॥
कदाचिज्जिनयात्रासु विजहार सहामरैः ।
कदाचिन्निर्ममे धर्मक्षेत्रे सत्पुरुषस्तुतीः ॥ २२७९ ॥
भविष्यज्जिनभावोत्थैः वपुर्गुणैरद्भुतैः ।
जयन्निन्द्रानपि ययौ जिनकल्याणिकेषु सः ॥ २२८० ॥

इत्थं प्रतिक्षणविनिर्मितदेवकृत्यो
नित्योत्सवैः प्रविलसन्भृशमप्रमत्तः ।
आलोलमौलिमुरमण्डलकर्णदोला–
केलीसुखः स्फुरितचारुचरित्रकीर्तिः ॥ २२८१ ॥
अभ्यर्णतीर्थविभुताविभवेषु लुभ्य–
न्नभ्यापतद्यवनकालशुचाप्यशान्तः ।
आह्लादनत्वमपि महामहिमा विमानै
तस्मिन्नसौ रसमयं समयं निनाय ॥ २२८२ ॥

इति दण्डाधिपतिश्रीमदाह्लादनसमभ्यर्थितश्रीविजयसिंहसूरिशिष्यश्रीवर्धमानसूरिविरचिते श्रीवासुपूज्यचरित आह्लादनाङ्के महाकाव्ये तीर्थंकरकारणलब्धिवर्णनो नाम द्वितीयः सर्गः ॥

॥ अथ तृतीयः सर्गः ॥

इतश्च संख्यातीताब्धिद्वीपमण्डलवेष्टितः
द्वीपो ऽस्ति जम्बूद्वीपाख्यो स्वजम्बूद्रुमाङ्कितः ॥ १ ॥
स्फुरन्तौ परितो बिभ्रद्वृत्तौ द्वौ हिमवच्छ्रियौ ।
स्वर्णभूभृद्भ्रमौ यत्र ऋतुपौष्पिकवाजिवत् ॥ २ ॥
अन्तर्मेरुमणिस्तम्बां धर्मरक्षाविधौ बुधः ।
यः सदा विजयश्रेणिं वीरः फलकवद्दधौ ॥ ३ ॥
कुग्राहो यः स्फुदक्षारो जलमूर्तिर्मलीमसः ।
रारटीति लुठन्भूमौ सिन्धुर्येन बहिःकृतः ॥ ४ ॥
तत्रास्ति भारतं क्षेत्रं षड्भूखण्डानि यद्दधौ ।
षण्मन्त्रमण्डलानीव रक्षितुं षड्भिधात्मनः ॥ ५ ॥
अवनीवनिताभालस्थलीकामितस्थिति ।
यत्र श्रीखण्डरेखेव राजते राजतो गिरिः ॥ ६ ॥
इहास्ति हास्तिकस्तोममदार्द्रीभूतभूतला ।
संपत्संपादितस्वर्गकम्पा चम्पाभिधा पुरी ॥ ७ ॥
कृतपापविषग्रासाः प्रासादाः काममर्हताम् ।
यस्यां पताकाजिह्माग्रैर्लिहन्तीव सुधाकरम् ॥ ८ ॥
यस्यामनुपमानो ऽपि सोपमानो ऽवजन्मनः ।
मणिमन्दिरभूमीषु स्वैरेव मतिबिम्बितैः ॥ ९ ॥
निर्निमेषा मिथो रूपदर्शनाद्दम्पतिव्रजाः ।
धर्मक्षेत्रे बभुर्यत्र स्वर्गौघा इवागताः ॥ १० ॥
रत्नकुम्भा धृताः मौलैर्यत्र चैत्यैः सतां पुरः ।

मोहध्वान्तद्रुहो दीपा इव मोक्षाध्वदर्शने ॥ ११ ॥
इक्ष्वाकुकुलराजीवलक्ष्मीसंजीवनौषधम् ।
तत्र प्रतापोष्णवासुर्वसुपूज्यो ऽभवन्नृपः ॥ १२ ॥
शोषिता यत्प्रतापेन द्विषतां शौर्यवल्लयः ।
पत्रैरिवासिभिर्भ्रष्टै रणारण्यमपूरयन् ॥ १३ ॥
कामधुग्दुग्धनिर्धौते चिन्तामणिशिलातले ।
कल्पद्रुकुसुमाकीर्णे यद्दानश्रीर्नटत्यहो ॥ १४ ॥
नित्यं यदीयधर्मस्य वर्धमानस्य सर्वतः ।
चैत्यश्रियः स्म तन्वन्ति न्युञ्छनानि ध्वजाञ्चलैः ॥१५॥
निःसृतां रणरेणुभ्यः स्नातामर्थिमुदश्रुभिः ।
चैत्यधूपनधूमैर्यः प्रियां कीर्तिमधूपयत् ॥ १६ ॥
तस्याग्रमहिषी जज्ञे स्वर्गस्त्रीजयिनी जया ।
जितं भासेव वक्त्रेन्दोर्नासीद्यस्याः स्मितं बहिः ॥ १७ ॥
त्रैलोक्यस्त्रीजयप्राप्तपताकात्रितयोपमम् ।
कम्बुकण्ठ्या ध्रुवं कण्ठस्तस्या रेखात्रयं दधौ ॥ १८ ॥
अङ्गुलीपल्लवोल्लासि नखांशुकुसुमाञ्चितम् ।
असेवि भूपदृग्भृङ्गैर्यस्या बाहुलतायुगम् ॥ १९ ॥
काञ्चीपट्टो नितम्बे ऽस्ति मदधःस्थे ऽपि नो मयि ।
इतीव दुःखितस्तस्या मध्यदेशः कृशो ऽभवत् ॥ २० ॥
अब्जेष्व एव क्रमौ यस्या न हंसो यदसेवत ।
गतिनिर्जयलज्जैव जानीमस्तत्र कारणम् ॥ २१ ॥
सत्यप्यन्तःपुरे तस्यां रेमे क्ष्मापतिमानसम् ।
लक्ष्ये नक्षत्रलक्षे ऽपि चक्षुश्चन्द्रतनौ व्रजेत् ॥ २२ ॥
तस्य विश्वम्भराभर्तुः प्रतापामिव सेवितुम् ।

एकदागच्छदुग्रोष्मा ग्रीष्मो ऽत्युग्रत्वलब्धये ॥ २३ ॥
हेलया कवलीकृत्य सकलामपि यामिनीम् ।
स्वाद्वैतमिव निर्मातुमवर्धत दिनोच्चयः ॥ २४ ॥
प्रतापाधिक्यमालोक्य द्विषतो दिवसेशितुः ।
दुःखादिव कृशीभावमभजन्त भृशं निशाः ॥ २५ ॥
सरोवरसरिद्वारिशोषे तोषेण कूपगाः ।
विश्वोपकारसाम्राज्यात्पापुरापस्तुषारताम् ॥ २६ ॥
आकर्षन्ति ध्रुवं वारि करा भानोर्धरातलात् ।
जलैः क्लिन्नानि यत्सङ्गादङ्गान्यङ्गभृतां यतः ॥ २७ ॥
तप्ता तपनतापेन च्छायापि हि महीरुहाम् ।
ययौ मध्यंदिने मूलमालवालाम्बुशीतलम् ॥ २८ ॥
यस्तप्तैः शान्तये सेव्यः सा ऽपि तप्तो मरुद्भवौ ।
इति भूपो हिमश्वासप्रियासक्तिं न सो ऽमुचत् ॥ २९ ॥
तदा च पूरयित्वायुः सागरोपमविंशतिम् ।
ज्येष्ठे नवम्यां शुक्लायां चन्द्रे शतभिषग्गते ॥ ३० ॥
स प्राणताज्जयाकुक्षिं प्राप पद्मोत्तरामरः ।
शुक्तिं मुक्तोद्भवमयः पयःकण इवाम्बुदात् ॥ ३१ ॥
॥ युग्मम् ॥

तदात्यद्भुतसंभूतभर्माभित्तिमनोरमे ।
नीलाश्मस्तम्भावष्टम्भरत्नपाञ्चालिकाञ्चिते ॥ ३२ ॥
वर्तुलामलमुक्तावचूलितोल्लोचमञ्जुले ।
अस्तोकालोकमाणिक्यदीपध्वस्ततमस्तमे ॥ ३३ ॥
उत्फुल्लमल्लिकापुष्पप्रकरामोदसंपदि ।
दह्यमानाग्र्यकस्तूरीकर्पूरागुरुधूपने ॥ ३४ ॥

शोभाभिभूतजम्भारिविमाने वासवेश्मनि ।
दुकूलास्तीर्णसत्तूलातुल्यपल्यङ्कसंश्रया ॥ ३५ ॥
सर्वसौख्यमयस्वल्पनिद्रामुद्रितलोचना ।
अतिव्यक्ताऽभयादेवी स्वप्नानेतानवैक्षत ॥ ३६ ॥

पञ्चभिःकुलकम् ॥

मत्स्वामिसेव्यस्त्वत्सूनुरयं देवि भविष्यति ।
इतीवाख्यातुमायातं सैरावतमवलोकत ॥ ३७ ॥
क्षमाभारवहो मद्वद्भावी ते देवि नन्दनः ।
इतीवाग्रे स्थितं साक्षाद्ददर्शादृषभं जया ॥ ३८ ॥
त्वत्सूनुर्द्वेषमत्तेभं हन्तायं मद्वदित्यथ ।
विज्ञापकमिवैक्षिष्ट सुमुखी नखरायुधम् ॥ ३९ ॥
त्वत्सूनुमाश्रिताया मे देवि चापलदूषणम् ।
यास्यतीतीव विज्ञप्त्यै प्राप्तां लक्ष्मीं ददर्श सा ॥ ४० ॥
देवि त्वन्नन्दनो मद्वद्भावी सत्कीर्तिसौरभः ।
इति व्याख्यायिनीमग्रे सापश्यत्कुसुमस्रजम् ॥ ४१ ॥
त्वत्पुत्रवद्दुनौपम्यं बुधैर्दास्यिते मम ।
इत्याख्यातुमिवाभ्येतमियं पूर्णेन्दुमैक्षत ॥ ४२ ॥
हन्ता मोहमयीं रात्रिं त्वद्वूरयमहं यथा ।
इति ज्ञापयितुं मन्ये स्थितमैक्षत सा रविम् ॥ ४३ ॥
अमुं वंशे ध्वजं देवि स्वं पुत्रं विद्धि मामिव ।
इतीव वक्तुमग्रस्थं ध्वजमेषा न्यभालयत् ॥ ४४ ॥
स्थानं ज्ञानादिरत्नानां मद्वत्ते भविता सुतः ।
इतीव गदितुं प्राप्तं निधिकुम्भं ददर्श सा ॥ ४५ ॥
मद्वदेष जगत्तृष्णां छेत्ता त्वत्तनुभूरिति ।

शङ्के कथयितुं पद्मसरः साग्रस्थमैक्षत ॥ ४६ ॥
गम्भीरो ऽहमिव त्वद्भूभावीति गदितुं किल ॥
रत्नाकरमुपेतं सा पश्यति स्म नृपप्रिया ॥ ४७ ॥
निर्भाग्यैर्दुर्लभस्त्वद्भूर्मद्भदेष भविष्यति ।
इतीव शंसितुं प्राप्तं विमानं सा व्यलोकयत् ॥ ४८ ॥
त्वद्भूर्भावी जगद्भूषा मद्भदेष इति ध्रुवम् ।
आख्यातुमागतं रत्नस्थालयालोकते स्म सा ॥ ४९ ॥
कर्मेन्धनानि त्वत्सूनोर्ध्यानं धक्ष्यत्यहं यथा ।
इतीव वक्तुमग्रस्थं साग्निं निर्धूममैक्षत ॥ ५० ॥
समालोकत तत्कालमुन्मेषान्तरितेष्वसौ ।
मुखे विशन्ति वस्तूनि स्वप्नेष्वेवं चतुर्दश ॥ ५१ ॥
अथाशु निद्रापर्यन्ते पर्यङ्कादियमुत्थिता ।
पत्युश्चकार चतुरा चाटुवाचां प्रपञ्चनम् ॥ ५२ ॥
सा च पृथ्वीभुजि प्रीतिभुजि संजातसागरे ।
स्वप्नांश्चतुर्दश स्पष्टतरदृष्टानचीकथत् ॥ ५३ ॥
अमन्दानन्दसंदर्भगर्भं भूपतिरभ्यधात् ।
स्वप्नैरेभिः सुतो देवि दिव्यस्तव भविष्यति ॥ ५४ ॥
इहान्तरे वितस्तार तारस्तूर्यशुभध्वनिः ।
इमं च रुचिरं श्लोकं पेठुर्मङ्गलपाठकाः ॥ ५५ ॥
पूर्वाद्रिचूडागर्भस्थो जगत्त्रितयपावनः ।
भास्वानेष भुवो भर्ता भवतात्तव नन्दनः ॥ ५६ ॥
इमामुपश्रुतिं श्रुत्वा दधती द्विगुणां मुदम् ।
बबन्ध शकुनग्रन्थिं पृथ्वीवल्लभवल्लभा ॥ ५७ ॥
सद्गर्भभूषिते देवि धन्ये सौधं विभूषय ।

इति राज्ञाभ्यनुज्ञाता ययावन्तःपुरं जया ॥ ५८ ॥
तस्मिन्नेव क्षणे जातासनप्रचलनेरिताः ।
परिज्ञायावधिज्ञानादाद्यं कल्याणिकं प्रभोः ॥ ५९ ॥
आवासे वसुपूज्यस्य द्वात्रिंशत्त्रिदशेश्वराः ।
आगत्य स्तवनं चक्रुर्गर्भस्थस्य जिनेशितुः ॥ ६० ॥युग्मम्॥
जय त्रिभुवनाधीश ज्ञानत्रयनिकेतन ।
गर्भस्थो ऽपि सतां तुष्ट्यै घनान्तर इवांशुमान् ॥६१ ॥
भवाम्भोधेः परं पारमिवान्त्यं गर्भमाश्रितः ।
कस्य नाश्रयणीयो ऽसि जगत्त्रितयतारक ॥ ६२ ॥
जये देवि नमस्यासि यस्याः कुक्षौ जगत्पतिः ।
कल्पद्रुर्यत्र जायेत सा स्तुत्या वनभूरपि ॥ ६३ ॥
स्त्रीषु त्वमेव धन्यासि जननी या जिनेशितुः ।
पूर्वैव श्लाघ्यते दिक्षु यस्यामुदयते रविः ॥ ६४ ॥
जिनं तज्जननीं चेति स्तुत्वा नत्वा च भक्तितः ।
पुष्पवन्धुरगन्धाम्बुवृष्टिविस्तारचारवः ॥ ६५ ॥
नन्दीश्वरवरे कृत्वा स्पष्टमष्टाह्निकोत्सवम् ।
धन्यंमन्या दिवं जग्मुः सर्वे गीर्वाणपुङ्गवाः ॥ ६६ ॥
॥ युग्मम् ॥
स्वप्नेष्विन्द्रेषु चागत्याप्यतृप्त इव भानुमान् ।
प्रभोः कल्याणिके प्राप्तः पुनरप्युदयच्छलात् ॥ ६७ ॥
तदावतीर्णमालोक्यान्तरध्वान्तभिदं विभुम् ।
तमो बाह्यमपि त्रस्तं निःशङ्काः कश्मलाः क्व नु ॥ ६८ ॥
विज्ञायेव प्रभोराद्यं कल्याणिकमहोत्सवम् ।
राजीविन्यो जगुर्भृङ्गनिनादैर्ननृतुर्दलैः ॥ ६९ ॥

गुणिन्यो ऽपि वयं दोषाकरेच्छा इति लज्जया ।
संन्यमीलन्कुमुद्वत्यो ऽवतीर्णे ज्ञानिनि प्रभौ ॥ ७० ॥
नाथे ऽवतीर्णे निर्वाणद्वारोद्घाटनसूचकाः ।
कपाटा उद्घटन्ते स्म धर्मस्थानेषु सर्वतः ॥ ७१ ॥
त्रैलोक्यैकप्रदीपे ऽस्मिन्नवतीर्णे सति प्रभौ ।
लज्जयेव भवन्ति स्म विच्छाया गृहदीपकाः ॥ ७२ ॥
भविष्यति प्रभोर्धर्मव्याख्या पीयूषवर्षणी ।
क्षीणः प्रागेव चक्राणां विप्रयोगहुताशनः ॥ ७३ ॥
भूपः श्रीवसुपूज्यो ऽथ कृतप्राभातिकक्रियः ।
नभोभागं यथा भानुः सभाभागं व्यभूषयत् ॥ ७४ ॥
जानन्नपि जिनेन्द्रस्यावतारं वासवोत्सवैः ।
परं मुहुः कृता वार्ता प्रियाप्रीत्यै भवेदिति ॥ ७५ ॥
तूर्णमानीय सन्मान्य स्थापितैः स्वप्नकोविदैः ।
व्याख्यापयन्नृपः स्पष्टदृष्टान्स्वप्नांश्चतुर्दश ॥ ७६ ॥ युग्मम् ॥
अथैते प्रथितान्स्वप्नग्रन्थानालोक्य धीधनाः ।
विचार्य चिरमन्योन्यमुच्चै रोमाञ्चिता जगुः ॥ ७७ ॥
स्वामिन्नेकैकमप्येषु स्वप्नेषु स्वप्नमीक्षले ।
या कापि स्त्री प्रसूते सा तनयं सनयं नृपम् ॥ ७८ ॥
एतेषु वीक्षते क्ष्माप या तु स्वप्नचतुष्टयम् ।
सीरिणं वैरिणां शल्यमतुल्यं जनयत्यसौ ॥ ७९ ॥
या पुनः पश्यति स्वप्नान्सप्तैतेषु नृशेखर ।
भरतार्धस्य भोक्तारं सा सारं जनयेत्सुतम् ॥ ८० ॥
चतुर्दशाप्यमून्स्वप्नान्या पश्येत्किंचिदस्फुटान् ।
सा प्रभो प्रमदा सूते नन्दनं चक्रवर्तिनम् ॥ ८१ ॥

इयं पुनर्जयादेवी स्फुटानेतानवलोकत ।
तत्प्राय त्रिजगन्नाथं स जिनं जनयिष्यति ॥ ८२ ॥
यदेव्या ददृशे दन्ती चतुर्दन्ती शुभाननः ।
तच्चतुःशुद्धधर्मोपदेष्टास्या भविता सुतः ॥ ८३ ॥
गमिष्यति सुतो देव्या वृषभस्य निरीक्षणात् ।
क्षेत्रे ऽस्मिन्भारते बोधिबीजतानिमित्तताम् ॥ ८४ ॥
मृगेन्द्रमार्गणादेव्या नन्दनः पालयिष्यति ।
दुःकर्मकरिभिर्भज्यमानानभव्यवनस्पतीन् ॥ ८५ ॥
एतस्याः साभिषेकश्रीदर्शनान्नन्दनः पुनः ।
सांवत्सरं ददद्दानं श्रियं पुण्यां करिष्यति ॥ ८६ ॥
अमुष्या भविता सूनुः प्रसूनस्रग्विलोकनात् ।
सुरासुरनराधीशैर्मौलौ धृतपदः सदा ॥ ८७ ॥
पूर्णेन्दुदर्शनादेव्या नन्दनो नेत्रनन्दनः ।
दास्यते वीतरागात्मा नित्यं कुवलये मुदम् ॥ ८८ ॥
मार्तण्डमण्डलालोकात्सूनुरस्या भविष्यति ।
मार्तण्डमण्डलाखण्डभामण्डलविभूषणः ॥ ८९ ॥
ध्वजस्य दर्शनादेव्यास्तनुजन्मा तनिष्यते ।
स्वं प्रभुत्वं पुरःस्फूर्जद्दिव्यधर्मध्वजश्रिया ॥ ९० ॥
कलशालोकनात्पुत्रः सुव्रतो ऽस्याः करिष्यति ।
उत्तुङ्गोज्ज्वलसद्धर्मप्रासादशिखरस्थितिम् ॥ ९१ ॥
विहरिष्यति पुत्रो ऽस्याः कमलाकरदर्शनात् ।
सुरसंचारितस्वर्णसरोजस्थापितक्रमः ॥ ९२ ॥
गम्भीरस्तनयो देव्या रत्नाकरनिरूपणात् ।
केवलालोकरत्नस्य स्थानमर्हन्भविष्यति ॥ ९३ ॥

विमानवीक्षणात्पुत्रो जयादेव्या भविष्यति ।
वैमानिकनिकायानां स्वर्गोदुत्तारकारणम् ॥ ९४ ॥
भविष्यति कुमारोऽस्या रत्नजालनिभालनात् ।
उदाररत्नभाकारमध्यसद्धर्मदेशनः ॥ ९५ ॥
सुतोऽस्या भविता भास्वद्वैश्वानरनिरीक्षणात् ।
भव्यलोकात्मकल्याणशुद्धिनिर्माणकारणम् ॥ ९६ ॥
दृष्ट्वाश्चतुर्दश स्वप्ना यदेव्या तत्तदङ्गजः ।
सं चतुर्दशरज्ज्वात्मलोकाग्र्यं पदमाप्स्यति ॥ ९७ ॥
एवं निशम्य रम्यं तन्नृपः कर्णामृतं वचः ।
ददौ दुकूलताम्बूलाद्यपारं पारितोषिकम् ॥ ९८ ॥
सभालोकं विसृज्याथ पृथ्वीनाथो यथोचितम् ।
सनाथं श्रीजयादेव्या जगामान्तःपुरं मुदा ॥ ९९ ॥
अथोत्थाय स्वयं देव्या सज्जितं विष्टरं नृपः ।
अलंचक्रे ततः सापि प्रियादेशादुपाविशत् ॥ १०० ॥
रोमाञ्चिततनोर्देव्याः पुरः स्फुरितसंमदः ।
नैमित्तिकोपदिष्टानि जगौ स्वप्नफलानि सः ॥ १०१ ॥
इदं ते कथितं नाथ भूयादवितथं वचः ।
इत्युक्त्वा शेखरीचक्रे करौ सा कमलेक्षणा ॥ १०२ ॥
इत्थं पुत्राश्रितैः प्रीतिभाषितैर्भर्तृभार्ययोः ।
दिनाः कालकलामाना जग्मुः सौख्यमया रयात् ॥१०३॥
गर्भस्याद्भुतमाहात्म्यादाधिव्याधिभयव्यथाः ।
तस्या अङ्गे तथा द्रङ्गे न बभूवुस्तदा क्वचित् ॥ १०४ ॥
प्रभोः प्रभावतस्तस्याः सौधस्याजिरमादरात् ।
मार्जयांचक्रिरे वायुकुमार्यो वर्षभक्तयः ॥ १०५ ॥

अभ्यषिञ्चंस्तदम्भोदकुमार्यो गन्धवारिभिः ।
ऋतुदेव्यो मुदा पुष्पप्रकरानकिरन्निह ॥ १०६ ॥
व्यन्तर्यस्तनुशुश्रूषां किंकर्य इव चक्रिरे ।
ज्योतिष्कयोषितो रत्नमयादर्शमदर्शयन् ॥ १०७ ॥
कारयांचक्रिरे क्रीडां हृद्यां विद्याधरस्त्रियः ।
कामं किन्नरकामिन्यो गीतिरीतिं वितेनिरे ॥ १०८ ॥
चतुर्भिः कलापकम् ॥

क्लिश्यतामर्हतो माता मा तापैर्मद्भवैरिति ।
तदा कादम्बिनीवृन्दान्तरस्तरणिरस्फुरत् ॥ १०९ ॥
जिनाधिपजनिस्नानादासन्ना मे पवित्रता ।
इति हर्षादिवानृत्यदुच्चैरम्बु तदाम्बुधेः ॥ ११० ॥
उदेष्यति जिनार्चीशे दिनार्चीशे ऽरुणोदयः ।
पुष्पितैः पाटलारामैर्बभूव भुवने तदा ॥ १११ ॥
जिनेन्द्रजननीपादस्पर्शात्पावनमानिनी ।
वात्यावर्तरजोव्याजादुद्धुनैव ननर्त भूः ॥ ११२ ॥
गायन्तं मल्लिकाभृङ्गैः क्षिप्त्वा ग्रीष्मं तपात्ययः ।
स्वामिमातुर्मुदे मेघमर्दलौघमघोषयत् ॥ ११३ ॥
तेजस्विभृदसौ यादृक्तादृग्नाहमिति ध्रुवम् ।
जयादेव्यास्तडिद्भिर्यौरारात्रिकमिवाकरोत् ॥ ११४ ॥
वृष्टिसिक्ता ध्रुवं धूपधूमं वाष्पैः सुगन्धिभिः ।
देव्या नृरत्नगर्भाया रत्नगर्भाप्युदक्षिपत् ११५ ॥
निवार्य वार्धिवीचीनामुच्चैः कोलाहलं दिशः ।
जयादेवीं स्तुवन्ति स्म केकिकेकारवैरिव ॥ ११६ ॥
आनीतमब्दैर्हृत्वाब्धेर्व्याघुट्येव नदीरयैः ।

धरार्पणत्रयः स्वामिमत्यासत्येव धर्मवित् ॥ ११७ ॥
सुमनोभिः कृतो जानिकदम्बनवकेतकैः ।
एष्यते त्रिजगन्नाथे भृङ्गीगीतैस्त्रिधोत्सवः ॥ ११८ ॥
तापशान्तिप्रसन्नायास्तदा तादृक्सुतोचिताः ।
आसन्देव्या मुदा बद्धसौहृदा दोहदा हृदि ॥ ११९ ॥
एत्य त्रिभुवनस्यापि स्वामिनः प्रणमन्तु माम् ।
दौःस्थ्यच्छेदनिदानं च ददे दानं जगन्मुदे ॥ १२० ॥
कुर्वे वात्सल्यतः शर्म धर्मनिर्मलवृत्तिषु ।
जगत्त्रयभयाभोगभङ्गमङ्गीकरोमि च ॥ १२१ ॥
इत्येषु पूर्यमाणेषु दोहदेषु बलिद्विषा ।
प्रमोदेन समं देव्याः स गर्भो ववृधे क्रमात् ॥ १२२ ॥
त्रिभिर्विशेषकम् ॥

यथार्भकगृहं क्रोडपरिक्रीडिनि दीपके ।
स्त्रियः स्वच्छांशुकं मध्यस्थिते चूडामणौ यथा ॥ १२३ ॥
अभिप्राये स्फुरत्यन्तः सुकवीनां यथा वचः ।
तथा गर्भस्थिते देवे तदङ्गं द्युते ऽधिकम् ॥ १२४ ॥
युग्मम् ॥

संतोषैकस्वभावस्य संसर्गेण प्रभोरिव ।
अत्यासक्तिं वितेने ऽसौ मधुरे ऽपि न भोजने ॥ १२५ ॥
आनन्दस्मितकान्त्येव निर्यान्त्या रोमकूपकैः ।
कलयामासतुस्तस्याः कपोलौ धवलां कलाम् ॥ १२६ ॥
देव्याः प्राप्तो ऽपि पुत्रत्वं स्वाङ्गुष्ठामृतपानकृत् ।
विश्वस्वामी न नौ पीतेत्यस्याः श्यामाननौ स्तनौ ॥ १२७ ॥
विश्वैश्वर्ये ऽप्यनौद्धत्यभाजः सूनोर्गुणादिव ।

तस्या निगूढगर्भाया नौद्धत्यमुदरं दधौ ॥ १२८ ॥
सदयो मे सुतस्तन्मा क्षितेः खेदो भवत्विति ।
मन्दं मन्दं चचालासौ देवी गर्भभरालसा ॥ १२९ ॥
प्रवृत्ते ऽथ जयादेव्याः सीमन्तोन्नयनोत्सवे ।
सिञ्चानहंसमञ्जीरा नृत्यन्तीव ययौ शरत् ॥ १३० ॥
अम्भांसि निर्मलीभूयात्मानमञ्जैरवासयन् ।
भाविन्यर्हज्जनिस्नाने गृह्णन्त्वस्मान्सुरा इति ॥ १३१ ॥
कीराणां पङ्क्तयो व्योम्नि विलम्बुस्विदशैरिव ।
जिनेन्द्रजन्मने सज्जीकृता वन्दनमालिकाः ॥ १३२ ॥
शान्ततापं जगत्कृत्वा जिनमातुर्मुदे ऽम्बुदाः ।
श्यामतामप्रचक्रुर्वैरदश्चत्सुकृता इव ॥ १३३ ॥
ईतिमुक्तमभिष्यातं सहस्रगुणितैः फलैः ।
सस्यमन्तर्जगद्भूम्नभूत्तस्यानुभावतः ॥ १३४ ॥
आदाय गोपीरूपाणि गोपीवर्गे सुरस्त्रियः ।
शालिक्षेत्रेषु तीर्थेशगुणगीतान्यशिक्षयन् ॥ १३५ ॥
गर्भस्थितदिनाधीशा मेघलेखेव शारदी ।
पाण्डुगभाप्यद्भुतश्रीः प्रभुगर्भा बभौ जया ॥ १३६ ॥
आसीदत्यर्हदास्यश्रीदासभावो ऽधुना मम ।
इतीव कलयामास नैर्मल्यातिशयं शशी ॥ १३७ ॥
त्रैलोक्यभूषणेनास्मि नन्दनेनैव भूषिता ।
तत्किमेभिरितीवाल्पीचक्रे ऽङ्गे भूषणानि सा ॥ १३८ ॥
विभौ गर्भावतीर्णे ऽस्मिञ्शक्रादेशाद्धनेश्वरः ।
पूरयामास सद्वासःस्वर्णरत्नैर्नृपालयम् ॥ १३९ ॥
अथ मन्ये जयादेव्या गुरुगर्भोष्मशान्तये ।

ढौकयञ्शतपत्राणि हेमन्तः समुपागमत् ॥ १४० ॥
एष्यतीह ममारातिरर्हन्निति भियाङ्गिनाम् ।
हृद्भ्यो बहिरभूद्रागः कुङ्कुमालेपनच्छलात् ॥ १४१ ॥
समजायन्त यामिन्यो महामहिमभाजनम् ।
युक्तं महत्त्वं स्त्रीजातेर्जयागर्भगते ऽर्हति ॥ १४२ ॥
मत्वा जिनार्कतो लोके भाविनो दिवसान्गुरून् ।
लज्जयेव लघूचक्रे वासरान्वासरेश्वरः ॥ १४३ ॥
जन्मस्नात्रे ऽर्हतः प्राप्ते धिग्धिगग्निस्ततरं सुराः ।
मां ग्रहीष्यन्ति नेत्याप तापं कूपोदरे पयः ॥ १४४ ॥
मय्युत्पत्तिर्जगद्भर्तुर्भवितेति मदोद्धतः ।
शिशिरो ऽथ ऋतून्सर्वान्दृश्यकुन्दरदो ऽहसत् ॥ १४५ ॥
प्रभुप्रभाब्धिरधुनाभ्येष्यतीतीव भक्तितः ।
विनीतैरुडुचन्द्रार्कैः प्रभालत्वमतन्यत ॥ १४६ ॥
अवतीर्णेषु तीर्थेषूपादेषु पृथिवीतले ।
का श्रीरस्माकमित्यब्जैः पूर्वमेव व्यलीयत ॥ १४७ ॥
तदा मे का गतिर्लोकः पातार्हद्वक्त्रमुखां यदा ।
इति ध्यायादिव स्तब्धमम्भः प्राप हिमोद्गमे ॥ १४८ ॥
जिनजन्मोत्सवे स्वर्गद्रुदलैस्तोरणस्रजम् ।
सुराः कर्तार इत्युर्व्यां शुचापाति तरुच्छदैः ॥ १४९ ॥
क्रियमाणासु रक्षासु देव्या वृद्धाङ्गनाजनैः ।
नव मासा व्यतिक्रान्ताः सार्धाष्टमदिनास्तदा ॥ १५० ॥
अथ कृष्णचतुर्दश्यां निशीथे मासि फाल्गुने ।
चन्द्रे शतभिषग्वर्तिन्यूरुस्थमाहिषध्वजम् ॥ १५१ ॥
असूत नूतनाम्भोजप्रभं भुवनभूषणम् ।

रत्नं रोहणभूमीव जयादेवी जिनाधिपम् ॥ १५२ ॥
॥ युग्मम् ॥

तदा को ऽपि प्रकाशो ऽभूदपि दुर्गतिभूमिषु ।
निखिलानां सुखं जज्ञे नारकाणामपि क्षणम् ॥ १५३ ॥
अस्माकमयमीशो ऽभूदशेषगुणसागरः ।
इत्यानन्दवशेनेव दिशः प्रापुः प्रसन्नताम् ॥ १५४ ॥
ववुः प्रदक्षिणावर्ताः कुसुमश्रीविमिश्रिताः ।
तन्वन्त इव सद्भक्तिं जगत्त्राणा जगत्प्रभोः ॥ १५५ ॥
आख्यातुमिव विश्वेषु प्रभोर्जन्ममहोत्सवम् ।
घनगम्भीरनिर्घोषा नेदुर्दुन्दुभयो ऽम्बरे ॥ १५६ ॥
प्रभुपादाम्बुजस्पर्शपवित्रं पृथिवीतलम् ।
पूजयद्भिरिवामर्त्यैश्चक्रिरे पुष्पवृष्टयः ॥ १५७ ॥
मत्वासनप्रकम्पेनावधिज्ञानात्प्रभोर्जनिम् ।
अष्टाजग्मुरधोलोकवासिन्यो दिक्कुमारिकाः ॥ १५८ ॥
भोगंकरा भोगवती सुभोगा भोगमालिनी ।
तोयधारा विचित्रा च पुष्पमाला त्वनिन्दिता ॥ १५९ ॥
नत्वा स्तुत्वा न भेतव्यमित्युदीर्य च ता इमाः ।
जिनजन्मोत्सवं देव्यै स्वागतौ हेतुमभ्यधुः ॥ १६० ॥
॥ युग्मम् ॥

सहस्रस्तम्भमातेनुरैशान्यां प्राङ्मुखं दिशि ।
ताः सूतिसदनं वातपूतयोजनभूतलम् ॥ १६१ ॥
देवि त्वमेव धन्यासि यस्याः सूनुर्जगद्गुरुः ।
इत्यादिगीतगायिन्यस्ताः प्रभोः परितः स्थिताः ॥१६२॥
पीठकम्पात्प्रभोर्जन्म मत्वा मेरुनिकेतनाः ।

मुदिता दिक्कुमार्यो ऽष्टावूर्ध्वलोकादिहाययुः ॥ १६३ ॥
मेघंकरा मेघवती सुमेघा मेघमालिनी ।
सुवत्सा वत्समित्रा च वारिषेणा बलाहका ॥ १६४ ॥
इमा जिनं च देवीं च नत्वा योजनसंमिताम् ।
धरां गन्धोदकैः सिक्त्वा पुष्पवृष्टिं वितेनिरे ॥ १६५ ॥
॥ युग्मम् ॥

ईयुरासनकम्पेन ज्ञात्वा जन्म जिनस्य तत् ।
पौरस्त्यरुचकादष्टौ दिक्कुमार्यः सदर्पणाः ॥ १६६ ॥
ताश्च नन्दोत्तरानन्दे आनन्दानन्दवर्धने ।
विजया वैजयन्ती च जयन्ती चापराजिता ॥ १६७ ॥
एताः प्राच्यां दिशि स्थित्वा नत्वा मातृयुतं जिनम् ।
जगुर्जगन्मनोज्ञानि गीतानि प्रीतचेतसः ॥ १६८ ॥
अपाच्यरुचकात्पीठप्रकम्पेनाययुस्ततः ।
दिक्कन्या अष्टभृङ्गारगृहीतकराम्बुजाः ॥ १६९ ॥
समाहारा सुप्रदत्ता सुप्रबद्धा यशोधरा ।
लक्ष्मीवती शेषवती चित्रगुप्ता वसुंधरा ॥ १७० ॥
॥ युग्मम् ॥

एताः प्रणम्य तीर्थेशं तीर्थेशजननीमपि ।
स्फीतागीतकलादक्षा दक्षिणस्यां दिशि स्थिताः ॥१७१॥
प्रतीच्यरुचकादष्टौ दिक्कन्याः पीठकम्पतः ।
आययुर्व्यञ्जनाभोगभ्राजिष्णुकरपङ्कजाः ॥ १७२ ॥
इलादेवी सुरादेवी पृथिवी पद्मवत्यपि ।
एकनासा नवमिका भद्रा सीतेति नामतः ॥ १७३ ॥
जननीसहितं नत्वा त्रैलोक्यमहितं जिनम् ।

पश्चिमायां दिशि प्रीता गीतामृतमुचः स्थिताः ॥१७४॥
उदीच्यरुचकादष्ट विष्टरस्य प्रकम्पतः ।
दिक्कुमार्यः समाजग्मुश्चञ्चच्चामरचारवः ॥ १७५ ॥
अलम्बुसा सुकेशी च पुण्डरीका च वारुणी ।
हासा सर्वप्रभा चैव श्रीर्ह्रीरित्यभिधानतः ॥ १७६ ॥
नत्वा मात्रा समं मात्राधिकभक्तिभराः प्रभुम् ।
तास्तस्थुरुत्तराशायामुत्तरोदारगीतयः ॥ १७७ ॥
ईयुश्चतस्रो दिक्कन्या विदिग्भ्यः पीठकम्पतः ।
सुतारा नित्रकनका चित्रा सौत्रामणी तथा ॥ १७८ ॥
दीप्तदीपकरा नत्वा स्वामिनं स्वामिनीमपि ।
गीतामृतभृतस्तस्थुरैशान्यादिविदिक्षु ताः ॥ १७९ ॥
दिक्कन्या मध्यरुचकाच्चतस्रः पीठकम्पतः ।
रूपा रूपासिका चेयुः सुरूपा रूपवत्यपि ॥ १८० ॥
नालं बालस्य तास्त्यक्त्वा चतुरङ्गुलवर्जितम् ।
रत्नयुक्तं निखन्योर्व्यामत्र दूर्वामरोपयन् ॥ १८१ ॥
त्रीन्मूलसौधतः पूर्वदक्षिणोत्तरदिक्षु ताः ।
रम्भागृहांश्चतुःशालसिंहासनजुषो व्यधुः ॥ १८२ ॥
ता दक्षिणचतुःशालपीठे देव्या जिनस्य च ।
अभ्यङ्गोद्वर्तनैर्दिव्यैस्तैलैर्दूर्तनकैर्यधुः ॥ १८३ ॥
उभौ संस्नप्य संमार्ज्य प्राक्चतुःशालविष्टरे ।
ता दिव्यचन्दनैर्लिप्त्वाभूषयंश्चेलभूषणैः ॥ १८४ ॥
एत्योत्तरचतुःशाले मथितारणिवह्निना ।
हृतैः क्षुद्रहिमाद्रेस्ता द्रुतगोशीर्षचन्दनैः ॥ १८५ ॥
तयोः शान्तिकमाधाय भद्रपीठप्रतिष्ठयोः ।

व्यक्तभक्तिविधौ दक्षा रक्षापोट्टलिकां व्यधुः ॥ १८६ ॥
॥ युग्मम् ॥

पर्वतायुर्भवेत्युक्त्वा कर्णाभ्यर्णे प्रभोः स्थिताः ।
आस्फालयांबभूवुस्ता हस्ताभ्यां ग्रावगोलकौ ॥ १८७ ॥
सूतिधाम्नि जिनेन्द्रं च जिनेन्द्रजननीं च ताः ।
आनीयाधाय शय्यायां गायन्त्यः परितः स्थिताः ॥१८८॥

समं द्युषु तदा नित्यघण्टानामजनि ध्वनिः ।
विश्वप्रबोधनाय्यैकनान्दीतूर्यरवोपमः ॥ १८९ ॥
आसनान्यचलन्नद्रिनिर्विद्यानि बिडौजसाम् ।
व्याख्यान्तीव शिरःकम्पैर्जिनजन्माद्भुतां भुवम् ॥ १९० ॥
अथैवं दर्शयत्योजः को मयीति क्रुधोत्कटम् ।
आत्तवज्रं सुधर्मेशं नत्वा सेनापतिर्जगौ ॥ १९१ ॥
वज्रं विश्राम्यतु स्वामिन्वद कं हन्मि ते द्विषम् ।
इत्यस्य वाग्भिरुद्भूतसमाधिरवधीक्षणात् ॥ १९२ ॥
परिज्ञाय प्रभोर्जन्म विलीनक्रोधबन्धनः ।
द्राग्मिथ्यादुःकृतं कृत्वामुञ्चत्सिंहासनं हरिः ॥ १९३ ॥
॥ युग्मम् ॥

दत्त्वा पदानि सप्ताष्टौ प्रभुजन्मदिशं प्रति ।
नत्वा स्तुत्वा जिनं शक्रो ऽलंचक्रे विष्टरं पुनः ॥१९४॥
अथाहूय स सेनान्यं नैगमेषिणमादिशत् ।
जिनजन्मोत्सवं कर्तुमाकारय सुरानिति ॥ १९५ ॥
योजनप्रमितां घण्टां सुघोषेत्यभिधानतः ।
अवाददद्यं प्रोच्चैर्वारांस्त्रीन्विपुलस्वरम् ॥ १९६ ॥
एतद्ध्वानादथैकोनद्वात्रिंशल्लक्षसंख्यया ।

विमानेषु प्रतिध्वाना घण्टानां सर्वतो ऽभवन् ॥ १९७ ॥
क्रीडासक्तास्ततः सर्वे सावधानाः सुराः स्थिताः ।
घण्टानादे च विश्रान्ते सेनानीरिति घुष्टवान् ॥ १९८ ॥
अमरा भारते क्षेत्रे जिनजन्मोत्सवे हरिः ।
गन्ता ततः प्रियायुक्ता एत त्वरितमेत भोः ॥ १९९ ॥
अथ ते प्रथितानन्दा वृन्दारकसमुच्चयाः ।
देवीभिः सममाजग्मुर्जिनजन्मोत्सवेच्छया ॥ २०० ॥
पञ्चयोजनशत्युच्चं विमानं लक्षयोजनम् ।
चक्रे संक्रन्दनादेशात्पालकः पालकाभिधम् ॥ २०१ ॥
स्तम्भैरङ्कुरितं कूजत्किङ्किणीभिः सकोकिलम् ।
मुक्तावचूलैः सत्पुष्पं पताकाभिः सपल्लवम् ॥ २०२ ॥
कलशैः फलितं रत्नप्रभाभिः सारसारणि ।
देवीभिः केलिशैलाढ्यं जालजालैर्निकुञ्जभृत् ॥ २०३ ॥
तारतोरणमालाभिर्लोलदोलालिमालितम् ।
किंचिद्गम्भीरपीठानामन्तरैर्दीर्घदीर्घिकम् ॥ २०४ ॥
सुवर्णकेतनश्रीभिर्धूतपुष्परजोभरम् ।
तज्जङ्गमं महेन्द्रस्य लीलोद्यानमिवाबभौ ॥ २०५ ॥
॥ चतुर्भिः कलापकम् ॥

तत्र तिस्रो व्यराजन्त रत्नसोपानराजयः ।
सहारोढुमिवेन्द्रस्य मनोवाक्कायसंपदाम् ॥ २०६ ॥
आरोहतस्त्रिसोपान्यां सुरांस्तत्तोरणैस्त्रिभिः ।
इत्थं करम्बितकरैर्नम्यः स्वामीत्यशिक्षयत् ॥ २०७ ॥
वर्तुलो मध्यभूभागस्तत्र चित्रप्रभो बभौ ।
जम्बूद्वीप इव स्वःश्रीशेखरो जिनजन्मना ॥ २०८ ॥

स्वनृत्तदर्शने देवीः स्थिता मूर्त्यन्तरैरिव ।
पाञ्चालीर्दधदस्यान्तर्जज्ञे प्रेक्षणमण्डपः ॥ २०९ ॥
चतुर्योजनपिण्डाष्टयोजनायामविस्तृतिः ।
शोभायाः केलिशैलाभा तत्राभूद्रत्नपीठिका ॥ २१० ॥
चलश्रीनिश्चलीकारबन्धरज्जुसहोदरैः ।
रत्नसिंहासनं रेजे तदुपर्येकमंशुभिः ॥ २११ ॥
अर्धमौक्तिकदामालिवृतमौक्तिकदामभाक् ।
दिव्यश्चन्द्रोदयो वज्राङ्कुशभृत्तदुपर्यभूत् ॥ २१२ ॥
अन्तःपीठान्मरुद्यक्षत्र्यक्षकाष्ठासु दिद्युते ।
चतुरशीतिसहस्रेन्द्रसमद्युसदासनैः ॥ २१३ ॥
प्राच्यां दिश्यग्र्यदेवीनामासनान्यष्ट रेजिरे ।
सहस्राद्वादशाग्नेय्यां चान्तःसभ्यदिवौकसाम् ॥ २१४ ॥
चतुर्दश सहस्राणि दक्षिणाशाविभूषणम् ।
आसनान्यभवन्नाकसदां मध्यसभासदाम् ॥ २१५ ॥
बहिःसभासदां स्वर्गवासिनामासनावलिः ।
षोडशानां सहस्राणां नैर्ऋत्यामभवद्दिशि ॥ २१६ ॥
सप्तसंख्यानि सप्तानां सेनापतिदिवौकसाम् ।
आशायां पाशहस्तस्य रेजिरे सिंहविष्टराः ॥ २१७ ॥
चतुर्भिरधिकाशीतिः सहस्राण्यङ्गरक्षिणाम् ।
औचित्येनासनान्यासन्परितो वासवासनम् ॥ २१८ ॥
विमानं विरचय्यैवं त्रिदशैराभियोगिकैः ।
शक्रो विज्ञपयांचक्रे तदा तदधिरोहणे ॥ २१९ ॥
अन्यैर्नानाविमानालिलासिभिः स्वर्गवासिभिः ।
वृतं स्फुरद्भिरम्भोजं संहैः पत्रस्थैरिव ॥ २२० ॥

विकृत्याद्भुतरूपोर्द्धं स्वर्भूपः सपरिच्छदः ।
तद्विमानं समारोहद्रोहन्माङ्गलिकध्वनिः ॥ २२१॥ युग्मम् ॥
पुरुहूतः पुरोभूतदर्पणाद्यष्टमङ्गलः ।
महासिंहासनासीनस्तद्विमानमदीदिपत् ॥ २२२ ॥
तिर्यग्मार्गेण सौधर्मादुत्तरेण तदुत्तरत् ।
द्वीपं नन्दीश्वरं प्रापासंख्यद्वीपाब्धिलङ्घनात् ॥ २२३ ॥
तत्राग्नेय्यां दिशि प्राप्य गिरिं रतिकरं हरिः ।
संचिक्षेप विमानं तन्मानं साधुजनो यथा ॥ २२४ ॥
द्वीपानब्धीनतिक्रामन्क्रमतस्तच्च संक्षिपन् ।
एत्य चम्पेशसौधस्य ददौ तिस्रः प्रदक्षिणाः ॥ २२५ ॥
मुक्त्वा विमानमैशान्यां दिशि सूतिगृहं ततः ।
स त्रिः प्रदक्षिणीकृत्यानमन्मातृयुतं जिनम् ॥ २२६ ॥
जन्मोत्सवं भवत्सूनोर्वर्यं कर्तुमिहागताः ।
न्यवेदयदिदं देव्यै शङ्कमाशङ्कुहृते हरिः ॥ २२७ ॥
दत्त्वासौ स्वाविनीं देव्या मुक्त्वात्र प्रतिमां प्रभोः ।
हृद्यमान्तीं मुदं धर्तुमिवाधाद्रूपपञ्चकम् ॥ २२८ ॥
गोशीर्षद्रव्यसौरभ्यभासुरे ऽसौ सुरेश्वरः ।
तीर्थंकरं करद्वन्द्वे मूर्त्याधारयदेकया ॥ २२९ ॥
छत्रं मूर्त्यैकया द्वाभ्यां चामरे चामरेश्वरः ।
एकया तु पुरः क्षिप्रप्रतीष्टं कुलिशं दधौ ॥ २३० ॥
नानारूपधरैर्नानाकुतूहलमनोहरैः ।
जगामाथ मरुन्नाथः सुरशैलं सुरैर्वृतः ॥ २३१ ॥
तच्चूलां दक्षिणेनायं वने पाण्डकनामनि ।
अतिपाण्डुकम्बलायां शिलायाममलद्युतौ ॥ २३२ ॥

अपूर्वसंमदः पूर्वदिक्पतिः पूर्वदिग्मुखः ।
स्नानसिंहासनं भेजे शक्रः क्रोडीकृतप्रभुः ॥ २३३ ॥
॥ युग्मम् ॥

इहान्तरे महाघोषाघण्टाघोषावबोधिनाम् ।
वृतो विमानिनां लक्षैरष्टाविंशतिसंमितैः ॥ २३४ ॥
ईशानाधिपतिः शूलशाली वृषभवाहनः ।
कृते पुष्पकदेवेन विमाने पुष्पके स्थितः ॥ २३५ ॥
॥ युग्मम् ॥

ईशानकल्पादुत्तीर्य तिर्यग्दक्षिणवर्त्मना ।
एत्य नन्दीश्वरं द्वीपं शान्त्यां रतिकरे गिरौ ॥ २३६ ॥
क्रमाद्विमानं संक्षिप्य सौधर्माधिपतिर्यथा ।
काञ्चनाचलचूलायां भक्त्याग्रे जिनमाययौ ॥ २३७ ॥
॥ युग्मम् ॥

आगाद्वादशभिर्लक्षैर्वृतो वैमानिकैः सुरैः ।
सनत्कुमारः सुमनोविमानस्थः प्रभोः पुरः ॥ २३८ ॥
माहेन्द्रो ऽष्टविमानेशलक्षैर्युक्तो महर्द्धिभिः ।
श्रीवत्साख्यविमानेन प्रभोरभ्यर्गमागमत् ॥ २३९ ॥
वैमानिकैश्चतुर्लक्षैः सुरैर्ब्रह्मपतिर्वृतः ।
नन्द्यावर्तविमानस्थः समागाज्जिनसन्निधौ ॥ २४० ॥
पञ्चाशता विमानेशसहस्रैः परिवारिताः ।
लान्तकेन्द्रः कामगवविमानस्थस्तथा ययौ ॥ २४१ ॥
आगाद्वैमानिकामर्त्यचत्वारिंशत्सहस्रयुक् ।
शुक्रशक्रः प्रीतिगमविमानेन जिनान्तिकम् ॥ २४२ ॥
मनोरमविमानस्थः सहस्रारसुरेश्वरः ।

षड्विमानसहस्रैश्चेतो देवैरिहागमत् ॥ २४३ ॥
आनतप्राणतस्वामी विमलाख्यविमानभाक् ।
आजगामामरैर्युक्तो विमानैश्चतुःशतैः ॥ २४४ ॥
त्रिविमानशतैर्वेरारणाच्युतवासवः ।
इहागात्सर्वतोभद्रविमानस्थः सुराचले ॥ २४५ ॥
पृथ्व्यां रत्नप्रभानाम्न्यां बाहुल्यामध्यवासिनाम् ।
भवनव्यन्तरेन्द्राणामकम्पन्तासनान्यथ ॥ २४६ ॥
पुर्यां चमरचञ्चायां चमरो सुरवासवः ।
सुधर्माख्यसभामध्ये निषण्णश्चमरासने ॥ २४७ ॥
ज्ञात्वावधेर्जानिं जैनं जनज्ञप्त्यै त्ववादयत् ।
घण्टां मोघस्वरां पत्त्यनीकपेन द्रुमेण सः ॥ २४८ ॥
॥ युग्मम् ॥

संसद्भिस्तिसृभिर्युक्तश्चतुर्भिर्लोकपालकैः ।
पञ्चभिः पट्टदेवीभिर्महानीकैश्च सप्तभिः ॥ २४९ ॥
सप्तभिः पृतनाधीशैरन्यैरप्यसुरैर्घनैः ।
चतुःषष्टिसहस्रैश्च सामानिकमहासुरैः ॥ २५० ॥
प्रतिकाष्ठं चतुःषष्टिसहस्रैरङ्गरक्षिणाम् ।
त्रायस्त्रिंशैस्त्रयस्त्रिंशत्संमितैः परमर्द्धिकः ॥ २५१ ॥
पञ्चयोजनशत्युच्चं चारुध्वजविराजितम् ।
पञ्चाशतं सहस्राणि योजनान्यभिविस्तृतम् ॥ २५२ ॥
विमानमभियोगेन सद्यो देवेन निर्मितम् ।
आरुह्याभ्यचलद्भक्त्या कर्तुं जन्मोत्सवं विभोः ॥ २५३ ॥
॥ पञ्चभिः कुलकम् ॥

मार्गे संक्षिप्य संक्षिप्य विमानमसुरेश्वरः ।

सौधर्मेन्द्र इवाभ्यागान्मेरुं विभुविभूषितम् ॥ २५४ ॥
असुरेन्द्रो बलिर्नाम बलिचञ्चापुरीपतिः ।
महौघस्वरघण्टायाः कारयित्वाथ वादनम् ॥ २५५ ॥
महाद्रुमाख्यसेनान्याहूतैः षष्टिसहस्रकैः ।
सामानिकसुरैस्तेभ्यश्चाङ्गरक्षैश्चतुर्गुणैः ॥ २५६ ॥
त्रायस्त्रिंशादिकैरन्यैरसुरैः परितो वृतः ।
आगादुत्तमयानेन मेरुभृङ्गे महोत्सवात् ॥ २५७ ॥
॥ त्रिभिर्विशेषकम् ॥

फणीन्द्रो धरणो मेघस्वराघण्टाभिताडनात् ।
सेनान्या भद्रसेनेन बोधितैर्जनिमर्हतः ॥ २५८ ॥
सामानिकोरगैः षड्भिः सहस्रैः परमर्द्धिकः ।
चतुर्विंशत्यङ्गरक्षसहस्रैर्भूरिभक्तिभिः ॥ २५९ ॥
षड्भिरुत्तमदेवीभिरन्यैर्नागकुलैर्वृतः ।
सार्धद्वियोजनशतमोत्तुङ्गं ध्वजमण्डलम् ॥ २६० ॥
सहस्रपञ्चविंशत्या योजनैर्जातविस्तृति ।
विमानरत्नमारुह्य मेरुमूर्ध्नि समागमत् ॥ २६१ ॥
॥ चतुर्भिः कलापकम् ॥

भूतानन्दाभियो मेघस्वराघण्टाभिवादनात् ।
सेनाधीशेन दक्षेणाहूतैः सामानिकादिभिः ॥ २६२ ॥
नागलक्षैर्वृतो नागनाथो निर्भरभक्तिभाक् ।
आगादिव्यविमानस्थः सनाथं स्वामिना नगम् ॥ २६३ ॥
॥ युग्मम् ॥

हरिस्तथा हरिसहो विद्युत्कुमारवासवौ ।
वेणुदारी वेणुदेवः सुपर्णानां पुरन्दरौ ॥ २६४ ॥

अग्निमाणवो ऽग्निशिखश्चेन्द्रावग्निकुमारकौ ।
शक्रौ वायुकुमाराणां वेलम्बो ऽथ प्रभञ्जनः ॥ २६५ ॥
महाघोषः सुघोषश्च स्तनितानां सुराधिपौ ।
तथोदधिकुमारेन्द्रौ जलकान्तजलप्रभौ ॥ २६६ ॥
तथा पूर्णो ऽवशिष्टश्च शक्रौ द्वीपकुमारकौ ।
वासवौ दिक्कुमाराणाममितो ऽमितवाहनः ॥ २६७ ॥
महाकालश्च कालश्च व्यन्तराणां सुरेश्वरौ ।
सुरूपप्रतिरूपश्च भूतानामधिपौ हरी ॥ २६८ ॥
माणिभद्रः पूर्णभद्रो वासवौ यक्षरक्षकौ ।
महाभीमश्च भीमश्च राक्षसाखण्डलौ वरौ ॥ २६९ ॥
किन्नराणां किंपुरुषः किन्नरश्च सुरत्पती ।
किंपुरुषेन्द्रौ महापुरुषसत्पुरुषाभिधौ ॥ २७० ॥
अतिकायमहाकायौ महोरगमहाधिपौ ।
गीतयशोगीतरती गन्धर्वत्रिदशेश्वरौ ॥ २७१ ॥
अथाप्रज्ञप्तिपञ्चप्रज्ञप्त्यादीनां समाययुः ।
व्यन्तराष्टनिकायानां षोडश त्रिदशेश्वराः ॥ २७२ ॥
तत्राप्रज्ञप्तिदेवेन्द्रौ सन्निहितसमानकौ ।
इन्द्रौ धाता विधाता च पञ्चप्रज्ञप्तिपालकौ ॥ २७३ ॥
ऋषिवादितिकाधीशावृषिश्च ऋषिपालकः ।
भूतवादितिकाशक्रौ तथेश्वरमहेश्वरौ ॥ २७४ ॥
सुवत्सकविशालाख्यौ क्रन्दितानां सुरेश्वरौ ।
महाक्रन्दितिकाशक्रौ हासो हासरतिस्तथा ॥ २७५ ॥
ख्यातौ श्वेतमहाश्वेतौ कूष्माण्डानां पुरन्दरौ ।
पावकः पावकगतिः पावकानां विडौजसौ ॥ २७६ ॥

ज्योतिषां वासवौ संख्यातीतौ रविहिमच्छवी ।
चतुःषष्टिरितीन्द्राणां मेरुमूर्ध्नि तदा ययौ ॥ २७७ ॥
आदिष्टा अच्युतेन्द्रेणापक्रम्येशानदिश्यथ ।
वैक्रियेण समुद्घातेनाकृष्योत्तमपुद्गलान् ॥ २७८ ॥
योजनोरुमुखान्हैमान् राजतान् रत्नजानपि ।
स्वर्णरौप्यमणिस्वर्णमणिरौप्यमयानपि ॥ २७९ ॥
स्वर्णरौप्यमणीन्कृष्णान्कलशान्मृन्मयानपि ।
प्रत्येकं चक्रुरष्टाग्रं सहस्रं सुरकिंकराः ॥ २८० ॥
॥ त्रिभिर्विशेषकम् ॥

ते पात्रीपुष्पचङ्गेरीस्थालभृङ्गारदर्पणान् ।
तद्वद्रत्नकरण्डांश्च सुप्रतिष्ठान्यकुर्वत ॥ २८१ ॥
क्षीराब्धिपुष्कराब्धिभ्यां तदा पद्महृदादपि ।
भरतैरावतक्षेत्रमुख्यात्तीर्थव्रजादपि ॥ २८२ ॥
आनिन्यिरे सदम्भोजमम्भो मूर्द्धन्धुरं सुराः ।
पुष्पसिद्धार्थतुवरौषधीः क्षुद्रहिमाद्रितः ॥ २८३ ॥ युग्मम् ॥
ते ऽत्र सौमनसाद्भद्रशालान्नन्दनकाननात् ।
पाण्डुकाद्गन्धवस्तूनि नीत्वाम्भसि निचिक्षिपुः ॥ २८४ ॥
मल्लिकापाटलाजातियूथिकाचम्पकोद्भवैः ।
मन्दारपारिजातोत्थैः पुष्पैः स्वर्णाम्बुजैरपि ॥ २८५ ॥
उत्क्षिप्तागुरुकर्पूरः स्तुतिं तन्वन्प्रभोः पुरः ।
अच्युतेन्द्रः सुरैः साकममुञ्चत्कुसुमाञ्जलिम् ॥ २८६ ॥
॥ युग्मम् ॥

ततेषु विततेषूच्चैर्घनेषु शुषिरेष्वपि ।
वाद्यमानेषु वाद्येषु सर्वतो ऽप्याभियोगिकैः ॥ २८७ ॥

गीयमानेषु गीतेषु तारनादेन किन्नरैः ।
तन्यमानेषु नृत्येषु यथातालं सुरीजनैः ॥ २८८ ॥
पठ्यमाने जिनाधीशे सुरमङ्गलपाठकैः ।
सितेषूद्धूयमानेषु चामरेषु सुरासुरैः ॥ २८९ ॥
जय द्वादशतीर्थेश श्रीमन्निर्जितसंसृते ।
इत्यादिस्तुतिवाक्येषु चारणश्रमणेषु च ॥ २९० ॥
धूपितार्चितभृङ्गारन्यस्तैः सर्वौषधीयुतैः ।
नीरैर्घुसृणकर्पूरश्रीखण्डागुरुसुन्दरैः ॥ २९१ ॥
स्नात्रं श्रेयःश्रियां पात्रममात्रप्रमदैः प्रभोः ।
त्रिषष्ट्या विदधे शक्रैरच्युतेन्द्रपुरःसरैः ॥ २९२ ॥
॥ षड्भिः कुलकम् ॥

माजितं गन्धकाषाय्या कर्पूरागुरुधूपितम् ।
व्यलिम्पन्पात्रिकान्यस्तैः प्रभुं गोशीर्षचन्दनैः ॥ २९३ ॥
भविष्यत्यधुना भर्तुरङ्गसंग इति स्मितैः ।
भृङ्गगीतिपरैर्देवाः प्रभुं पुष्पैरपूजयन् ॥ २९४ ॥
सौधर्मेन्द्र इवाधाय पञ्चमूर्तीस्ततः कृती ।
उत्सङ्गे ऽसौ दधौ मूर्त्या प्रभुमीशान एकया ॥ २९५ ॥
पाण्डुरौ चामरौ द्वाभ्यामुज्ज्वलं छत्रमेकया ।
व्योमकूलङ्कषं शूलं दूरोल्लालितमेकया ॥ २९६ ॥
॥ युग्मम् ॥

मूर्तान्धर्मानिवोन्मीलदर्ककान्तिमणीमयान् ।
चतुःसंख्यानसौ दिक्षु वृषांश्चतसृषु व्यधात् ॥ २९७ ॥
तच्छृङ्गाग्रोच्छलत्तारक्षीरधाराभिरष्टभिः ।
सौधर्माधिपतिश्चक्रे स्नात्रं विश्वत्रयीपतेः ॥ २९८ ॥

दिव्यैर्दुकूलः श्रीखण्डमाल्यमाणिक्यमण्डनैः ।
भक्तिसौधेन सौधर्मप्रभुणा भूषितः प्रभुः ॥ २९९ ॥
अथाग्रे जिनमातेने पट्टे मणिमये हरिः ।
कर्मारिक्षयायाष्टमङ्गलीं रूप्यतण्डुलैः ॥ ३०० ॥
स किंचिदपसृत्याथ ज्वलदीपदलत्तमः ।
ऊर्ध्वीभूतः पुरो भर्तुरारादारात्रिकं दधौ ॥ ३०१ ॥
तज्जिनेन्दोः पुरः स्फारलुठत्तारमिवाथ सः ।
क्षिप्तपुष्पं द्युसद्वारैस्त्रिवारमुदतारयत् ॥ ३०२ ॥
इलातलमिलन्मौलिः स पौलोमीपतिस्ततः ।
विनम्य विष्टपाधीशं प्रहृष्ट इति तुष्टुवे ॥ ३०३ ॥
जय त्रिभुवनाश्चर्य जय त्रिभुवनाभय ।
जय त्रिभुवनानन्द जय त्रिभुवनोदय ॥ ३०४ ॥
सद्यो मयाद्यरखाद्य प्रपेदे भाग्यभूरिषु ।
यत्त्वं त्रिविष्टपीतत्त्वं ददृशे द्वादशो जिनः ॥ ३०५ ॥
अणुमानं मनस्तद्भूर्बुद्धिस्तत्संभवं वचः ।
क्व तेन त्वद्गुणा नाथ स्तुत्या विश्वविलङ्घिनः ॥ ३०६ ॥
त्वां प्राप्य दृश्यसीमानं स्वामिन्सुकृतसीमया ।
दृशः प्रीता न्यवर्तन्त रूपान्तरनिरूपणात् ॥ ३०७ ॥
कदावसर्पिणीकालव्यालकर्मविषाकुलम् ।
उल्लासयासि विश्वेश विश्वं वागमृतद्रवैः ॥ ३०८ ॥
इति स्तुत्वा गृहीत्वेशमीशानेशाद्धृतः सुरैः ।
सौधर्माधिपतिः सूतिगृहे ऽगात्पञ्चरूपभाक् ॥ ३०९ ॥
निवर्त्य प्रतिमां न्यस्य जिनेशं मातुरन्तिके ।
उच्छीर्षके ऽमुचद्दिव्ये वाससी कुण्डले च सः ॥ ३१० ॥

सस्वर्णवलयैर्वर्यं लम्बिनानामणिं हरिः ।
जिनेन्दोर्लोचनानन्दमुल्लोचे कन्दुकं न्यधात् ॥ ३११ ॥
न जिना जननीक्षीरं रसयन्तीति नीतिवित् ।
कराङ्गुष्ठे विभोर्वज्री नानारससुधां न्यधात् ॥ ३१२ ॥
द्वात्रिंशतं रौप्यहेमरत्नकोटीः पृथक्पृथक् ।
तथा द्वात्रिंशतं नन्दासनभद्रासनान्यथ ॥ ३१३ ॥
अन्यच्च सुखदं वस्तु नेपथ्यादि मनोहरम् ।
शक्रादेशाद्धनाधीशो जिनाधीशगृहे ऽसृजत् ॥ ३१४ ॥
॥ युग्मम् ॥
स्वामिनः स्वामिमातुर्वा यो ऽशुभं चिन्तयिष्यति ।
सप्तधा भेत्स्यते तस्यार्जकमञ्जरिवच्छिरः ॥ ३१५ ॥
इत्युक्तिं वासवादेशादाभियोगिकनाकिनः ।
उच्चैरुज्जुघुषुर्देवनिकायेषु चतुर्ष्वपि ॥ ३१६ ॥ युग्मम् ॥
अथ पञ्च समादिक्षदक्षा अप्सरसः स्वयम् ।
पुरो विश्वगुरोर्धात्रींकर्मनिर्मितये हरिः ॥ ३१७ ॥
मुदा तदा तु निर्मातुमष्टाह्नीं बहवः सुराः ।
काञ्चनाचलचूलाग्रादेव नन्दीश्वरं ययुः ॥ ३१८ ॥
वज्री त्वर्हद्गृहादेवरमणाख्यं ययौ तदा ।
क्षुद्रमेरुप्रमं नन्दीश्वरं पूर्वाञ्जनाचलम् ॥ ३१९ ॥
दिव्ये चतुर्मुखे चैत्यद्रुमेन्द्रध्वजलाञ्छिते ।
चैत्ये ऽष्टाह्नीमिहारेभे नित्यानामर्हतां हरिः ॥ ३२० ॥
गिरौ तत्र चतुर्दिक्षु महावापीस्थितेष्वथ ।
चतुर्षु स्फाटिकाङ्गेषु तदा दधिमुखाद्रिषु ॥ ३२१ ॥
चैत्येषु जिनबिम्बानां नित्यानां महिमाद्भुतम् ।

चक्रिरे शक्रदिक्पालाश्चत्वारो ऽष्टाह्निकामहम् ॥ ३२२ ॥
॥ युग्मम् ॥

उत्तरे रमणीयाख्ये तत्रैशानो ऽञ्जनाचले ।
गत्वाष्टाह्नीं हरिश्चक्रे शाश्वतानां पुरो ऽर्हताम् ॥ ३२३ ॥
ईशानस्यापे दिक्पाला वापीस्थायिषु पूर्ववत् ।
महं जिनानां नित्यानां व्यधुर्दधिमुखाद्रिषु ॥ ३२४ ॥
दक्षिणाशास्थिते नित्योद्यताख्ये त्वञ्जनाचले ।
जिनानां तत्र नित्यानां चमरेन्द्रो महं व्यधात् ॥ ३२५ ॥
तद्वापीमध्यसंस्थेषु तद्वदधिमुखाद्रिषु ।
तद्दिक्पाला मुदा चक्रुरष्टाह्नीं शाश्वतार्हताम् ॥ ३२६ ॥
बलिः स्वयंप्रभाख्ये तु पश्चिमास्थे ऽञ्जनाचले ।
शाश्वतानां जिनाधीशबिम्बानां व्यधितोत्सवम् ॥ ३२७ ॥
तद्वापीकुहरस्थेषु चक्रुर्दधिमुखाद्रिषु ।
नित्यानां जिनबिम्बानां तद्दिक्पाला महोत्सवम् ॥३२८॥
इति नन्दीश्वरे द्वीपे ऽष्टाह्नीं कृत्वा सुरोत्तमाः ।
ययुर्निजं निजं स्थानं यथागतपथाध्वगाः ॥ ३२९ ॥
प्रबुद्धायास्तु यो देव्या हर्षो ऽभूत्पुत्रदर्शने ।
आस्तां स हृदि संकीर्णे न ममौ त्रिजगत्यपि ॥ ३३० ॥
तत्क्षणं दासदास्यङ्गरक्षका हर्षसाक्षिकाः ।
बद्धस्पर्धा द्रुतं वर्धापनिकार्थं दधाविरे ॥ ३३१ ॥
वर्धसे सुतरत्नस्य जन्मना देव वर्धसे ।
इत्युक्तिः कापि भूभर्तुरुत्तरीये ऽक्षिपत्करम् ॥ ३३२ ॥
सुवर्णमालिकां दासी कर्णयोर्मे न्यधादियम् ।
इतीव भूपस्तद्देहं सुवर्णैः पर्यपूरयत् ॥ ३३३ ॥

पुत्रजन्मोक्तिसारस्य परीवारस्य पार्थिवः ।
ददद्दानं महामानं ययौ सूतिगृहं प्रति ॥ ३३४ ॥
अपश्यच्छविविच्छायरत्नदीपं महीपतिः ।
सूनोर्मुखं तुषारांशुमिव निःसारतारकम् ॥ ३३५ ॥
आलप्य कोमलैः प्रेमपेशलैर्वचनैः प्रियाम् ।
अकारयत्पुरं भूपः पुत्रजन्मोत्सवाद्भुतम् ॥ ३३६ ॥
काश्मीरजरजःपूरहारिवारिघटाछटाः ।
रेजुः शिशावपि स्वामिन्यनुरागा इवावनेः ॥ ३३७ ॥
प्रत्योकः कौङ्कुमे पङ्के रेजे स्वस्तिकमौक्तिकैः ।
उष्णैः प्रभुप्रभावेण पुण्यवीजत्रजैरिव ॥ ३३८ ॥
प्रभुचन्द्रोदये पुष्पप्रकरैः परितः पुरि ।
उद्भान्तानन्दपाथोधिबुद्बुदैरिव दिद्युते ॥ ३३९ ॥
पौरागनेषु विश्वशसेवावसरलब्धये ।
कल्याणकलशैः सर्वद्वीपलूर्मैरिव स्थितम् ॥ ३४० ॥
प्रभुजन्मोत्सवे लोलभ्रुवो वन्दनदामभिः ।
पताकाहस्तलीलाभिर्नर्तयुर्विपणिश्रियः ॥ ३४१ ॥
दूरतोऽप्यतिनैर्मल्यादन्तःकर्तुमिव प्रभुम् ।
उच्चैस्तोरणचूलासु व्यलासि मणिदर्पणैः ॥ ३४२ ॥
उदाररत्नालंकारद्युतिजालजलप्लवाः ।
व्यालोलकरकल्लोलाश्चञ्चत्कुचरथाङ्गकाः ॥ ३४३ ॥
मञ्जुसिञ्जानमञ्जीरकलहंसकलस्वराः ।
स्मेराननवनाम्भोजसंकीर्तनगीतालिनिःस्वनाः ॥ ३४४ ॥
दृग्भिः प्रसूतिमुद्रागाभिः पीयमानाः पुरीजनैः ।
प्रभुजन्मप्रमोदश्रीविलासरसहेतवः ॥ ३४५ ॥

संभूय मण्डलीभूय रासकोल्लासकेलिभिः ।
पदे पदे व्यराजन्त सरस्य इव सुभ्रुवः ॥ ३४६ ॥
॥ चतुर्भिः कलापकम् ॥

भविष्यत्यधुना शुद्धिर्ममेतीव स्मितो ऽनदत् ।
धर्मः सर्वेषु चैत्येषु पूजामेक्षणकच्छलात् ॥ ३४७ ॥
अमान्तमिव चित्तान्तः प्रमदं प्रमदाजनः ।
पूर्णपात्रमिषात्पाणौ बिभ्रद्भूभृद्गृहे ऽविशत् ॥ ३४८ ॥
प्रभोर्जनन्याः स्त्रीजातिस्तथोत्कर्षमानीयत ।
यथा दूर्वां नरेशो ऽपि शिरसा तृणमप्यधात् ॥ ३४९ ॥
पाठकोलाहलोत्ताला: सबाला बालपाठकाः ।
पूजयामासिरे राज्ञा वहन्तः सोममातृकाम् ॥ ३५० ॥
करिष्यतः प्रभोः पुंसां भवबन्धाद्विमोक्षणम् ।
कारविमोचनाच्चक्रे नृपः पुण्याहमङ्गलम् ॥ ३५१ ॥
क्रीडान्तरं सुतालोककीडया भविता क मे ।
इतीव बन्धनात्क्रीडातिरश्चः पार्थिवो ऽमुचत् ॥ ३५२ ॥
भास्वानसावसौ वेति स्वयं पश्यन्निवान्तरम् ।
तृतीये ऽह्नि प्रभोः प्रातर्भूपो भानुमदर्शयत् ॥ ३५३ ॥
प्रभोरदीदृशद्रूपस्तस्यां निशि निशाकरम् ।
स बभूव सुधातृष्ट्या तद्दृष्ट्यैव सुधाकरः ॥ ३५४ ॥
निर्निमेषदृशः कामं जिनरूपनिरूपणात् ।
सुखेनैव व्यधुः षष्ठीनिशाजागरमङ्गनाः ॥ ३५५ ॥
नृपान्वयजनैः स्वामिजन्मनैवामलैरपि ।
एकादशे ऽहनि स्नातं वृद्धाचारो हि दुस्त्यजः ॥ ३५६ ॥
विविधाहारताम्बूलदुकूलाभरणार्चितैः ।

दूरतः पूरिते धात्रि सर्वतः स्वजनव्रजैः ॥ ३५७ ॥
वसूनां पूज्य एवायमिति त्रिजगतीपतेः ।
श्रीवासुपूज्य इत्याख्यां द्वादशेऽह्नि ददौ नृपः ॥ ३५८ ॥
॥ युग्मम् ॥

इत्युत्सवैर्नवनवैर्वर्धमानो दिने दिने ।
ददे ऽङ्गुष्ठसुधापुष्टः प्रभुः पितृदृशोर्मुदम् ॥ ३५९ ॥
पाणी पादौ बभुर्लोलाः प्रभोरुत्तानशायिनः ।
सद्धर्मकल्पवृक्षाणां चतुर्णां पल्लवा इव ॥ ३६० ॥
बभौ प्रभोर्मुखे मुग्धो दुग्धकान्तिः स्मितोदयः ।
उत्सुको लोकबोधाय निर्यन्धर्म इवोरसः ॥ ३६१ ॥
लक्ष्ये यत्रापि तत्रापि चिरनिश्चललोचनः ।
किमपि ध्यानमभ्यस्यन्निव प्रभुरभासत ॥ ३६२ ॥
दोलातलोपरिस्थायी प्रभोर्मौक्तिककन्दुकः ।
प्रस्तावमैक्षत ज्ञानमिव पिण्डस्थितं पुरः ॥ ३६३ ॥
बालाभिः करतालाभिर्दूरादाकारितः प्रभुः ।
उच्चैःपदगमाभ्यासकारीवोल्ललति स्म सः ॥ ३६४ ॥
स्वाङ्गुष्ठामृतसिक्तस्य प्रभोर्दशनकुड्मलाः ।
त्रैलोक्यानन्दकन्दस्य प्रारोहन्नङ्कुरा इव ॥ ३६५ ॥
जित एवैष संसारो मयेतीवोल्ललन्मुदा ।
प्रभुः प्रायो ऽनभिप्रायं चक्रे किलकिलारवम् ॥ ३६६ ॥
लोलत्करक्रमः स्वामी विलसन्नुरसा भुवे ।
बभावपारसंसारपारावारं तरन्निव ॥ ३६७ ॥
भवकूपाद्विभुर्विश्वं क्षमो ऽप्युद्धर्तुमोजसा ।
मातृहस्ताङ्गुलीलग्नः कुतुकेन पदान्यधात् ॥ ३६८ ॥

प्रसुप्तं मोहनिद्रायां जनं जागरयन्निव ।
विभुर्व्यधात्पदन्यासे घनं घर्घरकध्वनिम् ॥ ३६९ ॥
आकार्यमाणः स्वजनैर्जिनो रेजे ऽन्यतो व्रजन् ।
भवाभोगभिदेतेषां ममत्वं खण्डयन्निव ॥ ३७० ॥
वयसा सदृशीभूय प्रभोरसदृशा गुणैः ।
देवाश्चतुर्विधाः क्रीडां चक्रुः शक्रनिदेशतः ॥ ३७१ ॥
स्फुरन्ती स्वामिनो मूर्ध्नि विमुक्ता शुशुभे शिखा ।
प्रतिज्ञा तत्परस्येव संसारमथनं प्रति ॥ ३७२ ॥
येन येन यदा स्वामी रन्तुमैहत कौतुकात् ।
तत्तद्रूपं तदाधाय पुरतः स्फुरितं सुरैः ॥ ३७३ ॥
पूर्वं भवेष्वसंख्येषु दृष्टाभ्यस्तश्रुताः कलाः ।
सस्मारैवावधिज्ञानादधिपः सद्गुणोदधिः ॥ ३७४ ॥
इति क्रमादतिक्रान्तः शैशवं शिवदो विभुः ।
भाग्येन यौवनस्येव जगदानन्ददायिनः ॥ ३७५ ॥
कर्माणि यौवने जेतुं स्वामी संहननं दधौ ।
स वज्रर्षभनाराचं धनुःसप्ततिमानभृत् ॥ ३७६ ॥
स्वामिनोंऽहितलद्वन्द्वं ताम्रत्वाद्बुबुधे बुधैः ।
नूनं तस्मिन्भवे पार्ष्णिद्वयसो रागसागरः ॥ ३७७ ॥
विरेजिरे जिनेन्द्रस्य दश पादनखेन्दवः ।
यतिधर्मश्रियां रत्नकल्पिता इव दर्पणाः ॥ ३७८ ॥
निर्यतां पापजम्बालजालादशदिगात्मनाम् ।
आलम्बयष्टय इव क्रमाङ्गुल्यः प्रभोर्बभुः ॥ ३७९ ॥
प्रभोर्भवमहानीरनिधितीरकृतस्थितेः ।
उन्नतौ रेजतुः पादौ निलीनकमठाविव ॥ ३८० ॥

जगदुत्तंसकोटीरघनघर्षभयादिव ।
स्वामिनः पादयोर्गुल्फा बाढं गूढत्वमासदन् ॥ ३८१ ॥
द्वेषरागजितोर्जातौ शमनिर्ममभावयोः ।
सज्जाविव जयस्तम्भौ प्रभुनङ्घ्रायुगच्छलात् ॥ ३८२ ॥
मन्नैष्ठुर्येण मा पीडि मृदुपाणिद्वयं विभोः ।
इतीव जिननाथस्य जानुनी गूढतां गते ॥ ३८३ ॥
ऊरू क्रमोन्नते भर्तुरधर्मजयदिष्टयोः ।
तूणवद्विरतेरीर्यासमितेश्च विलेसतुः ॥ ३८४ ॥
कटीतटी पृथुर्जज्ञे मध्यदेशः कृशः प्रभोः ।
सर्वाङ्गं क नु पूर्यन्ते तादृशाः परमाणवः ॥ ३८५ ॥
लावण्यसरसो भर्तुः सुदृग्दृग्भृङ्गसंगतम् ।
रोमालिनालं नाभ्यब्जं कदाचिन्नोज्झितं श्रिया ॥ ३८६ ॥
एष्यते केवलज्ञानसार्वभौमाय सज्जितम् ।
श्रीवत्सच्छत्रतो भद्रपीठं हृत्प्राङ्गणे प्रभोः ॥ ३८७ ॥
प्रभोः पाणिद्वयी संध्यातारैस्तारकिता नखैः ।
पुण्येन्दोरुदयं विश्वे न्यवेदयदिवारुणा ॥ ३८८ ॥
दोर्दण्डौ तोरणस्तम्भौ विश्वैश्वर्यैकसि प्रभोः ।
अंसव्याजेन कल्याणकुम्भभाजौ विरेजतुः ॥ ३८९ ॥
त्रैलोक्यजनचित्तानां सदा संचलतां मुदे ।
वर्त्मत्रयोपमं रेखात्रयं कण्ठे बभौ प्रभोः ॥ ३९० ॥
उल्लासकारी पद्मानां शोषकारी भवाम्बुधेः ।
प्रभोर्मुखं तुषारांशुरपूर्वः को ऽपि द्युते ॥ ३९१ ॥
विभोर्वक्त्रालये वाणी जिह्वादोलाग्रखेलिनी ।
ओष्ठरत्नगवाक्षान्तर्वर्त्मना लक्षिता न कैः ॥ ३९२ ॥

दन्तद्युतिसुधाधारासारैर्धीरतरध्वनिः ।
न कस्य तापं चिच्छेद प्रभुज्ञानसुधाम्बुदः ॥ ३९३ ॥
नासा विश्वप्रभोरन्तःश्वाससौरभलिप्सया ।
दूरोन्नतापि पुरतो नताभून्मुखसंमुखी ॥ ३९४ ॥
हैमौ पुरःस्फुरौ न्यस्य कपोलच्छलतः प्रभोः ।
जेतुं धीरौ जगन्मोहं नेत्रवीरौ किल स्थितौ ॥ ३९५ ॥
स्वर्गापवर्गद्वारस्थाः सतां कर्मकपाटिकाः ।
समुद्घाटयितुं दध्रे कुञ्चिकाभे भ्रुवौ विभुः ॥ ३९६ ॥
त्रिलोकीकल्पवृक्षस्य कर्णपाशौ जिनेशितुः ।
ध्यानज्ञानश्रियोर्लोले दोले इव विरेजतुः ॥ ३९७ ॥
किं विभोः स्तौमि भालस्य शोभां यत्र निभालिते ।
निभालितैव धूतार्धविधुः सिद्धिशिलाखिला ॥ ३९८ ॥
प्रभोर्देहप्रभाविद्युन्मञ्जुला कुन्तलावलिः ।
दुःकर्मघर्मनिर्मन्थे सतामब्दनिभा व्यभात् ॥ ३९९ ॥
अश्रान्तपुण्यगन्धाम्बुदीर्घिकादीर्घकेलिभिः ।
ससौरभं विभुर्देहं दधौ स्वेदमलोज्झितम् ॥ ४०० ॥
नाथस्तथ्येन दुःकर्मापथ्यं न यदसेवत ।
तस्मात्तिरस्कृताशेषभोगै रोगैर्न दूषितः ॥ ४०१ ॥
प्रभोः प्राच्यतपःशाणैस्तथात्मा जनि निर्मलः ।
यथा तत्प्रभयेवाभून्मांसे रक्ते ऽपि शुभ्रता ॥ ४०२ ॥
कार्यं नौ देहदुर्गन्धः स तु नेह भवेदिति ।
ह्रियेवाहारनीहारौ विश्वादृश्यौ स्थितौ विभोः ॥ ४०३ ॥
विभोर्वक्त्रे ऽब्जमित्येत्य षट्पदाः श्वाससौरभैः ।
तृप्तिं प्रापुर्भ्रमेणापि जिनसेवा न निष्फला ॥ ४०४ ॥

इत्यद्भुतसमुद्भूतरूपातिशयवैभवः ।
विभुर्बभूव वामभ्रूविलासरसजीवितम् ॥ ४०५ ॥
कदाचिदाचितस्वर्णोत्तानपट्टस्फुटप्रभाम् ।
श्रीकेलिकमलोद्गच्छत्परागच्छुरितामिव ॥ ४०६ ॥
उन्मीलन्नीलरत्नालिमालिताद्भुतकुम्भिकाम् ।
दृग्मृगानन्दकृद्दूर्वावणस्तम्बगणामिव ॥ ४०७ ॥
पद्मरागमयस्तम्भप्रभापूरपरिप्लुताम् ।
सद्योद्यन्नृपतेजोर्कसंध्यारागश्रितामिव ॥ ४०८ ॥
स्तम्भावष्टम्भपाञ्चालीविशालीकृतसंपदम् ।
सौन्दर्यविस्मयस्तब्धखेचरीनिचयामिव ॥ ४०९ ॥
स्फुटस्फटिकसंभारभारपट्टघटाद्भुताम् ।
सुधर्माविजयोद्दण्डयशःकाण्डकुलामिव ॥ ४१० ॥
मुक्तावचूलरोन्निष्पुमेचकोल्लसंचयाम् ।
भानुत्रस्तसनक्षत्ररात्रिराजिश्रितामिव ॥ ४११ ॥
अतुल्यमूल्यमाणिक्यकलशावलिशालिनीम् ।
स्वर्गश्रीकार्मणोत्क्षिप्तजपापुष्पोत्करामिव ॥ ४१२ ॥
द्वारस्फुरत्प्रतीहारहुंकारस्खलितप्रजाम् ।
आकृष्टासिलतारङ्गदङ्गरक्षकृताट्टतिम् ॥ ४१३ ॥
प्रचण्डमण्डलाधीशमण्डलाखण्डमण्डनाम् ।
निरवद्यमहाविद्यविद्वद्वृन्दोदितद्युतिम् ॥ ४१४ ॥
उदारसारशृङ्गारवारस्त्रीवारहारिणीम् ।
औचित्यरचनस्तुत्यजात्यामात्यशतान्विताम् ॥ ४१५ ॥
व्यवहारकलाहारिव्यवहारिकुलाकुलाम् ।
पूर्यमाणमनोरङ्गतूर्यात्रिकविकस्वराम् ॥ ४१६ ॥

स्वेच्छया सेव्यमानांहिसपर्याचतुरैः सुरैः ।
भूषितां वसुपूज्येन प्रविवेश प्रभुः सभाम् ॥ ४१७ ॥
॥ द्वादशभिः कुलकम् ॥
सकङ्कणझणत्कारवारनारीकरोच्छ्वैतैः ।
ह्रादिहंसोपमैः सेव्यमुखाम्भोजस्य चामरैः ॥ ४१८ ॥
चक्रिणां गुणचक्राणां विनयं जनयन्विभुः ।
विश्ववन्द्यपदः पादपीठे पितुरुपाविशत् ॥ ४१९ ॥
॥ युग्मम् ॥
प्रभौ सभासदां दृष्टिर्लीना सत्यपि पार्थिवे ।
स्थिते ऽपि पादपे भृङ्गी पुष्प एव निलीयते ॥ ४२० ॥
प्रेक्षिताः प्रभुणा सभ्याः शुभ्रश्यामलया दृशा ।
स्वं स्नातं मेनिरे गङ्गायमुनासंगमाम्भसि ॥ ४२१ ॥
गुरुभिर्ग्रन्थसंदोहैरूहैरप्यहताः सताम् ।
तदाभञ्जत्प्रभुभ्रान्तीर्वार्तालापैकलीलया ॥ ४२२ ॥
तदा प्रज्ञाततत्त्वो ऽपि कवीन्द्राणां नवोक्तिभिः ।
अपूर्वाभिरिव स्वामी सविस्मय इवाभवत् ॥ ४२३ ॥
प्रभुः कलानामालापैर्मोहं भिन्दन्सभासदाम् ।
तथेत्यमन्यत क्वापि मूढामपि पितुर्गिरम् ॥ ४२४ ॥
निवार्य वेणुवीणादिवाद्यं स्वादविदस्तदा ।
कर्णामृतमुचं वाचमशृण्वन्वदतः प्रभोः ॥ ४२५ ॥
विभोर्लावण्यपीयूषपायिभिः सभ्यमानुषैः ।
निर्निमेषतया चक्रे तदा स्वर्गनिभा सभा ॥ ४२६ ॥
निरीक्ष्य सुतमीदृक्षमत्र क्षत्रपतिस्तदा ।
तद्विवाहमहोत्साहचिन्तार्तहृदयो ऽभवत् ॥ ४२७ ॥

तदा कक्षान्तरे क्षिप्त्वा वेत्रं वेत्रभृतां वरः ।
प्रणम्य पृथिवीजानिं जानुस्थानो व्यजिज्ञपत् ॥ ४२८ ॥
प्राप्तः संप्रति भूपाल श्रीशालनगरेशितुः
दूतो लीलाविलासस्य सुवेगस्त्वां दिदृक्षते ॥ ४२९ ॥
भ्रूपल्लवलवोल्लाससंज्ञयाथ महीपतेः ।
अमूमुचदमुं दूतं संसदन्तः स दण्डभृत् ॥ ४३० ॥
चक्षुर्विंशत एवास्य सभारत्नप्रभां पिबन् ।
देहद्युतिझलत्कारैः कोमारैर्दूरतो हृतम् ॥ ४३१ ॥
किं कान्तिचक्रमत्रेदमित्यन्तर्जातविस्मयः ।
चिरं निरूप्य पुंरूपनिश्चयाद्ध्यायति स्म सः ॥ ४३२ ॥
किं शेषो ऽयं न न फणारत्नेष्वेव स भास्वरः ।
किं सर्वाङ्गप्रभो ऽर्को ऽयं न न स क्व दृशां प्रियः ॥४३३॥
किमिन्दुरेष चक्षुष्यो न न तस्याह्नि भाः कुतः ।
किमिन्द्रो ऽयं सदोद्योती न न सो ऽक्षिगणव्रणी ॥४३४॥
अये ज्ञातं यदुर्वीन्दोः पादाग्रे विनयी स्थितः ।
तन्मन्ये वासुपूज्यो ऽयं कुमारो ऽत्र यथा श्रुतः ॥ ४३५ ॥
स एवं चिन्तयन्नेव तद्रूपहृतचेतनः ।
स्तम्भवत्संभवत्प्रीतिस्तस्थौ पुलकितो ऽश्रुदृक् ॥ ४३६ ॥
अथैष कम्पयञ्शीर्षं हर्षाविष्टो जगाविति ।
मनोरथो ऽप्ययं यस्य धन्य एव स भूपतिः ॥ ४३७ ॥
श्रुत्वैवं वसुपूज्यस्तं संभ्रमादभ्यधादिति ।
को ऽसौ क्षितिपतिर्धन्यः को वा तस्य मनोरथः ॥४३८॥
इत्युक्त्वा लब्धचैतन्यो नत्वा दूतः पतिं भुवः ।
प्राग्नमस्कारविस्मारसज्जलज्जो व्यजिज्ञपत् ॥ ४३९ ॥

लीलाविलासभूपस्य भवन्मित्रस्य भूविभो ।
प्रिया मदनरेखास्ति रेखा मदनसंपदः ॥ ४४० ॥
भृङ्गीसंगीतसोरभ्यकीर्तिं कमलमालिकाम् ।
यच्छन्तो स्वच्छपीयूषवृष्टिकृद्दृष्टिविभ्रमा ॥ ४४१ ॥
देवी स्वप्ने ऽन्यदादर्शं निशान्ते शान्तकान्तिभृत् ।
पद्मस्था पाणिपद्माक्तपद्मा पद्मावती तया ॥ ४४२ ॥
॥ युग्मम् ॥

सा विनिद्रा नरेन्द्राय स्वप्नमेनं न्यवेदयत् ।
सो ऽवदन्नन्दिनी विश्वनन्दिनी भाविनी तव ॥ ४४३ ॥
इत्युक्त्वा सा जगौ प्रीत्या सत्यमस्तु तवोदितम् ।
स्वामिन्सन्त्येव मे पुत्राः सत्पुत्रीं स्पृहयाम्यतः ॥ ४४४ ॥
अत्रान्तरे बहिः प्रातस्तूर्यनादादनन्तरम् ।
कुण्ठकण्ठीरवरवो ऽपठन्मङ्गलपाठकः ॥ ४४५ ॥
पद्मिनी विकसत्पद्ममुखी सौख्याय जायताम् ।
त्रैलोक्यलोचनं भानुर्यत्पतित्वाय युज्यते ॥ ४४६ ॥
प्रीतो ऽवाह नृपः कान्तामुपश्रुत्यानया ध्रुवम् ।
त्वत्सुता भाविता देवि दयिता त्रिजगद्गुरोः ॥ ४४७ ॥
इत्युक्तिप्रीतहृदया हृदयाधिपबोधिता ।
सा निनाय निशाशेषं विशेषसुकृतार्जनैः ॥ ४४८ ॥
ध्यायन्ती स्वप्नदृष्टायास्तद्देव्या वधुरद्भुतम् ।
ध्यानानुरूपं पुण्यैकगर्भं गर्भं बभार सा ॥ ४४९ ॥
संपूर्णदोहदा पत्युः प्रीतिसंदोहदानतः ।
सौम्योच्चग्रहसल्लग्ने सा लग्ने सुषुवे सुताम् ॥ ४५० ॥
ततो ऽद्भुतोत्सवव्यूहैः पितृभ्यामाहृते भासुरे ।

दत्तं पद्मावतीत्यस्या नाम स्वमानुसारतः ॥ ४५१ ॥
शरीरावयवस्पर्धावर्धमानकलावलिः ।
सा जाड्यविमुखी जज्ञे सुमुखी यौवनोन्मुखी ॥ ४५२ ॥
अमितः शोभते यस्याः श्यामला कुन्तलावलिः ।
विधुभ्रमेण वक्त्रस्य रजनीवानुचारिणी ॥ ४५३ ॥
यस्या निःसीमसौन्दर्यः सीमन्तः प्रतिभासते ।
जगज्जयकृतः कीर्तिस्तम्भो रतिपतेरिव ॥ ४५४ ॥
यद्भालो भाति सीमन्तदण्डः पुष्पेषुभूपतेः ।
भ्रूशिरीषस्फुरद्वारो ऽर्धचन्द्र इव चाम्पकः ॥ ४५५ ॥
दृग्विश्वासमृगश्लिष्टौ धर्तुं युवमनोमृगान् ।
यत्कर्णौ मृगयापाशौ कामयौवनयोरिव ॥ ४५६ ॥
कामकान्ताद्वयक्रीडासरसीसदृशोर्दृशोः ।
भातः पालीवनालीव यद्भ्रुवौ भग्नमेचके ॥ ४५७ ॥
रेजतुर्मञ्जुलद्योतिर्द्वारचारेण तद्भ्रुवौ ।
प्रणाल्याविव शृङ्गारविलासरसपूरयोः ॥ ४५८ ॥
कपोलयो रतिप्रीतिक्रीडाकुट्टिमयोरिव ।
यस्या नासा वहत्यन्तःसीमाभित्तिसमानताम् ॥ ४५९ ॥
कपोलयुगलं यस्या राजते राजमञ्जुलम् ।
विश्वदृग्वाहवाह्यालिवलयद्वयविभ्रमम् ॥ ४६० ॥
वहत्योष्ठयुगं यस्या द्युतिविद्रुतविद्रुमम् ।
नवीनोद्भिन्नरागद्रुपल्लवद्वयतुल्यताम् ॥ ४६१ ॥
भ्रेजे ऽनुमीयमानाया विपञ्चीमधुरस्वरैः ।
मुक्तावलीव भारत्या यन्मुखे दशनावलिः ॥ ४६२ ॥
यस्या मनसि संवासं कुरुते कुसुमायुधः ।

इतीवाद्भुतसौरभ्यचारुः श्वसितमारुतः ॥ ४६३ ॥
वीज्यमानस्य विश्वेन लोचनाञ्चलचामरैः ।
यत्कण्ठो मुखराजस्य वेत्रासनमिवेक्ष्यते ॥ ४६४ ॥
प्रवर्धमानयोर्यस्याः प्रकामं कर्णपाशयोः ।
स्थानं दातुमिवाभूतामंसौ किंचिन्नताकृती ॥ ४६५ ॥
यद्बाहुलतयोर्लोलदङ्गुलीपल्लवश्रियोः ।
नखांशुपुष्पयोः कश्चित्पुण्यात्मा लप्स्यते फलम् ॥ ४६६ ॥
यदुरःस्थायिनः कामभूपस्योपायनीकृतम् ।
यौवनेनेव वक्षोजबीजपूरफलद्वयम् ॥ ४६७ ॥
अतीव कृशतां बिभ्रच्छुभ्रप्रतिपदिन्दुवत् ।
यन्मध्यदेशो लोकेन श्रुत एव न वीक्षितः ॥ ४६८ ॥
रतिप्रीतिस्मरैर्गन्तुं यन्मध्याध्वनि संकटे ।
हस्तालम्बनदण्डाभं सज्जीचक्रे वलित्रयम् ॥ ४६९ ॥
रक्षादक्षफणिप्रख्यलक्ष्यरोमालिशालिनी ।
यस्या लावण्यपीयूषकुण्डाभा नाभिराबभौ ॥ ४७० ॥
मनोभूमत्तमातङ्गवेगप्रसरसैकतम् ।
राजते जघनं यस्या रोमालीमदरेखया ॥ ४७१ ॥
यस्याः किं वर्ण्यते तन्व्या नितम्बः स्तम्बडम्बरः ।
यस्मादाविर्भवत्युच्चैः स्फारः शृङ्गारभूरुहः ॥ ४७२ ॥
मकरध्वजसाम्राज्यतुल्यमङ्गल्यकारणम् ।
राजत्यूरुयुगं यस्या रम्भास्तम्भद्वयोपमम् ॥ ४७३ ॥
यस्या जङ्घे मिथो वीक्ष्य मन्यमाने स्वमद्भुतम् ।
हर्षेण हसतः कूजन्मुक्तामञ्जीरकान्तिभिः ॥ ४७४ ॥
किंचित्कूर्मोन्नतौ यस्याश्चरणौ वरलागतेः ।

मुखेन्दुभयतः पद्मे बद्धकोशे इव स्थिते ॥ ४७५ ॥
लीलाधःकृतजेतव्यकिङ्किल्लिकिसलद्युती ।
द्योतेते यत्क्रमौ बद्धमाणिक्यमुकुटौ नखैः ॥ ४७६ ॥
यांग्रहीज्जितयोर्यानशोभया कुम्भिहंसयोः ।
कुचाभ्यां कुम्भसौभाग्यं नूपुराभ्यां रवश्रियम् ॥४७७॥
जितं त्रिभुवनस्त्रैणमनयेति स्मरो नृपः ।
जैत्रपत्रं ददौ यस्याः कबरीदण्डदम्भतः ॥ ४७८ ॥
सा कृतस्फारशृङ्गारा शृङ्गाररसजीवितम् ।
कदाचित्पितुरुत्सङ्गमङ्गीचक्रे सभाजुषः ॥ ४७९ ॥
अस्या भविष्यति पतिः को नाम त्रिजगद्गुरुः ।
इति चिन्ताचयाक्रान्तस्वान्तो यावदभून्नृपः ॥ ४८० ॥
पुरा परिचितं किंचिद्विपञ्चीस्थापितस्वरम् ।
तावद्दिवः सभागर्भमभ्यगात्किन्नरद्वयम् ॥ ४८१ ॥
॥ युग्मम् ॥
अहो आगम्यतामागम्यतां कुशलिनौ युवाम् ।
किं चिराभ्यागतौ भूपस्तावित्याह ससंभ्रमम् ॥ ४८२ ॥
तावूचतुश्चतुःसिन्धुपूतभूतलभूषणः ।
लोकोत्तरगुणग्रामो विश्वव्यामोहमोहनः ॥ ४८३ ॥
रूपश्रीसततताहूतपुरहूतपुरन्ध्रिदृक् ।
भानोः प्रभातशीताभिः प्रभाभिरिव निर्मितः ॥ ४८४ ॥
गुणागुणविशेषज्ञो ऽनन्यसामान्यदानकृत् ।
आवाभ्यां सेव्यते भूप चम्पाभूपसुतो ऽधुना ॥ ४८५ ॥
॥ त्रिभिर्विशेषकम् ॥
गेयः स एव तस्याग्र एतद्दम्पिश्चयश्च नौ ।

किं याति वारिजातेषु पारिजातमधुव्रतः ॥ ४८६ ॥
चिरं परिचयोत्कर्षवशंवदहृदौ पुनः ।
भवन्तमन्तःकरणप्रीत्यैव द्रष्टुमागतौ ॥ ४८७ ॥
अथ भूपो ऽभ्यधाद्देयं यदि तस्याग्र एव वाम् ।
क्व तन्मे कर्णयोर्युष्मद्गीतपीयूषपारणम् ॥ ४८८ ॥
अवोचतां च तौ भक्त्याभ्यर्थितापसरसां वरा ।
चित्रलेखा पटे न्यस्य प्रभो रूपमदत्त नौ ॥ ४८९ ॥
वहावहे सहावां तद्विश्वस्त्रैरविहारिणौ ।
गायावो यत्र तत्रापि तत्पुरस्कृत्य कौतुकात् ॥ ४९० ॥
तत्ते ऽस्मद्गीतशुश्रूषा यदि पीठं विमुञ्च तत् ।
इहारोपय भूपाल रूपचित्रपटं विभोः ॥ ४९१ ॥
इत्युक्ते कौतुकी भूपः प्रभुरूपनिरूपणे ।
भद्रासनपरीहारमेवोत्तरमदत्त सः ॥ ४९२ ॥
तौ मुदाकृष्य धम्मिल्लादिव्यमाल्यार्चितं ततः ।
न्यस्य सिंहासने चित्रपटं भर्तुरगायताम् ॥ ४९३ ॥
सभासदां प्रभो रूपं पश्यतां शृण्वतां गुणान् ।
एहिरेयाहिरांचक्रे चित्तं चक्षुःश्रवोन्तरे ॥ ४९४ ॥
मुक्तापरेन्द्रियग्रामं स्वामिरूपादिदृक्षया ।
वेगादक्षिगवाक्षे ऽगात्पद्मावत्या मनः पुनः ॥ ४९५ ॥
त्रैलोक्यकल्पनाकल्पद्रुमस्त्वमभिगीयसे ।
तन्मे त्वदंघ्रिदासीत्वसंकल्पं पूरय प्रभो ॥ ४९६ ॥
इति ध्यानमयाम्भोधिमध्यमज्जितमानसा ।
प्रभुरूपातिरेकश्रीलीननेत्रैव सा स्थिता ॥ ४९७ ॥
॥ युग्मम् ॥

कारयन्प्रभुरूपाब्धौ जलकेलिमिवाक्षिणी ।
लोलयन्मौलिमुर्वीन्दुरिति सभ्यास्तदाभ्यधात् ॥ ४९८ ।
तत्प्राच्यैः फलितं पुण्यैर्दृष्टश्चित्रे ऽपि यत्प्रभुः ।
फलत्विदानीं तद्वीक्षापुण्यं तन्मूर्तिदर्शनात् ॥ ४९९ ॥
इमां पुण्यद्रुमफलं ढौकनीकृत्य कन्यकाम् ।
श्रीवासुपूज्यं पश्यामो यामश्चम्पापुरीं द्रुतम् ॥ ५०० ॥
अथ सभ्यैरनुमतः प्रहृष्टैर्हृष्टरोमभिः ।
सैन्यारब्धमहीकम्पश्चम्पायै प्राचलन्नृपः ॥ ५०१ ॥
भवद्भ्यां चित्रलेखातश्चित्रमीदृग्विधाप्यताम् ।
अयं मे दीयतां दृष्टिहृत्प्राणालम्बनं पटः ॥ ५०२ ॥
इत्यर्थितौ पितुश्छन्नं कन्यायै किन्नरौ पटम् ।
प्रदाय चित्रलेखार्थं जग्मतुर्नृपसत्कृतौ ॥ ५०३ ॥ युग्मम् ॥
कन्यामुखेन्दुविच्छायमार्गनद्यम्बुजव्रजः ।
त्वन्मित्रं त्वामयं स्वामिन्नृपः सत्वरमेति सः ॥ ५०४ ॥
श्रीचम्पेश भवद्देशसीमानं समुपेयुषा ।
तेनाहं प्रहितस्तुभ्यमिति ज्ञापयितुं पुरः ॥ ५०५ ॥
अथ श्रीवसुपूज्यो ऽङ्गलग्नं भूषणमद्भुतम् ।
ददौ मुदा सुवेगाय निःशेषं शेखरं विना ॥ ५०६ ॥
पश्यन्नुत्पश्यवदनान्प्रसादोर्मिस्पृशा दृशा ।
अभ्यधाच्च सुबुद्ध्यादीन्सचिवान्भूशचीवरः ॥ ५०७ ॥
अहो श्रीवासुपूज्यस्योद्वाहचिन्ता च मे ऽभवत् ।
कन्यारत्नमिहायातं सुवेगश्च न्यवेदयत् ॥ ५०८ ॥
कार्यारम्भे ऽनुकूलार्थसंपत्तिः शकुनं महत् ।
इत्थं ग्रन्थार्थ एवायमुत्साहयति मामिह ॥ ५०९ ॥

तद्युक्तं संमुखं गन्तुमिदानीं तस्य भूपतेः ।
युक्तमेवेत्यमात्योक्तः सो ऽचलत्सपरिच्छदः ॥ ५१० ॥
अमन्दानन्दमहिमाविभावमिलतां नृपौ ।
गुरूपदिष्टतत्त्वार्थश्रोतृश्रद्धारसाविव ॥ ५११ ॥
आश्लेषकुशलप्रश्नप्रीतिवाक्यप्रमोदिनौ ।
एकस्वर्णरथारूढौ तौ पुरान्तमुपेयतुः ॥ ५१२ ॥
लीलाविलासमावास्य तत्रावासे महीयसि ।
यथोचितं च सत्कृत्य वसुपूज्यो ऽविशत्पुरीम् ॥ ५१३ ॥
अन्तः संततसंचारैः सचिवैः शुचिवाचकैः ।
द्रढयांचक्रतुस्तौ च वरकन्याकरग्रहम् ॥ ५१४ ॥
ददौ कुण्डलयित्वाथ तद्दिनादशमेऽहनि ।
उभाभ्यां सत्कृतः शुद्धं लग्नं ज्योतिर्विदां वरः ॥ ५१५ ॥
पादौ प्रक्षाल्य कल्याणप्रदौ कल्याणदानवान् ।
नृपः श्रीवासुपूज्याय कन्यां स प्रददौ मुदा ॥ ५१६ ॥
शुभे ऽहनि जयादेव्या तथा मदनरेखया ।
पस्पृशे कर्म वैवाह्यं गानैर्धवलमङ्गलैः ॥ ५१७ ॥
संमर्दचकिता विद्यादेवता इव षोडश ।
स्तम्भाग्राण्यभजन्नाथमीक्षितुं शालभञ्जिकाः ॥ ५१८ ॥
समुक्तागुलमुक्तास्रग्नीलचन्द्रोदयच्छलात् ।
शब्दपूर्त्यै विभूद्वाहे प्राप्तमिन्दूडुभूत्रभः ॥ ५१९ ॥
दिग्मुखानीव चत्वारि सोत्कण्ठानीक्षितुं विभुम् ।
चलचन्दनमालाभूभाञ्जि स्तम्भान्तराण्यधुः ॥ ५२० ॥
नवाङ्गवेदिकादम्भानिधिकुम्भोपलक्षिताः ।
तत्रेयुः स्वामिसेवायै श्रियश्चतसृणां दिशाम् ॥ ५२१ ॥

अपि श्रीवासुपूज्यस्य विवाहोपकृतौवयम् ।
इति रोमाञ्चिता वेद्यो बभुर्बद्धैर्यवाङ्कुरैः ॥ ५२२ ॥

इतश्च तेनुरभ्यङ्गमङ्गनाः कृतमङ्गलाः ।
स्वर्णासनजुषः पद्मावत्यास्तैलैः सुगन्धिभिः ॥ ५२३ ॥
उद्वर्तयांबभूवुस्ता हृष्टाः पिष्टातकैरिमाम् ।
अस्या मन इव स्वामिगुणालीगानमङ्गलैः ॥ ५२४ ॥
अङ्गेषु नवसु न्यस्तमङ्गल्यातिलका बभुः ।
तस्यां नवग्रहीतोषा इव स्वामिकरग्रहे ॥ ५२५ ॥
तदङ्गं भाग्यसौधं ताः स्वस्तिकारम्भसूत्रवत् ।
तर्कुकौसुम्भसूत्रेणास्पृशन्सव्यापसव्ययोः ॥ ५२६ ॥
वर्णके निहिता सेयं ताभिः संरुद्धचापला ।
ध्यायन्ती हृदि विश्वेशं योगिनीव व्यराजत ॥ ५२७ ॥
वर्णकस्य विवादीव तस्या उद्वर्णकः कृतः ।
ताभिस्तथाविधानां तद्विधीनामनुवादकृत् ॥ ५२८ ॥
स्वाम्यंशसममाणिक्यभृङ्गारस्पर्शिभिर्जलैः ।
हृष्यन्त्यः स्नपयामासुस्तास्तां न्यस्यासनान्तरे ॥ ५२९ ॥
धूपितामद्भुतैर्धूपैरासयन्नासनान्तरे ।
ताश्चारुचीरानिर्नीरशरीरचिकुरां च ताम् ॥ ५३० ॥
रागस्तत्पादयोस्ताभिर्लगितो ऽलक्तकच्छलात् ।
वीतरागे ऽप्यहं योज्यो ऽनयेति विनयीव सः ॥ ५३१ ॥
सा ताभिश्चन्दनश्वेतचीरमौक्तिकभूषणैः ।
स्वामिप्राप्तिस्फुटीभूतैरिव भाग्यैरलंकृता ॥ ५३२ ॥
ताभिर्निदधिरे तस्याः केशेषु कुसुमस्रजः ।
प्रभुभीत्या स्मरेणेव गोपयामासिरे शराः ॥ ५३३ ॥

इत्थं विहितशृङ्गारा ताभिरुत्पाद्य सा रसात् ।
अन्तर्मातृगृहं नीत्वा हेमपीठे न्यवेशयत ॥ ५३४ ॥
इतश्चेन्द्रो ऽवधेर्ज्ञात्वा प्रभोरुद्वाहमङ्गलम् ।
आययौ सपरीवारः कालज्ञा हि सुसेवकाः ॥ ५३५ ॥
वासुपूज्यं पुरस्कृत्य तेन वाग्लोपभीरुणा ।
विवाहमङ्गलकृते कृतिनाभ्यर्थितः प्रभुः ॥ ५३६ ॥
मोक्षाध्वरोधि भोक्तव्यं कर्म भेत्तुं जिनो ऽप्यथ ।
कामं जित्वा तदस्त्रं स्त्रीं पाणौ कर्तुं मनो दधे ॥ ५३७ ॥
मलस्वेदादिमुक्तो ऽपि विधिज्ञेन बिडौजसा ।
अस्नप्यत मुदा रत्नप्रतिमास्थ इव प्रभुः ॥ ५३८ ॥
सर्वाङ्गीणं विभुर्भोगफलकर्मजयोन्मुखः ।
दधौ धर्ममयं वर्म चन्दनालेपनच्छलात् ॥ ५३९ ॥
ताद्रूप्यमेव बिभ्राद्भिरत्यच्छजलजीवितैः ।
न मुक्ताभरणैर्भर्तुः पिहिता देहदीधितिः ॥ ५४० ॥
अत्यद्भुतद्युतिः स्वामी धृतस्वच्छसितांशुकः ।
ज्योत्स्नावलितमाणिक्यशैलशृङ्गनिभो बभौ ॥ ५४१ ॥
आरुह्य मधुरारावैरावणमथ प्रभुः ।
क्षीराब्धिवीचीं बालार्कप्रतिबिम्ब इवाचलत् ॥ ५४२ ॥
करौघं चामरीकृत्य च्छत्रीकृत्य च मण्डलम् ।
तदेन्दुर्लाञ्छनं भेत्तुमिव देवमसेवत ॥ ५४३ ॥
मुहुर्मङ्गल्यकलशः कलितः कुलबालया ।
प्रभोर्मुखाग्रे बभ्राम शोभाभिक्षुरिवोडुपः ॥ ५४४ ॥
परीक्षादक्षयेन्द्राण्या लावण्यैकनिधेर्विभोः ।
मुहुरुत्तारणीकृत्य लवणं तत्यजे ऽमितः ॥ ५४५ ॥

मूढस्य गूढं तीर्थेशवरभावमजानतः ।
गलगर्जिर्भवस्येव तदा तूर्यस्वनो ऽजनि ॥ ५४६ ॥
पुरः सुरस्त्रियो ऽनृत्यन्ध्वनद्ध्वलमङ्गलाः ।
प्रभुस्तासां प्रमोदाय दधौ हृष्टमिवाननम् ॥ ५४७ ॥
मुहुर्मुहुः स्वपुत्रास्यं पश्यन्ती नृविमानगा ।
जगौ वृता सखीवृन्दैर्जया धवलमङ्गलान् ॥ ५४८ ॥
वसुपूज्यो नृपंघट्टस्पर्धावर्धिष्णुसंमदः ।
वृतः शक्रादिभिर्देवैर्दिव्ययानः पुरे ऽचलत् ॥ ५४९ ॥
इत्थं कृतार्थयन्नाथो जनाक्षीण्यमृतप्लवैः ।
आसदन्मण्डपद्वारं पूर्वाद्वारमिवोडुपः ॥ ५५० ॥
मुक्तयानः स्थितस्तत्र शक्रहस्तावलम्बनः ।
त्यक्तकृत्यो मुनेरात्मा ध्येयलग्न इव प्रभुः ॥ ५५१ ॥
तदा मदनरेखा तु तत्तत्कृत्योत्कराकुला ।
अन्तरन्तरुलूलूनामाददेशेति योषितः ॥ ५५२ ॥
हंसि धेहि मणिस्थालं चम्पिके चन्दनं नय ।
आलि शालिकणान् मुञ्च दधि धारय धारिणि ॥५५३॥
तरले सरलं वासः कौसुम्भं प्रगुणीकुरु ।
तिलकं स्थापय स्थाने मदने वदने मम ॥ ५५४ ॥
मुखरे शेखरं यच्छ स्रजः सज्जय सज्जने ।
कर्पूरे देहि कर्पूरं मृगनाभिं मृगि स्मर ॥ ५५५ ॥
किमेवं मन्दचारिण्यो यूयं किं नात्र पश्यत ।
नन्वयं वीक्ष्यते द्वारि वरस्त्रिजगतीवरः ॥ ५५६ ॥
पञ्चभिः कुलकम् ॥
प्रभुलावण्यदेहार्चिस्पर्धिनौ द्वारि काप्यथ ।

शरावसंपुटे क्षिप्त्वा मुमोचं लवणानलौ ॥ ५५७ ॥
दूर्वादधि शुभं स्थालं दधौ कापि प्रभूत्सवे ।
संक्षिप्तागतनीलाब्जफेनभृन्मानसोपमम् ॥ ५५८ ॥
मन्थानं मुसलं काचित्पाणौ कृत्वा पुरः स्थिता ।
कर्माणि मथितुं भंक्तुं प्रभोः शक्तिरिवाङ्गिनी ॥ ५५९ ॥
चक्रे ऽथ चान्दनाञ्चश्वश्रूः श्रीविभोस्तिलकान्नव ।
अङ्गेषु सोत्तमाङ्गेषु निधिश्रीदर्पण निव ॥ ५६० ॥
अर्घं देह्यर्घदे ऽर्घ्याय वरायेति गुरुस्वरैः ।
धवले गीयमाने सा प्रभोरर्घं ददाविति ॥ ५६१ ॥
जगतां मङ्गलस्यापि दूर्वादध्यक्षतैर्विभोः ।
चक्रे सा मङ्गलं यस्माल्लोकस्याचरणं महत् ॥ ५६२ ॥
अथोत्तरीयकौसुम्भांशुकच्छन्नमुखेन सा ।
त्रिः पस्पर्श विभोर्भालं मथा च मुसलेन च ॥ ५६३ ॥
त्रटत्त्रटिति तन्वानं लवणानलपूरितम् ।
शरावसंपुटं चाग्रे विभोरुत्तार्य सामुचत् ॥ ५६४ ॥
सपादुकेन वामेन तद्भभञ्जांघ्रिणा प्रभुः ।
जगत्प्राणस्य का लज्जा भवेद्बुद्बुदभञ्जने ॥ ५६५ ॥
कौसुम्भवसनं कण्ठे क्षिप्त्वा मदनरेखया ।
आकृष्य प्रापितो मातृगृहं स्वामी तया रयात् ॥ ५६६ ॥
सितवस्त्रावृताङ्गो ऽत्र मातृणामग्रतः प्रभुः ।
निषसादासने हैमे हंसः स्वर्णाम्बुजे यथा ॥ ५६७ ॥
कन्दर्पराट्श्रीकरणमुद्राभमदनान्वितम् ।
वरवध्वोर्बबन्धेन्द्रः कङ्कणं दक्षिणे करे ॥ ५६८ ॥
उत्सृतस्वच्छवस्त्रोर्मिस्फुटीभूतमुखाब्जयोः ।

तयोर्दर्शनमन्योन्यं वरवध्वोरभूत्ततः ॥ ५६९ ॥
एकत्रोद्वृतयोः पिष्ट्वा शमीपिष्पलयोस्त्वचौ ।
हस्तालेपं वधूहस्ते विदधुः सधवाःस्त्रियः ॥ ५७० ॥
लग्नस्याभ्यर्णभावेन तुमुले विनिवारिते ।
समयः समयो ऽस्तीति प्रोच्चैरुच्चरिते नरैः ॥ ५७१ ॥
वधूहस्तं स्वहस्तेन शुभलग्ने ऽग्रहीद्विभुः ।
ऊर्मिकां चात्र सूत्रामा चिक्षेप करसंपुटे ॥ ५७२ ॥युग्मम् ॥
वन्दिवाकुलवृद्धाशीस्तूर्यमङ्गलगीतिभिः ।
हर्षकोलाहलैर्भूरि तदापूरि जगत्त्रयम् ॥ ५७३ ॥
तारामेलो ऽथ तत्स्वान्तगुणर्द्धिपटयोः स्फुटम् ।
सकलः स्यूततां चक्रे दृग्ज्योत्स्नाहीरतन्तुभिः ॥ ५७४ ॥
तया विश्वपतिर्युक्तो विश्वात्यद्भुतरूपया ।
प्रकामं कामनीयो ऽभूत्क्षमयेव तपोगुणः ॥ ५७५ ॥
भक्त्यारोप्य विभुं कट्यां शक्रो वेदिगृहं प्रति ।
चचालैवं च पौलोमी वधूमुत्पाद्य तत्क्षणम् ॥ ५७६ ॥
अवियुक्तकरं बद्धाञ्चलमेतद्वधूवरम् ।
मिलितं चलदानन्दि कीर्तिदानोपमं बभौ ॥ ५७७ ॥
पूर्वद्वारेण तत्रेशः प्रविश्याथ तथा स्थितः ।
गीतेषु मङ्गलेषूच्चैर्मुमुचे नमुचिद्विषा ॥ ५७८ ॥
ज्वलनं मञ्जुलज्वालमभितः कान्तया सह ।
स्वाम्यभ्राम्यद्यथा मेरुं दिनाधीशो दिनश्रिया ॥ ५७९ ॥
लीलाविलासादेशेन मन्त्रीशस्त्रिजगद्विभोः ।
सुलक्षणान्परोलक्षानुत्तुङ्गांस्तुरगान्ददौ ॥ ५८० ॥
अथैवं वर्तिते मन्त्री द्वितीये मङ्गले विभोः ।

परःसहस्रान्करिणः प्रमोदादुन्मदानदात् ॥ ५८१ ॥
तृतीये मङ्गले जाते सचिवः स्वामिने ददे ।
कोटिमूल्यानलंकारसमुदायान्परःशतान् ॥ ५८२ ॥
चतुर्थे मङ्गले पूर्णे प्रभौ मन्त्री वितीर्णवान् ।
स्वर्णमौक्तिकमाणिक्योत्कराञ्श्रीकेलिपर्वतान् ॥ ५८३ ॥
चतुर्थे मङ्गले पुत्री परकीयेति निष्ठुरे ।
गीते हर्षाश्रु वध्वम्बा तत्तं जाड्यभिदे दधौ ॥ ५८४ ॥
कौतुकं मङ्गलोद्गानमथ चक्रे मिथस्तदा ।
वरवध्वाश्रयैर्योषिज्जनैर्नर्तितसंमदैः ॥ ५८५ ॥
दानैर्मनोरथातीतैरर्थिनोऽथ कृतार्थयन् ।
वरवध्वोर्व्यधादिन्द्रः कराञ्चलविमोचनम् ॥ ५८६ ॥
कोटिद्रव्यप्रदं देशं पाणिमोक्षणपर्वणि ।
दत्तवान्स्वामिनोऽमात्यः प्रणिपत्य प्रमोदतः ॥ ५८७ ॥
हावभावभवद्भङ्गीसंगीतप्रभुकीर्तयः ।
स्वस्वहर्षैरथानृत्यन्सुरासुरनरस्त्रियः ॥ ५८८ ॥
विहितातुल्यमङ्गल्यः पत्न्या सह महोत्सवैः ।
आरुह्यैरावणं नाथः स्वस्थानार्थमथाचलत् ॥ ५८९ ॥
एति पञ्चमहाशब्दैः सत्रियः प्रभुरित्यथ ।
औत्सुक्यापूर्णशृङ्गारा दधावुर्नागराङ्गनाः ॥ ५९० ॥
उत्तरीयं करे कापि कुर्वती सत्वरागमत् ।
स्वामिनो न्युञ्छनं कर्तुमिवाद्भुतवपुःश्रियः ॥ ५९१ ॥
अताण्डको ऽथ ताडङ्कीरम्यः कर्ण इति प्रभुम् ।
सुकर्णी प्रष्टुकामेव काप्यागादेककुण्डला ॥ ५९२ ॥
कस्तूर्यालिप्य काप्यास्यं रभसा चन्दनैः शिरः ।

शृङ्गारो ऽयः शमस्तूचैरितीवेष्टं विभोर्व्यधात् ॥ ५९३ ॥
नार्हतः प्रतिमः कोऽपीत्यर्थे काप्याभिमानिनी ।
कृष्टसर्पकरेवागाद्वेणीगुम्फनतत्परा ॥ ५९४ ॥
औत्सुक्याद्यावकभ्रान्त्या काप्यधादधरे ऽञ्जनम् ।
ज्ञापयन्तीव शृङ्गाररसपूरावधिं विभोः ॥ ५९५ ॥
कापि कण्ठोचिते माल्ये त्वरावेशात्करस्थिते ।
आगादाज्ञेव पुष्पेषोरस्त्रपाणिः पुरः प्रभोः ॥ ५९६ ॥
त्वरा विस्मृतहारापि वैरूप्यं कापि नाप यत् ।
तच्छ्रियं सुदती स्वामिवीक्षाहर्षस्मितैर्दधौ ॥ ५९७ ॥
इत्थमानन्दसंदर्भं पुरे बिभ्रदथ प्रभुः ।
सप्रियः प्राविशत्सौधं योगी शुद्धं लयं यथा ॥ ५९८ ॥
प्रभुं प्रणम्य रम्यास्यां जयामापृच्छ्य भक्तितः ।
परिस्पन्दकृतोल्लासः शक्रः स्ववासमासदत् ॥ ५९९ ॥
सुवर्णवज्रमाणिक्यमौक्तिकालंकृतीः पराः ।
पद्मावत्यै ददौ संख्यातीताः प्रभुपिता ततः ॥ ६०० ॥
अशनांशुकताम्बूलालंकारादिप्रदानतः ।
विवाहो ऽभूत्तथान्योन्यं नोपमापि यथा जने ॥ ६०१ ॥
लीलाविलासभूपालः स्वर्णाश्वेभरथांशुकैः ।
सन्मान्य वसुपूज्येन स्वदेशाय व्यसृज्यत ॥ ६०२ ॥
ततः श्रीवासुपूज्यो ऽसौ ज्ञानत्रितयदृष्टिभिः ।
दृष्टभूतभवद्भाविभावो ऽप्यभ्रान्तिभागपि ॥ ६०३ ॥
भवाम्भोर्जनमुद्धर्तुमात्तयत्नो ऽपि चेतसा ।
मोक्षलक्ष्मीपरीरम्भारम्भे संरम्भवानपि ॥ ६०४ ॥
परं भोगफलं कर्म भोक्तव्यमिति निश्चयात् ।

किंचिच्चकार संसारव्यापारकरणं मनः ॥ ६०५ ॥
त्रिभिर्विशेषकम् ॥
कदाचिदद्भुतारामे कदाचित्सिन्धुरोधसि ।
कदाचित्केलिशैलेषु कदाचिच्चित्रसद्मसु ॥ ६०६ ॥
कदाचिद्वनितोल्लासहल्लीशकविलोकने ।
कदाचित्किन्नरीतारगीताकर्णनकौतुके ॥ ६०७ ॥
कदाचिन्मघवादिष्टसुरीघट्टितनाटके ।
स्वामी विनिर्ममे कर्मनिर्जरां निर्जरैर्नुतः ॥ ६०८ ॥
त्रिभिर्विशेषकम् ॥
जगन्मित्रस्य मित्राणि विश्वसेव्यस्य सेवकाः ।
विशेषज्ञा विशेषेणाभवन्भूपाः शतानि षट् ॥ ६०९ ॥
आसने क्रीडने याने ऽवस्थाने शयने ऽशने ।
पार्श्व एवार्हतस्ते ऽस्थुरङ्गानि भविनो यथा ॥ ६१० ॥
ते निर्मलगुणाः स्वाम्यासत्तेर्जाताः सुदर्शनाः ।
स्वर्णकेतकसांगत्याद्यथामोदोद्भटाः पटाः ॥ ६११ ॥
एतानद्भुतसत्त्वांश्च प्रभुस्तत्त्वानि बोधयन् ।
सुखेन गमयामास वासरान्प्रीतिभासुरान् ॥ ६१२ ॥
अन्यदा संमदायेशो मातापित्रोर्जनस्य च ।
लीलारामं समित्रो ऽगाद्वसन्तोत्सवमीक्षितुम् ॥ ६१३ ॥
वलत्तिलककिञ्जल्कद्रवोर्वीसेककर्मभिः ।
सिन्धुवारसुमस्फारमुक्तास्वस्तिकराजिभिः ॥ ६१४ ॥
उड्डीनाम्रपरागोर्मिप्रसरद्गन्धसृष्टिभिः ।
क्रीडाद्रिनिर्झरोद्गारतूर्यतारतरस्वनैः ॥ ६१५ ॥
मरुत्कम्पितकङ्केल्लिवल्लीपल्लवनर्तनैः ।

बकुलामोदमत्तालिश्रेणिवेणुमृदुस्वनैः ॥ ६१६ ॥
कलकण्ठीकुहूकारपञ्चमोच्चारगीतिभिः ।
कूजत्कीरमहाबन्दिसंदोहजयघोषणैः ॥ ६१७ ॥
चारुचम्पकविस्मेरपुष्पारात्रिकमङ्गलैः ।
मलयानिलसंश्लिष्टपाटलाञ्चलवीजनैः ॥ ६१८ ॥
किंशुकाञ्जनवासन्तीविचित्रन्युञ्छनांशुकैः ।
विशतो विश्वनाथस्योद्यानश्रीरुत्सवं व्यधात् ॥ ६१९ ॥
षड्भिः कुलकम् ॥
लीलारामे प्रसर्पन्ती स्वभावतरला विभोः ।
प्रसादविशदा दृष्टिः सुधावृष्टिरिवाबभौ ॥ ६२० ॥
अथासीनः प्रभुः पीठे रक्ताशोकतरोस्तले ।
स्वकायकान्तिभिस्तन्वन्ना स्तम्बात्तस्य पल्लवान् ॥६२१॥
कुसुमाभरणैर्भूरि भूषितो ऽभाद्विभुस्तदा ।
अदीनशारदीनाभ्रश्रेणिर्मणिगिरिर्यथा ॥ ६२२ ॥
आन्दोलनजलक्रीडागृङ्गारोद्गारिगीतिभिः ।
प्रमादिनं जनं वीक्ष्य विभुरेवं व्यचिन्तयत् ॥ ६२३ ॥
अहो मोहः कियानेष निःशेषज्ञानहानिकृत् ।
यत्प्रभावादसद्भावाः सद्भावा भविनां हृदि ॥ ६२४ ॥
नारीं पश्यन्ति दोलास्थां विमानान्तः सुरीमिव ।
न धैर्यध्वंसिनीमन्धाः पाशबद्धां शिलामिमाम् ॥ ६२५ ॥
स्वं दोला दोलितं वेत्ति न पुनर्मुग्धधीर्जनः ।
किंकर्मायं गतौ नेयः केति धात्रा तुलाधृतम् ॥ ६२६ ॥
जानन्त्यम्भो ऽरुणं रागाब्धिवीचीति प्रियेक्षणम् ।
न प्रमादाग्निदग्धस्य ज्वालां पुण्यौकसो जडाः ॥ ६२७॥

क्रीडाजलकणान्मुक्ताः स्वतनौ मनुते जनः ।
श्रेयोङ्गे विषयैस्तप्ते नैतत्पिटकपेटकम् ॥ ६२८ ॥
गीतं कामास्त्रटङ्कार इत्याख्याति जनो ऽल्पधीः ।
न त्वेवं दुर्गतिद्वारकपाटोद्घाटनध्वनिः ॥ ६२९ ॥
गीतगाने शिरःकम्पः शंसायां तन्यते जडैः ।
महाप्रमादो ऽयमिति निषेधे ज्ञायते न किम् ॥ ६३० ॥
विश्वत्रयसमृद्ध्यापि नाप्यते जन्म मानुषम् ।
तदित्थं हार्यते व्यर्थमहो मोहो महानिह ॥ ६३१ ॥
तदेवं सर्वथा मूढजनप्रौढीकृतो भवः ।
उचितस्त्यक्तुमेवायं महतामहतात्मनाम् ॥ ६३२ ॥
तदद्यापि कियद्भोगफलं कर्मेदमस्ति मे ।
इति तत्रावधिज्ञानं प्रभुः प्रथितवांस्ततः ॥ ६३३ ॥
जन्मतो वर्षलक्षेषु गतेष्वष्टादशस्वथ ।
कर्मभोगफलं भुक्तमिति मत्वावधेस्तदा ॥ ६३४ ॥
उच्चैर्निःश्रेयसस्थानारोहणैकाधिरोहिणीम् ।
दीक्षां ग्रहीतुकामो ऽभूज्जितकामो जयाङ्गजः ॥ ६३५ ॥
॥ युग्मम् ॥
अस्मिन्नवसरे ब्रह्मलोकात्पञ्चमकल्पतः ।
लोकान्तिकाख्याः सम्यक्त्वपरिणामा महर्द्धिकाः ॥ ६३६ ॥
स्वस्वासनप्रकम्पेन प्रयुक्तावधयः क्षणात् ।
ज्ञातद्वादशतीर्थेशव्रतकालाः क्रियाविदः ॥ ६३७ ॥
सारस्वता अथादित्या वह्नयो वरुणास्तथा ।
गर्दतोयाश्च तुषिता अव्याबाधाभिधा अपि ॥ ६३८ ॥
मरुतो ऽरिष्टसंज्ञाश्च नवैते निर्जरव्रजाः ।

आगत्य स्वामिनं भक्त्या प्रणिपत्य व्यजिज्ञपन् ॥ ६३९ ॥
चतुर्भिः कलापकम् ॥
जीवान्भवाम्बुधौ मग्नानुद्धर्तुमहतं परैः ।
शुद्धधर्ममयं तीर्थं तीर्थनाथ प्रवर्तय ॥ ६४० ॥
अथैवं विज्ञपय्यैते ज्ञातकृत्यमपि प्रभुम् ।
प्रणिपत्य यथास्थानं जग्मुर्मुदितमानसाः ॥ ६४१ ॥
लीलारामादथ स्वामी कामी दीक्षापरिग्रहे ।
आगत्य स्वालयं मातापित्रोः पार्श्वे ऽभ्यधादिति ॥६४२॥
मातस्तात न मे स्वान्तं लीलारामे धृतिं दधौ ।
ततो मामनुजानीतमात्मारामाय संप्रति ॥ ६४३ ॥
तावार्जवोज्वलस्वान्तावूचतुः सर्ववेदिनम् ।
वत्सात्मीयः क आरामो यत्र ते रमते मनः ॥ ६४४ ॥
मातस्तात न भाषे ऽहं स्वं कंचिद्भूरुहां चयम् ।
यद्भवे स्वो न कायो ऽपि का कथा शेषवस्तुषु ॥ ६४५ ॥
आत्माराममभुं वच्मि कषायविषयोज्झितम् ।
इष्टानिष्टे समं शुद्धध्येयबद्धलयं मनः ॥ ६४६ ॥
तत्रासक्तं मम स्वान्तं प्राप्यते तत्तु दीक्षया ।
ततो मामनुमन्येथामस्यै यद्यस्मि वल्लभः ॥ ६४७ ॥
आकर्ण्य कर्णकटुकं पटुकं तद्वचः प्रभोः ।
जननीजनकौ जातमूर्छावपततां क्षितौ ॥ ६४८ ॥
ततः शीतोपचारेण चिरेणाञ्चितचेतनौ ।
कल्पितानेकसंकल्पावनल्पं तावजल्पताम् ॥ ६४९ ॥
त्वत्तः सर्वजनीनात्कि दुःसहास्मासु वागभूत् ।
यद्वा वत्स कदाप्यब्दादपि क्वापि पतेत्तडित् ॥ ६५० ॥

नवे वयसि दीक्षार्थमित्थं जल्पन्नवानभूत् ।
प्रातर्वैकालिकं याचन्निव मुग्धास्यहास्यकृत् ॥ ६५१ ॥
एकादशभिरर्हद्भिः श्रीनाभेयपुरःसरैः ।
राज्यं विधाय जगृहे व्रतं ते ऽपि शिवं ययुः ॥ ६५२ ॥
त्वं जिनो द्वादशस्तावद्गमिष्यसि शिवं ध्रुवम् ।
तदूर्ध्वं तु गतिर्नेति राज्यं राज्यसुखं भज ॥ ६५३ ॥
अथ दन्तांशुमुक्तास्रग्भूषिता भारती परा ।
वितेने श्रीजिनेन्द्रेण मातापित्रोः प्रबोधिनी ॥ ६५४ ॥
सत्यं यदुःसहा मद्वाक् परं मोहवृतात्मनाम् ।
यथा व्यथाकरी विश्वनेत्ररुग्नेत्ररोगिणाम् ॥ ६५५ ॥
नवे वयसि या दीक्षा नैव हास्याय सा सताम् ।
न हि पीयूषपाने ऽपि मस्तावः प्रेक्ष्यते बुधैः ॥ ६५६ ॥
भोक्तुं भोगफलं कर्म राज्यं चक्रे जिनैः पुरा ।
तदेवमेव मे छिन्नं तन्न राज्ये कृते फलम् ॥ ६५७ ॥
राज्ये ऽपि न सुखं यस्माद्दुःखमैश्वर्यमानतः ।
रसाधिक्यानुमानेन व्याधयः पीडयन्ति यत् ॥ ६५८ ॥
तस्मान्मोहं परित्यज्य पूज्यौ सज्जं व्रताय माम् ।
सर्वथैवानुमन्येथामिहार्थे ऽस्मि कृताञ्जलिः ॥ ६५९ ॥
इति श्रुत्वा गलत्सत्त्वा त्रपां त्यक्त्वा जया रयात् ।
तथारोदीद्यथा लोकांश्चित्रस्थानप्यरोदयत् ॥ ६६० ॥
उत्सङ्गसङ्गिनं कृत्वा स्पृशन्ती पाणिना प्रभुम् ।
बभाषे बाष्पसंरुद्धकण्ठा कुण्ठगिरा जया ॥ ६६१ ॥
हा वत्स मयि वात्सल्यं तत्ते क नु गतं क्षणात् ।
यत्त्वं मे दारयस्येवं हृदयं व्रतवार्तया ॥ ६६२ ॥

मालतीमुकुले युक्तं किं कुकूलाग्निमोचनम् ।
योग्यं वा नलिनीनाले क्वचित्ककचदारणम् ॥ ६६३ ॥
वरं क्षौमाम्बरे किं स्यात्कर्करोत्करबन्धनम् ।
उच्चैर्मरिचचूर्णस्योचितः क्षेपः किमीक्षणे ॥ ६६४ ॥
काचकुम्भे किमु श्रेष्ठं हठान्मुद्गरताडनम् ।
किं रम्भास्तम्भगर्भे ऽसिघातपातः सतां मतः ॥ ६६५ ॥
अस्मिञ्छिरीषपुष्पाग्रसुकुमारे कुमार किम् ।
केशोन्मूलनमुख्यानि कष्टानीष्टानि ते ऽङ्गके ॥ ६६६ ॥
चतुर्भिः कलापकम् ॥
अथाहार्हन्मुधासारं विश्वतापहरं वचः ।
अहृद्यैः खिद्यसे मातः किमेभिः कुविकल्पनैः ॥ ६६७ ॥
सौकुमार्यं बहिःस्पर्शे सारत्वं चान्तरं स्थिरम् ।
अर्हतां जायते ऽङ्गेषु वज्रेष्विव जनोत्तरम् ॥ ६६८ ॥
इति श्रुत्वा व्रतार्थित्वे मत्वा नाथस्य निश्चयम् ।
जगाद भगवत्पूज्यां वसुपूज्यनृपो जयाम् ॥ ६६९ ॥
धन्यां मन्यामहे देवि त्वामेव भुवनत्रये ।
सुरासुरनरेन्द्रार्च्यः सूनुर्यस्या जिनो ऽजनि ॥ ६७० ॥
ततः स्वकीयपुण्यैकप्रासादस्याधुनाद्भुतम् ।
अर्हद्दीक्षानुमत्या त्वं कलशारोपणं कुरु ॥ ६७१ ॥
एवमुक्तावदन्मुक्ताकान्तिकान्तान्वया जया ।
मत्पुत्रस्य भवत्विष्टं हृष्टास्म्येतावताप्यहम् ॥ ६७२ ॥
ततः कृताञ्जलिः स्वामी तावापृच्छ्य प्रमोदतः ।
सांवत्सरिकमारेभे दानं सर्वार्हतां मतम् ॥ ६७३ ॥
आसमुद्रममुद्रं तद्दानं दातुमिलातले ।

जिनो जङ्गमकल्पद्रुश्चकार क न किंकरान् ॥ ६७४ ॥
यस्मै यद्रोचते तेन तद्राह्यमिति गर्जिनः ।
जातरूपाम्बुदाः स्वामिमन्त्रिणो वृष्टवुर्भुवि ॥ ६७५ ॥
क्षीणस्वामीनि नष्टानि प्रभ्रष्टानि चिरादपि ।
क्षेत्रश्मशानवेश्मादिक्षितिखातगतान्यपि ॥ ६७६ ॥
पुञ्जितान्यद्रिकुञ्जेषु यत्र तत्र स्थितानि वा ।
अतिप्रलीनसेतूनि च्युतकेतूनि सर्वथा ॥ ६७७ ॥
शक्रादिष्टधनाधीशनियुक्ता जृम्भकामराः ।
सुवर्णरत्नवित्तानि दाने भर्तुरपूरयन् ॥ ६७८ ॥
त्रिभिर्विशेषकम् ॥
साष्टलक्षां प्रभुः स्वर्णकोटीमेकां दिने दिने ।
ददावाभोजनारम्भमारभ्य दिवसोदयात् ॥ ६७९ ॥
इत्यष्टाशीतिकोटीभिर्युतं कोटीशतत्रयम् ।
लक्षाशीतिं च वर्षेण स्वामी चामीकरं ददौ ॥ ६८० ॥
उत्सवेनोत्सुकतमाः समागत्य मतेनिरे ।
तदानान्ते विभोर्दीक्षाभिषेकममरेश्वराः ॥ ६८१ ॥
अम्भोभिरभ्यषिञ्चन्त सर्वतीर्थाहृतैः प्रभुम् ।
चित्रं पवित्रयामासुरात्मानं वृत्रशत्रवः ॥ ६८२ ॥
आनीतानि मनोभक्तिभासुराणि बलारिणा ।
पर्यधत्त प्रभुर्दिव्यवस्त्रालंकरणान्यथ ॥ ६८३ ॥
तदैव पृथिवीं नाम धामधूतरविच्छविम् ।
माणिक्यशिबिकां चक्रे शक्रः स्फुरदुपक्रमः ॥ ६८४ ॥
अनन्यद्युतिहृद्यायामथ त्रिजगतीपतिः ।
भवाम्भोधितटस्थल्यामिव तस्यां ददौ पदम् ॥ ६८५ ॥

सिंहासनमथारोहद्विश्वपातकघातकः ।
विवेकमिव तीर्थेशधर्मः सहजनिर्मलः ॥ ६८६ ॥
अथोत्क्षिप्ता नरैः सारशृङ्गारैः सुकुलोद्भवैः ।
मुख्यैः सहस्रसंख्यैः सा शिविका भक्तिभासुरैः ॥ ६८७ ॥
पूर्वस्मिन्नमरास्तस्यामसुरा दक्षिणे क्षणात् ।
पश्चिमे गरुडाः पार्श्वे ऽलगन्नागास्तथोत्तरे ॥ ६८८ ॥
भम्भादुन्दुभिनिःस्वानभेरीशङ्खपुरःसरम् ।
वादयद्भिस्तदा कैश्चित्तूर्यं तारतरस्वरम् । ६८९ ॥
जितो जितो भवाभिख्यः शत्रुरद्योति संमदात् ।
कैश्चित्स्वस्वायुधोल्लासलालसैरग्रयायिभिः ॥ ६९० ॥
कैश्चित्करेषु बिभ्रद्भिः शुभ्रां छत्रपरम्पराम् ।
दर्शयद्भिरिव स्वामिसेवया पुण्यवर्णिकाम् ॥ ६९१ ॥
उद्दामचामरमरुत्पूरदूरप्रसर्पणैः ।
उत्कल्लोलं वितन्वद्भिः कैश्चित्पुण्यपयोर्णवम् ॥ ६९२ ॥
उत्तालतालदृन्ताग्रजाग्रन्मारुतचारुभिः ।
प्रतापदीपं मोहस्य लुम्पद्भिरिव कैश्चन ॥ ६९३ ॥
कैश्चित्कृष्णालिपातेन विश्वासजननीरिव ।
कलयद्भिः स्रजः पापव्रजानामिव व्रागुराः ॥ ६९४ ॥
आनन्दामृतगण्डूषनिभस्तवनलीलया ।
स्तुवद्भिः कैश्चनाप्युच्चैः सुरासुरनरैर्वृतः ॥ ६९५ ॥
जीव नन्द जयेत्याशीर्गिरा पौरजनैः स्तुतः ।
विहारगृहनामानमारामममगमद्विभुः ॥ ६९६ ॥
अष्टभिःकुलकम् ॥
प्रभुर्यानादथोत्तीर्य सूर्यः पूर्वाचलादिव ।

बाल्यरागमिवामोक्तुमारेभे भूषणव्रजम् ॥ ६९७ ॥
नैकाकिनी वराकी मे युक्तं मोक्तुमलंकृतिः ।
इतीव मुमुचे सेत्थं ससहाया तदार्हता ॥ ६९८ ॥
पूर्वं मुमोच मुकुटं छत्रच्छायेच्छया समम् ।
स्वामी धम्मिल्लपुष्पौघं युतं स्नानमनोरथैः ॥ ६९९ ॥
तत्याज कुण्डलौ सार्कं चटुश्रुतिकुतूहलैः ।
ताम्बूलं च जिनः सद्यः सावद्यवचनान्वितम् ॥ ७०० ॥
हारमुत्तारयामास बन्धुस्नेहवृतं विभुः ।
अङ्गदौ भुजदर्पेण सहामुक्षन्मुमुक्षुराट् ॥ ७०१ ॥
जिनो ऽमुञ्चत्कराकल्पान्सत्रं शस्त्रग्रहादरैः ।
प्रणतव्यूहमोहेन सार्धं चांघ्रिविभूषणम् ॥ ७०२ ॥
इति भूषणमुक्तो ऽपि भगवान्शुशुभे ऽधिकम् ।
शोभां हन्त्येव रत्नस्य चन्दनादिविलेपनम् ॥ ७०३ ॥
त्यक्तपट्टांशुको ऽप्यर्हन्बभौ स्पष्टवपुः प्रभुः ।
प्रीणयन्विश्वनेत्राणि मेघमुक्त इवार्यमा ॥ ७०४ ॥
रहस्यं सुकृतस्येव सूक्ष्मं श्लक्ष्णसितं सरुक् ।
स्कन्धदेशे विभोर्देवदूष्यं देवपतिर्न्यधात् ॥ ७०५ ॥
जयां च वसुपूज्यं च सप्रश्रयमथ प्रभुः ।
आपृच्छ्यातुच्छबाष्पौघरुद्धदृष्टिं पटूक्तिभिः ॥ ७०६ ॥
फाल्गुने वारुणे धिष्ण्ये पूर्वाह्णे ऽथ कुहूतिथौ ।
स्वामी चतुर्थतपसा षड्भिर्मित्रशतैः सह ॥ ७०७ ॥
मूलादुन्मूलयामास पञ्चभिर्मुष्टिभिः कचान् ।
विषयक्ष्मारुहां दुःखफलदानामिवाङ्कुरान् ॥ ७०८ ॥

त्रिभिर्विशेषकम् ॥

सुधर्मेशः प्रभोः केशजालमालम्ब्य वाससा ।
चिक्षेप क्षीरजलधौ नीत्वा तीर्थत्वकारणम् ॥ ७०९ ॥
दृग्निमेषोन्मेषसदृक्तद्रमागमरंहसा ।
शक्रेण प्रतिषिद्धे ऽथ तुमुले तनुशालिनाम् ॥ ७१० ॥
योगं समग्रसावद्यं प्रत्याख्यामीति गीतगीः ।
प्रपेदे चारुचारित्रं कृतसिद्धनमस्कृतिः ॥ ७११ ॥ युग्मम् ॥
नारकैरपि लेभे ऽर्हद्दीक्षणेन क्षणं सुखम् ।
व्यजनैकभ्रमिभुवा वायुनेव श्रमातुरैः ७१२ ॥
ज्ञानं जज्ञे नरक्षेत्रमनोद्रव्यप्रकाशकम् ।
मनःपर्यायमीशस्य सस्पर्धमिव दीक्षया ॥ ७१३ ॥
रचिताञ्जलयः शक्रादयः सुरवरास्ततः ।
आनम्य नाथं जगतामिति स्तुतिमतन्वत ॥ ७१४ ॥
जय लोकत्रयीनाथ जय लोकत्रयीगुरो ।
जय लोकत्रयीध्येय जय लोकत्रयीप्रिय ॥ ७१५ ॥
पापपङ्कावलीमज्जज्जन्तुजातोद्धृतिक्षमम् ।
मज्जन्तं कालजम्बाले धर्ममुद्धृतवान्भवान् ॥ ७१६ ॥
स्वामिनामपि यः स्वामी गुरूणामपि यो गुरुः ।
देवानामपि यो देवस्तस्मै तुभ्यं नमो नमः ॥ ७१७ ॥
स्मिताभिर्दृष्टिभिः स्वामिन्प्रसादामृतवृष्टिभिः ।
ज्वलद्भवदवज्वालादाहिनः पाहि पाहि नः ॥ ७१८ ॥
इति स्तुत्वा जगत्पूज्यं वासुपूज्यं सुरोत्तमाः ।
अम्बातातौ विभोर्लोकान्संबोध्य मुमुचुः पुरे ॥ ७१९ ॥
जन्माभिषेकवत्कृत्वा नन्दीश्वरवरोत्सवाः ।
प्रापुर्निजं निजं धाम ते ऽथ स्वर्धामशेखराः ॥ ७२० ॥

वर्त्मना दृष्टिपूतेनापरेऽह्नि परमेश्वरः ।
पुरं महापुरं नाम पारणाय प्रयातवान् ॥ ७२१ ॥
निभाल्य प्रभुमायान्तमुद्यन्तमिव भास्करम् ।
पौरास्तुमुलिनः प्रीत्या समुत्पेतुः खगा इव ॥ ७२२ ॥
तद्विभाव्य च सानन्दः सुनन्दो मेदिनीपतिः ।
मुक्तच्छत्रपदत्राणस्त्वरमाणोऽभ्यगात्प्रभुम् ॥ ७२३ ॥
सुकृती सुकृताम्भोधिस्नातः प्रभुनिभालनात् ।
केशान्सुरभयामास प्रभुपादाब्जमार्जनैः ॥ ७२४ ॥
तेनाथ कृतकृत्योऽस्मि धन्योऽस्मीति च वादिना ।
कारितः परमान्नेन पारणं परमेश्वरः ॥ ७२५ ॥
पाणिभ्यां पायसं स्वामी कलयन्निन्दुनिर्मलम् ।
अदर्शयत्सुनन्दाय कन्दं पुण्यतरोरिव ॥ ७२६ ॥
नेदुर्मेदुरसन्नादा दिवि दुन्दुभयस्तदा ।
सुनन्दामन्दपुण्याब्धिकल्लोलरवचारवः ॥ ७२७ ॥
सुनन्दमन्दिरे रत्नवृष्टिः काप्यभवद्दिवः ।
तदुत्सवोच्छलत्स्वर्गिभ्रष्टभूषणभूरिव ॥ ७२८ ॥
पुष्पवृष्टिरभूद्व्योम्नस्तं दातारं तदाद्भुतम् ।
अर्चितुं कल्पवृक्षाधिदेवतैरिव कल्पिता ॥ ७२९ ॥
सुनन्दकीर्तिधूतानां सुरद्रुकुसुमस्रजाम् ।
मकरन्दैरिव दिवो वृष्टिर्गन्धोदकैरभूत् ॥ ७३० ॥
श्रीसुनन्दयशोवीचीवरचीवरसंचयः ।
शचीवरमुखैर्देवैरुत्क्षिप्तः खे चलाचलः ॥ ७३१ ॥
इत्युत्सवेन महता मुनिर्विहितपारणः ।
जगाम काममन्यत्र भुवनत्रयनायकः ॥ ७३२ ॥

अमेयमहिमा मर्त्यैर्मेयमुल्लङ्घ्यतामिति ।
पारणोर्व्यां प्रभोर्भूपो रत्नपीठमकारयत् ॥ ७३३ ॥
ते मित्रमुनयो ऽन्यत्र स्वलब्ध्या कृतपारणाः ।
अनुजग्मुर्विभुं ब्रह्मव्रतं साधुगुणा यथा ॥ ७३४ ॥
जिनेन्द्रो ऽपि जयं कर्तुं कर्मारीणां क्षमाचरः ।
विजह्रासिधारावत्तपस्तीव्रं दधद्भुवि ॥ ७३५ ॥
इतश्चारितृणस्तोमे वेगं पवनवद्वहन् ।
नाम्ना पवनवेगो ऽभूद्भूपः पृथ्वीपुरे पुरे ॥ ७३६ ॥
अखण्डमुकृतः खण्डमिलायाः परिपालयन् ।
मित्राणामप्यमित्राणामप्यानन्दमदत्त सः ॥ ७३७ ॥
समये व्रतमादाय मुनेः श्रमणसिंहतः ।
तप्त्वा तीव्रं तपः प्राप स विमानमनुत्तरम् ॥ ७३८ ॥
इतश्च निश्चलश्रीकं जम्बूद्वीपविभूषणे ।
दक्षिणे भरतार्धे ऽस्मिन्नस्ति विन्ध्यपुरं पुरम् ॥ ७३९ ॥
अवन्ध्यशक्तिस्तत्राभूद्विन्ध्यशक्तिरिति प्रभुः ।
चापं यस्मिन्विशद्विश्वजयश्रीद्वारतां दधौ ॥ ७४० ॥
गम्भीरनीरभ्रमतो यत्प्रतापभरातुराः ।
उपेत्य यत्कृपाणान्तर्नृपाणां ततयो ऽपतन् ॥ ७४१ ॥
रणनश्यदरिश्रेणित्वराभरतिरस्कृतैः ।
व्यराजि वाजिभिर्यस्य ह्रियेव विनमन्मुखैः ॥ ७४२ ॥
अमुं कदाचिदास्थानीस्थितं वेत्रिनिवेदितः ।
समुपेत्य चरः कश्चिन्नरनाथमजिज्ञपत् ॥ ७४३ ॥
इहैव भरतार्धे ऽस्ति नाथ जानासि विश्रुतम् ।
जातं भूपुण्यपाकेन साकेतमिति पत्तनम् ॥ ७४४ ॥

तत्रास्ति राजशौर्यश्रीक्रेलिजङ्गमपर्वतः ।
पर्वतो नाम संग्रामयशःप्रसरनिर्झरः ॥ ७४५ ॥
यममृत्युद्वयीधारः कालो यत्खड्गतां दधत् ।
स्वेच्छया हन्त हन्त्येव हन्तव्यानहतोदयः ॥ ७४६ ॥
रजोभिरश्वपादोत्थैर्गजोत्थैश्च मदाम्बुभिः ।
यत्सेना भाति संहारसृष्टिकृद्वारिधेरपि ॥ ७४७ ॥
राज्यश्रीभाग्यसारं तं दृष्ट्वैव भृशमीदृशम् ।
दीनयन्ती श्रिया तस्य वेश्यास्ति गुणमञ्जरी ॥ ७४८ ॥
यां विधाय विधिः पाणौ क्षालयामास वारिधौ ।
तन्मलं तत्र जानामि नानामणिगणच्छलात् ॥ ७४९ ॥
ईहन्ते हन्त यत्कान्तिविलोकस्मितविस्मयाः ।
अपि दिक्पतयः सर्वे पर्वतीभावमात्मनि ॥ ७५० ॥
निर्दम्भतत्परीरम्भसंभवत्पुलका मुदम् ।
तदलंकारसाराधिष्ठानदेव्यो ऽपि बिभ्रति ॥ ७५१ ॥
तयैव कान्तया देव त्वत्तः पर्वतको ऽधिकः ।
श्रिया सैन्येन रूपाद्यैर्गुणैस्तु त्वं ततो ऽधिकः ॥७५२ ॥
त्यातीव भवान्भाति भवतातीव भाति सा ।
पृथग्भावेन भवतोर्न श्रीरिन्दुनिशोरिव ॥ ७५३ ॥
नरेन्द्रवृन्दवन्द्यो ऽसि स्वामिञ्शक्त्या कयापि तत् ।
सर्पादिव मणिं तस्मात्तां ग्रहीतुं भवोद्यतः ॥ ७५४ ॥
इति श्रुत्वाथ हृष्टेन तं सन्मान्य महीभुजा ।
दौत्याय प्रहितो मन्त्री सभान्तः पर्वतं जगौ ॥ ७५५ ॥
कालकूटमभित्राणां मित्राणां तु सुधारसः ।
विन्ध्यशक्तिर्ब्रवीति त्वां मन्मुखेन सखा तव ॥ ७५६ ॥

यस्ते वैरी समे वैरी यः सुहृन्मे स ते सुहृत् ।
या ते श्रीः सा ममापि श्रीर्या मे भूः स तवापि भूः ॥७५७॥
एवं सौहार्दसंबन्धभासमानैकभावयोः ।
नैव श्रियि क्रियायां वा विभेदो भृशभावयोः ॥ ७५८ ॥
भेदं यदि न देहे ऽपि धत्से तच्छेषुषीप्रिय ।
मह्यं प्रेषय वेगेन गणिकां गुणमञ्जरीम् ॥ ७५९ ॥
इत्यस्य वचसा दीप्तः पवनेनेव पावकः ।
ततान पर्वतस्तीव्रमक्षरालिं स्फुलिङ्गवत् ॥ ७६० ॥
साधु सख्यं चिरादद्य दर्शितं विन्ध्यशक्तिना ।
याचितं जीवितव्यं मे यदसौ गुणमञ्जरी ॥ ७६१ ॥
स्वमुखेनैव यद्येतदभणिष्यत्स मे पुरः ।
अदास्यमुत्तरं तस्य स्वकृपाणमुखेन तत् ॥ ७६२ ॥
क्रोधाग्निर्वर्धमानो मे धक्ष्यति त्वामपि ध्रुवम् ।
तत्तूर्णं गच्छ मा यच्छ दूतदारणदुर्यशः ॥ ७६३ ॥
इति कोपिनि भूपे ऽसौ वण्ठैः कण्ठे धृतः पुमान् ।
अपमानात्समधिकं गत्वाख्याद्विन्ध्यशक्तये ॥ ७६४ ॥
तदैव दैवमप्याशु दुर्बलं गणयन्बलात् ।
चक्रे प्रयाणं राजासौ रजःसावयवाम्बरम् ॥ ७६५ ॥
पर्वतो ऽपि चमूचारचूर्णीभूताध्वपर्वतः ।
प्रतिप्रयाणमकरोद्धैर्याब्धिमकरो रयात् ॥ ७६६ ॥
चलद्भिः केतुचीराग्रैस्तर्जयन्तौ मिथो ऽप्यथ ।
योद्धुमुत्सङ्गितोत्साहौ तौ सैन्याब्धी समीयतुः ॥७६७॥
अजातजयभङ्गानि क्षणं क्षोणिपयोस्तयोः ।
अश्वेभरथपत्तीनां द्वन्द्वयुद्धानि जज्ञिरे ॥ ७६८ ॥

चिरेप्सितायां समरश्रियि संजातसंगतौ ।
अदर्शि क्षतजं वीरैश्चिरसंचितरागवत् ॥ ७६९ ॥
शरीरैर्वीरवाराणामभ्युत्पत्य मुहुर्मुहुः ।
प्रहाराणां गणः काममापतत्कवलीकृतः ॥ ७७० ॥
अन्येष्वपि द्विषद्वारप्रहारान्परिपातिनः ।
स्वस्मिन्नेव भटा ऐच्छलँल्लुब्धा इव धनोच्चयान् ॥ ७७१ ॥
अपसृत्यापसृत्याशु प्रधावद्भिर्विरोधिषु ।
वीरैर्जयश्रियो ऽपूरि दोलाकेलिकुतूहलम् ॥ ७७२ ॥
तुल्य एव प्रबलयोरित्यभूद्बलयोर्जयः ।
बाह्वोर्बाहुधनस्येव मिथः संधृत्य कर्षतोः ॥ ७७३ ॥
गर्वात्सर्वाभिसारेण प्रतेने पर्वतस्ततः ।
उत्तिष्ठमानो मानोर्मिमुक्तमेवारिवारिधिम् ॥ ७७४ ॥
रेजे ऽद्रैः खण्डशः कुर्वन्वैरिवीरान्पशूनिव ।
तेजोग्निं ज्वालयन्कालः स्वयंपाकव्रतीव सः ॥ ७७५ ॥
कुर्वन्संकीर्णकीनाशवदनं कदनं द्विषाम् ।
अधावत ततः क्रुद्धो युद्धोर्व्यां विन्ध्यराडपि ॥ ७७६ ॥
मिथः प्रमथिताशेषबलौ प्रबलदोर्बलौ ।
तर्जयन्तौ भुवैवैतौ गर्जन्तावभिजग्मतुः ॥ ७७७ ॥
रथसारथिरथ्यानां मिथो मन्थममन्थरम् ।
प्रथयित्वा स्थितौ पृथ्व्यां पृथू पृथ्वीधरौ यथा ॥ ७७८ ॥
रथान्तरपरिस्पन्दावमन्दानन्दविक्रमौ ।
युयुधाते क्रुधा तेजस्तेजयन्तौ जयाय तौ ॥ ७७९ ॥
युक्तं पर्वतको विन्ध्यशक्तिना युधि निर्जितः ।
चित्रं पलायमाना ऽपि स जिगाय प्रभञ्जनम् ॥ ७८० ॥

जगृहेऽथ महाकुम्भिकुम्भकान्तकुचोज्ज्वला ।
तस्य श्रीरिव सा विन्ध्यशक्तिना गुणमञ्जरी ॥ ७८१ ॥
सर्वतः पर्वतः सोऽथ गर्वतः प्रच्युतः कृती ।
भेजे संभवसूरिभ्यो भवसौरभ्यमुद्व्रतम् ॥ ॥ ७८२ ॥
विन्ध्यशक्तिवधे शक्तिर्भवतान्मे भवान्तरे ।
ईदृग्निदानध्यानेन तेनैव तेनातुलं तपः ॥ ७८३ ॥
एवं तपः स विक्रीय तत्क्रैः कामगवीमिव ।
गृहीत्वानशनं मृत्वा प्रपेदे प्राणतं दिवम् ॥ ७८४ ॥
विन्ध्यशक्तिरपि भ्राम्यन्भवाञ्जन्मनि कुत्रचित् ।
जिनलिङ्गधरो मृत्वा कल्पवृन्दारको ऽभवत् ॥ ७८५ ॥
च्युत्वा च श्रीमतीकुक्षिजन्मा श्रीधरभूपभूः ।
पुरे ऽभूद्विजयपुरे कुमारस्तारकाभिधः ॥ ७८६ ॥
स सप्ततिधनुर्मात्रगात्रः पात्रं मषीत्विषाम् ।
द्विसप्तत्यष्टलक्षायुरभूदक्षामपौरुषः ॥ ७८७ ॥
अन्ते पितुः प्रतापश्रीताडङ्कं चक्रमाप्य सः ।
प्रत्यर्धचक्री भूचक्रखण्डत्रयमसाधयत् ॥ ७८८ ॥
इतश्चास्ति चतुर्वर्गश्रीनिरर्गलनागरा ।
मध्येब्धि स्वर्गसौभाग्यकारिका द्वारिका पुरी ॥ ७८९ ॥
या परैरपराभूता सुराष्ट्रमुखमण्डनम् ।
पश्चिमाम्भोधिनीरेभनराश्वैरेव वेष्ट्यते ॥ ७९० ॥
अगोचरचरित्रश्रीर्ब्रह्मविद्वचसामपि ।
ब्रह्मचारी परस्त्रीषु ब्रह्माभूदिह भूपतिः ॥ ७९१ ॥
तस्याभूतां शुभे कान्ते सुभद्रोमे शुभद्युती ।
धारे इव कृपाणस्य सतीव्रतगुणश्रिते ॥ ७९२ ॥

ताभ्यां नरेन्दुः कान्ताभ्यां शुशुभे मुमुदे च सः ।
रजनीश इव ज्योत्स्नारजनीभ्यां कलोज्ज्वलः ॥ ७९३ ॥
इतश्चोत्तरतश्च्युत्वा सुभद्रागर्भमासदत् ।
जीवः पवनवेगस्य शृङ्गार्तिंसहो गुहामिव ॥ ७९४ ॥
द्विपसिंहवृषादित्या इति स्वप्नचतुष्टयम् ।
सुभद्रासौ तदाद्राक्षीद्रामजन्माभिसूचकम् ॥ ७९५ ॥
सूते स्म समये सूनुमियामिन्दुसमद्युतिम् ।
शुक्तिर्मुक्ताकणमिव क्षितिभूषणतां गतम् ॥ ७९६ ॥
कारामुक्त्यादिभिर्व्यक्तं द्विषामपि ददन्मुदम् ।
ब्रह्मा विजय इत्यस्य सुतस्य विदधे ऽभिधाम् ॥ ७९७ ॥
इन्द्रियश्रीभिरात्मेव पृथक्प्रथितकर्मभिः ।
धात्रीभिः पञ्चभिर्लाल्यमानो ऽयं ववृधे श्रिया ॥ ७९८ ॥
वर्धमानः क्रमादेष स्मितैः कुसुमयन्दिशः ।
वसन्तदिवसव्यूह इव कस्य न तुष्टये ॥ ७९९ ॥
अथोदरमुमादेव्याः प्राणतात्पर्वतश्च्युतः ।
अवाप पुण्यकृन्मुष्टिं चिन्तामणिरिवार्णवात् ॥ ८०० ॥
करी सिंहो वृषश्चन्द्रो भानुर्वैश्वानरो ऽम्बुधिः ।
इति स्वमानुमापश्यदच्युतोत्पत्तिसूचकान् ॥ ८०१ ॥
ततः सुतमसौ बालतमालदलदीधितिम् ।
विन्ध्यभूरिव भद्रेभं समये समजीजनत् ॥ ८०२ ॥
सुतोत्पत्तिं कथयतां दानमानन्दितो ददत् ।
रचयामास न ब्रह्मा भेदमाद्यान्तयोरपि ॥ ८०३ ॥
नित्योत्सवानपि सुरानुत्सवेनापि लोभयन् ।
सूनोर्द्विपृष्ठ इत्याख्यां सत्यामदित भूपतिः ॥ ८०४ ॥

अवर्धत स धात्रीभिः पुष्यमाणो यथाक्रमम् ।
नमस्क्रियाभिर्धर्मो वा पञ्चभिः परमेष्ठिनाम् ॥ ८०५ ॥
मध्ये दशानां धात्रीणां तौ क्रीडन्तौ विरेजतुः ।
दिशामिव निशाधीशदिनाधीशौ वरोदयौ ॥ ८०६ ॥
नीलपीताम्बरौ तालशङ्खाङ्कौ तौ सितासितौ ।
धरित्रीजननेत्राणां मुदं चित्रेण चक्रतुः ॥ ८०७ ॥
दोर्भूषणं शस्त्रकलाः शास्त्राणि मुखभूषणम् ।
जगृहाते गुरुभ्यस्तौ मञ्जूषाभ्य इव स्वयम् ॥ ८०८ ॥
एकपात्रदशायुग्मदीप्तौ दीपाविवोज्ज्वलौ ।
तौ दुःखसुखयोस्तुल्यौ तुल्यस्नेहौ विलेसतुः ॥ ८०९ ॥
तौ शस्त्रतोऽधिकं शश्वत्क्रीडयैवार्धचक्रिणः ।
अशस्त्रमाज्ञाभङ्गाख्यं वधं वध्यस्य चक्रतुः ॥ ८१० ॥
परिज्ञाय तयोर्दूरादाज्ञातिक्रमविक्रमौ ।
स्पशो गत्वा त्वरातारस्तारकं प्रत्यदोऽवदत् ॥ ८११ ॥
देव त्वत्सेवकस्यापि दारकौ द्वारिकापतेः ।
आज्ञां तव न मन्येते धुर्यौ रश्मिमिवोद्धतौ ॥ ८१२ ॥
गतः स कालस्तेजोऽस्तु तारकस्य क संप्रति ।
शूरौ यदुदितावेतावित्याहुः सेवकास्तयोः ॥ ८१३ ॥
अखर्वदोर्बलौ सर्वशस्त्रज्ञौ गर्वपर्वतौ ।
त्वां प्रति प्रतिभातस्तौ न शुभौ शोभनं कुरु ॥ ८१४ ॥
इति श्रुत्वोद्धतक्रोधो ऽयमबोधोद्धुरस्वरः ।
ऊचे ऽर्धचक्री सेनान्यं सेनान्यश्चितसागरः ॥ ८१५ ॥
सपुत्रद्वारिकाधीशवधप्रधनसंधया ।
प्रपश्चय त्वमूर्वीचीनींचीकृतकुलाचलाः ॥ ८१६ ॥

न चाटुवचनैर्नाग्रे नुण्ठनैर्नाघ्रिसेवनैः ।
न चाननतृणादानैस्ते मोक्तव्याः कथंचन ॥ ८१७ ॥
अधुनैवाधिकोत्साहैर्वाहैः सज्जय मे रथम् ।
मास्तु कालविलम्बस्ते भम्भां संभावय द्रुतम् ॥ ८१८ ॥
अथामात्यपतिर्भूपमजल्पन्नयकल्पवित् ।
देव सेवक एवाद्य यावदस्ति स ते नृपः ॥ ८१९ ॥
निर्देशवर्तिनं चैनं मानयोग्यं नियुङ्क्तः ।
परिवारे ऽपि पुंनाग विरागस्ते भविष्यति ॥ ८२० ॥
तदुत्पादयितुं दोषं दूतस्तं प्रति युज्यताम् ।
मृत्युरप्यङ्गिनं हन्ति नान्नदोषादिना विना ॥ ८२१ ॥
दूतेनाश्वेभरत्नानि याच्यो ऽसौ चेन्न दास्यति ।
तद्दोषी दोषवान्सर्वो विभौ हि च्छलवीक्षके ॥ ८२२ ॥
राज्ञाथ तद्गिरि प्रीतिं वहता प्रहितश्वरः ।
पार्श्वस्थितमुतद्वन्द्वं ब्रह्माणं स्माह संसदि ॥ ८२३ ॥
भूप त्वां तारको वक्ति भक्तिमान्सेवको ऽसि मे ।
तत्पाल्यो ऽसि ममैव त्वं किं ते हस्तिहयादिना ॥८२४॥
यच्छ तत्सर्वमस्मभ्यं यन्न लभ्यं तवास्ति यत् ।
यद्वस्तु भरतार्धे स्याद्भरतार्धपतेर्हि तत् ॥ ८२५ ॥
जल्पन्तमित्यमुं कोपस्वल्पकल्पान्तपावकः ।
दूतं भ्रूतन्तुतेजोभिर्वध्नन्निव जगौ हरिः ॥ ८२६ ॥
कुलक्रमागते राज्ये वयं स्मः स च विद्यते ।
स चेन्न सेवको ऽस्माकं तत्किं तत्सेवका वयम् ॥८२७॥
सो ऽस्माकं पालको भूत्वा मूढो रत्नानि याचते ।
यदा प्रत्युत याचिष्ये कस्तं पालयिता तदा ॥ ८२८ ॥

मयि स्थिते हरौ क्रोष्टा भरतार्धपतिः क्व सः ।
गच्छ तच्छिरसा सार्धं रत्नान्यादातुमेम्यहम् ॥ ८२९ ॥
इत्युक्त्वा विष्णुनोत्खात इव भ्रूशिखयासनात् ।
स गत्वाशु चरः सर्वं स्वभर्त्रे तथ्यमभ्यधात् ॥ ८३० ॥
क्रोधक्रौर्यत्रसत्कालस्तत्कालमथ तारकः ।
रिपुप्राणप्रयाणाय प्रयाणकमकारयत् ॥ ८३१ ॥
जिताम्भोधरसंभारभम्भारवनवश्रवात् ।
मनोमयूराः शूराणामखण्डं ताण्डवं व्यधुः ॥ ८३२ ॥
अभूच्चतुर्भिः पूर्द्वारैश्चतुरङ्गचमूद्रमः ।
चतुर्विधायुधोद्दामश्चतुर्भुजजयेच्छया ॥ ८३३ ॥
मिलद्भिर्मन्त्रिधात्रीशदेशाधीशादिसैनिकैः ।
तच्चमूर्वर्ष्टधे यान्ती नदी नद्यन्तरैरिव ॥ ८३४ ॥
प्रयाणैरप्रयाणैश्च सावेशः प्रतिकेशवः ।
द्रागलङ्घिष्ट मार्गार्धमलङ्घितपराक्रमः ॥ ८३५ ॥
इतश्च तादृगुत्साहसाहसाभोगभूषितः ।
हरिरप्येत्य मार्गार्धं रुद्धवान्मार्गमग्रतः ॥ ८३६ ॥
ततः प्रततसंग्रामगुणग्रामग्रहोन्मुखाः ।
यमश्रुतिमुखां वार्तां प्रतेनुरुभये भटाः ॥ ८३७ ॥
एकैकजन्तुग्रासेनातृप्तमालस्यशायिनम् ।
यमं जागरयामासुर्युद्धतूर्यस्वना घनाः ॥ ८३८ ॥
देहैः प्रहतिसस्नेहै रोमाञ्चोच्छ्वासवारितान् ।
सन्नाहाञ्जगृहुः कष्टं भटाः स्वामिजयेच्छया ॥ ८३९ ॥
इष्टो ऽत्र मृत्युरागच्छन्परिरब्धुं चिरेप्सितः ।
पराङ्मुखो भून्मे मेति नागृह्णन्के ऽपि कञ्चुकान् ॥८४०॥

ततः पारापतद्यूतकारा इव घनत्वराः ।
उभये ऽप्यमिलन्वीरा वपुर्नीरागचेतसः ॥ ८४१ ॥
असयो ऽन्तर्वसद्भर्तृमतापज्वलना इव ।
परस्पराभिपातेन स्फुलिङ्गान्मुमुचुर्मुहुः ॥ ८४२ ॥
द्विषत्तेजोऽग्निमेघेषु गजेषु मदवर्षिषु ।
खद्योतकल्पैरद्योति स्फुलिङ्गैर्दन्तघातजैः ॥ ८४३ ॥
सायकाः शाकिनीमन्त्रा इव स्यन्दनशालिनाम् ।
अदृष्टा एव वध्याङ्गप्रविष्टा रुधिरं पपुः ॥ ८४४ ॥
वाहवद्भिर्मणिश्रेणिसन्नाहद्युतिवेणिभिः ।
नाबोधि रुधिरं निर्यत्तादृक्शल्यप्रहारजम् ॥ ८४५ ॥
सन्नाहशस्त्रदण्डास्थिखण्डानां त्रुटतां स्वनैः ।
घ्नतां घोषैश्च घोरो ऽभून्मृत्योरपि भिये क्षणः ॥ ८४६ ॥
मकम्पितासयो हस्ता मौलयः सिंहनादिनः ।
अमर्षिणां द्विषत्खड्गोत्क्षिप्ताः खे ऽत्रासयन्सुरान् ॥८४७॥
युध्यमानमहावीरः क्षीणवीरगणः क्षणम् ।
व्यक्तो ऽजनि रणः कामं कालकान्तादृगुत्सवः ॥ ८४८ ॥
क्षीणास्त्रो बाहुमेव स्वमस्त्रीकृत्य द्विषक्षतम् ।
चक्रे कश्चन पीठाब्जमागताया जयश्रियः ॥ ८४९ ॥
छिन्नायुधभुजामौलिः कश्चिदुत्पत्य कोपतः ।
ऊरुसंदंशबन्धेन द्विषमाशु व्यसुं व्यधात् ॥ ८५० ॥
कोऽप्यभ्युत्थापयन्नङ्गान्याजिकण्डूभरच्छिदे ।
महारान्दढयामास रिपोर्मन्दप्रहारिणः ॥ ८५१ ॥
दृक्पातेनैव निर्भग्ने परवीरगणे ऽपरः ।
अपूर्णयुद्धाभिप्रायो ऽभजत्प्रायोपवेशनम् ॥ ८५२ ॥

तुल्यं हक्कां प्रहारं च दत्त्वा हक्काच्युतायुधे ।
द्विषि द्विखण्डिते को ऽपि स्वं जघानानुतापतः ॥८५३॥
स्वाङ्गे प्रहारमिच्छन्तौ दृढं कौचिन्महाभटौ ।
क्रुधान्यतो ऽन्यतो यातौ दयामन्दप्रहारिणौ ॥ ८५४ ॥
प्रतिघातमकुर्वन्तो दत्तघातेषु शत्रुषु ।
यश्यन्तः सदृशं वीरं चिरं के ऽप्यभ्रमन्भटाः ॥ ८५५ ॥
द्विषि प्रहारिण्यभ्याशादङ्गनाशं चकार यः ।
वीरास्तमप्यमन्यन्त कातरं जातरंहसः ॥ ८५६ ॥
अविभ्यत्सुभटेभ्यस्तच्छस्त्रं शस्त्रेण यो ऽच्छिनत् ।
मृत्युभीतो न वीरेषु सो ऽपि रेखामवाप्तवान् ॥ ८५७ ॥
एवं तरन्तो युद्धाब्धिं दोर्भ्यामेवोभये भटाः ।
सकौतुकमलोक्यन्त दृग्जयेन जयश्रिया ॥ ८५८ ॥
आरुह्याथ रथं तल्पमिवाभीष्टं जयश्रियः ।
तत्कण्ठमिव वैकुण्ठः पाञ्चजन्यं मुदाग्रहीत् ॥ ८५९ ॥
अस्त्राधिदैवतान्यस्त्रशय्यासुप्तानि सत्वरम् ।
शौरिर्जागरयामास पाञ्चजन्यं प्रणादयन् ॥ ८६० ॥
तेन शङ्खस्य घोषेण सैन्यानि प्रतिशार्ङ्गिणः ।
तृणानि पवनेनेवोड्डाययामासिरे ऽग्रतः ॥ ८६१ ॥
संक्रुद्धस्तद्ध्वनेरब्दशब्दादिव मृगाधिपः ।
शैलशृङ्गमिवारोहद्रथं प्रतिरथाङ्गभृत् ॥ ८६२ ॥
जयलक्ष्मीहठाकृष्टिसिद्धमन्त्राक्षरैरिव ।
सैन्यानि चापटङ्कारैः स्थिरयन्स हरिं ययौ ॥ ८६३ ॥
क्रुद्धौ दृग्युद्धवाग्युद्धपूर्वं सर्वायुधैः क्रमात् ।
परस्परेण संरब्धौ प्रारब्धौ योद्धुमेव तौ ॥ ८६४ ॥

शिलीमुखा मिथश्छिन्नाः क्षोणीगतमुखास्तयोः ।
कबन्धैरिव पश्चार्धैर्ननृतुर्युद्धमूर्धनि ॥ ८६५ ॥
छिन्नमध्या अपि शरा बहुवेगबलोद्धताः ।
तयोर्लक्ष्यं ययुः के ऽपि कोपना इव पन्नगाः ॥ ८६६ ॥
क्रुधारुणमुखौ श्यामौ बाणपञ्जरमध्यगौ ।
जग्मतुः केलिकीरत्वं वाग्मिनौ तौ जयश्रियः ॥ ८६७ ॥
तुल्योद्यमबलौ तुल्यकृतिप्रतिकृतिक्रमौ ।
तौ तुल्यलक्षणौ वीक्ष्य भग्नाशो ऽभूत्पराजयः ॥ ८६८ ॥
स्वयं जयश्रियैकैकबाहुनालिङ्गितावित्र ।
केन केन महास्त्रेण चक्रतुर्विक्रमं न तौ ॥ ८६९ ॥
अस्त्रान्तरेण मत्वाथ दुर्जयं विजयानुजम् ।
दुर्निरीक्षतरं चक्रे करं चक्रेण तारकः ॥ ८७० ॥
जीवितव्यमिवार्कस्य रहस्यमिव विद्युताम् ।
चक्रं चित्तमिवाग्नेस्तज्ज्वलत्कः प्रेक्ष्य नात्रसत् ॥ ८७१ ॥
तादृक्प्रभावभृच्चक्रं न किंचिदिति चिन्तयन् ।
पीतवान्पीतवासास्तदुत्कारोकान्तिवारिदैः ॥ ८७२ ॥
चक्रेण जितमेवेति मन्यमानस्तु तारकः ।
तर्जयन्निव दृष्ट्यैव प्रहसन्हरिमाह सः ॥ ८७३ ॥
चिरसेवकसूनुर्मे दुर्मेधा इति वध्यसे ।
मदाज्ञां श्रय भो डिम्भ भुंक्ष्व भोगान्त्रियस्व मा ॥ ८७४ ॥
हरिराह त्वदस्त्राणां प्रमाणं ददृशे मया ।
मुञ्च चक्रमपीदानीं पश्याम्यस्याप्यहं महः ॥ ८७५ ॥
इत्युक्त्या कुपितश्चक्रं भ्रमयित्वा रयेण खे ।
तं प्रति त्रस्तचन्द्रार्कतारकं तारको ऽमुचत् ॥ ८७६ ॥

स्नेहाज्जयश्रिया कर्णकुण्डलेनेव केशवः ।
नाभ्यां हृदि हतस्तेन चक्रेण सुखमूर्छितः ॥ ८७७ ॥
अतिज्वलयतेवाथ तत्प्रतापहुताशनम् ।
वीजितो व्यजनीकृत्य वासो ऽन्तं विजयेन सः ॥८७८॥
तदेव चक्रमुद्भ्रम्य मूर्छान्ते तं हरिर्जगौ ।
मुञ्चाग्रभागं मुञ्चामि जीवन्तं भुंक्ष्व भो भुवम् ॥ ८७९ ॥
क्रुधा रक्तभ्रमच्चक्षुस्तारकस्तारकस्ततः ।
ऊचे तं दन्तपेषोत्थस्फुलिङ्गावलिनीं गिरम् ॥ ८८० ॥
अरे रे मुञ्च मुञ्च द्राग्ममैवेदमनेन हि ।
हस्तात्तेन पुनर्यत्नान्मुक्तेन त्वच्छिरो हरे ॥ ८८१ ॥
इति वाचार्दितः शार्ङ्गी चक्रमुद्भ्रम्य मूर्धनि ।
द्राग्मुञ्चत तच्छिन्नमपश्यच्च द्विषच्छिरः ॥ ८८२ ॥
चिरं प्रतिहरिः प्रीतः संभुज्य विजयश्रियम् ।
सुष्वाप वीरशय्यायां यशश्रीरावगुण्ठनः ॥ ८८३ ॥
स्वनाथशत्रुसंहारसंप्रीतैरिव तारकैः ।
पुष्पवृष्टिश्रियागामि विष्णुं सेवितुमम्बरात् ॥ ८८४ ॥
जिगाय गायनोद्गीतगुणग्रामो रणं हरिः ।
स केन जीयतां यस्यानुयायी विजयः स्वयम् ॥ ८८५ ॥
चक्रं च राजचक्रं च तारकस्य तदद्भुतम् ।
लग्नं हस्ते च पादे च किं करोमीति शार्ङ्गिणः ॥ ८८६ ॥
भरतार्धजयारम्भससंरम्भहृदो हरेः ।
चक्रमेवाभवज्जेयदेशमार्गोपदेशकम् ॥ ८८७ ॥
दक्षिणं भरतार्धं स सार्धं सर्वैर्धराधवैः ।
तयैव यात्रया जैत्रः साधयामास माधवः ॥ ८८८ ॥

जनवन्मागधाधीशं वरदामेश्वरं च सः ।
प्रभासप्रभुमप्येतान्देवान्सेवागिरो ऽकरोत् ॥ ८८९ ॥
आगमन्मगधान्यात्राविनिवृत्तो ऽच्युतस्ततः ।
तत्र व्यलोकयत्कोटिनरोत्पाट्यां महाशिलाम् ॥ ८९० ॥
दूरावलोककुतुकी नरः करमिवाच्युतः ।
लीलयोत्पाटयामास तां ललाटतटावधि ॥ ८९१ ॥
स्थापयित्वा यथास्थानं तामधाङ्गस्थाङ्गभृत् ।
उत्तोरणपुरागारद्वारिकां द्वारिकां ययौ ॥ ८९२ ॥
हरिः सिंहासने ऽध्यास्य जनकेनाग्रजेन च ।
सर्वैरुर्वीधवैश्चार्धचक्रित्वे सो ऽभ्यषिच्यत ॥ ८९३ ॥
नीतिं वितत्य पृथ्वीं स पृथ्वीं पृथ्वीपुरन्दरः ।
अपालयद्वनीपाल इव बालद्रुमावलीम् ॥ ८९४ ॥
तदा च नाथश्छद्मस्थावस्थामस्थापिताशुभः ।
विहृत्य वर्षमासन्नकेवलोत्पत्तिवासरः ॥ ८९५ ॥
श्रीवासुपूज्यो दृक्पूतामंघ्रिभिः पावयन्महीम् ।
चम्पापुर्यां व्रतारामे ऽगाद्विहारगृहाभिधे ॥ ८९६ ॥
युग्मम् ॥

पाटलातरुमूले ऽथ श्रिततुर्यतपाः प्रभुः ।
प्रतिमास्थो गुणस्थानमप्रमत्ताख्यमाप्तवान् ॥ ८९७ ॥
अपूर्वकरणारूढः प्रतिपेदे ततः प्रभुः ।
सविचारं सितध्यानं पृथक्त्वेन वितर्कयुक् ॥ ८९८ ॥
अनिवृत्तिं ततः सूक्ष्मसंपरायगुणं गुरुः ।
अधिगम्याध्यरोहच्च क्षणात्क्षीणकषायताम् ॥ ८९९ ॥
शुक्लध्यानमवीचारमैक्यश्रुतमथ प्रभुः ।

मोहान्तिमक्षणे क्षीणे द्वितीयं प्रत्यपद्यत ॥ ९०० ॥
पञ्चज्ञानावृतीरीशश्चतस्रो दर्शनावृतीः ।
अन्तरायांश्च पञ्चेति घातिकर्माण्यनाशयत् ॥ ९०१ ॥
माघे सितद्वितीयायां चन्द्रे शतभिषग्युजि ।
केवलज्ञानमुदभूद्विश्वोद्भासि प्रभोस्ततः ॥ ९०२ ॥
प्रसत्तिं हरितो भेजुर्वायवः सुखदा ववुः ।
क्षणं तदा सुखं मापुर्दुःप्रापं नारका अपि ॥ ९०३ ॥
चक्रम्पिरे सुरेन्द्राणामासनान्यथ सर्वतः ।
शिरांसीव विमानानां विभुवैभववीक्षणात् ॥ ९०४ ॥
एतैत यात यातेशं नन्तुमित्यादिशन्निव ।
स्वर्लोकानिन्द्रलोकेषु महाघण्टाः स्फुटस्वनैः ॥ ९०५ ॥
सुधर्मेशस्य तीर्थेशं नन्तुमागन्तुमिच्छतः ।
ऐरावणसुरः स्मृत्या करीभूय पुरोऽभवत् ॥ ९०६ ॥
लक्षयोजनमानाङ्गः शुभश्रीरभ्रमूविभुः ।
रौप्याद्रिरिव हेमाद्रिस्पर्धया तुङ्गतां गतः ॥ ९०७ ॥
जिनं ययासोस्तस्योच्चैर्मदधारायुगच्छलात् ।
पापं निकाचितं चानिकाचितं च गलद्भभौ ॥ ९०८ ॥
गर्जितैश्च महाघण्टाटणत्कारयुगैश्च सः ।
व्यराजत जिनं नन्तुं त्रिलोकीमाह्वयन्निव ॥ ९०९ ॥
स्वर्णपट्टाढ्यभालानि तस्याष्टौ वदनान्यभान् ।
प्रभुवाक्श्रवणोत्कण्ठाः प्रत्यक्षा इव धीगुणाः ॥ ९१० ॥
वदने वदने चाष्टौ दशनास्तस्य रेजिरे ।
चतुःषष्टिकलाश्रीणां केलितल्पतला इव ॥ ९११ ॥
दशने दशने वापी स्वादुस्वच्छहिमोदका ।

कीर्तिर्मूर्तिमतीवास्य वपुःसामर्थ्यसंभवा ॥ ९१२ ॥
अष्टाष्ट जलजन्मानि वाप्यां वाप्यां विरेजिरे ।
विकासीन्यष्टदिक्कान्तावदनप्रतिबिम्बवत् ॥ ९१३ ॥
कमले कमले ऽष्टाष्ट दलानि दधिरे द्युतिम् ।
अत्युत्सृतानि तीर्थेशविलोककुतुकादिव ॥ ९१४ ॥
चतुर्धाभिनयस्मेररसभ्रसरलीलया ।
शुभान्यभूवन्नष्टाष्ट नाटकानि दले दले ॥ ९१५ ॥
प्रभुभक्तिभरव्यक्तीभूतस्वस्वगुणान्यथ ।
नाटके नाटके पात्राण्यत्र द्वात्रिंशदस्फुरन् ॥ ९१६ ॥
इति चित्रीयमाणश्रीशालिनं गुणमालिनम् ।
करोत्पातेन कुर्वन्तमाकाश इव जाह्नवीम् ॥ ९१७ ॥
सुरभिश्वासदेवद्रुकुसुमस्रग्मदाम्बुभिः ।
त्रिधा संप्रीणितैर्भृङ्गैर्गीतकीर्तिमिवाभितः ॥ ९१८ ॥
जगत्स्वामिनमस्कारमनोरथमिवोन्नतम् ।
आरोहद्वारणं वेगात्तं हरिः सपरिच्छदः ॥ ९१९ ॥
त्रिभिर्विशेषकम् ॥

स्कन्धबद्धासने जिष्णौ ससिन्धुरसुरस्ततः ।
स्वामिसेवोत्सुकमनास्त्वराकृष्ट इवाचलत् ॥ ९२० ॥
प्राक्पालक इवात्मानं संक्षिपन्स क्षणादपि ।
जगाम स्वामिपादाब्जपूतमुद्यानभूतलम् ॥ ९२१ ॥
उत्ततार ततस्तारसारालंकारवारभृत् ।
सौधर्मस्वाम्यसौ धर्मस्वामिनं नन्तुमुद्यतः ॥ ९२२ ॥
अहंप्रथमिकाध्यानवर्धमानतरत्वराः ।
अन्ये ऽपीन्द्राः समं देवैरीयुस्तत्राच्युतादयः ॥ ९२३ ॥

भर्तुः समवसृत्यर्थं कुमारा मरुतस्ततः ।
अमृजञ्जगतीमेकयोजनां स्वामिव स्वयम् ॥ ९२४ ॥
स्वपोष्यपादपस्तोमदत्तैः पुष्पद्रवैरिव ।
सिषिचुस्तां भुवं मेघकुमारा गन्धवारिभिः ॥ ९२५ ॥
मुक्तामाणिक्यनिष्पत्तैस्तां बबन्धुर्बन्धुरैर्धराम् ।
व्यन्तराः कर्मभिर्बद्धमात्मानं तु भृशं व्यधुः ॥ ९२६ ॥
उन्मुखान्याकिरन्पञ्चवर्णपुष्पाणि तत्र ते ।
सुगन्धीनि क्षितेरेवोद्गतानीव विना तरून् ॥ ९२७ ॥
मुक्तासुवर्णमाणिक्यैस्ते चतुस्तोरणामिह ।
चतुर्गतिकसंसारनिःसारद्वारवद्व्यधुः ९२८ ॥
दिक्तोरणेषु तेषूच्चैरतिष्ठञ्शालभञ्जिकाः ।
साक्षान्नु तदधिष्ठानदेवताः सेवितुं विभुम् ॥ ९२९ ॥
इन्द्रनीलमयास्तेषु मकरमकरा बभुः ।
प्रबुद्धाः सेवने मुक्ता भीतेनेव भवाब्धिना ॥ ९३० ॥
चतुर्णामिव धर्माणां चतुर्विधभवच्छिदाम् ।
स्वाम्यशंसीनि चत्वारि तत्र च्छत्राणि रेजिरे ॥ ९३१ ॥
उज्ज्वलः प्रचलस्तेषु विरराज ध्वजव्रजः ।
मोहं जित्वा पटव्यूहो धर्मसैन्यैरिवाभ्रमि ॥ ९३२ ॥
बलिपीठेष्विवोच्चेषु भूमिपीठेषु तत्तले ।
चिह्नानि स्वस्तिकादीनि मङ्गल्यान्यष्ट चाभवन् ॥९३३॥
भवाब्धिमध्यद्वीपे ऽस्मिन्भूमिपीठे विमानिनः ।
वेलारत्नोच्चयाकारं रत्नप्राकारमादधुः ॥ ९३४ ॥
कपिशीर्षचयो ऽमुष्मिन्नानामणिमयो ऽभवत् ।
पापाहीन्यत्प्रभापूरमयूरः कस्य नाहरत् ॥ ९३५ ॥

द्वितीयं तद्बहिर्ज्योतिःपतयः कनकोत्करैः ।
प्राकारं चक्रुरात्मीयाश्रयान्मेरोरिवाहृतैः ॥ ९३६ ॥
ज्योतिषामग्रणीर्भानुर्भूत्वा भूयिष्ठमण्डलः ।
तत्र स्वयमिव प्राप रत्नालिकपिशीर्षताम् ॥ ९३७ ॥
प्राकारो ऽकारि भवनपतिभिश्च ततो बहिः ।
रजतैर्भगवद्भक्तिगौरैरिव मनोणुभिः ॥ ९३८ ॥
स्फुरद्भिरुपरि स्वर्णकपिशीर्षकदम्बकैः ।
चक्रवाकैरिवाभासि शुभ्रे तस्य प्रभाम्भसि ॥ ९३९ ॥
त्रिवप्री नूनमन्योन्यबिम्बबिम्बितबिम्बनात् ।
अनन्तजन्तुरक्षार्थमिव सानन्तवप्रभूत् ॥ ९४० ॥
वैजयन्तीयुजो रेजुस्तत्र माणिक्यतोरणाः ।
जनं भवभ्रमौ खिन्नमिव वीजयितुं स्थिताः ॥ ९४१ ॥
चत्वारि गोपुराणीह वप्रे वप्रे चकासिरे ।
द्वादशश्राद्धधर्मश्रीनिवेशामैकैकजालवत् ॥ ९४२ ॥
लोकपापच्छिदे धूमदण्डव्याजोद्धतासयः ।
प्रतिद्वारमभाव्यन्त व्यन्तरैर्धूपकुम्भिकाः ॥ ९४३ ॥
तैश्चतुर्विधधर्मश्रीत्रिकालक्रीडनेच्छया ।
प्रतिद्वारं कृता निष्कपुष्करा पुष्करिण्यपि ॥ ९४४ ॥
ते ऽन्तः काञ्चनवप्रस्य चक्रुरुत्तरपूर्वतः ।
विश्रामायामतिच्छन्दं देवच्छन्दं जगत्प्रभोः ॥ ९४५ ॥
प्राङ्मुखे पूर्ववप्रस्य स्वर्णवर्णौ विमानिनौ ।
द्वाःस्थौ तस्थतुरङ्गार्चिर्मण्डलीकुण्डलायितौ ॥ ९४६ ॥
द्वारपौ दक्षिणद्वारि व्यन्तरौ तत्र तस्थतुः ।
शुभ्राङ्गौ स्वामिभक्तानां यशोधर्माविवाङ्गिनाम् ॥ ९४७ ॥

ज्योतिष्कौ पश्चिमद्वारि द्वारपालौ बभूवतुः ।
आरक्तवर्णौ सुकृताकृष्टिध्यानवशादिव ॥ ९४८ ॥
वप्रलक्ष्म्या मुख इवोत्तरद्वारि सितेतरौ ।
भवनाधिपती द्वाःस्थौ स्थितावलकवल्लिवत् ॥ ९४९ ॥
अभयं पाशिनं दिव्याङ्कुशं मुद्गरिणं क्रमात् ।
सर्वा दधत्यश्चन्द्राब्जकनकाञ्जनकान्तयः ॥ ९५० ॥
देव्यो जया च विजया चाजिता चापराजिता ।
प्राक्क्रमेण स्थिताः स्वर्णप्राकारद्वारभूमिषु ॥९५१॥ युग्मम्॥
रौप्यवप्रे प्रतिद्वारं तुम्बरुर्द्वाःस्थतां दधौ ।
जटाकिरीटः खट्वाङ्गी नृशिरःस्रगलंकृतः ॥ ९५२ ॥
मध्ये समवसृत्याश्च व्यन्तराश्चैत्यपादपम् ।
व्यधुः श्रीद्वादशाधीशाङ्गद्वादशगुणोच्छ्रयम् ॥ ९५३ ॥
तदधो विदधुः पीठं नानामणिगणेन ते ।
यदंशुभिरशोको ऽभूत्केकिपत्रातपत्रवत् ॥ ९५४ ॥
तस्योपरि पराभूतसर्वामरविमानरुक् ।
छन्दकं मणिवृन्देन मन्दितार्केण ते ऽसृजन् ॥ ९५५ ॥
तन्मध्ये प्राङ्मुखं सांघ्रिपीठं सिंहासनं व्यधुः ।
रत्नैस्ते समवसृतिश्रियो ऽस्या जीवितव्यवत् ॥ ९५६ ॥
तेनुस्तदुपरि च्छत्रत्रयं ते चन्द्रसुन्दरम् ।
ज्ञानदर्शनचारित्रप्रभुताभावनं प्रभोः ॥ ९५७ ॥
यक्षाभ्यां चामरौ तत्र दधाते स्वामिनो मुखम् ।
सेवितुं प्रहितौ चन्द्रद्वयेनांशुचयाविव ॥ ९५८ ॥
द्वारे समवसारस्य स्वर्णाब्जस्थमथाभवत् ।
श्रीधर्मचक्रितासूचि धर्मचक्रं प्रभाद्भुतम् ॥ ९५९ ॥

कृत्यं यदन्यदप्यत्र दिव्यं तद्व्यन्तरामराः ।
सर्वं वितेनिरे स्वामिभक्त्यजाततमश्रमाः ॥ ९६० ॥
ततश्चतुर्विधामर्त्यकोटीनां कोटिभिर्वृतः ।
स्वामी समवसृत्यर्थं त्रैलोक्यकृपयाचलत् ॥ ९६१ ॥
नवतत्त्वश्रियामास्यानीव विश्वपतेः पुरः ।
सुरैः सुवर्णपद्मानि दिव्यान्यथ वितेनिरे ॥ ९६२ ॥
द्वयोर्द्वयोः पदन्यासं तेषु चक्रे चलन्विभुः ।
अन्यानि चालयामास सुरवर्गः पुरः पुरः ॥ ९६३ ॥
ततः समवसृत्युर्वीं पूर्वद्वाराविशत्प्रभुः ।
द्यामिव द्युमणिर्विश्वतमःसमुदयच्छिदे ॥ ९६४ ॥
ततः प्रदक्षिणीकृत्य चैत्यद्रुं पूर्वदिग्मुखः ।
तीर्थाय नम इत्युक्त्वा भेजे सिंहासनं जिनः ॥ ९६५ ॥
रत्नसिंहासनस्थानि प्रतिरूपाण्यथ प्रभोः ।
अप्यन्यासु व्यधुस्त्रीणि व्यन्तरा दिक्षु तत्क्षणात् ॥९६६॥
अङ्गुष्ठस्यापि नो रूपं ते विकर्तुं प्रभोः क्षमाः ।
प्रभुप्रभावादेवासीत्तद्रूपं तासु मूर्तिषु ॥ ९६७ ॥
सर्वद्वीपार्कतेजांसि पिण्डयित्वेव निर्मितम् ।
उद्भास्वदुद्भभूवानुमौलि भामण्डलं विभोः ॥ ९६८ ॥
जिनेशदेशनानादनासीरो विश्वपापभित् ।
पूरयन्मरुदध्वानमुच्चैर्दध्वान दुन्दुभिः ॥ ९६९ ॥
रत्नध्वजः पुरो भर्तुरुद्भभूव यदग्रतः ।
नृत्यन्पताकाहस्तेन धर्मः शैलूषतां दधौ ॥ ९७० ॥
प्राग्द्वारागत्य वप्रे ऽस्मिन्दत्त्वा तिस्रः प्रदक्षिणाः ।
नत्वा तीर्थं जिनं चाग्निदिश्याचारविदो मुदा ॥ ९७१ ॥

स्थानं विमुच्य साधूनां साध्वीनां च तदन्तरे ।
विहिताञ्जलयस्तस्थुरूर्ध्वा वैमानिकस्त्रियः ॥ ९७२ ॥
॥ युग्मम् ॥

याम्यद्वारा प्रविश्याथ विधिना नैर्ऋते स्थिताः ।
क्रमेण भवनाधीशज्योतिष्कव्यन्तरस्त्रियः ॥ ९७३ ॥
प्रतीचा गोपुरेणाथ प्रविश्यास्थुर्मरुद्दिशि ।
विधिना भवनाधीशज्योतिष्कव्यन्तरास्तथा ॥ ९७४ ॥
अल्पर्द्धिः प्रथमायातस्तत्रायान्तं महर्द्धिकम् ।
प्रणनामागतं त्वग्रे नमन्नेव ययौ च सः ॥ ९७५ ॥
गोपुरेणोत्तरेणोच्चैः प्रविष्टास्तद्विधिक्रमात् ।
कल्पामरा नरा नार्य ईशाने ककुभि स्थिताः ॥ ९७६ ॥
नासीज्जियन्त्रणा तत्र न च काचन दुःकथा ।
न भयं न च मात्सर्यमभून्मत्सरिणामपि ॥ ९७७ ॥
द्वितीयस्य तु वप्रस्य मध्ये सिंहगजादयः ।
तिर्यञ्चो ऽस्थुर्मिथःस्पर्शसुखस्थास्त्यक्तमत्सराः ॥९७८॥
संघट्टादप्यभग्नानि रौप्यवप्रान्तरे पुनः ।
सुरासुरनरेशानां वाहनान्यवतस्थिरे ॥ ९७९ ॥
दिशञ्शोभां पुरे राजा जयापद्मावतीवृतः ।
तत्रागत्योत्सवैर्नाथं नत्वास्थाद्विधिवत्तदा ॥ ९८०॥
स्वपुत्रैश्वर्यमालोक्य त्रिलोक्या स्तूयमानयोः ।
यः पित्रोः प्रमदो जज्ञे तत्पुरश्चुलुकोऽम्बुधिः ॥ ९८१ ॥
ये योजनसहस्रेऽपि जीवा मान्ति न मान्ति वा
मम्नुः प्रभुप्रभावात्ते पीठे तत्रैकयोजने ॥ ९८२ ॥
निवार्य भक्तिवर्योऽथ सर्वं कोलाहलं तदा ।

नत्वा तीर्थपतिं स्तोतुमिति शक्रः प्रचक्रमे ॥ ९८३ ॥
श्रीवासुपूज्य नन्दन्तु त्वदंहिनखचन्द्रिकाः ।
दशाशाविलसज्जन्तुकर्मसंतमसच्छिदः ॥ ९८४ ॥
नमः शमसुधाम्भोधिलहरीभ्य इव प्रभो ।
त्वद्विलोकितलीलाभ्यो भवाग्निभ्रंशहेतवे ॥ ९८५ ॥
अन्तःसंततसंदीप्तध्यानानलविभानिभाः ।
विभो तव विभान्त्यङ्गभासोदासितविद्रुमाः ॥ ९८६ ॥
जयन्ति दन्तद्युतयो विश्वेश विशदास्तव ।
भवार्णवतरण्डस्य सितध्वजपटोपमाः ॥ ९८७ ॥
भाग्यं भुवि भवानेव विभाति भविनां विभो ।
यद्भवदर्शनं तेषां सर्वेन्द्रियमदप्रदम् ॥ ९८८ ॥
स्तूयसे सुमनोभिस्त्वममनस्को ऽपि यत्प्रभो ।
केवलस्यैव पुण्यस्य तन्महत्त्वमहो तव ॥ ९८९ ॥
धर्मदेशनया वीतरागयिष्यञ्जनं जिन ।
प्रागेव कुरुषे वीतरागं दन्तद्युताधरम् ॥ ९९० ॥
वर्धमानवरज्ञानज्ञेयः श्रेयःश्रियः पदम् ।
त्वत्प्रसादः सदा मे ऽस्तु वासुपूज्य जिनाधिप ॥ ९९१ ॥
इतीन्द्रस्तुतिभिस्तुष्टे निविष्टे नृसुरासुरे ।
निर्मलां निर्ममे धर्मदेशनां निर्ममेश्वरः ॥ ९९२ ॥
योजनप्रसराः सर्वभाषापरिणतिप्रियाः ।
पञ्चत्रिंशद्गुणा रेजुर्गिरो विश्वगुरोरिति ॥ ९९३ ॥
भो भव्या भूरिभाग्येन भविनां नृभवो भवेत् ।
तदमुं प्राप्य संसारं त्यक्त्वा श्रयत निर्वृतिम् ॥ ९९४ ॥
यतः संसारमस्तोकशोकदुःखभृतं बुधाः ।

न भजन्ते यथाश्वत्थतरोः कृम्याकुलं फलम् ॥ ९९५ ॥
मोक्षायाभ्युद्यतैर्भाव्यं भव्यैः शाश्वतशर्मणे ।
भवदुःखानि यन्नूनं न भवेयुः शुभात्मनाम् ॥ ९९६ ॥
शक्तिज्ञानदृगानन्दा यत्रानन्ता ध्रुवं स्थिताः ।
कः संसारसुखभ्रान्त्या तत्र मोक्षे निरुद्यमः ॥ ९९७ ॥
यः संसारसुखास्वादान्मोक्षसौख्ये निरादरः ।
व्यग्रः पङ्कादने दुर्धीः स सुधामवधीरयेत् ॥ ९९८ ॥
संसारे परमं दुःखं मोक्षे च परमं सुखम् ।
इति तत्त्वं परिज्ञाय भाव्यं मोक्षाय तत्परैः ॥ ९९९ ॥
तस्याद्यं कारणं धर्मस्तरोर्बीजमिव ध्रुवम् ।
यतितव्यं ततस्तस्मिन्नप्रमत्तैर्मनीषिभिः ॥ १००० ॥
अयं धर्मो द्विधा ज्ञेयः साधुश्राद्धाश्रयाद् बुधैः ।
अल्पानल्पविलम्बेन सिद्धये द्विविधोऽपि सः ॥ १००१ ॥
तत्र सावद्ययोगानां विरतिः सर्वतः सदा ।
निर्दोष एव साधूनां धर्मश्चारित्रलक्षणः ॥ १००२ ॥
यदि सावद्ययोगानां देशतो विरतिर्भवेत् ।
तदेष गृहिणां धर्मः श्रमणोपास्तिसंस्पृशाम् ॥ १००३ ॥
द्विविधोऽपि विधेयोऽयं श्रद्धया शुद्धयाधिकम् ।
सा पुनः सुगुरोस्तत्त्वोपदेशैर्जायते श्रुतैः ॥ १००४ ॥
तेऽप्यास्तिकत्वपात्रेषु फलन्त्यन्यत्र न क्वचित् ।
नानाचित्तेष्वहोशुद्धमत्यादिष्विव तद्यथा ॥ १००५ ॥

अनन्तजनमित्यस्ति पुरं महिमवत्तरम् ।
श्रुद्वसन्ति यत्पौरैरेव विश्वपुराण्यपि ॥ १००६ ॥
महाकष्टमसाधूनां साधूनां संमदं ददत् ।

तत्र चित्रगतिर्नाम धरित्रीदयितः स्थितः ॥ १००७ ॥
पुरे ऽत्र कष्टं तिष्ठन्तः क्वापि सौख्याय गम्यताम् ।
इत्युक्तास्तेन चत्वारः पौरा निरगुरेकदा ॥ १००८ ॥
ते तु शुद्धमतिर्योग्यमतिर्मन्दमतिस्तथा ।
दुर्मतिश्चेति कुग्रामेष्वजीवन्कर्मवृत्तितः ॥ १००९ ॥
कामं वृत्त्यै भ्रमन्तस्ते शीतवातातपेष्वपि ।
रत्नद्वीपं ययुः कष्टार्जितालपद्रव्यशम्बलाः ॥ १०१० ॥
कुशैलेषु दृषत्खण्डान्सत्रासानल्पतेजसः ।
रत्नभ्रमेण गृह्णन्तो मूढा मुमुदिरेऽत्र ते ॥ १०११ ॥
तैरलोकि पुमान्कोऽपि दिव्याभरणभासुरः ।
तरुच्छायास्थितः सारपरिवारो महानिह ॥ १०१२ ॥
प्रीणितस्वान्तया नुन्नः कान्तयाथ प्रशान्तया ।
असत्योक्तिनिशाभानुस्तानुवाच पुमानयम् ॥ १०१३ ॥
किमेभिरश्मखण्डैर्वो रोचितैः पामरोचितैः ।
न स्पृशन्ति करेणापि यानि पौराः परीक्षकाः ॥१०१४॥
इतोऽग्रतोऽस्ति माणिक्यगिरिर्गुरुगुणालयः ।
यत्प्रभासु न भासन्ते तमांसि च महांसि च ॥ १०१५ ॥
यदि तं याथ रत्नानि लभध्वे तानि तानि तत् ।
येषां महीयोमहसां महीयं मूल्यमल्पकम् ॥ १०१६ ॥
अथ शुद्धमतिर्दध्यौ साधु दिष्टमनेन मे ।
व्यक्तं परोपकारार्थमेव जीवितमीदृशाम् ॥ १०१७ ॥
तदस्यादेशमाधाय दारिद्र्याय ददे जलम् ।
इति ध्यात्वा चचालासौ माणिक्याचलदिङ्मुखः ॥१०१८॥
तस्मै रत्नार्थिने खानिखननार्थमथार्पयत् ।

पुमान्स दिव्यः कुद्दालं तीव्रत्वालंकृतं कृती ॥ १०१९ ॥
माणिक्याचलमासाद्य माद्यद्रोमाञ्चकञ्चुकः ।
अवापैष खनन्खानी रत्नानीह त्विषां गृहम् ॥ १०२० ॥
कालेनाप्यतिकष्टेनाप्यहं रत्नममूल्यकम् ।
तद्ग्रहीष्ये ऽधुना येन लभ्यते सुखमक्षयम् ॥ १०२१ ॥
इति ध्यात्वातिकष्टासु माणिक्याचलसीमासु ।
ददत्पदानि संप्राप शिखरं तस्य स क्रमात् ॥ १०२२ ॥
॥ युग्मम् ॥
यन्माहात्म्येन तन्वन्ति सेवां देवाधिपा अपि ।
रत्नं तेनेह तत्किंचिदुदञ्चद्रोचिरैक्षयत ॥ १०२३ ॥
महतस्तस्य रत्नस्य दर्शनादेव शुद्धधीः ।
विश्वत्रयस्याप्युपरि स्फुरितं स्वममन्यत ॥ १०२४ ॥
तच्चालोक्यातियत्नेन रत्नमुत्पुलकाकृतिः ।
धीरो निश्चयधीश्चेतस्येतच्चिन्तयति स्म सः ॥ १०२५ ॥
स एव ज्ञानवान्पुण्यः कृपागारो गुरुः पुमान् ।
येनेदृग्रत्नपात्रं मे कथितः पृथिवीधरः ॥ १०२६ ॥
अयमेव च रत्नाद्रिः सेव्यो रत्नार्थिभिर्नृभिः ।
स्युः सर्वेष्वपि शैलेषु रत्नानि कवित्वागियम् ॥ १०२७ ॥
देवः स एव यः कश्चिदस्याद्रेराधिदैवतम् ।
देवत्वं कान्यदेवानां येषां न स्थानमीदृशम् ॥ १०२८ ॥
रुचिप्रचितविश्वेऽस्मिन्नपि माणिक्यभूभृति ।
तमःसमलदृष्टीनामस्ति नास्तीति संशयः ॥ १०२९ ॥
दृष्ट्वैनमपि रत्नाद्रिं गिरीनाकाङ्क्षतोऽपरान् ।
अन्धदृष्टेर्जनस्यास्य कान्तौ ध्वान्तेऽपि नो भिदा ॥१०३०॥

अयमप्यस्ति रम्योऽद्रिस्तथान्येऽप्यद्रयोऽद्भुताः ।
यस्य स्याद्विचिकित्सेति स किं पापैर्न लिप्यते ॥ १०३१ ॥
धन्या अन्याद्रिभाजोऽपि यत्नाद्रत्नान्यवाप्नुयुः ।
इति वार्तापि हास्याय हा स्यादेतद्गिरिस्पृशाम् ॥१०३२॥
अन्याचलचरैः पुंभिरेतद्गिरिचरा नराः ।
दर्शनेनापि लज्जेरन्सहेरन्संस्तवं कुतः ॥ १०३३ ॥
धन्योऽहं कृतकृत्योऽहं लब्धजन्मफलोऽप्यहम् ।
येनासामान्यमाहात्म्यं रत्नमेतदवाप्यते ॥ १०३४ ॥
धिग्मिर्भाग्यं जडमतिं मां पुरा येन वासराः ।
अगम्यन्ततमां हन्त रत्नैस्तैरप्युपार्जितैः ॥ २०३५ ॥
इति ध्यायन्हृदि दधौ स तद्रत्नं सुनिश्चलम् ।
अच्छिद्रमपि यत्प्रोतमनन्तैरमलैर्गुणैः ॥ १०३६ ॥
सुरासुरार्च्यामृद्धिं स आप तद्रत्नधारणात् ।
अचिन्त्यमहिमानो हि मणिमन्त्रौषधीगुणाः ॥ १०३७ ॥
स प्रतिक्षणतत्सङ्गसुखनिर्भरभावनः ।
महानन्दमपि आप किं न भाग्यभृतां भवेत् ॥ १०३८ ॥
यस्तु योग्यमतिः सोऽपि दिव्यपुंसो गिरां गुणैः ।
प्रीतः शुद्धमतिं मूलाच्चालोक्य प्राप्तनिश्चयः ॥ १०३९ ॥
पूर्ववल्लब्धकुदालः खानीर्ज्ञाताः खनञ्शनैः ।
कृतयत्नोऽपि रत्नौघं बहुमूल्यमवाप च ॥ १०४० ॥
॥ युग्मम् ॥
रत्नमूल्यसुखस्वादः परं किंचिदभूदसौ ।
तत्र लोकोत्तरं रत्नं लब्धुमादरमादधौ ॥ १०४१ ॥
गत्वा किंचित्पुरं दिव्यं रत्नाप्तश्रीः स्थितः सुखम् ।

स ईहासहसंपन्नभोगयोगश्चिरं स्थिरः ॥ १०४२ ॥
क्षीणश्रीः प्राप्य रत्नानि श्रिये माणिक्यशैलतः ।
जगाम कामं दिव्यानि भूयो भूयः पुराणि सः ॥१०४३॥
रत्नद्वीपे स माणिक्यगिरिं गत्वा कदाचन ।
सप्ताष्टवारसंचारखिन्नश्चेतस्यचिन्तयत् ॥ १०४४ ॥
पुंसा दिव्येन मे तावदधुनापि हितैषिणा ।
अमूल्यरत्नमादिष्टं नित्यसौख्यस्य कारणम् ॥ १०४५ ॥
ततस्तल्लब्धये यत्नं कुर्वे चक्रे च तं तथा ।
प्राप्यामूल्यं च तद्रत्नं स शुद्धमतिवद्भवौ ॥ १०४६ ॥
यस्तु मन्दमतिर्नाम स दिव्यपुरुषोक्तिषु ।
ईदृग्विमर्शस्पर्शेन वितेने तरलं मनः ॥ १०४७ ॥
प्रत्यक्षाणि परिक्षिप्य रत्नान्येतानि रुक्पदम् ।
लगेद्वाक्येऽस्य कः सत्यासत्यसंशयगोचरे ॥ १०४८ ॥
इति निश्चित्य तैरेव ग्रावखण्डैरखण्डमुत् ।
पुरं गन्तुमना दिव्यं क्वचित्पल्लीं पपात सः ॥ १०४९ ॥
ततस्तदुचितप्राप्तस्वल्पमूल्योपभोगभुक् ।
निनाय स दिनान्यत्र संकरे सुखदुःखयोः ॥ १०५० ॥
भुक्तश्रीर्यत्र तत्रापि स भ्रमन्नभ्रवत्पुनः ।
रत्नद्वीपं ययौ दैवाद्भावखण्डान्यवाप च ॥ १०५१ ॥
ततस्तदुचितावाप्तस्थानश्रीदुःखजीवनः ।
गतागतशतान्येवं हताशः प्रततान सः ॥१०५२ ॥
सोऽपि कालेन निर्विण्णस्तन्वानो दिव्यपुंवचः ।
माणिक्यगिरिमाश्रित्य भेजे शुद्धमतेर्गतिम् ॥ १०५३ ॥
यस्तु दुर्मतिराकर्ण्य स दिव्यपुरुषस्य गाम् ।

स्वनामार्हविचारेऽत्र स्थिरं व्यरचयन्मनः ॥ १०५४ ॥
महत्वं माययापन्नः कोऽप्ययं मायिकः पुमान् ।
विप्रतारयति स्वैरं रत्नद्वीपचरान्नरान् ॥ १०५५ ॥
विलोभ्य कोमलोक्त्यायमायातं जनमादरात् ।
नीत्वा क्वचन गृह्णाति शम्बलं स्वमपि क्षणात् ॥ १०५६ ॥
पापाचारे विचारेऽस्मिन्निश्चलं रचयन्मनः ।
रत्नद्वीपस्य पन्थानमप्यमुञ्चत दुर्मतिः ॥ १०५७ ॥
कूपावर्तशिलागर्तपङ्ककण्टकसंकटे ।
स महागहनेऽरण्ये क्वचिन्निःपुण्यकोऽपतत् ॥ १०५८ ॥
दुष्टजीवघटाघट्टकष्टितस्तेषु तेषु च ।
दुःस्थानेषु पतञ्जन्तेऽरण्यान्निर्गन्तुमक्षमः ॥ १०५९ ॥
आकर्ण्य धीधनैरेतदन्तरङ्गनिदर्शनम् ।
ततः प्रथमवद्भाव्यं न पुनश्चरमो यथा ॥ १०६० ॥
निगोदवसनं यत्तदनन्तजनपत्तनम् ।
तत्र कालपरीणामो नाम चित्रगतिर्नृपः ॥ १०६१ ॥
भव्यस्तद्भवसिद्धोऽसौ जीवः शुद्धमतिस्तु यः ।
आसन्नसिद्धिको योग्यमतिर्भव्योपमः स च ॥ १०६२ ॥
दूरभव्यस्त्वसौ मन्दमतिर्मन्दगतिर्भवे ।
अभव्यो दुर्मतिर्ज्ञेयोऽनन्तसंसारदुःखभाक् ॥ १०६३ ॥
जीवाश्चतुर्विधाः कालपरिणामवशादमी ।
आजग्मुर्व्यवहाराख्यराशौ ते कथमप्यथ ॥ १०६४ ॥
कुग्रामाः कुभवास्तापशीतवातादिकष्टजम् ।
अकामनिर्जरापुण्यमल्पमल्पं स्वशम्बलम् ॥ १०६५ ॥
मानुष्यकभवो रत्नद्वीपस्तत्र कुपत्रताः ।

कुतीर्थानि कुरत्नानि तत्राज्ञानतपांसि च ॥ १०६६ ॥
चारित्रं विटपी तत्र सद्गुरुः पुरुषो महान् ।
कृपा तत्प्रेयसी विश्वत्रयजन्तुहिता स्मृता ॥ १०६७ ॥
सर्वज्ञशासनं यच्च स माणिक्यमहीधरः ।
ध्यानं कुदालकः कर्मखानीनां खनने क्षमः ॥ १०६८ ॥
सुतपोभ्यस्तु सत्पुण्या रत्नश्रेणिरदूषणा ।
सम्यक्त्वं तच्च रत्नाद्रिकोटौ रत्नं यदुत्तमम् ॥ १०६९ ॥
पञ्चातिचारसंहारो माणिक्याद्रिस्तुतिच्छलात् ।
सुरासुरार्च्या लक्ष्मीर्या केवलज्ञानमेव तत् ॥ १०७० ॥
यस्तत्सङ्गान्महानन्दः स मोक्षगमनोत्सवः ।
भव्यःकोऽपि भवेऽत्रैव कृतकृत्यो भवेदिति ॥ १०७१ ॥
आसन्नसिद्धिकस्तु स्यात्सस्पृहस्तपसां फले ।
भवेषु दिव्यद्रङ्गेषु भोगास्तन्मूल्यजं फलम् ॥ १०७२ ॥
सप्ताष्टवारं यामुष्य सुपुरेषु गतागतिः ।
पुण्योदयव्ययोत्थाना नरामरभवास्तु ते ॥ १०७३ ॥
दूरभव्यस्य यो दिव्यपुरीगमनमिच्छतः ।
पल्लीपातोऽल्पभोगर्द्धिभूतप्रेतादिजन्म तत् ॥ १०७४ ॥
भ्रमन्भूरीन्भवान्दूरभव्योऽपि सुखदुःखभाक् ।
गुरोर्गिरं पुनः प्राप्य भव्यीभूय शिवं श्रयेत् ॥ १०७५ ॥
अभव्यस्तु गुरुद्वेषान्मर्त्यजन्माध्वदूरगः ।
विशत्यरण्ये दुर्जन्मचयसंचारनामनि ॥ १०७६ ॥
दुःकर्मनामभिर्दुष्टजीवैस्तत्रातिघट्टितः ।
दुःखस्थानेषु कूपादिस्थानीयेषु पतत्यसौ ॥ १०७७ ॥
कष्टात्कष्टान्तरे स्पष्टं पतन्नेषु मुहुर्मुहुः ।

अयं कुजन्मनां पारं कदाचिदपि न व्रजेत् ॥ १०७८ ॥
इत्यन्तरङ्गदृष्टान्तमवबुध्य सुबुद्धयः ।
अहितत्यागतः सन्तः सन्तु स्वस्य हिते रताः ॥१०७९॥
॥ इति चतुर्विधजीवविचारेऽन्तरङ्गकथा ॥
इत्याकर्ण्य सुधापूर्णकर्णा वर्ण्यं विभोर्वचः ।
बभूवुरुद्यता बोधमहिताः स्वहिते जनाः ॥ १०८० ॥
बहवो लघुकर्माणः सूक्ष्माद्याः सूक्ष्मदर्शिनः ।
विभुं विज्ञापयांचक्रुः कोशीकृतकरा नराः ॥ १०८१ ॥
प्रभो भ्रान्तैर्महारण्ये सार्थनाथ इवोत्तमः ।
पतद्भिरवटे हस्तावलम्ब इव दाढर्यवान् ॥ १०८२ ॥
क्षुधादग्धैरभीष्टान्नसत्रागारमिवाग्रतः ।
रोगग्रस्तैर्महावैद्य इवादरणसुन्दरः ॥ १०८३ ॥
मरौ ग्रीष्मेऽद्रि संचारात्खिन्नैः सर इवाद्भुतम् ।
प्रयासस्थैः प्रियालोक इवास्तोकमतर्कितः ॥ १०८४ ॥
शत्रुशस्त्राहतित्रस्तैः शरण्यः शक्तिमानिव ।
नदीपूररयाकृष्टैः सत्तारक इवोद्यतः ॥ १०८५ ॥
मन्त्रसेवादितैस्तुष्टदेवीवर इवोत्तरः ।
अस्माभिर्भवदुःखार्तैर्लब्धस्त्वं श्रेयसां निधिः ॥१०८६॥
पञ्चभिः कुलकम् ॥
तदस्मान्करुणाम्भोधे रक्ष रक्षाभितो भवात् ।
प्रसीद देहि दीक्षां नः शिक्षय श्रमणक्रियाम् ॥१०८७॥
एवमभ्यर्थितस्तेभ्यः श्रीसर्वज्ञो यथाविधि ।
सूक्ष्मादिभ्यो ददौ दीक्षां व्रतशिक्षां च तत्क्षणात् ॥१०८८॥
सूक्ष्माद्याः साधवः साध्व्यो धरणीप्रमुखा बभुः ।

श्रावकाः सुयशोमुख्याः श्राविकाश्च जयादिकाः ॥१०८९॥
इत्थं चतुर्विधं सङ्घमघसंघातघातकम् ।
वासुपूज्यो जगत्पूज्यं स्थापयामास सुस्थितम् ॥१०९०॥
यदा ज्ञानं त्रिभोर्भावि ग्रहीष्येऽहं तदा व्रतम् ।
इति ध्यानवती पद्मावती नाथेन दीक्षिता ॥ १०९१ ॥
तत्त्वप्रश्नत्रयेणाथ नाथस्तेषां महात्मनाम् ।
सूक्ष्मादीनां तु षट्षष्टेर्गणभृन्नामकर्मणाम् ॥ १०९२ ॥
उत्पत्तिर्विगमो ध्रौव्यं क्रमादिति पदत्रयम् ।
त्रिकालज्ञस्तदाचख्यौ श्रुतद्रोर्बीजमादिमम् ॥ १०९३ ॥
॥ युग्मम् ॥

त्रिपदानुसृतेरेकादशाङ्गानि वितेनिरे ।
ते चतुर्दशपूर्वस्थमङ्गं द्वादशमप्यथ ॥ १०९४ ॥
सुगन्धिचूर्णसंपूर्णं तूर्णं शक्रः सुरैर्वृतः ।
प्रस्तावज्ञो मणिस्थालं गृहीत्वास्थात्पुरः प्रभोः ॥१०९५॥
उत्थायाथ प्रभुश्चूर्णक्षेपं कुर्वन्सुमेधसाम् ।
तेषां सूत्रेण चार्थेन ततस्तदुभयेन च ॥ १०९६ ॥
क्रमाद्द्रव्यैरथ गुणैः पर्यायैश्च नयैरपि ।
अनुज्ञामनुयोगस्य गणस्य च ददौ तदा ॥१०९७॥युग्मम् ॥
अथ दुन्दुभिनिर्घोषैर्मङ्गलोद्गारगीतिभिः ।
सुरासुरनरा हर्षोत्तेषु वासांश्च चिक्षिपुः ॥ १०९८ ॥
पुनः सिंहासनासीनः पुरःस्थानां जगद्गुरुः ।
मुनीन्द्राणामदात्तत्त्वशिक्षां गणधरोचिताम् ॥ १०९९ ॥
तस्मिन्नवसरे स्थूलैरुज्ज्वलैः शालितण्डुलैः ।
अखण्डैराढकोन्मानैर्निर्मितः कृत्यवेदिभिः ॥ ११०० ॥

गन्धद्रव्यैः सुरन्यस्तैः प्रचुरीभूतसौरभः ।
सुनरोदञ्चितः क्ष्मापवसुपूज्येन कारितः ॥ ११०१ ॥
वाद्येषु वाद्यमानेषु गायति प्रमदाजने ।
द्वारा प्राच्येन समवसरणे प्राविशद्बलिः ॥ ११०२ ॥

त्रिभिर्विशेषकम् ॥

दत्तप्रदक्षिणो भर्तुरुत्क्षिप्तः स पुरो नृभिः ।
श्रेयःश्रीनर्तनारम्भे पुष्पहस्तकवद्बभौ ॥ ११०३ ॥
अपतन्तं महीपीठे बलेरर्धं दिवौकसः ।
जगृहुः सुगुरोर्वाक्यमिव भक्तिपरा नराः ॥ ११०४ ॥
पतितस्य क्षितौ तस्यार्धस्यार्धं जगृहे नृपः ।
तीर्थशेषामिवाल्पाल्पं शेषं तु जगृहुर्जनाः ॥ ११०५ ॥
बलेस्तस्य प्रभावेण पूर्वोत्पन्ना गदाः क्षणात् ।
विलीयन्ते न जायन्ते षण्मासान्तर्नवाः पुनः ॥ ११०६ ॥
मातुलिङ्गशराधारौ धारयन्दक्षिणौ भुजौ ।
वामौ नकुलकोदण्डदण्डाभ्यामभिमण्डयन् ॥ ११०७ ॥
अवलक्षरुचिर्यक्षो वलक्षखगवाहनः ।
कुमारनामतीर्थेऽस्मिन्वासुपूज्यविभोरभूत् ॥ ११०८ ॥

युग्मम् ॥

उत्पेदे च घनश्यामा चण्डानामा तुरङ्गगा ।
दक्षिणौ दधती शक्तिवरदश्रवरौ करौ ॥ ११०९ ॥
भुजौ वामौ गदापुष्पभूषितौ परिबिभ्रती ।
सदा संनिहिता भर्तुर्जाता शासनदेवता ॥ १११० ॥

युग्मम् ॥

अथोत्थायोत्तरद्वारा निर्गत्य स्वर्गिभिर्वृतः ।
देवच्छन्दे जिनो हंस इव व्यश्राम्यदम्बुजे ॥ १११३ ॥
प्रभोरनुज्ञामासाद्य प्रतिपद्य जिनस्तुतिम् ।
उपविष्टेषु शेषेषु मुनीन्द्रेषु यथाक्रमम् ॥ १११२ ॥
तदार्हदंघ्रिपीठस्थः सूक्ष्मो गणधराग्रणीः ।
विश्वलोकमनःप्रीत्यै प्रतेने धर्मदेशनाम् ॥ १११३ ॥
॥ युग्मम् ॥

सर्वज्ञवाक्यघनसारलवानुकार–
माबिभ्रतीमुपशमामृतपुष्टदृष्टिम् ।
आकर्ण्य कर्णसुभगां प्रभुशिष्यवाचं
वाचंयमान्निभृतभक्तिभरेण नत्वा ॥ १११४ ॥
आह्लादनस्त्रिजगतां जयतादनर्घ्यः ।
श्रीसङ्घ एष जिननाथकृतप्रतिष्ठः ।
इत्याशिषं वदनचन्द्रमरीचिशस्तां ।
विस्तारयन्निव निजं निलयं जनोऽगात् ॥ १११५ ॥
युग्मम् ॥

इति दण्डाधिपतिश्रीमदाह्लादनसमभ्यर्थितश्रीविजयसिंहसूरिशिष्यश्रीवर्धमानसूरिविरचिते श्रीवासुपूज्यचरित आह्लादनाङ्के महाकाव्ये चतुःकल्याणकलब्धिवर्णनो नाम तृतीयः सर्गः ॥

अथ चतुर्थः सर्गः

अथ प्रतस्थे पृथिवीं पावयन्स्वपदैः प्रभुः ।
अन्वीयमानो मुनिभिर्विनयः सद्गुणैरिव ॥ १ ॥
जघन्यतोऽप्यभूत्कोटिः प्रभोः पार्श्वे सुपर्वणाम् ।
ऋतुवातेन्द्रियार्थाश्चानुकूलाः सर्वतोऽन्वहम् ॥ २ ॥
द्रुमाः कल्पद्रुमस्यास्य गच्छतो नतशीर्षकाः ।
अजायन्त जगद्भर्तुः शकुनाश्च प्रदक्षिणाः ॥ ३ ॥ युग्मम् ॥
स्वदुर्मुखत्वं जानन्तो लज्जिता इव कण्टकाः ।
अधोमुखत्वमभजन्पथि प्रचलतः प्रभोः ॥ ४ ॥
यत्रेशोऽगान्न तत्रातिवृष्ट्यवृष्टिरुजः क्वचित् ।
मारिवैरेतिदुर्भिक्षस्वान्यचक्रभयान्यपि ॥ ५ ॥
अमृद्धनखश्मश्रुकेशो देशेषु संचरन् ।
स्याद्वादी द्वारिकापुर्याः पर्यन्तोर्वीं क्रमादगात् ॥ ६ ॥
अस्यां सुरौघैः समवसरणे विहिते क्षणात् ।
तत्र प्राग्वत्प्रविश्यालंचक्रे सिंहासनं जिनः ॥ ७ ॥
राजमान्या द्विपृष्ठस्य तन्नरा द्वारिकापतेः ।
तदा समवसृत्याद्यं मनःस्वाद्यं न्यवेदयन् ॥ ८ ॥
सार्धा द्वादश रूप्यस्य कोटीस्तेभ्यो ददौ मुदा ।
प्रभोः समवसृत्यां च नृपः सविजयो ययौ ॥ ९ ॥
प्रभुं प्रदक्षिणीकृत्य कृतीन्दुः प्रणिपत्य च ।
द्विपृष्टो बन्धुना सार्धमासामासानुवासवम् ॥ १० ॥
अथ विश्वत्रयीनाथो विश्वभाषानुगामिनीम् ।
विश्वलोकप्रबोधार्थं विदधे धर्मदेशनाम् ॥ ११ ॥

भवा जन्तोरनन्ताः स्युर्नृभवः शस्यते परम् ।
यदर्ज्यन्तेऽमुना स्वर्गापवर्गाद्याः सुखश्रियः ॥ १२ ॥
एषोऽपि पुरुषार्थानां कर्तृत्वेन विदां मुदे ।
तान्विना तेन किं जन्मसंख्यापूरणहेतुना ॥ १३ ॥
स श्लाघ्यः पुरुषो यस्मिन्पुरुषार्थाः स्फुरन्त्यलम् ।
सरस्तदेव सेव्यं हि यत्रापः प्रापुरास्पदम् ॥ १४ ॥
धर्मार्थकाममोक्षाख्याश्चत्वारस्ते जने श्रुताः ।
किं त्वर्थकाममोक्षाणां धर्म एव निबन्धनम् ॥ १५ ॥
तस्माद्विश्वार्थदृक्षाणां धर्मो बीजमिति ध्रुवम् ।
मन्वानैरमलज्ञानैर्जनैः सेव्योऽयमन्वहम् ॥ १६ ॥
एतस्य वृद्धये शुद्धबुद्धिभिर्गृहमेधिभिः ।
विज्ञाय सेवनीयानि व्रतानि द्वादशान्यपि ॥ १७ ॥
तत्राहिंसा च सत्यं चास्तेयब्रह्मापरिग्रहाः ।
यतेर्महाव्रतानि स्युः पञ्चैतानि तु सर्वतः ॥ १८ ॥
देशतोऽमूनि पञ्चाणुव्रतानि गृहशालिनाम् ।
दिग्भोगानर्थदण्डाख्यं त्रिधा ज्ञेयं गुणव्रतम् ॥ १९ ॥
सामायिकं च देशावकाशः पोषधसेवनम् ।
संविभागोऽतिथेश्चत्वार्येवं शिक्षाव्रतान्यपि ॥ २० ॥
द्वादशानां व्रतानां तु सम्यक्त्वं जीवितं परम् ।
यथा गुणानामौदार्यं तपसां वा क्षमोच्चयः ॥ २१ ॥
सर्वज्ञे सद्गुरौ धर्मे या श्रद्धा हृदि निश्चला ।
सम्यक्त्वमिति तत्त्वज्ञैर्विज्ञेयं हितमात्मनः ॥ २२ ॥
अस्य प्रभावाज्जायन्ते देवाः सेवाभृतो नृणाम् ।
विस्तारिण्यः श्रियः सर्वा यथा विक्रमभूपतेः ॥ २३ ॥

तथाहि ।

जम्बूद्वीपेऽस्ति कुसुमपुरं कुसुमसंनिभम् ।
यत्र स्वर्णमयावासभासः केसरतां दधुः ॥ २४ ॥
राजास्मिन्हरितिलको भूवधूतिलकोऽजनि ।
नाम्ना गौरीति कान्तास्य गौरी कान्तगुणैरभूत् ॥ २५ ॥
उपयाचितलक्षाभिर्दक्षलक्ष्यमुलक्षणः ।
तयोरपुत्रतादोषच्छेदनो नन्दनोऽभवत् ॥ २६ ॥
अस्मिन्गर्भस्थिते राज्ञा जिता विक्रमतो ऽरयः ।
अतो विक्रम इत्याख्यामस्याम्बाकारयन्मुहैः ॥२७॥
समये विनयी सोऽयमुपाध्यायवशंवदः ।
अधीती सर्वशास्त्रेषु निष्णः कृत्स्नकलास्वभूत् ॥ २८ ॥
कामेभक्रीडनारण्ये तारुण्ये यातुमुद्यतम् ।
द्वात्रिंशन्नृपकन्याभिर्नृपस्तं पर्यणाययत् ॥ २९ ॥
यावद्दिव्येष्वसौ ताभिर्द्वात्रिंशद्वासवेश्मसु ।
रन्तुं प्रवर्तते तावदकस्माद्व्याधिभिर्वृतः ॥ ३० ॥
कुष्ठकासज्वरश्वासशोकशूलजलोदरैः ।
शिरोर्तिगडुदृक्पीडावान्तिवातैश्च सोऽर्दितः ॥ ३१ ॥
उपयाचितबस्त्यादिकर्भमन्त्रौषधक्रियाः ।
सर्वं व्यर्थमभूदस्मिन्हितं वाक्यं जडे यथा ॥ ३२ ॥
शीर्णनासोष्ठहस्तांघ्रिरत्यर्थं व्यथितोऽर्तिभिः ।
अनल्पं तल्पगः कष्टं रारटीति स्म सोऽनिशम् ॥ ३३ ॥
ततः पुरबहिःस्थस्य प्रसिद्धस्यार्तिशान्तये ।
धनंजयस्य यक्षस्य स मेने महिषाञ्शतम् ॥ ३४ ॥
तदा विमलकीर्त्याख्यः केवली केलिकानने ।

दुःकर्मतिमिरत्रासत्रासरः समवासरत् ॥ ३५ ॥
ततः केवलिनं नन्तुं भूभर्ता भूरिभक्तिभाक् ।
चचालानन्दसंदर्भोज्जागरैर्नागरैर्वृतः ॥ ३६ ॥
तद्विज्ञाय तदा विज्ञो विक्रमोऽपि व्यचिन्तयत् ।
लाभैर्लोभा इव रुजो हा वर्धन्ते ममौषधैः ॥ ३७ ॥
मुद्रामण्डलमन्त्रैस्तैरौषधैरुपयाचितैः ।
भग्नं मद्याधिषूदग्रैर्दन्तिदन्तैरिवाद्रिषु ॥ ३८ ॥
तन्मे दर्पादमी रोगसर्पाः सर्पन्ति यद्बलात् ।
तत्तमः शमयाम्यद्य ज्ञानभानुं भजे मुनिम् ॥ ३९ ॥
अथ व्यजिज्ञपद्भूपमसावुद्यमसाहसी ।
शमराशिं नमस्कर्तुं समं नयत मामिति ॥ ४० ॥
मुक्तालिखचितश्मश्रु मुखमश्रुकणैः सृजन् ।
नृपो ऽथ नृतिमानेन समं तमनयत्सुखम् ॥ ४१ ॥
स्वर्णाब्जविष्टरक्रोडनिविष्टं कलभाषिणम् ।
नृपः समं कुमारेण मुनिहंसं ननाम तम् ॥ ४२ ॥
ततो मुनिर्मनुष्याणां हरन्पापमिषं विषम् ।
वाचा सुधाद्रवाचारधारिण्या धर्ममादिशत् ॥ ४३ ॥
पप्रच्छ देशनान्तेऽथ विक्रमोक्त्या मुनिं नृपः ।
किं कुमारोऽयमारोग्यमारोहति न सर्वथा ॥ ४४ ॥
व्यक्तदृश्यस्फुरद्धर्म इवास्ये दशनांशुभिः ।
ऊचेऽथ केवली ज्ञानकवलीकृतसंशयः ॥ ४५ ॥
पुरेऽपरविदेहोर्वीरत्ने रत्नस्थलाभिधे ।
पद्माख्यश्छद्मनां सद्म कुराजन्यः पुराजनि ॥ ४६ ॥
स मृगव्यरसव्यग्रो भूतलं वन्यमन्यदा ।

ययौ सुयशसं साधुं कायोत्सर्गे ददर्श च ॥ ४७ ॥
स धर्मज्ञानयोर्वैरी धर्मज्ञानसमाश्रये ।
साधोरुरसि निःशङ्कः कङ्कपत्रं निखातवान् ॥ ४८ ॥
मिथ्यादुःकृतवाक्साधुः स्वव्यलीकविशङ्कया ।
पपात घातव्यग्रोऽथ धर्माधारतरुर्धराम् ॥ ४९ ॥
जनं धिगिति जल्पन्तं निघ्नन्भूपोऽथ मन्त्रिभिः ।
पापश्रीकौतुकशुकः कृतः क्षिप्त्वाशु पञ्जरे ॥ ५० ॥
न्यस्य तस्य सुतं राज्ये पुण्डरीकं स भूपतिः ।
सचिवैः पञ्जराद्युक्तममोचि निरयोचितः ॥ ५१ ॥
सुयशा मुनिराजस्तु स्मरन्पञ्चनमस्कृतीः ।
षड्जीववर्गान्क्षमयन्सुरोऽभूल्लवसप्तमः ॥ ५२ ॥
स तु राजा वहन्वैरं साधुवर्गे निरर्गलम् ।
न जनैर्निन्द्यमानोऽपि तत्पुरोद्यानमत्यजत् ॥ ५३ ॥
ध्यानाधीनो यशोधौतव्योमा सोमाभिधो मुनिः ।
तेनोर्व्यां दण्डपातेनापाति स्वात्मेव दुर्गतौ ॥ ५४ ॥
क्ष्माजन्तून्क्षमयित्वाङ्गं संमार्ज्य प्रतिमास्थितः ।
मुनिस्तथैव घातेनापाति पातकिनाऽनघा ॥ ५५ ॥
इत्येष पौनःपुन्येन कुर्वन्पुण्येन साधुना ।
अवधिज्ञानविज्ञाततद्भावेनेति भर्त्सितः ॥ ५६ ॥
निघ्नन्साधूञ्शमागाधान्रे रे दुष्ट स्वतुष्टये ।
न चेद्भीतोऽस्यघात्तत्किं मादृग्भ्योऽपि बिभेषि न ॥५७॥
शमिनः सुयशोमुख्या हन्त त्वामसहन्त रे ।
नाहं सहिष्ये हन्म्येष स्वाभीष्टं स्मर दैवतम् ॥ ५८ ॥
इत्युक्त्वा तडितेव दुं तं तेजोलेश्यया मुनिः ।

भस्मीकृत्य द्रुतं प्राप पयोद इव शान्तताम् ॥ ५९ ॥
भूपोऽथ पापभारेण समुत्पतितुमक्षमः ।
अधोगतीनामवधिं सप्तमीं दुर्गतिं गतः ॥ ६० ॥
सोऽप्यालोच्य प्रतिक्रम्य तदतिक्रम्य पातकम् ।
मुनिस्तीव्रतपस्तप्त्वा दिवमायुःक्षयादगात् ॥ ६१ ॥
स भूरमणजीवस्तु स्वयंभूरमणार्णवे ।
अप्रतिष्ठाननरकादुद्वृत्तस्तिमितां गतः ॥ ६२ ॥
स तिमिः सप्तमीमेव जगाम जगतीं ततः ।
ततो ऽप्युद्वृत्य मत्स्यो ऽभूद्गतः षष्ठीं च दुर्गतिम् ॥६३॥
चण्डालस्त्रीभवं प्राप्य पुनस्तत्रैव यातवान् ।
ततः कुम्भीनसो भूत्वा स भूमीं पञ्चमीं गतः ॥ ६४ ॥
पुनर्जगाम तामेव भुवं मीनभवान्तरः ।
मृगनाथः स भूत्वाथ तुरीयं निरयं गतः ॥ ६५ ॥
पुनस्तत्रैव पाठीनशरीरान्तरितो ऽगमत् ।
श्येनीभूय तृतीयं स इयाय निरयं ततः ॥ ६६ ॥
गृध्रदेहं गृहीत्वाथ गतस्तामेव दुर्गतिम् ।
द्वितीयां भुजगो भूत्वा जगाम जगतीं च सः ॥६७॥
सोऽगमद्भोगभृद्भूय तत्र भूयोऽपि दुर्गतौ ।
तिमीभूयागमदसौ प्रथमां पृथिवीमथ ॥ ६८ ॥
अजायत स जीवोऽथ पक्ष्येको विकलेन्द्रियः ।
हीनेन्द्रियचयस्तिर्यग्नीचजातिर्नरः सुरः ॥ ६९ ॥
नारकश्चेति शतशः सोऽभूद्भवचरश्चिरम् ।
नानायोनीभवां भूरिपरागभूतिं समाश्रयत् ॥ ७० ॥
आकुलः कष्टकोटीभिर्बन्धव्यथवधादिभिः ।

भवे भवे स पञ्चत्वमवाप व्यापदां पदम् ॥ ७१ ॥
इत्यापदोऽतिगहनाः सहमानेन संसृतौ ।
तेन बह्व्योऽवसर्पिण्य उत्सर्पिण्यश्च निन्यिरे ॥ ७२ ॥
सोऽकामनिर्जराक्षामकर्माथ तनुभूरभूत् ।
गृहिणः सिंहदत्तस्य वसन्तपुरवासिनः ॥ ७३ ॥
तारुण्ये तापसीभूय तपस्तप्त्वा स दुस्तपम् ।
फलं त्वज्ञानकष्टस्य प्राप त्वत्पुत्रतामयम् ॥ ७४ ॥
ऋषिघातप्रवचनद्वेषजं पापमेष तत् ।
तीव्राभिः कष्टकोटीभिस्ताभिस्ताभिरशोषयत् ॥ ७५ ॥
तेनाशोषितशेषेण दुरितेन तवात्मजः ।
अन्यं बभूव भूपाल रोगजालस्य भाजनम् ॥ ७६ ॥
इत्युक्तिं दुःश्रवां श्रुत्वा चकम्पे चकितो नृपः ।
स विक्रमकुमारस्तु जातजातिस्मृतिर्जगौ ॥ ७७ ॥
विवेकदीपमप्राप्य प्रभो मोहतमोहतः ।
हहा कष्टमहासिन्धौ मार्गभ्रष्टः पुरापतम् ॥ ७८ ॥
इतश्चेतश्च चण्डाभिस्ताड्यमानस्तदूर्मिभिः ।
दैवात्तत्तीरमेत्यास्मिन्मग्नो रुक्पङ्कसंकटे ॥ ७९ ॥
जगद्गुरो करालम्बं तद्यच्छानवलम्बितम् ।
आकर्ष मामितः स्वामिन्निरीह करुणां कुरु ॥ ८० ॥
सम्यक्त्वैकगुणप्रोतद्वादशव्रतभूषणम् ।
श्राद्धधर्ममथो हस्तमिव व्यस्तारयद्विभुः ॥ ८१ ॥
रोमहर्षाङ्कुराकीर्णो हर्षाश्रुकणमिश्रदृक् ।
जग्राह श्रावकं धर्मं विक्रमोऽथ यथाविधिम् ॥ ८२ ॥
भूपोऽभूद्भद्रको नत्वा तौ मुनिं पुरमीयतुः ।

व्यहरद्वसुधां बोधिसुधाम्भोधिस्ततो मुनिः ॥ ८३ ॥
धर्मद्रुमूलसम्यक्त्वरसास्वादकृतादरः ।
छिन्नाघकन्दैर्मुमुचे व्याधिभिर्विक्रमः क्रमात् ॥ ८४ ॥
नवोल्लासितलावण्यपुण्यसर्वाङ्गचङ्गिमा ।
धर्मालंकरणः सोऽभून्मुक्तेरपि मनोरमः ॥ ८५ ॥
निशाशेषेऽन्यदा यक्षः प्रत्यक्षः स जगाद तम् ।
मच्छक्त्या सज्जदेहोऽसि देहि मे महिषाञ्शतम् ॥ ८६ ॥
तमूचे विक्रमो याचल्लुँलायाङ्कि न लज्जसे ।
जज्ञेऽङ्गं मुनिदिष्टेन सज्जं धर्मौषधेन मे ॥ ८७ ॥
धर्माख्यमौषधं दृष्टप्रत्ययं कष्टतो ऽर्जितम् ।
जीवव्यापादपापाब्धौ यक्ष कः क्षिपति प्रधीः ॥ ८८ ॥
आचचक्षे च यक्षेशो ददास्यन्यस्य मत्पशून् ।
ततस्तत्ते करिष्यामि कामं येनानुतप्यसे ॥ ८९ ॥
इत्युदित्वा तिरोभूते यक्षे दक्षैकशेखरः ।
अनाकुलमनाश्चक्रे कृत्यकर्माणि विक्रमः ॥ ९० ॥
तत्रामरनिकेताख्योद्यानश्रीशेखरेऽन्यदा ।
जिनागारे कुमारेन्दुर्ययौ कल्याणकोत्सवे ॥ ९१ ॥
ततः स्नात्रविलेपार्चाप्रेक्षणीयस्तवक्षणैः ।
जिनेन्दोर्जनयित्वैष यात्रां यावन्न्यवर्तत ॥ ९२ ॥
अस्तम्भयद्भयव्यग्रं तावत्तस्याखिलं बलम् ।
जिनक्रीडावनक्रोडे स धनञ्जयगुह्यकः ॥ ९३ ॥ युग्मम् ॥
यमाग्निकौणपध्वान्तकोटिकल्पामिवाथ सः ।
हताम्बरचरस्फूर्तिं मूर्तिं निर्माय मायया ॥ ९४ ॥
रोषप्लोषितया भीष्मघनघर्घरघोषया ।

तं क्षोणिपसुतं यक्षः साक्षेपमिदमब्रवीत् ॥ ९५ ॥युग्मम् ॥
न रे नराधम कथं ददासि मम कासरान् ।
आयुःकाण्डमकाण्डेऽपि समापयसि किं स्वकम् ॥ ९६ ॥
स्मितधौताधरोऽधत्त कुमारो भारतीमथ ।
भो यक्ष न क्षिपामि त्वं तनुमद्धातपातके ॥ ९७ ॥
अप्यारब्धबहुत्राणाः प्राणाः कस्यापि न स्थिराः ।
तत्कृत्याकृत्यवित्कुर्यादकृत्यं तत्कृतेऽपि कः ॥ ९८ ॥
इत्याकर्ण्य क्रुधा यक्षो विक्रमं क्रमसंग्रहात् ।
उत्पाट्यास्फालयद्वीचीमिवाभ्यर्णाचलेऽर्णवः ॥ ९९ ॥
मूर्छामुच्छिद्य यक्षस्तं क्रुधान्धः पुनरभ्यधात् ।
रे रे ददासि नाद्यापि किं मदेयमदेयवत् ॥ १०० ॥
कृपां करोषि जीवेषु स्वजीवे न करोषि किम् ।
मद्भक्ष्यतां गतेऽमुष्मिन्धर्माविष्कारकारणे ॥ १०१ ॥
धर्माधारः कुमारोऽथ गिरं जग्राह साहसी ।
स्वैकजीवकृते जीवशतं को हन्ति धर्मवित् ॥ १०२ ॥
फलं तवापि धिग्यक्ष जीवलक्षनिपातनैः ।
इहामगन्धिकं धाम परत्र नरकव्यथा ॥ १०३ ॥
त्वं धर्मादेव देवत्वं यातोऽसि प्राग्भवं स्मर ।
पातके जातकेलिस्तत्किमसि ज्ञानवानपि ॥ १०४ ॥
पुण्यैकपरिणामेन जगदुल्लासहेतुना ।
तवापि युज्यते धर्तुमानन्दं वन्दनादिना ॥ १०५ ॥
इति तस्योक्तिभिर्युक्तिभिन्नाभिर्भिन्नमानसः ।
यक्षोऽभ्यधादहो साधु त्वयाहं प्रतिबोधितः ॥ १०६ ॥
ततो नाद्यापि माद्यामि पापाहैरङ्गिनां वधैः ।

नृणां प्रणाममात्रेण गमिष्यामि प्रसन्नताम् ॥ १०७ ॥
कुरु त्वमपि मे नाम प्रणाममलाशय ।
तेनैव तेऽनुमंस्येऽहं संपूर्णमखिलं खलु ॥ १०८ ॥
कुमारोऽथ जगौ यक्ष नमस्कारो हि पञ्चधा ।
प्रहासविनयप्रेमप्रभुभावप्रभेदभाक् ॥ १०९ ॥
स प्रहासप्रणामः स्याच्चित्तोत्सङ्कितमत्सरैः ।
यः क्रियेत परिज्ञातविक्रियेभ्योऽपि सत्क्रियैः ॥ ११० ॥
तमामनन्ति विनयप्रणामं नयपण्डिताः ।
पित्रादिभ्यो विधीयेत पुत्राद्यैर्विनयेन यः ॥ १११ ॥
प्राहुः प्रेमप्रणामं तं प्रणयिभ्यः क्रियेत यः ।
कामं स प्रेमकोपेभ्यो मित्रादिभ्यः प्रसत्तये ॥ ११२ ॥
यस्तु स्वामिनि संमानमानश्रीदानशालिनि ।
ऐहिकः क्रियते स्वामिनमस्कारमुशन्ति तम् ॥ ११३ ॥
यः सद्गुरौ च देवे च वीतरागे विरच्यते ।
तं तु भावनमस्कारं निर्दिशन्ति विशारदाः ॥ ११४ ॥
विचारय त्वमेतेषु कं नमस्कारमर्हसि ।
इत्याकर्ण्य कुमारोक्तिमभ्यधत्त जनंजयः ॥ ११५ ॥
त्वं कुमार नमस्कारं कुरु भावमयं मयि ।
यद्देवोऽस्मि जगत्कारसंहारोद्धारकारणम् ॥ ११६ ॥
भवार्णवसमुत्तारतरीभूतविभूतयः ।
मदंशा एव भासन्ते सर्वदर्शनदेवताः ॥ ११७ ॥
मन्नमस्कारमात्रेण तव संसारसागरः ।
विक्रम क्रमलङ्घ्यत्वमनुल्लङ्घ्यो गमिष्यति ॥ ११८ ॥
अथाब्रूत स्मितस्यूतवदनो नृपनन्दनः ।

मयाकृष्टः क्रियापापाद्वाक्पापे यक्ष मा पत ॥ ११९ ॥
जगतां सृष्टिसंहारोद्धाराः सन्ति न सन्ति वा ।
इति सम्यग्न जानासि स्वमाख्यासि च तत्क्षमम् ॥१२०॥
यदङ्गमहसा दृष्टिः सहसा तव लुप्यते ।
तैः सुरेन्द्रैः स्तुतान्ख्यासि स्वांशान्दर्शनदेवताः ॥१२१॥
स्वयं भवाब्धौ मत्स्यस्त्वं चापलेनोपलक्ष्यसे ।
नमस्कारात्तदुत्तारं कुतो दिशसि मे ततः ॥ १२२ ॥
वचसा निष्फलेनैव तत्पापं मा वृथा कृथाः ।
भवेन्मम नमस्कारो भवे ऽस्मिन्न जिनं विना ॥ १२३ ॥
इति वादिनि यक्षेन्दुर्मेदिनीनाथनन्दने ।
गिरं जागरयामास विवेकविमलामिमाम् ॥ १२४ ॥
ददृशे त्वादृशः को ऽपि पुमाननुपमाकृतिः ।
धीरो धर्मी च वाग्मी च राजपुत्र न कुत्रचित् ॥ १२५ ॥
जितस्त्वयाहं वचनैस्तेनास्मि तव किंकरः ।
शुद्धधर्मोपदेशाच्च मम त्वमसि सद्गुरुः ॥ १२६ ॥
स्वचित्तकोणं वासाय निजदासाय यच्छ मे ।
त्वच्छिष्यो यदि जानामि तद्गतां त्वद्गुणावलीम् ॥ १२७॥
विभो विरहयिष्यामि निजं चेतो न च त्वया ।
कदापि यदि वेत्तीदं जिनसेवोत्सवं तव ॥ १२८ ॥
भर्तः स्मर्तव्य एवाहमुत्कटे संकटे क्वचित् ।
अयमेव हि भृत्यानां स्वामिन्यवसरः परः ॥ १२९ ॥
इत्युदित्वैनमापृच्छ्यावगूह्य च स गुह्यकः ।
ययौ निजाश्रयं चित्रस्तच्चरित्रचमत्कृतः ॥ १३० ॥
ततः प्रत्यूषशेषायां रजन्यां राजपुङ्गवः ।

द्रुतं विज्ञातवृत्तान्तः कुमारोपान्तमापतत् ॥ १३१ ॥
मुदा कुमारमालिङ्ग्य पत्तनाय निनाय सः ।
बालार्करश्मिकाश्मीरनीरश्रीरम्यया भुवा ॥ १३२ ॥
प्रत्यध्वपौरगौराङ्गीदृक्तामरसतोरणे ।
कुमारमुत्सवेनाथ नृपः प्रावीविशत्पुरे ॥ १३३ ॥
कालेन केनचिद्राज्यभारमारोप्य विक्रमे ।
जगाम नामशेषत्वमेष भूपालपुङ्गवः ॥ १३४ ॥
कुर्वन्नित्यताध्यानसुधासिन्धूर्मिमज्जनम् ।
पितृशोकाग्निजं तापममुञ्चद्विक्रमो नृपः ॥ १३५ ॥
विवेकं पितृशोकाग्निविशेषविशदं ततः ।
हृदलंकरणं चक्रे निष्कवद्विक्रमो नृपः ॥ १३६ ॥
न्यायकल्पद्रुमारामच्छायामध्ये निवेश्य भूः ।
तेनाभूष्यत सर्वाङ्गमर्हद्गृहविभूषणैः ॥ १३७ ॥
सप्तव्यसननिर्मुक्तममुक्तसुकृतोद्यमम् ।
अभूद्भूपे ऽत्र भूपीठं राजन्ते राजवत्प्रजाः ॥ १३८ ॥

आगात्तद्देशभङ्गाय कलिङ्गाधिपतिर्यमः ।
कदाप्याकस्मिकापातः संनिपात इवोत्कटः ॥ १३९ ॥
दूरं देवस्य कस्यापि प्रभावाद्द्रुतौजसा ।
हरिः स हरिणेनेवाचक्रमे तेन विक्रमः ॥ १४० ॥
शूरमण्डलतेजांसि दूरयन्सैन्यरेणुभिः ।
विक्रमो ऽथ धरित्रीन्दुरभ्यमित्रीणतां गतः ॥ १४१ ॥
यमविक्रमयोर्जाग्रद्दुग्रविक्रमकर्मणोः ।
तयोः प्रवृत्ते वीरसिंहसंहरणो रणः ॥ १४२ ॥
जातदेवानुभावौजःसंक्रमो विक्रमं यमः ।

जितोत्कटचमूकोटिर्विकटे संकटे ऽनयत् ॥ १४३ ॥
पादान्ते ढौकणीकृत्य कृतदोःसंयमं यमम् ।
स्मृतिमात्रागतो यक्षस्तदा विक्रममैक्षत ॥ १४४ ॥
हीनोद्यमं दीनमुखं विद्विषं वीक्ष्य विक्रमः ।
बन्धादुन्मोच्य देशायादिदेशाढ्यकुपाशयः ॥ १४५ ॥
मानयित्वा च नत्वा च यक्षमक्षीणसौहृदम् ।
अनुज्ञाय निवासाय स्वपुरायाचलन्नृपः ॥ १४६ ॥
पुर्या मङ्गलशृङ्गारहृद्याया हृदये ऽविशत् ।
प्रतोलीदृक्पथेनाथ भूनाथः कीर्तिभूषणः ॥ १४७ ॥
तस्मिन्राजनि राजन्तः पौराः सौराज्यसंपदा ।
महोत्सवैर्दिवो देवान्धरामानिन्यिरे ऽन्वहम् ॥ १४८ ॥

व्रजन्भूपो ऽन्यदा बाह्यावनीं वाह्यालिकेलये ।
किमप्योकः क्षणक्षीवास्तोकलोकमलोकत ॥ १४९ ॥
वाहयित्वा हयान्भूपो वल्गमानस्तदैव सः ।
अमन्दाक्रन्दसंदर्भगर्भमैक्षत मन्दिरम् ॥ १५० ॥
विस्मयव्याकुलेनैको नरः पार्श्वचरस्ततः ।
पृष्टस्तत्कारणं राज्ञा विज्ञायेति व्यजिज्ञपत् ॥ १५१ ॥
स्वामिन्नेतद्गृहेशस्य महेभ्यस्य गतेऽहनि ।
अपुत्रकस्य पुत्रो ऽभूदन्धस्येव दृगुद्गमः ॥ १५२ ॥
इदानीमेव वाह्यालिविलासगमनक्षणे ।
तन्निमित्तभवो ऽदर्शि देवेनेह महोत्सवः ॥ १५३ ॥
अधुनैव पुनर्दैवयोगतः स मृतः शिशुः ।
तद्वियोगार्तिमार्गेण तत्पितापि तमन्वगात् ॥ १५४ ॥
तत्कुटुम्बजनः सर्वः पुत्रजन्मात्सवागतः ।

प्रत्युत द्विगुणे दुःखे पतितो रारटीत्ययम् ॥ १५५ ॥
भवनाटककौटिल्यादथोत्कण्ठकविग्रहः ।
अव्याकुलचलच्चेताः क्षितिनेता व्यचिन्तयत् ॥ १५६ ॥
विदामप्यपरिच्छेद्या संसारस्य विचित्रता ।
जनो ऽयं चिन्तयत्युच्चैरन्यदन्यच्च जायते ॥ १५७ ॥
सुखाय च्छायामायाति ग्रीष्मतापातुरस्तरोः ।
नरस्तत्कोटरस्थेन दश्यते हा महाहिना ॥ १५८ ॥
वहत्यहो नरः शस्त्रं रिपोर्दारणकारणम् ।
कदाचिदेष तेनैव दैवात्तेनैव हन्यते ॥ १५९ ॥
मनोरथानुरूपं यत्फलमाप्नोति कश्चन ।
महाविडम्बनाजालक्षेपविश्वासकं हि तत् ॥ १६० ॥
एकान्तदुःखदे लोके विरज्य मयि मुक्तये ।
मा धावत्विति संसारो दत्ते सुखकणानपि ॥ १६१ ॥
या संसारसुखावाप्तिर्दुरन्तैव नरस्य सा ।
मत्स्यस्य गलिकायन्त्रनियुक्तकवलोपमा ॥ १६२ ॥
अयं जनो मनो लोलं कथं नु कथयत्यदः ।
भवभावेषु यद्वज्रलेपेनेव नियन्त्रितम् ॥ १६३ ॥
अलोकव्योम्नि ये लोकव्योम क्षेप्तुं क्षमा जिनाः ।
तदाश्रयबलाच्चित्तं क्षमामि भवभावतः ॥ १६४ ॥
इति ध्यायन्ययौ धाम त्वरितं नृपविक्रमः ।
चन्द्रसेनं सुतं राज्ये न्यस्य तस्थौ व्रतोत्सुकः ॥ १६५ ॥
ज्ञानविज्ञाततद्भावः स्वभावकरुणाकरः ।
सद्गुरुः केवली काले तत्र तत्पुरमासदत् ॥ १६६ ॥
तद्वार्तावादिनं दानैरानन्द्योद्यानपालकम् ।

विक्रमः प्रमदस्मेरो जगामारामभुस्तुवः ॥ १६७ ॥
सो ऽथ प्रदक्षिणीचक्रे गुरुं कर्मेन्धनानलम् ।
चिरानुरागसंबद्धां श्रद्धां परिणमन्निव ॥ १६८ ॥
नत्वा गुरुं धराजानिर्यथायुक्तमथासनम् ।
भेजे रेजे च तद्वाणीदृष्टिसंपातचातकः ॥ १६९ ॥
युग्मम् ॥
अथ व्रतार्थमभ्यर्च्य यतीशं जगतीपतिः ।
प्रभावनार्थं तीर्थस्य जगाम नगरं पुनः ॥ १७० ॥
धनंजयाख्ययक्षेशकृतसान्निध्यबन्धुरः ।
सुरासुरचमत्कारकरोदारमहोत्सवः ॥ १७१ ॥
प्रभावनाभिर्यक्षेन्द्रकृताभिः सुकृताब्धिभिः ।
वैधर्मिकैरपि स्तुत्यं जनयञ्जिनशासनम् ॥ १७२ ॥
पुराद्रुरुमगाद्भूपः सिद्धिलोभनरूपधाक् ।
भेजे भवशिरःशूलं मूलं ज्ञानतरोर्व्रतम् ॥ १७३ ॥
त्रिभिर्विशेषकम् ॥
नृचन्द्रे चन्द्रसेने ऽथ नत्वा नगरगामिनि ।
विजहार महीं राजमहर्षिर्गुरुभिः सह ॥ १७४ ॥
श्रद्धाशुद्धतपाः शुद्धसिद्धान्तपठनक्रमः ।
बोधयित्वा धरां ज्ञानी स परं पदमासदत् ॥ १७५ ॥
इति तत्त्वेन सम्यक्त्वं सेव्यं विक्रमवत्ततः ।
जनो येन भवत्याशु लोकद्वयभयव्ययः ॥ १७६ ॥

इति सम्यक्त्वे विक्रमराजकथा ॥

पापध्वान्तभिदस्तस्य सम्यक्त्वस्य रवेरिव ।
राशिवद्द्वादशाद्यव्रतान्याभोगवृत्तये ॥ १७७ ॥

निरागस्त्रसहिंसाङ्गपीडारक्षणलक्षणम् ।
प्रथमं तेष्वहिंसाख्यं श्राद्धानां स्यादणुव्रतम् । १७८ ॥
सुकृताम्भोजहंसीयमहिंसैवातिनिर्मला ।
भवमोक्षजलक्षीरविवेकाय निषेव्यते ॥ १७९ ॥
भूस्वर्गभोगसौख्यश्रीसोपानश्रेणिशालिनी ।
अहिंसा नाम निःश्रेणिर्निःश्रेयसगमावधिः ॥ १८० ॥
हिंसा निरन्तरं दुःखमहिंसा तु परं सुखम् ।
जन्तोर्ददात्यहो सूरचन्द्रयोरिव तद्यथा ॥ १८१ ॥
अस्ति रूपेण संपत्त्या सुकृतोपचयेन च ।
पुरन्दरपुराल्लब्धजयं जयपुरं पुरम् ॥ १८२ ॥
अभूद्भूपः श्रियां पात्रं तत्र शत्रुञ्जयाह्वयः ।
यद्यशःक्षीरधिर्वैरिदुर्यशःशैवलाद्भयौ ॥ १८३ ॥
नन्दनौ सूरचन्द्राख्यौ तस्यामूतां मतौ सताम् ।
सूरचन्द्राविवोन्निद्रानन्दं कर्तुमिदं जगत् ॥ १८४ ॥
ज्येष्ठे श्रेष्ठगुणभ्रान्त्या बिभ्राणः स्नेहविभ्रमम् ।
स तस्मै सूनवे राजा युवराजपदं ददौ ॥ १८५ ॥
चन्द्रस्य तु महीन्द्रेण न वृत्तिरपि निर्ममे ।
ततः स चिन्तयामास स्वावासशयनो निशि ॥ १८६ ॥
सूरोऽद्य विदधे राज्ञा युवराजः स्वयं मुदा ।
न पत्तिरप्यहं वृत्त्या पितुर्मोहः कियानहो ॥ १८७ ॥
पराभूतस्य तद्राज्ञा स्थातुं मे ऽत्र न युज्यते ।
कलभः किं वसेद्यूथे यूथेशेनापमानितः ॥ १८८ ॥
एवं विचिन्त्य निस्तन्द्रश्चन्द्रः सान्द्रपराभवः ।
अचलद्गलितस्नेहः स्वगेहान्निश्यलक्षितः ॥ १८९ ॥

चित्तावेशहृतक्लेशः स्वदेशत्यागरागभृत् ।
कुमारः सुकुमारोऽपि दूरे देशान्तरेऽविशत् ॥ १९० ॥
रत्नपत्तनमित्यत्र पत्तनं विद्यते ऽद्भुतम् ।
तदुद्यानसमीपे ऽस्थाच्चन्द्रः श्रान्तस्तरोस्तले ॥ १९१ ॥
श्रुतिपेयं स्वरं श्रुत्वा ततस्तदनुसारतः ।
विशन्नाराममद्राक्षीच्चन्द्रः साधुं सुदर्शनम् ॥ १९२ ॥
सभागभावनौ नत्वा तत्त्वार्थादेशकं मुनिम् ।
तन्मुखादिति शुश्राव स धर्मं भावपावनः ॥ १९३ ॥
सापराधा अपि प्रायो गेहिभिः पुण्यदेहिभिः ।
न हन्तव्यास्त्रसास्तावत्किं पुनस्ते निरागसः ॥ १९४ ॥
इत्यादिदेशनां कर्णदेशनान्दीं निशम्य सः ।
प्रपद्य करुणामेव स्वगिरा प्रत्यपद्यत ॥ १९५ ॥
मयापराधिनोऽप्युच्चैरुपरोधे ऽपि च प्रभोः ।
जन्तवो हन्त हन्तव्या नान्यतः शौर्यवृत्तितः ॥ १९६ ॥
इत्याप्तनिश्चयश्चन्द्रो नत्वा सच्चगुरुर्गुरून् ।
पुरे तत्रैव धात्रीशं जयसेनमसेवत ॥ १९७ ॥
शौच्यसत्यौचितीदाक्ष्यदाक्षिण्यादिभिरद्भुतैः ।
निजैः सेवागुणैरेवाभवद्भर्तुरयं प्रियः ॥ १९८ ॥
निवेश्य रहसि प्रेमहसितस्नपिताधरः ।
लपति स्म पतिः शुद्धविवेकमभुमेकदा ॥ १९९ ॥
अपीन्द्रसमरे धीरा वीराः क्षीराभकीर्तयः ।
ये सन्ति मे तृणानीव त्वद्दृष्टिस्तानपीक्षते ॥ २०० ॥
क्रियाकथितनिःशेषगुणस्य तव पौरुषम् ।
दृष्टिर्दिशत्यसौ धैर्यरसार्णवनवाब्जिनी ॥ २०१ ॥

तद्वीरवारकोटीर वैरिशल्यं मम स्खलत् ।
तूर्णमाकर्ष हृदयादुदयादपि रोपितम् ॥ २०२ ॥
अन्यायमदिराकुम्भः कुम्भ इत्युग्रशुम्भनः ।
मन्न्यायवृक्षकरटी चरटीभूय वल्गति ॥ २०३ ॥
स्त्रीश्च गाश्च हरत्येष क्रूरो हन्ति यतीनपि ।
चमूरुद्धो यमस्यापि दुर्गमं दुर्गमञ्चति ॥ २०४ ॥
तत्तद्दुर्गं महादुर्गवल्गनो वल्गुविक्रमः ।
गुप्तं प्रविश्य तं सुप्तं मत्प्रमोदाय दारय ॥ २०५ ॥
इत्याज्ञप्तवति भूपे गां चन्द्रो ऽमुञ्चत्सुधामयीम् ।
प्रारब्धतीर्थकृद्धर्ममहासागरजागराम् ॥ २०६ ॥
हन्तुं जन्तूनयुद्धेषु प्रत्याख्यानं प्रभो मम ।
युद्धेष्वपि परित्रस्तानस्तानन्दान्निरायुधान् ॥ २०७ ॥
इत्यस्य निश्चयं शौर्यमयं धर्ममयं च सः ।
नृपो मत्वा ममञ्चक्रे मदसंमदयोः पदम् ॥ २०८ ॥
अध्यक्षमङ्गरक्षाणामग्रण्यं मन्त्रिणामपि ।
सर्वेश्वरं च तं चक्रे क्रमात्प्रीतः क्षमापतिः ॥ २०९ ॥
पापव्यापारपारीणो रीणातुलचमूकुलः ।
विवेश देशं संरम्भी स कुम्भचरटो ऽन्यदा ॥ २१० ॥
सारवीरचयश्चन्द्रस्तद्वधाय दधाव च ।
अमार्गत्वरितैः सैन्यैर्दुर्गमार्गान् रुरोध च ॥ २११ ॥
पलायमानमुन्निद्ररौद्रचन्द्रचमूभयात् ।
तं रुरोध पुरोद्धर्षसहर्षसुभटोत्करः ॥ २१२ ॥
पुरतः पार्श्वतः पश्चान्मिलद्भिः स बलैरभूत् ।
वनेभः सर्वदिग्धावद्दवानल इवाकुलः ॥ २१३ ॥

सेनासु तासु चरटो झञ्झासु करटो यथा ।
कथंचिज्जीवनोपायकणिकामप्यनाप्नुवन् ॥ २१४ ॥
न शौर्यवह्निलेशो ऽपि मय्यस्तीति दिशन्निव ।
सनिःश्वासमुखन्यस्ततृणश्चन्द्राग्रतो ऽलुठत् ॥ २१५ ॥
प्रसन्नहृदयः स्फीतदयस्तदयमुद्यशाः ।
हृष्यद्रोमालिमालिङ्गत्कुम्भमुत्थाप्य भूपभूः ॥ २१६ ॥
तदादि स्फुरदादित्यमहसं बहुसंमदः ।
चन्द्रं नृपो ऽधिकं मेने पुत्रतो ऽपि स्वतो ऽपि च ॥२१७॥
चन्द्राग्रभूरतृप्तस्तु यौवराज्यश्रियापि सः ।
राज्याय सूरः क्रूरात्मा दधौ पितृवधे धियम् ॥ २१८ ॥
निशीथे निशितास्त्रौघो दूरं वञ्चितयामिकः ।
उन्मार्गैः सौधमाविष्टः कालादिष्टः फणीव सः ॥ २१९ ॥
ततः पराङ्मुखं सुप्तं तीव्रेणास्त्रेण भूपतिम् ।
स जघान घनं लोभः शोभते मूलमंहसाम् ॥ २२० ॥
ततस्त्रसन्नसौ देव्या दृष्टः संमुखसुप्तया ।
घात्येष याति घात्येष यातीति पूत्कृतो रवः ॥ २२१ ॥
धावत्सु द्वारपालेषु भूपालेनेत्यभाषि च ।
कस्यायं घातक इति ज्ञातव्यो मैष हन्यताम् ॥ २२२ ॥
तनुजं मनुजस्वामी तं विज्ञाय विकारिणम् ।
यूथाद्विनष्टं दासेरमिव देशान्निरासयत् ॥ २२३ ॥
त्वरवत्तुरगारूढैः स क्रमेलकमेलकैः ।
प्रधानपुम्भिर्भूचन्द्रः सुतं चन्द्रमथाह्वयत् ॥ २२४ ॥
जयसेनमथापृच्छ्य समायातस्तथास्थितम् ।
पितरं प्रेक्ष्य चन्द्रोऽभूदास्पदं हर्षदुःखयोः ॥ २२५ ॥

निवेश्य तं सुतं राज्ये राजा तद्घातपीडया ।
सूरे समत्सरो मृत्वा द्वीपी कापि नगे ऽभवत् ॥ २२६ ॥
कलङ्कपङ्किलः सो ऽपि सूरो जीवन्कुकर्मभिः ।
चरन्देशान्तराण्याप वनं तद्द्वीपिदीपितम् ॥ २२७ ॥
पलायमानस्तत्रायमंहःसंहृतपौरुषः ।
जघ्ने प्राग्वैरवैरस्यात्कोपिना द्वीपिनामुना ॥ २२८ ॥
स सूरजीवस्तत्रैव वने यातः किरातताम् ।
पापर्द्धिवर्धितारम्भस्तेनैव द्वीपिना हतः ॥ २२९ ॥
सो ऽपि द्वीपी हतः कोपाटोपान्धैस्तस्य बन्धुभिः ।
तावभूतामुभौ शैलवने तत्रैव पोत्रिणौ ॥ २३० ॥
तत्र त्रिवत्सरौ व्यक्तमत्सरौ तौ परस्परम् ।
संग्रामव्यसनव्यग्रावबधील्लुब्धकव्रजः ॥ २३१ ॥
ततो ऽन्यतो वने कापि मृगावभवतामुभौ ।
तथैव प्रथितद्वेषसमरौ शबरो ऽवधीत् ॥ २३२ ॥
गजपोतावथैकस्मिन्गजयूथे बभूवतुः ।
युध्यमानौ च तौ यूथभ्रष्टौ भिल्लगणो ऽग्रहीत् ॥ १२३ ॥
तौ परम्परया चन्द्रनरेन्द्रालयमीयतुः ।
न्यषिध्येतां मुहुर्बद्धयुद्धावाधोरणैर्बलात् ॥ २३५ ॥
कदाचिदाययौ तत्र केवलालोकभासुरः ।
मुनिः सुदर्शनो नाम जिनदर्शनभास्करः ॥ १३५ ॥
मनोवृत्तीर्वहन्भक्तिगहनाः सह नागरैः ।
वनं ययौ मुनिं नन्तुकामः कामयिता भुवः २३६ ॥
मुनिं नत्वाथ तत्त्वार्थवेदिनं मेदिनीपतिः ।
धर्मोपदेशपीयूषपूरं पातुमुपाविशत् ॥ २३७ ॥

व्याख्यान्ते ऽथ नृपो ऽपृच्छत्केवली च न्यवेदयत् ।
तयोर्वारणयोर्वैरकारणं दूरदारुणम् ॥ २३८ ॥
तच्चरित्रात्तसंवेगो भवोद्वेगेन वेगतः ।
प्रवव्राज स राजन्यः कृत्वा राजानमात्मजम् ॥ २३९ ॥
विरराज स राजर्षिस्तपस्तपनतेजसा ।
ततो ऽनाद्दिवमुदामसंमदामृतदीधिकाम् ॥ २४० ॥
विवर्धिष्णुविरोधोर्मिदुर्धरौ तौ तु सिन्धुरौ ।
आद्यं दुःखरसास्वादकरकं नरकं गतौ ॥ २४१ ॥
तदुद्वृत्तौ च तौ लब्धजन्मानौ पापयोनिषु ।
अनन्तभवसंतप्तात्मानौ संचरतो ऽभितः ॥ २४२ ॥
चन्द्रजीवस्तु स स्तुत्यं भुक्त्वा स्वर्गसुखं चिरम् ।
लब्ध्वा शुद्धमनुष्यत्वं स्वामी सिद्धिश्रियो ऽभवत् ॥२४३॥
अमुं दृष्टान्तमाकर्ण्य मुक्तिसंप्राप्तिकारणम् ।
अहिंसासेवकैर्भाव्यमिच्छद्भिः शिवमात्मनः ॥ २४४ ॥
इति प्राणातिपातविचारे शूरचन्द्रयोः कथा ॥

पयोवाह इवाहिंसावल्लिपल्लवनक्षमः ।
मृषावादविरागस्तु सतां भवदवच्छिदे ॥ २४५ ॥
अणुव्रतं द्वितीयं तद्वाच्यं यत्कापि नानृतम् ।
भूकन्यागोधनन्यासकूटसाक्ष्ये विशेषतः ॥ २४६ ॥
जन्तूनामहितं यत्तन्न वाच्यं सत्यमप्यहो ।
सुधीभिर्वाक्प्रपञ्चेन बोधनीयो ऽत्र पृच्छकः ॥ २४७ ॥
असत्यमपि निश्चित्य वाच्यं धर्महितं वचः ।
न सत्यमपि तत्साम्यमेति पुण्यचयश्रिया ॥ २४८ ॥
ईदृक्सत्यगिरां वक्ता यथा राजपुरीपतिः ।

वैभवं बिभरामास हंसः संश्रूयतां तथा ॥ २४९ ॥
अश्रान्तधर्मरचनः ससत्यवचनव्रतः ।
मासगम्ये वनीरम्ये रत्नशृङ्गाभिधे गिरौ ॥ २५० ॥
पूर्वजैः स्थापिते चैत्ये चैत्रीयात्रोत्सवे नृपः ।
चचालाल्पपरीवारो नन्तुं श्रीऋषभं जिनम् ॥ २५१ ॥
॥ युग्मम् ॥
अर्धवर्त्मनि तं यान्तं चरस्तारतरत्वरः ।
व्यग्रो व्यज्ञपयामास कश्चित्पश्चादुपागतः ॥ २५२ ॥
यात्रार्थं त्वयि निर्याते नरेश दशमे ऽहनि ।
सीमालो ऽर्जुनभूपालः त्वत्पुरीं शत्रुरापतत् ॥ २५३ ॥
निरस्य त्रस्यतः सर्वान्निहत्य विहितायुधान् ।
सभाण्डागारहस्त्यश्वं स राजगृहमग्रहीत् ॥ २५४ ॥
भयातुरं पुरं कृत्स्नमानन्द्याभयदानतः ।
स सिंहासनमासीनः सद्यः स्वाज्ञामदापयत् ॥ २५५ ॥
अन्यालयनिलीनेन श्रीसुमन्त्रेण मन्त्रिणा ।
अतस्त्वयि नियुक्तो ऽहं युक्तं यत्तद्विधीयताम् ॥ २५६ ॥
अथाब्रुवन्भ्रुवः क्षेपात्तं नृपं निकटा भटाः ।
वलामहे महेष्वास त्वत्पुरः कः स्फुरेत्परः ॥ २५७ ॥
तदाप्यकम्पितं दन्तद्युतिपुष्पैरुरो ऽर्चयन् ।
अजातमुखमालिन्यस्तानभाषत भूपतिः ॥ २५८ ॥
संपदो विपदो ऽपि स्युः पूर्वकर्मवशंवदाः ।
मूढा मुदं विषादं वा तत्संपत्तिषु तन्वते ॥ २५९ ॥
नेदानीं भाग्यलभ्याय युक्तं राज्याय धावनम् ।
भाग्यलभ्यं परित्यज्य जिनयात्रामहोत्सवम् ॥ २६० ॥

तद्यात्रामसमाप्यैनं न वले धवलेक्षणाः ।
विघ्नैः प्रारब्धसत्कर्म त्यजतो ऽधमचेष्टितम् ॥ २६१ ॥
इत्युक्त्वा वाहयामास वाहवाहनमध्वनि ।
भूपतिः कम्पितक्रूरपातकादिचमूचयः ॥ २६२ ॥
परिवारजनेनाथ नाथभक्तिवियोगिना ।
स्वस्वमानुषवीक्षार्तिभाजा राजा व्यमुच्यत ॥ २६३ ॥
यथा यथा स तैर्मुक्तो मुदं भेजे तथा तथा ।
त्रुटन्ति यात्राभाग्यस्य भागिनो ऽमी क्रमादिति ॥२६४॥
अथ च्छत्रभृतैकेन युक्तो मुक्तो जनैर्नृपः ।
कामप्यवापदेकाकी मार्गभ्रष्टो महाटवीम् ॥ २६५ ॥
चारुचीरवरेण्याश्वशुभाभरणवीक्षणात् ।
भूरिलोभेन मा भिल्लाः सानन्दाः खेदयन्तु माम् ॥२६६॥
उत्तरीयमिति च्छत्रधरस्य परिधाय सः ।
यात्रैकधीर्दिशो वीक्ष्य प्राचलत्तीर्थदिङ्मुखः ॥ २६७ ॥
॥ युग्मम् ॥

अथैकः पश्यतस्तस्य जातत्रातवरत्वरः ।
एत्यातुरो लतापुञ्जनिकुञ्जमविशन्मृगः ॥ २६८ ॥
किरातः कश्चिदायातस्तमनु स्फारयन्धनुः ।
दृक्पथातीतसारङ्गः क्ष्माभुजङ्गमुवाच तम् ॥ २६९ ॥
अत्र पत्रततिच्छन्ने न पश्यामि पदं वने ।
मद्वक्ष्यं स मृगः कागान्ममेश कृपया दिश ॥ २७० ॥
सत्ये ख्याते मृगवधो ऽन्यथा ख्याते मृषावचः ।
तद्बुद्ध्या विमृतार्थो ऽयमिति ध्यात्वावदन्नृपः ॥ २७१ ॥
भो पृच्छसि स्वरूपं मे मार्गभ्रष्ट इवापतम् ।

व्याधो ऽभ्यधादहो मूढ त्रस्तः क्वागान्मृगो वद ॥२७२॥
नृपः प्राह महाभाग हंस इत्यभिधा मम ।
उच्चैराचष्ट मृगयुर्दिश मार्गं मृगस्य मे ॥ २७३ ॥
जगतीशो जगौ मित्र स्थानं राजपुरी मम ।
भिल्लो ऽभ्यधात्क्षुधा रे ऽन्यत्पृच्छचसे ऽन्यत्प्रजल्पसि॥२७४॥
व्याजहार स राजन्यो मित्राहं क्षत्रियान्वयः ।
अत्युच्चैरूचिवान्व्याधः किं महाबधिरो ऽसि भोः ॥२७५॥
भूपो ऽवददिशसि मे यन्मार्गं यामि तत्पुरम् ।
व्याधो ऽभ्यधत्त बाधिर्यव्याधिर्यः सो ऽस्तु ते चिरम् ॥२७६॥
इत्युक्त्वैणनिराशो ऽयमगाद्व्याधो यथागतम् ।
ययौ पुण्यभराक्रान्तः क्ष्माकान्तस्तु शनैः पुनः ॥२७७॥
मतिमान्यतिमायान्तमेकमग्रे निरीक्ष्य सः ।
नत्वा मार्गं च मुक्त्वा च पुरावत्प्राचलन्नृपः ॥ २७८ ॥
कृतान्तस्येव दृक्पातौ ततः कोपारुणौ पुरः ।
एत्य भिल्लावुभौ भीमभृकुटी भूपमूचतुः ॥ २७९ ॥
चिरात्पल्लीपतिः शूरश्चौर्यबुद्ध्याद्य निःसृतः ।
दूरादस्मिन्वने मुण्डं पाषण्डिनमलोकत ॥ २८० ॥
जानन्नशकुनं तं स तद्वधायोद्यतायुधौ ।
आवां प्रेष्यौ द्रुतं प्रेषीदृष्टः कापि स कथ्यताम् ॥ २८१ ॥
दध्यौ राजा मयि व्याजवाचि वा मौनभाजि वा ।
सरलेन पथा यान्तौ कृतान्तौ तन्मुनेरिमौ ॥ २८२ ॥
संप्रत्यसत्यमप्युक्तं सत्यादप्युरुपुण्यकृत् ।
इति शब्दच्छलात्सत्यमसत्यमयमभ्यधात् ॥ २८३ ॥
वामेन याति दुःखाध्वजुषामशकुनाय सः ।

लभ्यो युवाभ्यां न यथा तथाद्भुतगतिर्यतिः ॥ २८४ ॥
मार्गे तद्वचसा तस्मिंस्तौ मुधा पर्यधावताम् ।
असद्गुरूपदेशेन संयमस्येव वर्त्मनि ॥ २८५ ॥
तादृग्वागमृतासेकवर्धिष्णुसुकृतद्रुमः ।
यशःप्रसूनैः सुरभिस्तथैव पथि सो ऽचलत् ॥ २८६ ॥
प्रसूनपातसुरभीभूतभूतलमण्डलम् ।
शयनाय निशारम्भे सारं भेजे स भूरुहम् ॥ २८७ ॥
तृतीये ऽह्नि पतिष्यामः संघे तस्मिन्धनाम्बुधौ ।
दारिद्र्यभारमुन्मुच्य तरिष्यामो धनोर्मिषु ॥ २८८ ॥
प्राक्पात एव हन्तव्या हन्त केचिज्जनाः पुनः ।
भीवश्यस्त्रस्यति यथा त्राता तुच्छपरिच्छदः ॥ २८९ ॥
इत्यदूरे लतागुल्मे बहूनां बलशालिनाम् ।
वचः कर्णचरीकृत्य श्रुत्वा सो ऽचिन्तयन्नृपः ॥ २९० ॥
॥ त्रिभिर्विशेषकम् ॥
केचिन्मलिम्लुचाः काममिह विश्राममागताः ।
साधुसंघातघाताय दुर्जने दुर्गुणा इव ॥ २९१ ॥
दूरादेभिः स्फुटं लुण्ट्यः संघो धर्मरुचिः क्वचित् ।
एकाकिना मया शक्यः केनोपायेन रक्षितुम् ॥ २९२ ॥
इति चिन्तामसौ कुर्वन्निद्रया दूरितस्तदा ।
दीपदीप्तदिशो ऽपश्यद्वीरान्कानप्युदायुधान् ॥ २९३ ॥
को ऽप्यसौ तस्करपुमानित्युत्थाप्य क्रुधा स तैः ।
मूर्त्यालोकान्महात्मायं कोऽपीत्युद्भाव्य भाषितः ॥ २९४ ॥
चौराः केचित्क्वचिद्दृष्टा वदन्तो वा श्रुतास्त्वया ।
दिष्ट्या हि हेरकेणेह पथि संघजिघांसवः ॥ २९५ ॥

योजनैर्दशभिः स्थानादितो ऽस्ति श्रीपुरं पुरम् ।
गाधिस्तस्याधिपो जैनस्तान्हन्तुं प्रजिघाय नः ॥ २९६ ॥
तदाशु दिश जानासि यदि येन निहत्य तान् ।
यशो लभामहे संघरक्षया सुकृतानि च ॥ २९७ ॥
अथ दध्यौ धराधीशः सत्योक्तिस्तान्दिशामि चेत् ।
समालिङ्गति सर्वाङ्गं तन्मां तद्वधपातकम् ॥ २९८ ॥
यदि तान्न दिशाम्याशु तदैतैरनिपातितैः ।
भवन्ति मम ते संघघातपातकदायिनः ॥ २९९ ॥
तत्किमत्र करोमीति ध्यानादुत्पन्नधीः सुधीः ।
तान्बभाषे भटानत्र दृष्टा दृष्ट्या मया न ते ॥ ३०० ॥
तद्विलोकाय युष्माकं युक्तं नेह विलम्बितुम् ।
यत्रास्ति संघस्तत्राशु गम्यतां त्रातुमातुरैः ॥ ३०१ ॥
ते ऽपि तत्र गमिष्यन्ति याथ तत्पथमं यदि ।
ततश्च कीर्तिर्धर्मश्च भवतां भवतो ऽद्भुतौ ॥ ३०२ ॥
इत्युक्त्याक्षचमत्कारास्ते संघाभिमुखं ययुः ।
चौरास्तु गुल्मान्निर्गत्य प्रणिपत्य तमब्रुवन् ॥ ३०३ ॥
गुल्मे सन्तो वदन्तो ऽत्र ज्ञाता एव त्वया वयम् ।
न ख्याता नृपवीरेभ्यः पिता प्राणप्रदो ऽसि नः ॥३०४॥
धर्मदुग्धार्णवज्योत्स्नां पापध्वान्तरविच्छविम् ।
स्तुमो धियं तव यया वयं संघश्च रक्षिताः ॥ ३०५ ॥
इत्युक्त्वा ते वलित्वागुः प्रगे सो ऽप्यचलत्पुरः ।
अन्वेत्य सत्वरैरश्ववारैः कैश्चिदभाष्यत ॥ ३०६ ॥
दण्डितास्मत्पतेस्तस्यन्हंसो राजपुरीश्वरः ।
दृष्टः कापीह तं हत्वा तरामो वैरवारिधिम् ॥ ३०७ ॥

स्वजीविताय कः पापं वदत्यनृतमित्यथ ।
अहं स हंस इत्युक्त्वा धृतास्त्रो ऽसौ पुरः स्थितः ॥ ३०८ ॥
सस्मार च नमस्कारान्राजा धर्मे धियं दधत् ।
दुन्दुभिः खे च दध्वान पुष्पवृष्टिः पपात च ॥ ३०९ ॥
सत्यवादिञ्जय जयेत्यानन्दविशदं वदन् ।
सम्यग्दृक्तद्वनाध्यक्षः तस्य यक्षः पुरो ऽभवत् ॥ ३१० ॥
प्रीतस्त्वत्सत्यवादेन त्रासितः त्वदरिव्रजः ।
एतद्वनपतिर्यक्षस्त्र्यक्षाख्यस्त्वां वदाम्यदः ॥ ३११ ॥
तीर्थे त्वदीप्सिते यात्रा यत्र स्यादद्य तद्दिनम् ।
तद्यामो जिनमानन्तुं मद्विमानमलंकुरु ॥ ३१२ ॥
इत्यस्योक्त्या विमानं तदयमारूढवान्मुदा ।
स्वं चालोकत तत्कालं दिव्यमण्डनमण्डितम् ॥ ३१३ ॥
दिव्यगायनवर्गेण गीयमानयशोगुणः ।
गुह्यकार्धासनासीनः स जैनं धाम तद्ययौ ॥ ३१४ ॥
दिव्यद्रुकुसुमैर्दिव्यगन्धद्रव्यरसैरसौ ।
दिव्यमेक्षणकैश्चात्र जिनयात्रां समाप्तवान् ॥ ३१५ ॥
स्वस्थाने च गतः शत्रुं यक्षबद्धं विमुच्य सः ।
पुरीं प्रमोदयामास नृपासनगतो नृपः ॥ ३१६ ॥
भोगैरद्भूतलप्राप्यैः प्रीणनीयो ऽयमन्वहम् ।
अन्तरायनिकायश्च रक्ष्यो ऽस्मिन्पुण्यकारिणि ॥ ३१७ ॥
इत्युक्त्वा प्रीतिचतुरश्चतुरः सुरकिंकरान् ।
यक्षः श्रीहंसमापृच्छ्य द्यां ययौ द्युतिदीप्तदिक् ॥ ३१८ ॥
॥ युग्मम् ॥
अहो सत्योक्तिमाहात्म्यमिहापि प्राप यन्मुदम् ।

परलोके तु स स्वर्गसंपदं हंसभूपतिः ॥ ३१९ ॥
मृषावादविषाटोपक्लेशलोपसुधारसे ।
सत्यवादे रता नित्यं भवन्तस्तद्भवन्तु भोः ॥ ३२० ॥

इति मृषावादविचारे हंसनृपकथा ॥

अस्तेयममृषावादपादपच्छायवत्पुनः ।
क्लेशनाशाय सेवध्वमध्वगा भववर्त्मनः ॥ ३२१ ॥
आहितं स्थापितं नष्टं विस्मृतं पतितं स्थितम् ।
नाददीतास्वकीयं स्वमित्यस्तेयमणुव्रतम् ॥ ३२२ ॥
अस्तेयव्रतदुग्धाब्धिमध्यस्नानकृतां सताम् ।
न स्याद्भवदवज्वालाकलापस्तापहेतवे ॥ ३२३ ॥
अदत्तादानविरतिव्रतनिश्चयनिश्चलः ।
लक्ष्मीपुञ्ज इवाप्नोति सर्वः सर्वमचिन्तितम् ॥ ३२४ ॥

तथाह्यवितथारम्भधर्मिधर्मोर्मिनिर्मलम् ।
श्रीहस्तिपुरमस्ति श्रीनिरस्तान्यपुरं पुरम् ॥ ३२५ ॥
तस्मिन्नुदारदारिद्र्यमुद्रासर्वेश्वरो ऽभवत् ।
सुधर्म इति सद्धर्मरसैकमणिको वणिक् ॥ ३२६ ॥
कैश्चिद्वराटकैः किंचित्क्रीत्वा विक्रीय चान्वहम् ।
कांश्चिद्वराटकाल्लाँभे ऽर्जयन्कालं निनाय सः ॥ ३२७ ॥
सधर्मचारिणी तस्य धन्याख्या धर्मचारिणी ।
अभूत्कार्योच्चये चित्ताधिपचित्तानुवर्तिनी ॥ ३२८ ॥
पत्रे पत्रे स्फुरन्तीभिर्विचित्राभिर्विभूतिभिः ।
चार्वङ्गीभिः कृतैर्गीतनृत्तवाद्यैः प्रसन्नया ॥ ३२९ ॥
रत्नाब्जमध्यवर्तिन्या दृग्भाग्यावधिरूपया ।
अगण्यपुण्यसंप्राप्यसर्वशृङ्गारसारया ॥ ३३० ॥

श्रीदेव्या जिनमर्चन्त्या हृद्यं पद्महृदं हृदम् ।
स्वप्ने ऽपश्यन्निशान्ते सा नृत्यद्धंसामलोर्मिकम् ॥ ३३१॥
त्रिभिर्विशेषकम् ॥

स्वप्नं प्रेक्ष्य प्रमोदेन यान्भेजे पुलकाङ्कुरान् ।
तैरेवाङ्गीकृताङ्गीयं प्रबुद्धाख्यत्प्रियं प्रति ॥ ३३२ ॥
सो ऽपि व्याख्यत्प्रिये पुत्रः श्रेयाञ्श्रीमान्महागुणः ।
स्वच्छाशयो जिनाधीशभक्तस्तव भविष्यति ॥ ३३३ ॥
प्रीताथ धन्यंमन्यासौ धन्यार्हद्ध्यानमानसा ।
दूरविद्राणनिद्रा तं निशाशेषमवाहयत् ॥ ३३४ ॥
तस्मिन्नह्नि विनिहुत्य कर्म लाभान्तरायिकम् ।
क्रयविक्रयतो लाभं स लेभे द्विगुणं वणिक् ॥ ३३५ ॥
इति व्यवहृतिक्रीडावर्धमानधनः क्रमात् ।
सुधर्मः सुखलेशानां प्रथमातिथितां गतः ॥ ३३६ ॥
धन्यायास्तनुकान्त्यैव गर्भो ऽथ बुबुधे शुभः ।
शारदाम्भोदलेखाया गर्भस्थ इव भानुमान् ॥ ३३७ ॥
सीमन्तोन्नयने वित्तचिन्तार्तः सो ऽन्यदा वणिक् ।
पादाङ्गुष्ठेन गेहान्तर्विलक्षो व्यलिखन्महीम् ॥ ३३८ ॥
तदुल्लेखनखातायां स च क्ष्मायां व्यलोकयत् ।
कान्तकल्याणमाणिक्यमण्डलैराविलं बिलम् ॥ ३३९ ॥
विस्मयानन्दसंदर्भी मणिरुक्मप्रमयं वणिक् ।
अगारं कारयामास वासवावासवत्ततः ॥ ३४० ॥
रूपलास्ये ऽप्सरस्तुल्यो दास्ये विनयवामनः ।
तस्य सद्मनि दासीनां संघः संघट्टितस्ततः ॥ ३४१ ॥
तस्मिन्दातरि दातव्यमणिचारुत्वदर्शनात् ।

दातारो ऽप्यर्थितां जग्मुः सीमन्तोन्नयनोत्सवे ॥ ३४२ ॥
कूपं जलेष्विव बिलं स्वर्णरत्नगणेषु तत् ।
कृष्यमाणेष्वपि वणिक् पूर्णमेव न्यरूपयत् ॥ ३४३ ॥
तद्भूतिमुदिता चिन्तासमकालासदोहदा ।
सुमुहूर्ते ऽद्भुतं धन्या सुखेन सुषुवे सुतम् ॥ ३४४ ॥
दानाधिक्येन गीतादिचारुत्वेन स च व्यधात् ।
सुतजन्मोत्सवे श्रेष्ठी विस्मयं द्युसदामपि ॥ ३४५ ॥
लक्ष्मीपुञ्जमिवालोक्य तं सुतं कान्तिभिः पिता ।
महेन महता लक्ष्मीपुञ्जनामानमातनोत् ॥ ३४६ ॥
कालकालोचितैर्भावैरार्चितोपस्थितैः शिशुः ।
अजातचिन्तादुःखो ऽयं कामं कामवैधत ॥ ३४७ ॥
अस्पृशन्क्लेशकणमप्यरोदीन्न कदाप्यसौ ।
नित्यानन्दस्मितमुखः पित्रोः सुखकरो ऽभवत् ॥ ३४८ ॥
कलाः प्रतिदिनं गृह्णन्कुतो ऽप्युल्लसिताः सिताः ।
रुचिस्तोमतनुः सोम इवावर्धत दक्षियः ॥ ३४९ ॥
तत्तद्दिक्तत्वमङ्गश्रीकलागुणगणोदयैः ।
कन्यास्तमागमन्नष्टौ दिग्भ्यो ऽष्टभ्यः स्वयंवराः ॥ ३५०॥
नित्यं रत्नालये लीनो दर्शनस्पर्शनद्विषोः ।
नाबुध्यत स्वरूपं स तमिस्रतपनत्विषोः ॥ ३५१ ॥
यद्यत्प्रीतिकरं सर्वं स तत्तदुपभुक्तवान् ।
यद्यदुःखकरं तत्तद्बुबुधे सत्तयापि न ॥ ३५२ ॥
प्रियाभिरेव संवृत्तनृत्तगीतादिसंमदः ।
कालं यान्तं स नाबोधि पञ्चोत्तरसुरो यथा ॥ ३५३ ॥
अचिन्तिताः कुतो भोगाः स्युर्ममेति कदाप्यसौ ।

अङ्के श्रमुप्तः कान्तानां सुखी यावदचिन्तयत् ॥ ३५४ ॥
तावद्दिव्यतनुर्दिव्यचीराभरणभासुरः ।
कश्चित्पुमान्पुरः स्पष्टीभूय बद्धाञ्जलिर्जगौ ॥ ३५५ ॥
॥ युग्मम् ॥

धन्यकुक्षिसरोहंस गृहं सर्वश्रियां बृहत् ।
विद्यते विपदां दूरं मणिपूरं महापुरम् ॥ ३५६ ॥
तत्रासीत्सार्थपः पुण्यधरो गुणधराभिधः ।
सो ऽन्यदा विशदाख्यस्य मुनेः पार्श्वे वने ऽगमत् ॥३५७॥
जन्तोः स्याद्दुःखदं द्रव्यहरणं मरणादपि ।
अथ सुकृतिभिः कार्यं चौर्यचर्याविमोचनम् ॥ ३५८ ॥
एवमाकर्ण्य पुण्यात्मा स विद्याधरसंसदि ।
अदत्तादानविरतिं व्यधात्तत्र तदा मुदा ॥ ३५९ ॥
पुरं प्राप्तः कदाप्येष विशेषधनकाङ्क्षया ।
देशान्तराय कस्मैचिद्भूरिभाण्डभरो ऽचलत् ॥ ३६० ॥
स्वदेशान्ते महाटव्यामस्मिन्सार्थे विशत्यथ ।
अश्वारूढः क्वचित्प्रौढपददण्डे व्रजन्पुरः ॥ ३६१ ॥
दृष्ट्वासौ पतितां स्वर्णलक्षमूल्यां मणिस्रजम् ।
व्रतभङ्गभयात्तस्यां न मुहुर्दृष्टिमप्यदात् ॥ ३६२ ॥
युग्मम् ॥

किं सार्थो याति दूरे यच्छ्रूयते तुमुलो ऽपि न ।
इत्यसौ जातहृद्दाहस्ततो वाहमवाहयत् ॥ ३६३ ॥
मार्गे हरिखुरोत्खाते स्वर्णपूर्णं स भूतले ।
ताम्रकुम्भं निभाल्याशु व्रतभङ्गभयाद्ययौ ॥ ३६४ ॥
सहसाश्वे मृते पापभीरुः सो ऽचिन्तयत्तदा ।

मम वाहयतो वाहः प्रमीतो ऽयं हतो ऽस्मि हा ॥ ३६५ ॥
य एनं जीवयत्यश्वं ददे तस्मै निजं धनम् ।
इति ध्यायंश्चचालांघ्रिचारेणैष त्वराभरात् ॥ ३६६ ॥
तृषातुरस्तरौ बद्धां वीक्ष्य वारिभृतां दृतिम् ।
कस्येयं दृतिरित्युच्चैरुच्चचार मुहुर्मुहुः ॥ ३६७ ॥
दूरे गतस्य वैद्यस्य विभोर्वीक्षितुमौषधम् ।
नैवाहं ज्ञापयिष्यामि पिब तन्निर्मलं जलम् ॥ ३६८ ॥
इत्यसौ शाखिशाखाग्रपञ्जरस्थशुकाननात् ।
आकर्ण्य कर्णौ पाणिभ्यां प्रच्छाद्य शुकमभ्यधात् ॥३६९॥
युग्मम् ॥

तृष्णा गृह्णातु मे प्राणांस्तेनादत्तं पुनः पयः ।
न पिबामि महापापमदत्तादानमुच्यते ॥ ३७० ॥

शाखाग्रादुपसंहृत्य शुकरूपं सपञ्जरम् ।
उत्तीर्याग्रेचरः को ऽपि नरः स्थित्वा मुदावदत् ॥ ३७१ ॥
वैताढ्ये विपुलापुर्यां सूर्याख्यः खेचरो ऽस्म्यहम् ।
त्वत्पुरे विशदं तातं मुनिं नन्तुं वने ऽगमम् ॥ ३७२ ॥
ममासंख्यधनस्यापि परद्रव्ये हृते सुखम् ।
अतो मामयमुद्दिश्यादिदेशास्तेयवर्णनाम् ॥ ३७३ ॥
अदत्तादानविरतिस्त्वया चक्रे तु तत्पुरः ।
चिरं चिन्तितवानस्मि तदा सस्मयविस्मयः ॥ ३७४ ॥
दूरं देशं विशन्त्येते सार्थपाः श्रीलवार्थिनः ।
तत्किं दृष्टं सुखेनान्यद्रव्यं नैव हरन्त्यमी ॥ ३७५ ॥
तदवश्यं करिष्ये ऽस्य सार्थपस्य परीक्षणम् ।
अदृश्येन मया प्रापि प्रस्तावस्त्वत्र पश्यता ॥ ३७६ ॥

नृरत्न रत्नमालां ते निधिं चाहमदर्शयम् ।
न जितस्त्वं तु लोभेन वस्तूनां महतामपि ॥ ३७७ ॥
कृत्वा वाहं मृतं पादगत्या तृष्णातुरस्य ते ।
मयाम्भो दर्शितं शीतं कीरप्रेरणयान्वितम् ॥ ३७८ ॥
कार्ये वर्यतमे मौढे प्राणरक्षणलक्षणे ।
लोभेन न पराभूतस्त्वमल्पस्यापि वस्तुनः ॥ ३७९ ॥
तमित्युक्त्वा निजान्सूर्यः खेचरानयमाह्वयत् ।
तत्रासीरन्नदृश्यास्ते बभूवुः प्रकटाः पुरः ॥ ३८० ॥
एभिः सूर्यः समानीय मणिमालां निधिं हयम् ।
अन्यच्च प्रचुरं द्रव्यं सार्थपस्य पुरोऽमुचत् ॥ ३८१ ॥
सधनाश्यं तथा सार्थे सार्थेशविरहार्दिते ।
स निनाय जनप्रीतिकरं गुणधरं क्षणात् ॥ ३८२ ॥
किमेतद्धनमित्युक्तः सार्थपेनाथ सोऽवदत् ।
किंचिन्मदीयं किंचिच्च कौतुकाज्जनतो हृतम् ॥ ३८३ ॥
चौर्यं तातस्य राजर्षेर्बोधैर्मुक्तं न यन्मया ।
तत्त्वदव्रतावलोकेन स्वयमेवाद्य तत्यजे ॥ ३८४ ॥
इत्थं त्वं मे गुरुस्तत्ते ऽर्चायामेतद्धनं कृतम् ।
इति जल्पपरं विद्याधरं गुणधरोऽभ्यधात् ॥ ३८५ ॥
धनं यस्य हृतं यत्तत्तस्मै देहि तमिच्छदे ।
इत्युक्तस्तत्तथा वाक्यं सूर्यश्चक्रे स्वसेवकैः ॥ ३८६ ॥
गृहाणेदं धनं मे त्वमिति जल्पंश्च खेचरः ।
अभाणि सार्थपेन स्वं मुक्त्वा सर्वस्वमग्रतः ॥ ३८७ ॥
स्वीकुरु त्वमिदं वित्तं मन्मयेति प्रतिश्रुतम् ।
यो मे ऽश्वं जीवयत्येनं तस्मै सर्वं ददे धनम् ॥ ३८८ ॥

किंच पात्रं न दानार्हमहं तत्ते धनं ध्रुवम् ।
न गृह्णामीतिं जल्पन्तं सार्थपं खेचरो जगौ ॥ ३८९ ॥
॥ त्रिभिर्विशेषकम् ॥
अहं त्वदुपदेशस्य नेहानृण्यं भवे भजे ।
तत्स्वमायाकृते कार्ये कथं गृह्णामि ते धनम् ॥ ३९० ॥
मद्धनं त्वं न गृह्णासि नाददे ऽहं तु ते धनम् ।
ततः सार्थेश कः स्वामी श्रियामासां भविष्यति ॥ ३९१ ॥
सो ऽप्याह धर्म एवैकः प्रभुस्त्रिभुवनश्रियाम् ।
यस्मै यस्मै प्रदत्ते स तस्य तस्य भवन्ति ताः । ३९२ ॥
तदेहि यावः सर्वत्र धर्मे सर्वज्ञदर्शिते ।
विश्वस्वामिनि विन्यस्य कृतार्थां कुर्वहे श्रियम् ॥ ३९३ ॥
वचस्यङ्गीकृते तेन खेचरेण प्रमोदिना ।
ददतुर्मुदितौ वित्तं सप्तक्षेत्र्यामुभौ शुभौ ॥ ३९४ ॥
ततो गुणधरः क्षिप्त्वा भवं धर्मैः सुखादसौ ।
लक्ष्मीपुञ्ज प्रभापुञ्ज पुण्यपुञ्जो भवानभूत् ॥ ३९५ ॥
तच्छिक्षयैव सूर्यो ऽपि त्यक्तस्तेयो धनं ददत् ।
पूर्णायुः पुण्यमानेन जातो ऽस्मि व्यन्तराधिपः ॥ ३९६ ॥
त्वद्भाग्यदेवताशक्तिनुन्नो गर्भात्प्रभृत्यपि ।
अपूरयं रयात्ते ऽहं कालकालोचितं हितम् ॥ ३९७ ॥
इति व्यन्तरवागन्ते मूर्छामाप्य प्रबोधभाक् ।
संजातजातिस्मरणो लक्ष्मीपुञ्जः पदं मुदाम् ॥ ३९८ ॥
विशुद्धं धर्ममाराध्य लब्ध्वा देवत्वमच्युते ।
स्तुत्यं वितत्य मर्त्यत्वं श्रेयःश्रियमशिश्रियत् ॥ ३९९ ॥
॥ युग्मम् ॥

इत्याप्तसर्वलक्ष्मीकलक्ष्मीपुञ्जनिदर्शनात् ।
जनेन भाव्यमस्तेयव्रतशस्तेन सर्वदा ॥ ४०० ॥
इत्यदत्तादानव्रतविचारे लक्ष्मीपुञ्जकथा ॥
अस्तेयव्रतदीपस्य प्रकाशोल्लासवत्पुनः ।
मुक्तिवर्त्मनि पान्थानां सतां ब्रह्मव्रतं मतम् ॥ ४०१ ॥
संतोषः स्वेषु दारेषु त्यागो वा परयोषिताम् ।
प्रथयन्ति गृहस्थानां चतुर्थं तदणुव्रतम् ॥ ४०२ ॥
ये ऽन्यदारपरीहारव्रततीव्रतयोद्धुराः ।
भयान्मोहादयो दोषा न तेषु ददते पदम् ॥ ४०३ ॥
अहो ब्रह्मव्रतं मुक्तेः सन्मुखीकारकारणम् ।
गीयते नागिलस्येव विपदामुपदाहकृत् ॥ ४०४ ॥
तथाहि भोजभूजानिभुजाहिपरिरक्षितम् ।
निधानमिव धर्मस्य पुरमस्ति महापुरम् ॥ ४०५ ॥
जिनेन्द्रसेवाहेवाकविवेकविकसन्मनाः ।
तस्मिन्विस्मयकृल्लक्ष्मीर्लक्ष्मणो ऽस्ति महावणिक् ॥४०६॥
अभूदभूषितशुभाप्यर्हद्भक्तिविभूषिता ।
विवेकिनी विनीता च तस्य नन्देति नन्दिनी ॥ ४०७ ॥
सतीशतशिरोमाल्यमियं बाल्यविलङ्घिनी ।
वरावलोकिनं तातं निरातङ्कतयावदत् ॥ ४०८ ॥
निरञ्जनं दशोन्मुक्तं निःस्नेहव्ययमन्वहम् ।
धत्ते विकम्पं दीपं यः परिणेता ममास्तु सः ॥ ४०९ ॥
इति तस्या वचः श्रेष्ठी वरेष्वनुदिनं दिशन् ।
अस्याः काभिग्रहः पूर्य इत्यार्तश्चिन्तयाजनि ॥ ४१० ॥
नागिलः कान्तकायस्तु कितवो लङ्घनैर्धनैः ।

तुष्टं यक्षं विरूपाक्षं वने ऽभ्यर्थयताग्रहात् ॥ ४११ ॥
नन्दयोक्तो यथा दीपस्त्वं तथा भव मद्गृहे ।
इति यक्षेण दत्ते ऽर्थे स ययौ श्रेष्ठिनो ऽन्तिके ॥ ४१२ ॥
कितवाय दरिद्राय नन्दिनीं स्वां ददासि मे ।
अभिग्रहमहं तस्या हन्त पूरयितुं क्षमः ॥ ४१३ ॥
यादृक्तादृग्भव त्वं भोः पूरिताभिग्रहो यदि ।
तत्ते दास्यामहं पुत्रीं गङ्गामिव पयोधये ॥ ४१४ ॥
तर्हि मद्गृहमागत्य दीपस्तादृग्विलोक्यताम् ।
इत्युक्ते तेन स श्रेष्ठी सकुटुम्बस्तथाकरोत् ॥ ४१५ ॥
दारिद्र्योपद्रुते ऽप्यस्य गृहे तादृशमेव सः ।
दीपं पश्यन्मुतोद्वाहसोत्साहः प्राप संमदम् ॥ ४१६ ॥
तादृग्दीपसमालोककौतुकोत्तानलोचनः ।
जनो ऽनिष्ट नन्दा तु निरानन्दाभवत्तदा ॥ ४१७ ॥
विभवैर्भवनं तस्य विभूष्याथ वणिग्वरः ।
उत्सवोत्संगितपुरः पुत्रीं तेन व्यवाहयत् ॥ ४१८ ॥
परिणीयापि तां तन्वीं विवेकामृतदीर्घिकाम् ।
द्यूताज्न्यवर्तत न स व्यसनं कस्य सुत्यजम् ॥ ४१९ ॥
अहारयद्यं वित्तं द्यूतकारो यथा यथा ।
अपूरयत स श्रेष्ठी पुत्रीप्रेम्णा तथा तथा ॥ ४२० ॥
हारयित्वापि वित्तानि रंत्वापि बहिरङ्गनाः ।
गृहं प्राप्तः स सानन्दं नन्दया पर्यचर्यत ॥ ४२१ ॥
अचिन्तयदिदं चैष नाहमस्या ध्रुवं प्रियः ।
यदित्थमपराधे ऽपि मयि रोषं तनोति न ॥ ४२२ ॥
सो ऽन्यदा हारिते त्रस्तः कितवेभ्यो वने ऽविशत् ।

दृष्ट्वात्र ज्ञानिनं साधुं पप्रच्छ रचिताञ्जलिः ॥ ४२३ ॥
किं सा शुभस्वभावापि धत्ते चित्ते न मां प्रिया ।
इति पृष्टे ऽस्य योग्यत्वं ज्ञात्वा ज्ञानी मुनिर्जगौ ॥ ४२४॥
सा विवेकवती कान्तमपीच्छन्ती विवेकिनम् ।
विवेकं तद्गुणं व्याख्यात्तादृग्दीपापदेशतः ॥ ४२५ ॥
निगद्यते ऽञ्जनं माया नवतत्त्वस्थितिर्दशा ।
स्नेहव्ययः प्रेमभङ्गः कम्पः सम्यक्त्वखडनम् ॥ ४२६ ॥
तैर्विमुक्तं विवेकं यो धत्ते ऽस्तु स पतिर्मम ।
इति दीपच्छलादाख्यत्पृष्टा नार्थं तु केनचित् ॥४२७॥
निरञ्जनं दशोन्मुक्तमस्नेहव्ययमन्वहम् ।
विकम्पं दीपमेव त्वं कृतवानद्भुतं गृहे ॥ ४२८ ॥
तादृक्षं वीक्ष्य सा दीपं सती भग्नोत्तरा सती ।
ह्रिया मौनवती व्यूहे भवताप्यविवेकिना ॥ ४२९ ॥
सतीति परिणेतुस्ते हृष्टिस्थाने न हृष्यति ।
अविवेकीति सा चित्ते न धत्ते त्वां विवेकिनी ॥४३०॥
साध्वादिष्टं विवेकं स स्वीचक्रे ऽथ विशेषतः ।
व्रतं स्वदारसंतोषं जगृहे स्नेहपुष्टिदम् ॥ ४३१ ॥
मुदा गत्वा गृहे स्नात्वा पूजयित्वा जिनाधिपम् ।
दत्त्वा दानं सुपात्रेभ्यो बुभुजे ऽसौ यथाविधि ॥ ४३२ ॥
विवेकिनमिवालोक्य मुदा कान्तमथाक्दत् ।
नन्दा मन्दाकिनीनीरशुचिना वचनेन तम् ॥ ४३३ ॥
जिनेन्दुसेवया शीलसलिलव्यक्तसिक्तया ।
अद्य मे फलितं नाथ यद्दृष्टो ऽसि विवेकवान् ॥ ४३४ ॥
नागिलो ऽपि जगौ तन्वि यन्मुक्ता व्यसन मया ।

विवेकः स्वीकृतस्तत्र गुर्वादेशो ऽस्ति कारणम् ॥ ४३५ ॥
ततः प्रभृति सद्धर्मशीलप्रेमगुणैर्दृढम् ।
त्रिधा स्यूते तयोश्चित्ते भेजतुर्भृशमेकताम् ॥ ४३६ ॥
अनन्यरूपयोर्धर्मध्यानाधीनधियोस्तयोः ।
आधिमुक्तहृदोः कामं कायकान्तिरवर्धत ॥ ४३७ ॥
कदाचिदुत्सवाकृष्टा नन्दा पितृगृहे ययौ ।
सुप्तः कुट्टिमकोट्यग्रे नागिलश्चन्द्रदत्तदृक् ॥ ४३८ ॥
व्योम्नि विद्याधरी काऽपि यान्ती प्रियवियोगिनी ।
तद्रूपमोहतः कामरोहतः प्राप्य तं जगौ ॥ ४३९ ॥
कामानलशिखातप्ता प्राप्ताऽस्मि शरणं तव ।
स्वामिन्नलाँवण्यपाथोधे मां मज्जय भुजोर्मिषु ॥ ४४० ॥
प्रियाऽस्मि हंसराजस्य विद्याधरशिरोमणेः ।
ततश्चित्तं त्वयाकर्षि गीतेनेव कवित्वतः ॥ ४४१ ॥
चण्डस्य खेचरपतेः सुता लीलावतीत्यहम् ।
त्वयाहृता भविष्यामि सत्यं लीलावती पुनः ॥ ४४२ ॥
नाङ्गीकरोषि चेत्तन्मां मृत्युरङ्गीकरिष्यति ।
तद्भविष्यसि धर्मज्ञ किं न स्त्रीघातपातकी ॥ ४४३ ॥
रहस्यं वेद्मि विद्यानां कामितुश्च पितुश्च तत् ।
तौ जित्वा तेन तत्स्वाम्यं तव दास्यामि मां भज ॥४४४॥
मान्यथा मद्वचः कार्षीरित्युक्त्वासौ कुरङ्गदृक् ।
कम्पमाना क्रमौ तस्य मूर्ध्ना स्पष्टुमधावत ॥ ४४५ ॥
मा भूत्परस्त्रीस्पर्शो ऽपि ममेत्याशु स नागिलः ।
ततश्चकर्ष चरणौ दह्यमानाविवाग्निना ॥ ४४६ ॥
क्रुद्धाथ व्योम्नि तप्तायोगोलं लोलं विकृत्य सा ।

भज मामन्यथानेन भस्मयामीत्युवाच तम् ॥ ४४७ ॥
अलुभ्यतो लोभवाक्याद्भीतिस्थानादबिभ्यतः ।
मूत्कारी स ज्वलन्गोलस्तस्याथो मौलये ऽपतत ॥४४८॥
दग्धो दग्धो ऽयमित्यन्तर्ध्यायन्त्यां खेचरस्त्रियाम् ।
स सस्मार नमस्कारं विलीनश्च विपच्चयः ॥ ४४९ ॥
अथ त्रापद्दृश्यत्वं त्रपाटोपेन खेचरी ।
नागिलो ऽभून्नमस्कारप्रभावोत्पुलकः पुनः ॥ ४५० ॥
न रतिः पितृगेहे ऽपि त्वां विनेत्यादिवादिनी ।
चेटिकोद्घाटितद्वारा तदा नन्दा तमाययौ ॥ ४५१ ॥
आकारेण गिरा गत्या तां नन्दां स विदन्नपि ।
खेचरीविप्लवाशङ्की संकीर्णस्थो ऽवदत्ततः ॥ ४५२ ॥
अरविन्दाक्षि नन्दासि यदि तूर्णं तदेहि माम् ।
अन्यासि यदि तद्धर्मः स्वाम्यस्तु स्खलनं तव ॥ ४५३ ॥
ततः स्थितस्वरूपैव खेचरी सा स्खलद्गतिः ।
तद्वृत्तविस्मयस्तब्धमूर्तिरेवाग्रतः स्थिता ॥ ४५४ ॥
स तत्तत्कपटं वीक्ष्य कपटान्तरशङ्कितः ।
कृतलोचः स्वयं भेजे शीलभङ्गभयाद्व्रतम् ॥ ४५५ ॥
दत्तं शासनदेव्याथ यतिवेषं स धारयन् ।
तत्प्रदीपपुरोभागमागत्येदमभाषत ॥ ४५६ ॥
आराध्य नन्दालोभेन नीतो ऽस्यद्भुतदीपताम् ।
अयि यक्ष विरूपाक्ष कृतकृत्यो ऽस्मि गम्यताम् ॥४५७॥
दीपतो ऽप्यथ भाषाभूत्सेव्यो यावद्भवं भवान् ।
रवेरिव न मे भाभिः स्पर्शदोषः प्रभो भवेत् ॥ ४५८ ॥
अथ तादृग्महाशीलश्रीतया स्फीतविद्यया ।

विद्याधर्या प्रतिपदं क्रियमाणप्रभावनः ॥ ४५९ ॥
तथाविधकथाबोधवर्धमानप्रमोदया ।
व्रतध्यानगलत्पापकन्दया नन्दयान्वितः ॥ ४६० ॥
भानूदये ऽप्यविभ्रष्टभासा दीपेन भासुरः ।
साश्चर्यमेष लोकेनालोक्यमानो गुरुं ययौ ॥ ४६१ ॥
त्रिभिर्विशेषकम् ॥
व्रतं नन्दायुतः प्राप्य विधिवद्गुरुसंगतः ।
विजहार महारण्यारामग्रामपुरादिषु ॥ ४६२ ॥
निशास्वपि प्रदीपस्य तस्योद्योते ततः पठन् ।
ज्ञातज्ञातव्यपूरो ऽयमल्पैरेव दिनैरभूत् ॥ ४६३ ॥
बद्धायुःसंयमात्पूर्वं मृत्वासौ स्नेहवांस्तया ।
हरिवर्षे युगलतां ययौ कल्पतरोस्तले ॥ ४६४ ॥
तद्भूयं भाग्यशेषेण भुक्त्वा भोगोत्सवं दिवः ।
क्षेत्रे महाविदेहाख्ये मर्त्यीभूयाप निर्वृतिम् ॥ ४६५ ॥
अतो नागिलनन्दावदानन्दाद्वैततत्परैः ।
धार्यं तुर्यव्रतं दक्षैर्धर्मवृक्षैकवर्षणम् ॥ ४६६ ॥
इति चतुर्थव्रतविचारे नागिलकथा ॥
ईदृक्चतुर्व्रतीरूपनिरूपणसुदर्पणम् ।
पञ्चमं तु व्रतं धीराः कलयन्त्वतिनिर्मलम् ॥ ४६७ ॥
असंतोषादिदोषाहिमोहहालाहलामृतम् ।
परिग्रहस्य मानं यत् तत्पञ्चमाणुव्रतम् ॥ ४६८ ॥
क्रूरात्मसंसृतिवधूचकितस्य मनीषिणः ।
मुक्तिसीमन्तिनीमेलसंकेतस्थानलक्षणम् ॥ ४६९ ॥
परिग्रहप्रमाणाख्यव्रतकल्पद्रुरद्भुतः ।

निषिध्यमानमप्यर्थं दद्याद्विद्यापतेरिव ॥ ४७० ॥

युग्मम् ॥

श्राद्धाः शृणुत तद्वृत्तमभूद्वृत्तवैभवः ।
धनी विद्यापतिरिति ख्यातः पोतनपत्तने ॥ ४७१ ॥
सर्वज्ञसेवको ऽप्येष निजसद्मश्रियामपि ।
संख्यातिं ज्ञातवान्नैव ज्योतिषी ज्योतिषामिव ॥ ४७२ ॥
तस्याजनिष्ट गृहिणी स्पृहणीयगुणोदया ।
जिनेशशासनाम्भोजभृङ्गी शृङ्गारसुन्दरी ॥ ४७३ ॥
सप्तक्षेत्र्यां वपन्वित्तमनन्तगुणलाभधीः ।
प्रयत्नेन यथाकालं वृषपोषं चकार सः ॥ ४७४ ॥
धनमर्जयतो नित्यमृणं तर्जयतः सताम् ।
धर्मं कल्पयतः कामप्यघमल्पयतः परम् ॥ ४७५ ॥
सुखोर्मिमयमेवोच्चैरह्नां गमयतो गणम् ।
स्वप्ने कापि कदापि स्त्री पुरस्तस्येदमभ्यधात् ॥४७६ ॥

युग्मम् ॥

श्रीरहं त्वद्गुणश्रेणिवशेति त्वां ब्रवीम्यदः ।
कृष्टा दैवेन यास्यामि त्वद्वृहादशमे ऽहनि ॥ ४७७ ॥
अथोन्निद्रं दरिद्रो ऽहं भविष्यामीति दुःखितम् ।
तमुवाच करद्वन्द्वशृङ्गा शृङ्गारसुन्दरी ॥ ४७८ ॥
रवे रथ इव ध्वान्तं तव मालिन्यमानने ।
अश्रुतादृष्टपूर्वं यत्तत्किमद्य विलोक्यते ॥ ४७९ ॥
त्वया कृतास्मि स्नेहेन सुखसर्वस्वभागिनी ।
दुःखभागमदाने ऽद्य किं मां वञ्चयसि प्रभो ॥ ४८० ॥
पत्न्या स्वप्नस्वरूपे ऽथ कथिते ग्रथितस्मिता ।

सा पुनर्भारतीं भेजे विवेकामृतसारणीम् ॥ ४८१ ॥
निर्वाणमार्गसंचारचरणस्खलशृङ्खला ।
हृच्छल्यं श्रीः सतां भोगफलकर्मचिरस्थिरा ॥ ४८२ ॥
मदयेन्मदिरेव श्रीर्यदि सा याति यातु तत् ।
विवेक एक एव त्वां मा मुञ्चन्मदमर्दनः ॥ ४८३ ॥
पात्रदानं फलं लक्ष्म्यास्तद्गृहीतं बहु त्वया ।
फलं संप्रति दौःस्थ्यस्य तपो ग्राह्यं ततो ऽधिकम् ॥४८४॥
मुक्तिमार्गवृतिर्लक्ष्मीर्भाग्यैस्ते भङ्गमेति चेत् ।
तत्किं हर्षपदे नाथ दुःखं भजसि निर्भरम् ॥ ४८५ ॥
गमिष्यति कथं वा श्रीर्दासेरी दशमे ऽहनि ।
स्वायत्तैव सती सप्तक्षेत्र्यामद्यैव रोप्यताम् ॥ ४८६ ॥
परिग्रहप्रमाणाख्यमङ्गीकृत्य व्रतं ततः ।
स्थीयते नीयते चैष कालः संतोषपोषकः ॥ ४८७ ॥
इति प्रियोक्तिभिः प्रीतः प्रातःकृत्यपुरःसरम् ।
सप्तक्षेत्र्यां क्षणादेष निःशेषमवपद्धनम् ॥ ४८८ ॥
ततः स्थापितदेहोपयोगिस्वल्पपरिग्रहः ।
मध्यंदिने जिनाधीशमभ्यर्च्यैदं बभाण सः ॥ ४८९ ॥
शृङ्गारसुन्दरी भार्या शय्यैका वसने उभे ।
एकं पात्रमहर्भोज्यमात्रश्चाहारसंग्रहः ॥ ४९० ॥
एकद्विसंख्यमल्पार्थमन्यदप्यात्महेतुकम् ।
अस्तु मे वस्तु तीर्थेश सेवार्हं त्वस्तु बह्वपि ॥ ४९१ ॥
॥ युग्मम् ॥
परिग्रहं प्रमायेति प्रमोदविशदाशयः ।
स निनाय दिनं धीमान्धर्मध्यानधुरन्धरः ॥ ४९२ ॥

धनं विनार्थिनामास्यं दर्शनीयं प्रगे कथम् ।
नक्तं सुप्ते जने युक्ता देशान्तरगतिस्ततः ॥ ४९३ ॥
इति शृङ्गारसुन्दर्या सममालोच्य सुप्तवान् ।
निशीथे ऽभ्युत्थितश्चायं यावद्देशान्तरोन्मुखः ॥ ४९४ ॥
तावत्तावद्भिरेव श्रीपूरैरापूर्णमालयम् ।
आलोक्य विस्मयस्मेरचित्तश्चित्तभियां जगौ ॥ ४९५ ॥
त्रिभिर्विशेषकम् ॥

दशमे ऽहनि दैवेन कृष्यमाणैव यास्यति ।
नेदानीं दीयमानापि श्रीरियं याति मद्गृहात् ॥ ४९६ ॥
न स्याददानं दानं वा स्थैर्यास्थैर्यकृते श्रियः ।
मुधा कृपणतां मूढा रूढामात्मनि तन्वते ॥ ४९७ ॥
न याति दीयमानापि श्रीश्चेद्दीयत एव तत् ।
तिष्ठत्यदीयमानापि नो चेद्दीयत एव तत् ॥ ४९८ ॥
इति विस्मितयोर्वार्तारसोर्मिप्लुतयोस्तयोः ।
आलिलिङ्ग दिवं पिङ्गः क्षपावल्लिदवो रविः ॥ ४९९ ॥
तथैवाथ श्रियं दत्त्वा कृत्वा कर्म दिनोचितम् ।
सुष्वाप पुण्यपूर्णो ऽयं प्रतिज्ञातपरिग्रहः ॥ ५०० ॥
इत्थमेष नवाहानि हानिहीनां श्रियं ददत् ।
कल्पद्रुमाधिदेवीनामपि श्लाघ्यत्वमागतः ॥ ५०१ ॥
प्राच्यपुण्यपयःपङ्को मुक्तिमार्गस्य दूषकः ।
शोषमेष्यति मे दिष्ट्या श्रीपूरः श्वस्तने दिने ॥ ५०२ ॥
इति प्रीतमना नक्तं सुप्तः स्वप्ने श्रिया रयात् ।
आनन्दसुन्दरदृशा स बभाषे शुभाशयः ॥५०३॥ युग्मम् ॥
तद्बलादुर्बलं दैवं कुर्वद्भिर्गर्वगर्भितैः ।

तादृग्भिर्दानसुकृतैः कृतैवाहं त्वयि स्थिरा ॥ ५०४ ॥
अत्यर्थपुण्यपापानामिहैव फलमश्नुते ।
इति सूक्तं त्वयाकारि मतिसार यथातथम् ॥ ५०५ ॥
कदाचन न मुञ्चामि तद्दृहं सदनं तव ।
यथेच्छं भाग्यभङ्गीभिरुत्संगीकृत मुङ्क्ष्व माम् ॥ ५०६ ॥
विनिद्रः कथयित्वाथ निशीथे स्वप्नसंकथाम् ।
स प्रियाग्रे प्रतिज्ञैकलीलापदमिदं जगौ ॥ ५०७ ॥
श्रीदानव्यसनेनैव भोगमात्रफलेन हा ।
जन्म यास्यति नौ मुक्तिफलेन तपसा विना ॥ ५०८ ॥
कदापि लोभलीलाभिर्लोलितं लोलुभं मनः ।
पञ्चमव्रतपञ्चत्वप्रपञ्चमपि संसृजेत् ॥ ५०९ ॥
पूरितं वित्तपूरेण तत्परित्यज्य मन्दिरम् ।
क्वचिदेशान्तरे यावच्छुटावः श्रीमहाग्रहात् ॥ ५१० ॥
इति निश्चित्य स तया सहागच्छद्बहिर्गृहात् ।
श्रीकेलिकोमलान्नक्तं कमलादिव षट्पदः ॥ ५११ ॥
करण्डमण्डिनीं बिभ्रत्तीर्थेशप्रतिमामसौ ।
स्मरन्पञ्चनमस्कारान्नगरद्वारमास्थितः ॥ ५१२ ॥
मृते शूलादपुत्रे ऽथ शूराख्ये तत्पुरीपतौ ।
मन्त्रिभिः कल्पितो दिव्यहस्ती तत्रापतत्तदा ॥ ५१३ ॥
तं पुण्यकलशाम्भोभिरभिषिच्य प्रियान्वितम् ।
पृष्ठमारोपयामास करेण करिणां वरः ॥ ५१४ ॥
निन्ये महोत्सवेनाथ करीश्वरशिरःस्थितः ।
राजसौधाय हृष्यद्भिरहृष्यन्सचिवैरसौ ॥ ५१५ ॥
श्रीपङ्कान्निःसृतं राज्यमहापङ्कप्रपातिनम् ।

स स्वं मेने ऽम्बुदोन्मुक्तं राहुग्रस्तमिवोडुपम् ॥ ५१६ ॥
भद्रपीठाश्रये तस्मिन्नभिषेकं निषेधति ।
विलक्षे मन्त्रिलक्षे ऽथ दिव्यभूर्दिव्यभारती ॥ ५१७ ॥
अद्यापि विद्यते भूरि कर्मभोगफलं तव ।
तदङ्गीकृत्य राज्यश्रीरुत्संगीकुरु संमदम् ॥ ५१८ ॥
स्वभाग्यदेवतावाचमित्याकर्ण्य स वर्ण्यधीः ।
सिंहासने जिनेशस्य प्रतिमां विन्यवीविशत् ॥ ५१९ ॥
धर्मज्ञैर्मन्त्रिभिः प्रीतैः पादपीठोपवेशनः ।
जिनदास्याभिषेकं स स्वस्मिन्धीमानकारयत् ॥ ५२० ॥
सुधीः संधारयन्मुक्तमात्रं स्वस्मै परिग्रहम् ।
समस्तं जिननामाङ्कं वस्तुचक्रमचीकरत् ॥ ५२१ ॥
नित्यं यात्रोत्सवं तत्र स पवित्रमनाः प्रभोः ।
प्रभूतवित्तव्ययतः कारयामास कृत्यवित् ॥ ५२२ ॥
भूरिव्ययकृते तस्मिन्न गृह्णाति करं जनात् ।
तद्भाग्यदेवतावर्षन्नित्यं रत्नैर्नृपौकसि ॥ ५२३ ॥
धर्माधीनो ऽयमित्येतं जेतुं जातोद्यमा नृपाः ।
जिनाधिष्ठायिभिर्यक्षै रोगशुत्पाद्य नाशिताः ॥ ५२४ ॥
विकटं कटकारम्भं शक्तिस्तम्भं च विद्विषाम् ।
ज्ञात्वाथ हर्षहृद्यात्मा विद्यापतिरचिन्तयत् ॥ ५२५ ॥
अहो ये शक्रविक्रान्तिभाजस्ते ऽप्यरिभूभुजः ।
धर्मप्रभावादुःकीर्तिनिलयं विलयं ययुः ॥ ५२६ ॥
मां धर्मः कलयन्सेवमानमल्पपरिग्रहम् ।
महापरिग्रहाञ्शत्रूञ्जेतुं भेजे सहायताम् ॥ ५२७ ॥
तदहं यद्यधुं सेवे त्यक्ताशेषपरिग्रहः ।

तदन्तरारिभङ्गे ऽपि भवत्ययमुपक्रमी ॥ ५२८ ॥
इति संचिन्त्य शृङ्गारसुन्दरीकुक्षिसंभवम् ।
सुतं शृङ्गारसेनं स्वे पदे विद्यापतिर्न्यधात् ॥ ५२९ ॥
पुरः संयमसूरीणामूरीकृत्य व्रतं स्वयम् ।
कल्याणमयमात्मानं शुद्धं चक्रे तपोग्निना ॥ ५३० ॥
पूरितायुरियाय द्यां विद्यापतियतिस्ततः ।
मर्त्यामर्त्यभवैर्भेजे पञ्चभिः परमं पदम् ॥ ५३१ ॥
तद्विद्यापतिदृष्टान्तविद्यानिश्चलचेतनैः ।
भाव्यं भव्यजनैर्धर्मस्पृहैर्मितपरिग्रहैः ॥ ५३२ ॥

इति परिग्रहप्रमाणव्रतविचारे विद्यापतिकथा ॥

दशदिक्क्लृप्तसंचारे सीमानुल्लङ्घनं पुनः ।
प्रथमं प्रथयन्ते दिग्विरत्याख्यं गुणव्रतम् ॥ ५३३ ॥
पापद्विपदुरुत्थानपातसंवर्तगर्तिका ।
इदं भाति व्रतं धर्मधात्रीशकनकासनम् ॥ ५३४ ॥
उच्चैर्धर्मप्रसूनस्य शाखी दिग्विरतिव्रतम् ।
नृणां यदधिरूढानां न पापश्वापदाद्भयम् ॥ ५३५ ॥
गतौ संकोचयत्येव यः स्वं दिग्विरतिव्रती ।
संसारलङ्घनोत्तालफालारम्भः स सिंहवत् ॥ ५३६ ॥

तथाहि द्रङ्गप्रस्तारेष्वस्ति सर्वगुरुः पुरी ।
वासन्तीति श्रुता चित्रमवक्रगुणपूरिता ॥ ५३७ ॥
कीर्तिपाल इति क्षोणिपालस्तस्यामजायत ।
यत्कीर्तिकन्याकेलीषु वियदङ्गो ऽपि संकटः ॥ ५३८ ॥
रूपश्रीस्पर्शसंलुब्धैरिवाशेषैर्वृतो गुणैः ।
ननन्द नन्दनः श्रीमान्भीमाख्यस्तस्य भूपतेः ॥ ५३९ ॥

तस्मात्पुत्रादपि स्वेभ्यः प्राणेभ्यो ऽप्यतिवल्लभः ।
तत्र मित्रं महीभर्तुः श्रेष्ठीन्दुः सिंह इत्यभूत् ॥ ५४० ॥
जिनभक्तिर्जिनमतज्ञानं तद्धर्मनिर्मितिः ।
इति सारमलङ्कारत्रयं श्रेष्ठ्यधार सः ॥ ५४१ ॥
तदीयवदनन्यस्तनेत्रं वेत्रभृतां वरः ।
कदाप्युदारसदसं तं महीशं व्यजिज्ञपत् ॥ ५४२ ॥
देव दिव्याकृतिर्द्वारि कोऽप्यास्ति नरपुङ्गवः ।
चक्षुर्भवन्मुखाम्भोजे भ्रमरीकर्तुमुत्सुकः ॥ ५४३ ॥
अथैष वेत्रभृद्भूपभ्रूपल्लवकसंज्ञया ।
आशु प्रवेशयामास तं पुमांसं सभाभुवि ॥ ५४४ ॥
कृती कृतनमस्कारः संनिविष्टो ऽथ विष्टरे ।
वचःसुधाभिः स्नपयामास भूवासवश्रवः ॥ ५४५ ॥
जानासि जगतीनाथ विरोधिकाथकृन्महाः ।
श्रीनागचन्द्र इत्यस्ति पुरे नागपुरे नृपः ॥ ५४६ ॥
तस्य प्रियास्ति प्रस्तावव्याच्या सुरवधूक्तिषु ।
मकरध्वजकारैकपञ्जरी रत्नमञ्जरी ॥ ५४७ ॥
कामभूभर्तुरस्तित्वमुच्चैरस्ति तयोः सुता ।
विश्रुता गुणमालेति गुणमालेव देहिनी ॥ ५४८ ॥
तदङ्गसंगता लक्ष्मीः साक्षाल्लक्ष्मीमुपाहसत् ।
स्फुरदम्भोजकुम्भीन्द्रकुम्भद्वन्द्वेन्दुवासिनी ॥ ५४९ ॥
तारुण्यचारवे तस्यै वरान्ध्यायन्धरार्धिपः ।
त्वत्सुतं निश्चिकायैव प्रभायै भास्करं यथा ॥ ५५० ॥
इत्यर्थमभ्यर्थयितुं त्वयि मामीश मे प्रभुः ।
विश्वासभाजनीभूतं मुख्यदूतं नियुक्तवान् ॥ ५५१ ॥

सत्यभो सत्यभोल्लासनिर्विलासमनोभुवे ।
रतिनिर्जयिनीं कामं तामङ्गीकुरु सूनवे ॥ ५५२ ॥
तं भूपमुत्सवाभोगात्तां कन्यां वरलाभतः ।
दौत्यसाफल्यतो मां च स्वामिन्ननुगृहाण तत् ॥ ५५३ ॥
इदं वादिनि दूते ऽस्मिन्नानन्दी मेदिनीपतिः ।
सिंहश्रेष्ठिमुखाम्भोजे न्यस्तनेत्रयुगो जगौ ॥ ५५४ ॥
नावयोरन्तरं किंचिदमुमादाय नन्दनम् ।
व्रज नागपुरं बन्धो संबन्धो ऽयं विधीयताम् ॥ ५५५ ॥
अनर्थदण्डादुद्दण्डादतः स चकितः कृती ।
किंचिन्न्यञ्चन्मुखः सिंहो नोत्तरं नृपतेर्ददौ ॥ ५५६ ॥
किंचित्कोपकडाराक्षस्ततः क्ष्मादयितो ऽवदत् ।
संबन्धो ऽयं न किं साधुर्यदत्से मित्र नोत्तरम् ॥ ५५७ ॥
अथ पृथ्वीपतिं कोपकणाङ्कमवलोकयन् ।
वाकलां कलयामास सिंहः पीयुषपेशलाम् ॥ ५५८ ॥
न योजनशतादूर्ध्वं व्रजामीति व्रतं मम ।
अतस्तु योजनशतं साग्रं नागपुरं पुरम् ॥ ५५९ ॥
तदहं न विवाहे ऽस्मिन्व्रजामि व्रतभङ्गभीः ।
एवंविधेषु कार्येषु दिश्यन्ते न च मादृशाः ॥ ५६० ॥
इत्युक्तिघृतहोमेन ज्वलत्कोपमहानलः ।
तज्ज्वालाजालसंतप्तामिव भूपो ऽभजद्गिरम् ॥ ५६१ ॥
स्याद्वन्तुं यत्र मे युक्तं मया तत्र निदिश्यसे ।
कार्यं तदप्यदेश्यं ते तन्महामहिमासि भोः ॥ ५६२ ॥
न यासि योजनशतादूर्ध्वमित्यस्ति ते व्रतम् ।
सहस्राद्योजनेभ्यो ऽग्रे त्वां मोक्ष्याम्यौष्ट्रिकैस्ततः ॥५६३॥

सिंहः श्रुत्वेत्यथ क्रोधावहित्थविहितस्मितः ।
ऊचे ऽग्रतो नृणां पत्युः प्रत्युत्पन्नमतिः कृती ॥ ५६४ ॥
स्वामिन्नसहमानस्ते विरहं निरहंकृतिः ।
अकार्षमुत्तराप्येवं देवादेशः शिरोमणिः ॥ ५६५ ॥
नृपः प्रीतो ऽथ तद्वाचा विवाहाय व्यहारयत् ।
महासैन्यमहामन्त्रिमहाभटयुतं सुतम् ॥ ५६६ ॥
पृथग्भूतमिवात्मानं सुहृदं हृदयप्रियम् ।
नृसिंहः सिंहमकरोत्तत्र सर्वक्रियागुरुम् ॥ ५६७ ॥
कृतयात्रस्ततः सिंहो गुप्तसंवेगवाग्भरैः ।
अत्रोटयत्कुमारस्य संसारावासवासनाम् ॥ ५६८ ॥
व्यक्तमुक्तिवधूलोभः शोभमानः श्रियोऽथ सः ।
तृणवद्गणयामास महीवासवनन्दनः ॥ ५६९ ॥
कृतव्याजोत्तरः श्रेष्ठी दिग्विरामव्रतस्थितः ।
न योजनशतादूर्ध्वं स प्रयाणमकारयत् ॥ ५७० ॥
यात्राविरामाद्यातेषु पञ्चषेषु दिनेष्वथ ।
कुमारमूचुः सचिवा रहसि प्रहसद्गिरः ॥ ५७१ ॥
यात्रां कुत्रापि सिंहश्चेन्निषेधति विधिच्छलात् ।
तद्बलादपि कुर्वन्तो न यूयमपराधिनः ॥ ५७२ ॥
इत्यस्मानशिषद्गुप्तं प्रयाणसमये नृपः ।
तद्बद्ध्वाप्यधुना सिंहं यामो नागपुरं न किम् ॥ ५७३ ॥
॥ युग्मम् ॥
इत्याप्तवाचः सचिवानचष्ट नृपनन्दनः ।
श्वः कर्तव्यमिदं यात्रा नाद्य निर्णीयते यदि ॥ ५७४ ॥
अथैकान्ते महीकान्तजन्मा तन्मानसप्रियम् ।

वचो ऽवोचत सिंहस्य पुरो धर्मकलागुरोः ॥ ५७५ ॥
धर्माम्बुधिसुधाधामा सिंहनामा महामतिः ।
ततः कुमारमारब्धसंसारशमनो ऽभ्यधात् ॥ ५७६ ॥
नेदं मे ऽङ्गमपीत्युक्त्वा भूतले प्रतिलेखिते ।
पतित्वा पादप इव प्रस्थिरावयवव्रजः ॥ ५७७ ॥
शुचौ क्वचिद्वनोद्देशे पादपोपगमाभिधम् ।
ग्रहीष्यामि व्रतं तत्ते बद्ध्व नेष्यन्ति किं मम ॥ ५७८ ॥
॥ युग्मम् ॥
इत्युक्त्वा सिंहवत्सिंहः काननं निशि जग्मिवान् ।
त्वमेव मे गतिरिति क्ष्मापजो ऽप्यनु तं ययौ ॥ ५७९ ॥
निशान्ते तावपश्यन्तः शयनादिषु मन्त्रिणः ।
पदश्रेण्यनुसारेण भुवं भूरितरां ययुः ॥ ५८० ॥
तौ गृहीतपरिव्रज्यौ पादपोपगमस्थितौ ।
नित्यव्योमभ्रमश्रान्तौ सुप्तौ सूर्योडुपाविव ॥ ५८१ ॥
क्वचिच्छैलतले वीक्ष्य वैलक्ष्यकलुषाननाः ।
मन्त्रिणः प्रणिपत्योचुश्चटूच्चयमयं वचः ॥ ५८२ ॥
क्षम्यतामपराधो नः सकटूक्तिपटूकृतः ।
उत्तिष्ठतं द्रुतं यामः स्वामिनौ नागपत्तनम् ॥ ५८३ ॥
मत्वा वृत्तमिदं भूपः कुप्यन्यन्त्रे तिलानिव ।
दुःखश्यामतनूनस्मान्साम्ध्यान्पीलयिष्यति ॥ ५८४ ॥
तत्कृपाब्धी कृपां कृत्वा पश्यतं जल्पतं च नः ।
दृग्भिः प्रसादसार्द्राभिः स्मितधौताधरैर्मुखैः ॥ ५८५ ॥
व्यर्थीभूयाथ सचिवैरित्यादिचटुवादिभिः ।
स्वरूपमाशु भूपस्तज्ज्ञापितः सत्वरैश्चरैः ॥ ५८६ ॥

बद्ध्वा विवाह्यस्तनुजः सिंहो वध्यस्तु वैरिवत् ।
इति कुप्यन्नृपो ऽप्यागाद्वाहनैर्वेगवत्तरैः ॥ ५८७ ॥
ईदृग्विरुद्धबुद्धिस्तौ स ददर्श महामुनी ।
सेव्यमानपदौ व्याघ्रद्वीपिसिंहादिजन्तुभिः ॥ ५८८ ॥
प्रभाविनाविमौ शक्यौ न पराभवितुं बलात् ।
भक्त्यैव भाष्यावित्यन्तर्ध्यायन्राजा जगाम तौ ॥ ५८९ ॥
श्वापदैर्दत्तमार्गं तं मार्गन्तं वीक्षणान्यपि ।
नमन्तं चटुमन्तं च नेक्षांचक्रतुरप्यमू ॥ ५९० ॥
तौ तु मासोपवासान्ते स्तूयमानौ सुरासुरैः ।
शुद्धध्यानवशीभूतां भेजाते मुक्तिवल्लभाम् ॥ ५९१ ॥
न योजनशतादूर्ध्वं यामीति तव निश्चयः ।
असंख्यैर्योजनैर्मित्र मां मुक्त्वा किमगाः शिवम् ॥ ५९२ ॥
इति क्रन्दन्नृपः सिंहनाम्नो मित्रस्य विग्रहम् ।
पुत्रस्य चाग्नौ चिक्षेप स्वं च शोकमहानले ॥ ५९३ ॥
तयोः सत्त्वातिरेकोक्त्या विबुधैर्बोधितस्ततः ।
धर्मकर्मठधीः प्राप स्वपुरं भूपुरन्दरः ॥ ५९४ ॥
वरं तत्याज यः प्राणान्न पुनः स्वीकृतं व्रतम् ।
स सिंह इव सेवध्वं जना दिग्विरतौ रतिम् ॥ ५९५ ॥

॥ इति दिग्विरतिविचारे सिंहकथा ॥

यद्भोग्यमुपभोग्यं च पारिमित्येन गृह्यते ।
भोगोपभोगमानाख्यं तद्द्वितीयं गुणव्रतम् ॥ ५९६ ॥
सुकृतश्रीनिवासैकसरोजं सप्तमं व्रतम् ।
चित्रमत्र परत्रापि सुरभीकुरुते सतः ॥ ५९७ ॥
कृती मितीकृताहारः सप्तमव्रतलीलया ।

मुच्यते संचितेनापि कर्मरोगेण धर्मवत् ॥ ५९८ ॥
तथाहि सिद्धं साहित्यमिव विद्यासु भासुरम् ।
नगरीषु गुरुश्रीकमस्ति श्रीकमलं पुरम् ॥ ५९९ ॥
तत्राजनिष्ट राजेन्दुः सत्याख्यो राजशेखरः ।
कालरात्रेरिवादर्शो यदसिर्दृष्टशे ऽरिभिः ॥ ६०० ॥
सकलैः स कलापात्रैः क्षत्रैरिव गुणैः श्रितः ।
कस्य कस्य नमस्यत्वं भूभुजङ्गो न जग्मिवान् ॥ ६०१ ॥
संभावि भुवि दुर्भिक्षं देव द्वादशवार्षिकम् ।
इत्येकदा पुरस्तस्य ज्योतिःशास्त्रविदो ऽवदन् ॥ ६०२ ॥
सर्वथा नान्यथादृष्टगिरामेषां मनीषिणाम् ।
चकम्पे वचसा तेन स वातेन तृणं यथा ॥ ६०३ ॥
रौप्यकाञ्चनरत्नादिसर्वस्वव्ययतस्ततः ।
कणानां च तृणानां च स चक्रे संग्रहं बहुम् ॥ ६०४ ॥
अथान्नसंग्रहव्यग्रे समग्रे ऽपि जने ऽभितः ।
विवेश मध्ये देशस्य कापि दुर्भिक्षवर्णिका ॥ ६०५ ॥
अन्नसंग्रहविक्रीतसर्वालंकरणो जनः ।
फाल्गुणच्युतपत्रालिशालजालवदाबभौ ॥ ६०६ ॥
निर्धान्या निर्धनाः काश्चिद्व्रजिष्यन्ति प्रजाः क्व मे ।
शुचेत्यचिन्तयद्राजा प्राजापत्येन लज्जितः ॥ ६०७ ॥
इति नित्यं ज्वलच्चिन्तातप्तस्योर्वीशितुर्मुदे ।
आषाढस्याद्य एवाहि पौरस्त्यपवनो ववौ ॥ ६०८ ॥
अथाङ्कुर इव प्राच्यां सुभिक्षफलशाखिनः ।
अम्बुदस्य लवो ऽदर्शि मुदितेन महीभुजा ॥ ६०९ ॥
श्रीरिवाभ्युदयद्भाग्यभरस्य जलभृल्लवः ।

अवर्धतातिमात्रं स धात्रीश्वरमुदा समम् ॥ ६१० ॥
अवग्रहग्रहान्विद्युदङ्गुल्या तर्जयन्निव ।
बलाकादशनैर्ज्योतिर्विदां वाचो हसन्निव ॥ ६११ ॥
दर्शनादेव दुर्भिक्षं द्विषं भुक्त्वैव निर्नदन् ।
धारासुशलसंपातैः क्ष्मादुःखमिव खण्डयन् ॥ ६१२ ॥
अब्धिद्वयजलाकर्षनालयन्त्राभकार्मुकः ।
स ववर्ष प्रजाहर्षप्रकर्षाश्रुघनं घनः ॥ ६१३ ॥
॥ त्रिभिर्विशेषकम् ॥
अन्योन्यकरतालाभिर्ज्योतिषज्ञोपहासकृत् ।
वृष्ट्यानयैव निष्पन्नः काल इत्यालपज्जनः ॥ ६१४ ॥
कृतार्थां पृथिवीं कृत्वा लोकस्तवभयादिव ।
अब्दो ऽथ काप्यगादेष एषैव महतां गतिः ॥ ६१५ ॥
निवृत्तचिन्तासंतापं ततः क्ष्मापं परे ऽहनि ।
एत्य हस्तमिलद्भालो वनपालो व्यजिज्ञपत् ॥ ६१६ ॥
स्वदुद्याने चतुर्मासवासमासृत्य तस्थुषः ।
युगन्धरमुनेरद्योत्पेदे केवलमुज्ज्वलम् ॥ ६१७ ॥
अथारामिकमापूर्य परमैः पारितोषिकैः ।
आरामाय जगामायममायसुकृतः कृती ॥ ६१८ ॥
स त्रिः प्रदक्षिणीकृत्य प्रणिपत्य च तं मुनिम् ।
सद्धर्मदेशनां श्रुत्वा पप्रच्छेति कृताञ्जलिः ॥ ६१९ ॥
प्रभो ज्योतिर्विदां तेषामदृष्टिविषयं वचः ।
कथं विघट्टितं पृथ्व्यामथ स प्राह केवली ॥ ६२० ॥
ग्रहयोगेन दुर्भिक्षं भवद्वादशवार्षिकम् ।
कारणेन न येनाभूत्तदमीषामगोचरम् ॥ ६२१ ॥

पुरे पुरिमतालाख्ये नरः प्रवर इत्यभूत् ।
महारोगैः पराभूतः स युवापि स्वकर्मतः ॥ ६२२ ॥
सैष स्वाद्यं रसस्वादविलोलरसनारसः ।
जग्राह यं यमाहारं विकारमकरोत्स सः ॥ ६२३ ॥
सो ऽथ दध्यौ य आहारः शरीराहितकारकः ।
प्रत्याख्यानादनाहारफलं किं तस्य नाददे ॥ ६२४ ॥
शूकासंकोचितदृशो भजन्ति सुदृशो न माम् ।
ताः प्रत्याख्याय किं साक्षान्न गृह्णे मर्त्यताफलम् ॥ ६२५ ॥
इत्युज्ज्वलीकृतमतिर्मतिभाजां मतल्लिका ।
गुरून्गुणगुरूनेष साक्षीकृत्येदमब्रवीत् ॥ ६२६ ॥
स्निग्धाम्लमधुरक्षारानाहारान्नाहमाहरे ।
कटुतिक्तकषायांस्तु गृह्णाम्यूनोदरव्रतः ॥ ६२७ ॥
यदासक्तान्नरान्मुक्तिरीर्ष्ययेवेक्षते ऽपि न ।
ताः प्रत्याख्यामि वामाक्षीर्भवाब्धेरधिदेवताः ॥ ६२८ ॥
इत्यादृतं व्रतं सत्त्वविशालः पालयन्नयम् ।
क्रमेण मुमुचे रोगैरसाध्यं सुकृतस्य किम् ॥ ६२९ ॥
तदमुञ्चन्व्रतं धीरो नीरोगत्वं गतो ऽपि सः ।
क्रमेणाभूद्विभूतीनां प्रभूतानामपि प्रभुः ॥ ६३० ॥
तद्गृहे व्यलसन्दास्यः स्मरलास्यलसद्दृशः ।
स्वर्गवेश्या इव स्वर्गमुन्मुच्याल्पविभूतिकम् ॥ ६३१ ॥
सत्संयमगुणस्वान्तावष्टम्भस्तम्भयन्त्रितः ।
नाकृष्टुं विषयैः शेके तस्येन्द्रियगणः स तैः ॥ ६३२ ॥
आययौ मार्गकोटीभिर्धनं यत्तस्य नित्यशः ।
ययौ पात्रदयौचित्यदानमार्गत्रयेण तत् ॥ ६३३ ॥

अन्नार्थविग्रहव्यग्रपितृमातृसुतोद्धतम् ।
एकदा रङ्कदुःप्रेक्षं दुर्भिक्षं समभूद्भुवि ॥ ६३४ ॥
विलीनं दानिनां दानैस्तद्दानं वव्रृधे तदा ।
ग्रीष्मे सरोम्भः शुष्येत स्यादुद्वीचिस्तु वारिधिः ॥ ६३५ ॥
दुर्भिक्षभीरुभिर्भेजे स एवैको जगज्जनैः ।
सर्वज्ञदिष्टः संसारभीतैर्धर्म इवाभितः ॥ ६३६ ॥
प्रासुकैः पेयपक्कान्नदधिदुग्धघृतादिभिः ।
स दिगन्तागतान्साधूल्लँक्षशः प्रत्यलाभयत् ॥ ६३७ ॥
पितृमातृसुतीकृत्य श्रावकान्स वयःक्रमात् ।
प्रत्यहं गृह एवोच्चैरसंख्यातानभोजयत् ॥ ६३८ ॥
इत्यखण्डव्रतः श्रीमान्प्रवरस्तु वरस्तुतिः ।
दानैकव्यसनः कालयोगतस्त्रिदिवं गतः ॥ ६३९ ॥
शाश्वतार्हन्महायात्रानित्यनिर्मलधर्मधीः ।
पूर्णायुश्चिन्तयामास स वासवसमः सुरः ॥ ६४० ॥
श्राद्धो युगप्रधानोऽस्ति यः कश्चिद्भुवि तत्सुतः ।
भूयासं सार्वभौमोऽपि मा भूवं कलुषे कुले ॥ ६४१ ॥
इतश्च चित्रशालाख्ये त्वत्पुरोपपुरे पुरे ।
श्राद्धोऽस्ति शुद्धबुद्ध्याख्यो विमलाया मनःप्रियः॥६४२॥
द्वादशव्रतनिर्व्याजपालनोज्ज्वलजीवितः ।
ईदृग्दुर्भिक्षवाचापि न चक्रे योऽन्नसंग्रहम् ॥ ६४३ ॥
स देवस्तत्प्रियाकुक्षिमाप सुस्वप्नसूचितः ।
साप्यसूत सती पुत्रं पवित्रं ह्यस्तने दिने ॥ ६४४ ॥
महाभाग्यवतो जन्म तस्य जित्वाशु दुर्ग्रहान् ।
बभञ्ज बत दुर्भिक्षमिह द्वादशवार्षिकम् ॥ ६४५ ॥

इति श्रुत्वाद्भुतप्रीतिर्नत्वा केवलिनं नृपः ।
तत्राशु गत्वा तं बालं भाले न्यस्येदमूचिवान् ॥ ६४६ ॥
दुर्भिक्षमज्जज्जगदुद्धारधीर नमो ऽस्तु ते ।
राजा त्वमेव मे राज्ये तलारक्षो ऽस्मि तावकः ॥६४७॥
मूर्तिमानिव धर्मो ऽयमित्थं दुर्भिक्षभङ्गकृत् ।
इति तस्याभिधा धर्म इति धात्रीभृता कृता ॥ ६४८ ॥
चरैर्मत्वेदमन्ये ऽपि भूभुजः स्वस्वभूमिषु ।
धर्माज्ञां वर्तयित्वाशु वर्षयामासुरम्बुदान् ॥ ६४९ ॥
वयःकालोचितैश्चित्रैः प्राभृतैः सर्वभूभुजाम् ।
अश्रान्तानन्दसंदर्भः सो ऽर्भकः समवर्धत ॥ ६५० ॥
समस्तभूभृतां पुत्र्यः सकलाः कमलेक्षणाः ।
पतिंवरास्तमाजग्मुः समुद्रमिव निम्नगाः ॥ ६५१ ॥
धर्मः समग्रभूगोललोलाज्ञो गुरुभक्तिभाक् ।
धर्मी कर्माण्यसंचिन्वन्संभोगान्बुभुजे ऽद्भुतान् ॥ ६५२ ॥
भुक्तभोगस्त्वसौ योगबलमुज्ज्वलमाश्रितः ।
उत्पन्नकेवलज्ञानमहिमा मुक्तिमाप्तवान् ॥ ६५३ ॥

इति धन्यस्य धर्मस्य भवद्वयनिदर्शनात् ।
जितसंपत्तिसंपातैः सेव्यतां सप्तमं व्रतम् ॥ ६५४ ॥
इति भोगोपभोगव्रतविचारे धर्मनृपकथा ॥

रौद्रार्तधीशस्त्रदानपापशिक्षाप्रमादिताः ।
अनर्थदण्डस्तत्त्यागः स्यात्तृतीयं गुणव्रतम् ॥ ६५५ ॥
अनर्थदण्डवीरामव्रतधीरा महोदयम् ।
लभन्ते शुभसंभारभासुराः सुरसेनवत् ॥ ६५६ ॥

तथाहि देवपूज्योद्यद्बन्धान्धैर्मधुपैर्मुहुः ।

गीतप्रशस्तिरस्ति श्रीबन्धुरा बन्धुरा पुरी ॥ ६५७ ॥
श्रीवीरसेन इत्युग्रवीरसेनाशिरोमणिः ।
वृत्तैः पवित्रैरश्यामस्तस्यामजनि भूधवः ॥ ६५८ ॥
अन्तरारिप्रहारेषु धर्मकाण्डाद्भुतौ सुतौ ।
सुरसेनमहासेनौ तस्याभूतामुभौ शुभौ ॥ ६५९ ॥
उपमानोपमेयत्वमभिधानाभिधेयता ।
रूपे च साहचर्ये च व्यचार्यत तयोर्जनैः ॥ ६६० ॥
दृशौ सदवलोकेषु बाहू मोहादिमर्दने ।
चरणौ सच्चरित्रेषु तौ धर्मस्य व्यराजताम् ॥ ६६१ ॥
अजायत रसज्ञायामन्येद्युः श्वयथुः पृथुः ।
अकस्माद्विस्मयकरो महासेनस्य दुःसहः ॥ ६६२ ॥
उपशान्त्यै व्यधुर्वैद्या यद्यदौषधमुच्चकैः ।
ववृधे तेन तेनापि जिह्वाशोफः सलोभवत् ॥ ६६३ ॥
औषधं धर्म एवास्य युक्तमित्युक्तयस्ततः ।
तं वैद्या मुमुचुर्निःस्वं भुजङ्गं गणिका इव ॥ ६६४ ॥
क्रमेण कुथिता तस्य रसज्ञा राजजन्मनः ।
मक्षिकाणामनिर्वारसत्त्वागारत्वमाययौ ॥ ६६५ ॥
उग्रदुर्गन्धभूः कान्तापितृमातृभिरप्यसौ ।
चण्डालपाटक इवाध्वगैर्दूरादमुच्यत ॥ ६६६ ॥
तं तथाभूतमुद्भाव्य भ्रातृस्नेहवशंवदः ।
दुर्गन्धं दुःसहं जित्वा सुरसेनः समीपगः ॥ ६६७ ॥
रोगो ऽसौ यावदस्यास्ति न किंचित्तावदाहरे ।
म्रियते यद्यनेनैष म्रिये ऽनशनतस्ततः ॥ ६६८ ॥
इति न्यविशत भ्रातुरग्रे स दृढनिश्चयः ।

वीजयन्क्सनान्तेन मक्षिका मुखपातिनीः ॥ ६६९ ॥

॥ त्रिभिर्विशेषकम् ॥

नमस्काराख्यमन्त्रेणाभिमन्त्र्य प्रासुकं पयः ।
तं मुहुः स्मारयंश्चास्य सिषेच रसनामसौ ॥ ६७० ॥
सेके सेके व्यथाशान्तिर्विशेषं समजायत ।
क्रमात्तस्य क्षुधार्तस्य कवले कवले यथा ॥ ६७१ ॥
निर्व्यथं निर्व्रणं नीरुग्निर्गन्धं च सुगन्धि च ।
मुहूर्तात्तन्मुखं जज्ञे क न धर्मः प्रभावभाक् ॥ ६७२ ॥
धर्मेणास्तः स रोगः श्राग्मुक्तो वैद्यगणेन यः ।
भानुच्छेद्यं तमश्छेत्तुं खद्योताः क किल क्षमाः ॥ ६७३ ॥
राहुमुक्तं रविमिव प्राप्तपूर्वच्छविच्छटम् ।
तं रोगमुक्तं वीक्ष्याभूल्लोकः सर्वोऽपि सोत्सवः ॥६७४॥
विशेषतस्ततस्तारे धर्मभारे सहोदरौ ।
तौ बभूवतुरुद्भासौ शरदीवेन्दुभास्करौ ॥ ६७५ ॥

श्रीभद्रबाहुराचार्यो ऽवधिज्ञानमधिष्ठितः ।
कदापि तत्पुरोद्यानं द्यामिवेन्दुरभूषयत् ॥ ६७६ ॥
प्रदक्षिणात्रयेणोपभ्रेमतुर्नेमतुश्च तम् ।
उपविश्य ततो धर्मदेशनां पपतुश्च तौ ॥ ६७७ ॥
सुरसे सुरसेनेन निपीते देशनामृते ।
अपृच्छ्यत गुरुर्भ्रातृरसनारोगकारणम् ॥ ६७८ ॥
स च प्रवचनक्षीरार्णववीचीनिभं वचः ।
उपाददे भवदवोद्भवक्लेशहरं गुरुः ॥ ६७९ ॥

भूभूषाभूतमाहूतपुरुहूतपुरप्रभम् ।
पुरं मणिपुरं नाम विद्यते विश्वविश्रुतम् ॥ ६८० ॥

तस्मिन्कश्मलितारातिवदनो मदनो भटः ।
बभूव भगवद्धर्मसुधाम्बुधिसुधाकरः ॥ ६८१ ॥
तुल्याकृती तुल्यशक्ती तुल्यार्थौ तुल्यतेजसौ ।
धीरवीराभिधौ तस्य सुतौ जातौ भुजाविव ॥ ६८२ ॥
जिनप्रवचनस्वादानन्दामन्दसुधारसौ ।
तौ भवाहिभुवा ग्रस्तौ न मोहविषमूर्छया ॥ ६८३ ॥
कदाप्येतौ गतावात्मोद्याने ददृशतुर्मुनिम् ।
स्वमातुलं वसन्ताख्यं पुंवृतं पतितं भुवि ॥ ६८४ ॥
किमभूत्किमभूदेतदिति व्याकुलचेतसि ।
धीरे ऽथ पृच्छति पुमानेकस्तत्राभ्युद्गगौ ॥ ६८५ ॥
प्रतिमास्थमिमं साधुं दृष्ट्वैको दुष्टपन्नगः ।
दुर्गे नृपापराधीव प्रविष्टो ऽस्मिन्महाबिले ॥ ६८६ ॥
अथ मातुलमोहेन क्रुधा धीरानुजो ऽभ्यधात् ।
रे रङ्काः किमसौ नश्यन्नहिः पापी हतो न हि ॥ ६८७ ॥
धीरस्तमभ्यधात्सर्पे गते जीवति कर्मतः ।
हहा महात्मन्किं पापं मुधा बध्नासि जिह्वया ॥ ६८८ ॥
क्रुधाभ्यधित वीरो ऽपि दुष्टे दष्टमहामुनौ ।
तस्मिन्हते ऽपि धर्मः स्याद्भतिवाचा क पातकम् ॥ ६८९ ॥
क्षत्रधर्मो ह्ययं साधुपालने दुष्टनिग्रहे ।
इत्यसत्यं यदि ततो मज्जिह्वामेतु पातकम् ॥ ६९० ॥
धीरस्त्वचिन्तयन्वाचं तस्यापारकृपारसः ।
यतीन्द्रं जीवयामास मणिमन्त्रौषधीबलात् ॥ ६९१ ॥
यतीन्द्रजीवनात्प्रीतिं महानन्दस्य वर्णिकाम् ।
धारयन्ता भटस्यैतौ सुतौ सर्वजनस्तुतौ ॥ ६९२ ॥

पालयन्तौ शुभं धर्मं ज्वालयन्तौ च पातकम् ।
क्षालयन्तौ च कीर्त्या स्वं सुचिरं तौ ननन्दतुः ॥ ६९३ ॥
युग्मम् ॥

धीरः क्रमेण पूर्णायुः सुरसेन भवानभूत् ।
अनालोचिततादृग्वाग्वीरस्त्वेष तवानुजः ॥ ६९४ ॥
असाध्यः सर्ववैद्यानामनवद्यौषधीविदाम् ।
सर्पप्रहतिवाक्पापाज्जिह्वारोगो ऽस्य जातवान् ॥६९५॥
यतिसंजीवनादेव लब्धरुग्भङ्गलाञ्छिना ।
निरासि रसनारोगो महासेनस्य स त्वया ॥ ६९६ ॥
इति ज्ञात्वा स्ववृत्तान्तं जातजातिस्मृती तदा ।
सुरसेनमहासेनौ भवार्तौ भेजतुर्व्रतम् ॥ ६९७ ॥
व्रतं व्रततिवत्सिक्ता तौ चारुचरितामृतैः ।
धर्मप्रसूनजं मुक्तिफलं कालादवापतुः ॥ ६९८ ॥
सुरसेनमहासेनदृष्टान्तेनामुना जनाः ।
अनर्थदण्डं दुःखौघहेतुं त्यजत दूरतः ॥ ६९९ ॥

॥ इत्यनर्थदण्डव्रतविचारे सुरसेनमहासेनकथा ॥

सुध्यानानामसावद्यकृतां मौहूर्तिकं हृदि ।
यत्साम्यमाद्यं तच्छिक्षाव्रतं सामायिकाभिधम् ॥७००॥
आभाति यतिधर्मश्रीक्षणखेलनभूमिका ।
दुरितोर्मिन्निरामाय व्रतं सामायिकं पुनः ॥ ७०१ ॥
मोक्षश्रीमिमतारम्भः समताभ्यासरङ्गभूः ।
करुणारससिन्धूर्मिराद्यं शिक्षाव्रतं मतम् ॥ ७०२ ॥
क्रूराचारो ऽपि संसारकाराया मुच्यते द्रुतम् ।
केसरीव त्रुटत्कर्मदामा सामायिकव्रती ॥ ७०३ ॥

तथाहि शत्रुलोकाहिबर्हणः क्षीणगर्हणः ।
भूपो ऽभूद्विजयो नाम धर्मी कामपुरे पुरे ॥ ७०४ ॥
तं श्रेष्ठी सिंहदत्ताख्यो नत्वाचख्यौ कदाचन ।
केशरी नाम मे स्वामिन्पुत्रो ऽभूच्चौर्यभूरिति ॥ ७०५ ॥
अथ स्थास्यति मद्भूमौ यदि तद्ध्य एव मे ।
इति केशरिणं देशान्नरेशो निरकाशयत् ॥ ७०६ ॥
सो ऽपि भूपभयाक्रान्तः श्रान्तो देशान्तरं व्रजन् ।
काप्यपश्यद्वने स्वच्छशीतस्वादुरसं सरः ॥ ७०७ ॥
अचौर्याहृतमाशक्तेर्न पयो ऽपि पपे मया ।
अहो कार्यं तदप्यद्य धिग्धिग्दैवविपर्ययम् ॥ ७०८ ॥
इति ध्यायन्नयं तत्र श्रान्तः कान्तारपल्वले ।
चौरश्चक्रे पयःपानं स्नानं च विदधे ऽधिकम् ॥ ७०९ ॥
॥ युग्मम् ॥

निःसृत्य स गतश्रान्तिरारोहत्पालिशालिनम् ।
क्षुधाकुलः फलस्यूततरं चूततरुं ततः ॥ ७१० ॥
फलैस्तृप्तस्ततो दृप्तः स चिन्तां कृतवानिति ।
हहा मम किमद्याहर्विना चौर्येण यास्यति ॥ ७११ ॥
इति चिन्तापरे तत्र मन्त्रसाधितपादुकः ।
उत्ततार सरस्तीरे को ऽपि योगीश्वरो ऽम्बरात् ॥ ७१२ ॥
स व्योमगमनासन्नतपनातपतापितः ।
दत्त्वा दिक्षु दृशं मुक्त्वा पादुके उदके ऽविशत् ॥ ७१३ ॥
वेद्म्यदं पादुकाद्वन्द्वमस्याकाशगतौ क्षमम् ।
यदेतदिह मुक्त्वासौ पद्भ्यामेव जले ऽविशत् ॥ ७१४ ॥
तदेतच्चौर्यामीति ध्यात्वोत्तीर्य द्रुतं द्रुमात् ।

पादुके पादयोः क्षिप्त्वा चौरो ऽगाद्गगनाध्वना ॥ ७१५ ॥
स निर्गम्य दिनं क्वापि नक्तं तत्पादुकापदः ।
चिन्तासमानसमयः व्योम्ना धाम्नि ययौ निजे ॥७१६ ॥
राज्ञे विज्ञप्य चौरं मां त्वं पुरान्निरकाशयः ।
इत्युक्त्वाताडयद्दण्डैः पितरं नितरामसौ ॥ ७१७ ॥
परासुं पितरं त्यक्त्वा महर्द्धीनि गृहाणि सः ।
प्रविवेश पदार्थौघं सारं सारं जहार च ॥ ७१८ ॥
अन्त्ये यामे त्रियामायाः स समायातवान्पुनः ।
सरोवरं तदेवाशु दुर्गमारण्यमण्डनम् ॥ ७१९ ॥
नित्यमित्ययमुद्दामक्रौर्यश्चौर्यलसद्रसः ।
तदेव नगरं गत्वालुण्टद्विविधलुण्टनः ॥ ७२० ॥
लोकं साधुसतीमुख्यं संतापयति पापिनि ।
यमागम इव भिये ऽभवत्तत्र निशागमः ॥ ७२१ ॥
तत्स्वरूपं परिज्ञाय राज्ञाथ व्यथितात्मना ।
परिपृष्टः पुरीरक्षो वैलक्ष्यन्यग्मुखो ऽवदत् ॥ ७२२ ॥
प्रभो नभोध्वगः को ऽपि पुरं मथ्नात्यदः सदा ।
न चौरचरणन्यासः क्वापि चाप्यत यद्भुवि ॥ ७२३ ॥
ततः क्षितिपतिः कोपसंतप्तं लोचनद्वयम् ।
व्यथातुरःपुरमेक्षाकृपाश्रुषु निमज्जयन् ॥ ७२४ ॥
तपोधनतपःशीलवतीशीलप्रभावतः ।
तत्क्लेशसोद्यमः सो ऽद्य मम चौरो ऽस्तु गोचरः ॥७२५॥
इत्युक्त्वाल्पपरीवारः पुरीमयमलोकत ।
प्रत्यास्थानं प्रतिद्यूताश्रयं प्रतिसुरालयम् ॥ ७२६ ॥
॥ त्रिभिर्विशेषकं ॥

चौरचिह्नं क्वचित्किंचिदप्यनालोकयन्नृपः ।
जगाम क्षामसंकल्पः पुरीपरिसरावनिम् ॥ ७२७ ॥
वापीकूपतडागादिस्थानेष्वपि निरूपयन् ।
न प्राप भूपतिः क्वापि चौरसंचारचेष्टितम् ॥ ७२८ ॥
मध्याह्ने ऽथ धरानेतुर्वनान्तर्भुवि तस्थुषः ।
नासामासादयद्गन्धः कर्पूरागुरुधूपभूः ॥ ७२९ ॥
व्रजन्गन्धानुसारेण चण्डिकागारमासदत् ।
चम्पकाद्यर्चितां तस्मिन्नपश्यच्चण्डिकां नृपः ॥ ७३० ॥
उन्मुच्य धूपनं तादृग्भूपमभ्याययौ ततः ।
संयोजितकरः पूजाकरः प्रवरचीवरः ॥ ७३१ ॥
केनोत्सवेन केनेदृक्चण्डीपूजाद्य कारिता ।
दत्तानि द्युतिदूनेन्दुभांसि वासांसि केन ते ॥ ७३२ ॥
इति पृच्छति भूजानौ पूजाकारी जगाद सः ।
दुःस्थान्वयस्य मे स्वामिन्भक्त्या तुष्टाद्य चण्डिका॥७३३॥
प्रगे पूजार्थमायामि यदा नित्यं लभे तदा ।
देव्याः पादाग्रवर्तीनि रत्नानि कनकानि च ॥ ७३४ ॥
एवं देवीं त्रिकालं तत्पूजयामि जयामि च ।
तत्प्रसादोत्थनिःशेषश्रीपूरः श्रीदमप्यहम् ॥ ७३५ ॥
नक्तं चौरागमं तत्र सुधीर्निश्चित्य तद्विरा ।
ययौ वासरकृत्यार्थमावासं वासवो भुवः ॥ ७३६ ॥
नक्तं सारपरीवारश्चण्डिकागारमागतः ।
न्यस्य दूरे नृपः शूरानिहैकः स्वयमास्थितः ॥ ७३७ ॥
निशीथे स्तम्भगुप्ताङ्गो भूभुजङ्गस्ततो ऽम्बरात् ।
उत्तीर्णं पादुकासिद्धं तमालोकत तस्करम् ॥ ७३८ ॥

पादुकाद्वयमादाय सो ऽथ वामेन पाणिना ।
गत्वा गर्भगृहं चण्डीमानर्च मणिभिः शुभैः ॥ ७३९ ॥
जगौ च स्वामिनि स्वैरचारिणश्चौर्यकारिणः ।
स्यान्ममेयममेयर्द्धिदायिनी क्षणदा मुदे ॥ ७४० ॥
इत्युक्त्वा वलमानो ऽयं द्वारमारुह्य भूभुजा ।
कृपाणपाणिना जीवन् रे न यासीति धर्षितः ॥ ७४१ ॥
इति भाषिणि भूपाले तद्भालं मति कालवित् ।
पादुकाद्वयमेवायमक्षीकृत्य क्रुधाभ्यधात् ॥ ७४२ ॥
तद्धातवञ्चनव्यग्रे महीभुजि महाभुजः ।
अयं जीवन्व्रजामीति वदन्नेवैष निर्ययौ ॥ ७४३ ॥
यात्यसौ केशरी चौर इति भूपगिरा भटाः ।
तमाशु दूरे नश्यन्तमन्वधावन्नृपाज्ञया ॥ ७४४ ॥
चौरलोप्त्रावनीं गन्तुं मन्त्रेणादिष्टशक्तिवत् ।
प्रदाय पादुकाद्वन्द्वं भूपो ऽप्यनुययौ भटान् ॥ ७४५ ॥
स तु चौरस्त्वरा दूरमुक्तशूरसमुच्चयः ।
पुरग्रामान्तगैर्मार्गैरेवागात्पदगुप्तये ॥ ७४६ ॥
भयाकुलितचित्तो ऽसौ किंचिद्वैराग्यवांस्ततः ।
दध्यावित्यद्य मे पापमित्युग्रं फलितं ध्रुवम् ॥ ७४७ ॥
ग्रामारामावनौ कापि कस्यापि दिशतो मुनेः ।
ध्यानतत्त्वं वचश्चौरः श्रद्धयेत्यशृणोत्तदा ॥ ७४८ ॥
सर्वत्र ध्यानसमतारुचिर्मुच्येत पातकैः ।
जनः सद्यो ऽपि तिमिरैः कृतदीप इवालयः ॥ ७४९ ॥
इति हृन्मर्मनिर्मग्नं चौरस्तद्भावयन्वचः ।
वपुरुत्पुलकं बिभ्रद्ध्वस्तत्रैव तस्थिवान् ॥ ७५० ॥ युग्मम् ॥

सारासारास्तिलजमनुन्निन्दाविमुक्तधीः ।
तस्थौ मध्यस्थतामग्नः स भग्नदुरितक्रमः ॥ ७५१ ॥
शेषां रात्रिं दिनं चास्थादेष साम्यफलस्तथा ।
यथा स्थिरं मनो लीनं पवित्रे परमात्मनि ॥ ७५२ ॥
घातिकर्मक्षये सायं ज्ञानं जज्ञे ऽस्य केवलम् ।
सर्वत्रान्वेषयंस्तत्र तदा नृपतिरप्यगात् ॥ ७५३ ॥
इतश्चान्वपतद्भूपस्तं हन्तुं भद्भारभाक् ।
इतश्चागान्मरुद्गौ नन्तुं दत्तव्रतध्वजः ॥ ७५४ ॥
सुरैः कृतं सुवर्णाब्जमासीने केशरिण्यथ ।
ते हन्तारो ऽपि नन्तारो भूपमभृतयो ऽभवन् ॥ ७५५ ॥
दन्तांशुभिः सुभिक्षाणि कुर्वाणश्चन्द्ररोचिषाम् ।
स व्यधादेशनां पापतमसः पूर्णिमां मुनिः ॥ ७५६ ॥
क्व तत्ते चरितं नाथ क्व चायं केवलोदयः ।
इति क्षितिभृता पृष्टस्ततो व्याचष्ट केवली ॥ ७५७ ॥
राजन्ना जन्म तत्तादृक् पापभाजो ऽप्यभून्मम ।
श्रीरियं मुनिवाग्लब्धसामायिकमनोलयात् ॥ ७५८ ॥
यद्वर्षकोटितपसामप्यच्छेद्यं तदप्यहो ।
कर्म निर्मूल्यते चित्तसमत्वेन क्षणादपि ॥ ७५९ ॥
इति श्रुत्वा प्रमुदितो जगाम नगरीं नृपः ।
बोधयन्वसुधां सोऽपि विजहार महामुनिः ॥ ७६० ॥
पितृघातकरे सर्वजनसंतापकारिणि ।
चौरे ऽपि दत्तनिर्वाणं सेव्यं सामायिकं बुधैः ॥ ७६१ ॥
इति सामायिकव्रतविचारे केशरिकथा ॥
क्रियते दिग्व्रते मानसंक्षेपो यो दिवानिशम् ।

द्वितीयं तदिदं शिक्षाव्रतं देशावकाशिकम् ॥ ७६२ ॥
देशावकाशिकं यावत्कुरुते श्रद्धया सुधीः ।
तदन्यत्रात्मनां तेनाभयं दत्तं भवेत्तदा ॥ ७६३ ॥
प्रभावादस्य नश्यन्ति विघ्नाः शुद्धात्मनामिह ।
सुमित्रस्येव जायन्ते परत्र च शुभश्रियः ॥ ७६४ ॥
मुख्या पुरीतितावस्ति भुवस्तिलकवत्पुरी ।
चन्द्रिकेति चतुर्वर्गश्रीनिरर्गलनागरा ॥ ७६५ ॥
नासीरवीरश्वासोर्मिसमुड्डीनारिमण्डलः ।
तारापीड इति क्ष्मापस्तामपालयदुत्सवैः ॥ ७६६ ॥
तन्मन्त्री कीर्तिकुसुमं सुमित्राख्यः समन्ततः ।
विश्वसौरभ्यकृद्भेजे जिनभक्तिलताद्रुमः ॥ ७६७ ॥
शास्त्रमङ्गलदीपोद्यद्धाम्नि हृन्नामधामनि ।
यस्यालीनौ भुजस्तम्भतोरणे मतिविक्रमौ ॥ ७६८ ॥
नृपतिर्नवतारुण्यः पुण्यकर्मपराङ्मुखः ।
उवाच सचिवाधीशं कदाचिद्वार्धकाञ्चितम् ॥ ७६९ ॥
देवार्चास्वकरोद्दामदानव्याख्याश्रवादिभिः ।
धर्मकृत्यैर्वपुर्मन्त्रिन्किं मुधा बाध्यते ऽधुना ॥ ७७० ॥
क एभिर्विफलैर्धर्मकर्मक्लेशैर्भवादृशः ।
जराक्रान्तमविश्रान्तमिति देहं दहत्यहो ॥ ७७१ ॥
इत्युक्तः स्मितवक्त्रो ऽयं मन्त्री धात्रीधवं जगौ ।
किं नृदेव त्वमप्येवमनौचित्येन भाषसे ॥ ७७२ ॥
इच्छामि धर्मकृत्येषु त्वां कारयितुमुद्यमम् ।
मामपि त्वं तु किं नाथ निषेधयसि तेषु हा ॥ ७७३ ॥
धर्मः किं विफलः स स्याद्यत्प्रसादेन धीधनैः ।

निर्विघ्नैः स्वर्गमोक्षाणामपि सौख्यमवाप्यते ॥ ७७४ ॥
अथोचे सचिवो राज्ञा मम ज्ञापय मन्त्रिप ।
विघ्नोच्छित्त्याथ संपत्त्या प्रत्यक्षं धर्मजं फलम् ॥ ७७५॥
इत्युक्तिभाजं राजानं सचिवस्तमुवाच सः ।
त्वं नाथो ऽन्ये तु ते भृत्याः साक्षादेतद्धि तत्फलम् ॥७७६॥
ततो ऽमात्यं जगौ राजा पाषाणे द्विदलीकृते ।
भवत्येकेन सोपानं द्वितीयेन तु देवता ॥ ७७७ ॥
तत्किं तस्यैकदेशेन धर्मश्चक्रे परेण न ।
सिद्धा स्वभावाद्विश्वस्य भव्याभव्यव्यवस्थितिः ॥७७८॥
॥ युग्मम् ॥

अथाह मन्त्री नाजीवो ग्रावात्र स्यान्निदर्शनम् ।
सति धर्मिणि धर्माणां स्थापना युज्यते ततः ॥ ७७९ ॥
इत्युक्तस्तं नृपः किंचित्सवैलक्ष्यस्मितो ऽवदत् ।
अहं मन्त्रिन्वचःशक्त्या त्वया चक्रे निरुत्तरः ॥ ७८० ॥
परं प्रत्यक्षदृष्टेन प्रभावेणैव कुत्रचित् ।
निःसंशयं करिष्यामि धर्मं मन्त्रीश नान्यथा ॥ ७८१ ॥
इति प्रायस्तयोर्नित्यं संलापः क्षत्रमन्त्रिणोः ।
अजायत प्रजामध्ये प्रसिद्धिमधुरो ऽधिकम् ॥ ७८२ ॥
निर्वर्त्य सर्वकृत्यानि कदाचित्सचिवेश्वरः ।
पाक्षिकावश्यकं कर्तुं सायं स्वावासमासदत् ॥ ७८३ ॥
गृहाद्बहिर्न निर्यामीत्यात्तदेशावकाशिकः ।
सत्यसंधो महामात्यः प्रत्याख्यानविधिं व्यधात् ॥७८४॥
आवश्यके कृते शुद्धश्रद्धानध्यानबन्धुरः ।
मन्त्रीश्वरो नमस्कारपरावर्तपरो ऽभवत् ॥ ७८५ ॥

समाह्वयति वः स्वामी गुरुकार्यतयेत्यथ ।
नृपतिप्रतिहारस्तं तदागत्य व्यजिज्ञपत् ॥ ७८६ ॥
आ प्रमाताद्गृहबहिर्गतिप्रत्याख्यया स्थितः ।
एष्यामि प्रातरित्युक्त्वा वेत्री प्रैष्यत मन्त्रिणा ॥ ७८७ ॥
परमेष्ठिनमस्कारसुधासेकविवेकतः ।
पुनर्मानुषजन्मर्द्धुं सचिवः सफलं व्यधात् ॥ ७८८ ॥
समुपेत्य पुनर्वेत्री मन्त्रीन्दुमिदमभ्यधात् ।
युष्मदुक्तैर्नृपः स्वाज्ञालोपात्कोपान्धतामधात् ॥ ७८९ ॥
इह मायाति मायातिचित्रधीः सचिवः स चेत् ।
तत्सर्वैश्वर्यमुद्रा मे याच्येति प्रजिघाय माम् ॥ ७९० ॥
इति श्रुतप्रतीहारव्याहारः सचिवो हसन् ।
तत्क्षणं प्रैषयन्मुद्रां दुःशीलामिव दासिकाम् ॥ ७९१ ॥
मन्त्री श्रेयःसमुद्रो ऽस्मिन्समुद्रे सत्रतो गते ।
राज्यचिन्ताशल्यनाशाद्दृढधर्मभरो ऽभवत् ॥ ७९२ ॥
मुद्रां कौतुकतो वेत्री परिधाय करे तदा ।
मन्त्री जातो ऽहमित्यात्मपदातिषु जगौ हसन् ॥ ७९३ ॥
शनैर्मन्त्रिशिरोरत्न कुरु पादावधारणम् ।
इति हास्यमुखैः पुंभिर्वृतो गेहाच्चचाल सः ॥ ७९४ ॥
तदैव दैवतः कैश्चिद्भटैः प्रकटितासिभिः ।
आहत्य पातितो नीतश्चायं वार्तावशेषताम् ॥ ७९५ ॥
त्रस्तशेषैस्तदा तस्य सुभटैर्जघ्निरे ऽरयः ।
वेत्री हतो हत इति तुमुलश्च महानभूत् ॥ ७९६ ॥
इति धात्रीधवः श्रुत्वा क्रोधधूमध्वजोद्धुरः ।
उच्चैर्जल्पन्मनल्पं स ज्वालाकल्पमकल्पयत् ॥ ७९७ ॥

अस्मत्कार्यमिदं कुर्वन्नतुच्छच्छद्मसङ्गना ।
संहारितः प्रतीहारस्तेनासौ मन्त्रिणा ध्रुवम् ॥ ७९८ ॥
एतस्य यदि वृद्धस्य शिरश्छित्त्वा स्वपाणिना ।
उच्छालयामि छलिनस्तन्मे मनसि निर्वृतिः ॥ ७९९ ॥
एवमुच्चैर्लपन्गोपः कोपाटोपभटोत्कटः ।
तत्रागाद्यत्र ते सन्ति घातार्तो वेत्रिघातकाः ॥ ८०० ॥
अमात्यभृत्या नैते स्युः के ऽपि वैदेशिका इव ।
इति ध्यात्वा नरेन्द्रस्तान्दीपदृष्टानभाषत ॥ ८०१ ॥
के यूयं किं हतो वेत्रीत्युर्वीनाथे ऽथ पृच्छति ।
ऊचुस्ते ऽमर्षदष्टोष्ठा वण्ठाः कण्ठागतासवः ॥ ८०२ ॥
किमस्मान्पृच्छसि क्ष्माप दैवं पृच्छ दुराशयम् ।
अस्मदीशस्य येनैव चक्रे व्यर्थो मनोरथः ॥ ८०३ ॥
धरावासपुराधीशः शूरसेनः स्वसेवकान् ।
सुमित्रं मन्त्रिणं हन्तुं प्रैषीदस्मान्महेच्छया ॥ ८०४ ॥
यदयं दण्डयत्यस्मन्नेतारं प्रतिवत्सरम् ।
त्वामप्यस्मद्विधोः शत्रुं सर्वदा पोषयत्यलम् ॥ ८०५ ॥
स्वाम्यादेशादिहास्माभिर्बध्वे ऽद्याद्य मन्त्रिणः ।
कुतो ऽयमपतत्सिंहबन्धनं जम्बुको यथा ॥ ८०६ ॥
इत्युक्तिविकटावेशाः सुभटा प्रकटाशयाः ।
ते चत्वारो ऽपि पञ्चत्वं जग्मुस्तत्रैव घातकाः ॥ ८०७ ॥
नृपः कृतानुतापो ऽथ गत्वा पौरवरैर्वृतः ।
अमात्यं क्षमयामास बाहू धृत्वा वदन्निति ॥ ८०८ ॥
मया ते ऽपि नृकल्पस्य कल्पितो यो ऽल्पबुद्धिना ।
त्वं क्षमस्व क्षमस्व त्वमपराधमिमं मयि ॥ ८०९ ॥

व्रतं चेन्नाचरिष्यस्त्वं नाजीविष्यस्ततः पितः ।
त्वां विना नैव राज्यं मे ऽभविष्यत्साम्राज्यवैभवम् ॥ ८१० ।
तदद्यातुल्यकल्याणकारिणः पुण्यकर्मणः ।
फलं प्रत्यक्षमद्राक्षमहं पापापहं चिरात् ॥ ८११ ॥
सुकृतं जीवितव्यं ते व्रतेनानेन पोषितम् ।
शोषितं त्वत्कृतेनाद्य दुःकृतं दुर्यशश्च मे ॥ ८१२ ॥
तत्सहस्वापराधं मे प्रसीद वद सात्त्विक ।
धर्मं कारय मां तात तारयाशु भवार्णवात् ॥ ८१३ ॥
उवाच सचिवो ऽथेदं नापराधो ऽस्ति ते ध्रुवम् ।
यत्क्ष्माप सानुतापस्त्वं धर्मे धत्से ऽधुना धियम् ॥ ८१४ ।
ततः संलब्धमुद्रेण मन्त्रिणा प्रेरितो नृपः ।
जग्राहे ग्रहिणां धर्मं पूर्णचन्द्रगुरोः पुरः ॥ ८१५ ॥
मन्त्रिणः शङ्कमानो ऽथ निजे कण्ठे कुठारवान् ।
आयातः शूरसेनो ऽपि भूभुजां भूषितः श्रिया ॥ ८१६ ॥
देवार्चादानसुध्यानरथयात्रादिकर्मभिः ।
नृपो मन्त्र्युपदिष्टैः स्वं विदधे जन्मपावनम् ॥ ८१७ ॥
तत्र स्वामिनि बालो ऽपि चण्डालो ऽपि न सो ऽभवत् ।
न यो जिनाधिनाथोक्तधर्मकर्मठतां गतः ॥ ८१८ ॥
इत्थं मन्त्रीव भूपश्च कृत्वा धर्मं विशुद्धधीः ।
महाविदेहे मर्त्यत्वं प्राप्य लेभे शिवश्रियम् ॥ ८१९ ॥
ततः सुमित्रदीपेन गमिते ऽस्मिन्प्रकाशताम् ।
देशावकाशिकपथे संचरन्तु सुखं बुधाः ॥ ८२० ॥
इति देशावकाशिकव्रतविचारे सुमित्रकथा ॥
कुव्यापृतीनां स्नानादेस्त्यागो ब्रह्मव्रतं तपः ।

आहुः शिक्षाव्रतमिदं तृतीयं पौषधाभिधम् ॥ ८२१ ॥
तत्तु शुद्धोक्तचारित्रिव्रतवत्परिपाल्यते ।
अहोरात्रमथाशेषां रात्रिं यावज्जितेन्द्रियैः ॥ ८२२ ॥
भवोरगगदच्छेदे पौषवत्पौषधव्रतम् ।
आपत्तापभिदे मित्रानन्दमन्त्रिपतारिव ॥ ८२३ ॥
तद्यथा ।
धर्मनिर्मलमत्यर्थमर्थविद्योति विद्यते ।
पुरं पुष्पपुरं पुष्पचापचापलपेशलम् ॥ ८२४ ॥
तत्र युद्धसुधासत्रममित्रवसुधाभृताम् ।
बभूव भूविभुर्भानुर्जितभानुः स्वतेजसा ॥ ८२५ ॥
मन्त्री तस्य धरित्रीन्दोर्मित्रानन्द इति श्रुतः ।
अजायत धियां पात्रं छात्रीकृतबृहस्पतिः ॥ ८२६ ॥
मध्येसदः कदाप्युच्चैर्नरेन्द्रसचिवेन्द्रयोः ।
व्यवसायस्य पुण्यस्य प्रतिष्ठाने ऽभवत्कलिः ॥ ८२७ ॥
क्रुधाथ वसुधानाथः प्रोवाच सचिवं प्रति ।
व्यवसायः प्रमाणं न प्रमाणं पुण्यमेव चेत् ॥ ८२८ ॥
ततः स्वपुण्यमाहात्म्यात्त्वं पुण्यबलगर्वितः ।
गृहाण मम राज्यर्द्धिमित्थं संवर्धिमत्सरः ॥ ८२९ ॥
॥ युग्मम् ॥
यश्च कश्चित्पुरीमध्याद्भवन्तमनुयास्यति ।
तत्कण्ठात्तृषितो ऽसौ मत्खड्गः पास्यति शोणितम् ॥८३०॥
गच्छ तुच्छमते तूर्णं पूर्णं कुरु निजं वचः ।
गृहे न हन्त गन्तव्यमित एवान्यतो व्रज ॥ ८३१ ॥
इति क्षितिपतेरुक्त्वा विज्ञाय सचिवाग्रणीः ।

एकाक्येव दृढावेशो ऽचलदेशान्तरं प्रति ॥ ८३२ ॥
पद्भ्यामेवादिभूचारविपद्भ्यामद्भुतोद्यमः ।
स निःससार नगरान्नगराज इवोन्नतः ॥ ८३३ ॥
गच्छन्नतुच्छपुण्यो ऽसौ श्रान्तो मध्यन्दिने ऽधिकम् ।
ददर्शेन्दोरिव कलाकोटीभिर्घटितं सरः ॥ ८३४ ॥
यल्लोललहरीहस्तगणं भृङ्गघनस्वनाः ।
आह्वातुं तृषितान्वक्त्रकोटीरब्जच्छलादधौ ॥ ८३५ ॥
स कृतस्नानपानो ऽत्र स्थितः पाल्यां तरोस्तले ।
नभसो रभसोत्तीर्णमपश्यत्पुरुषं पुरः ॥ ८३६ ॥
संध्यायां चिन्तितं सैन्यं दास्यत्येष मणिस्तव ।
पश्चादपि श्रियं भूरि पूरयिष्यति पूजितः ॥ ८३७ ॥
इत्युक्त्वा किं किमित्युक्तेरुच्चैश्चित्रस्य मन्त्रिणः ।
पाणौ चिन्तामणिं मुक्त्वा स द्यां दिव्यनरो ऽगमत् ॥८३८॥
॥ युग्मम् ॥
अथाब्जैर्मणिमभ्यर्च्य रोमाञ्चितवपुश्चिरम् ।
विरचय्य चमूचक्रं सायं सो ऽगात्पुरं प्रति ॥ ८३९ ॥
गजवाजिरथाभोगमग्ननिस्वाननिस्वनः ।
तैर्बलैर्वलयामास मित्रानन्दो ऽथ तत्पुरम् ॥ ८४० ॥
कश्चकार पुरीरोधमिति बोधकृते नृपः ।
हेरिकान्प्रेरयामास तान्प्रेक्ष्य सचिवो ऽब्रवीत् ॥ ८४१ ॥
भुजागर्वपराभूतभूरिभाग्यभरोद्भवः ।
अये मद्वचसा वाच्यो भवद्भिरिति भूपतिः ॥ ८४२ ॥
पुण्यात्तसैन्यसंदर्भो मित्रानन्दः समागमत् ।
विक्रमाक्रान्तविश्वो ऽसि संग्रहीतुं बहिर्भव ॥ ८४३ ॥

एवमाभाष्य संभूष्य प्रहिताः सचिवेन ते ।
गत्वा व्यज्ञपयन्राज्ञे सर्वमथ यथातथम् ॥ ८४४ ॥
स्वस्थीभूयाथ भूजानिः कैश्चित्परिवृतो जनैः ।
कृती तत्र ययौ यत्र मित्रानन्दः स्वयं स्थितः ॥ ८४५ ॥
अभ्युत्तस्थौ तदा मन्त्री निभाल्य नृपतिं पुरः ।
इष्टे हि दर्शनं यावद्विरोधो युज्यते सताम् ॥ ८४६ ॥
प्रणिपत्याथ पृथ्वीन्दुर्निष्कपीठे निवेशितः ।
बलादधासने स्वस्य सचिवं न्यस्य सो ऽवदत् ॥ ८४७ ॥
वरेण्यं पुण्यमस्त्येव शौर्यादिव्यवसायतः ।
पुण्यभाजां हि जायन्ते किंकरा व्यवसायिनः ॥ ८४८ ॥
भवद्भाग्योदयः कश्चिदयमीदृक्चमूचयः ।
येनाहं तव भर्तापि भृत्यवद्भामितो ऽग्रतः ॥ ८४९ ॥
किं त्वसावियती भूतिर्बभूव भवतः कुतः ।
इत्युक्तो भूभुजा मन्त्री स्वचरित्रमचीकथत् ॥ ८५० ॥
अथ विस्मयविस्मेरनेत्रपत्रजनेक्षितः ।
मित्रानन्देन सानन्दः पृथ्वीन्दुः प्राविशत्पुरम् ॥ ८५१ ॥
उपायैः फलितं श्रीभिर्मणिमाहात्म्यतो ऽधिकम् ।
ववृधे च नरेन्द्रेण मन्त्रिणो मैत्र्यमद्भुतम् ॥ ८५२ ॥
कदापि भानुभूपेन सहोत्तंसितसंसदम् ।
आरादारामिको ऽभ्येत्य तं धर्मज्ञं व्यजिज्ञपत् ॥ ८५३ ॥
दिष्ट्याद्य वर्धसे स्वामिन्नङ्गी धर्म इवागमत् ।
मुनिः सुमन्धरो नाम ज्ञानी लीलावनीं तव ॥ ८५४ ॥
प्रीत्याथ तस्मै दत्त्वाङ्गभूषणानि क्षणेन सः ।
जगामारामजगता जगतीपतिना समम् ॥ ८५५ ॥

मुनिं नेत्रामृतं नेत्रैरापीय नृपमन्त्रिणौ ।
नत्वाथ न्यविशेतां तौ पातुं कर्णामृतं वचः ॥ ८५६ ॥
मुनीशं देशनान्ते ऽथ पप्रच्छ पृथिवीपतिः ।
धन्यस्य कथमस्यासन्विपत्काले ऽपि संपदः ॥ ८५७ ॥
अथाचष्ट मुनिः स्पष्टविभवा भुवि भाति पूः ।
धन्यभारच्युतेव द्यौः पद्मनेत्रेति विश्रुता ॥ ८५८ ॥
तत्रादित्य इति क्ष्मापस्तत्प्रसादास्पदं धनी ।
श्रेष्ठी सुदत्त इत्यासीज्जिनधर्मधुरन्धरः ॥ ८५९ ॥
सो ऽन्यदा पापरोगाणामौषधं पौषधं श्रितः ।
तस्थौ निशि निशान्ते ऽसौ शान्तेन मनसा रसात् ॥८६०।
तदा कश्चिदवस्थापविद्यावेदी तदोकसि ।
भूरिभीमपरीवारः प्राविशत्तस्करग्रणीः ॥ ८६१ ॥
विद्या चौरस्मृता लोकं तत्रामूर्छयताखिलम् ।
सुदत्ते सा नमस्कारमन्त्रध्याने तु नास्फुरत् ॥८६२ ॥
तं पश्यन्तमपश्यन्त एकान्तस्थं मलिम्लुचाः ।
जगृहुस्तद्गृहद्रव्याण्यखिलान्यस्खलन्मुदः ॥ ८६३ ॥
द्राग्भञ्जन्ति स्म मञ्जूषाः कपाटौघमपाटयन् ।
द्रव्याय स्पष्टथामासुरमी भूमिगृहाण्यपि ॥ ८६४ ॥
अहो महात्मनस्तस्य धर्मावष्टम्भयन्त्रितम् ।
जाते ऽप्युत्पातजाते ऽस्मिन्न ध्यानाच्चलितं मनः ॥८६५॥
अनागतेष्वथागत्य गृह्णत्सु धनपद्धतीः ।
तेषु यातेषु च ध्यानभेदो ऽभूत्तस्य न क्वचित् ॥ ८६६ ॥
जने शोचत्यथोन्निद्रे धननाशं निशात्यये ।
व्यलसद्दिनकृत्येषु श्रेष्ठी पारितपौषधः ॥ ८६७ ॥

क्रमाद्दर्जयतो भाग्यभङ्गीसङ्गीकृतात्मनः ।
धनधोरणयस्तस्य भूरयो ऽप्यभवन्पुनः ॥ ८६८ ॥
स कदाचिदवस्वापविद्याविच्चौरचक्रराट् ।
एकं तल्लोप्त्रतो हारं विक्रेतुं प्राप तां पुरीम् ॥ ८६९ ॥
तं हारं श्रेष्ठिनस्तस्य वणिक्पुत्रो धनाभिधः ।
उपलक्ष्यार्पयामास तलारक्षाय तस्करम् ॥ ८७० ॥
तद्विज्ञाय द्रुतं गत्वा श्रेष्ठी तत्र कृपाक्षयः ।
स्वं वणिक्पुत्रमाक्षिप्य तलारक्षमदो ऽवदत् ॥ ८७१ ॥
धनो ऽयं नैव जानाति चौरव्यतिकरात्पुरा ।
अस्मै महात्मने मूल्यान्मया हारो ऽयमर्पितः ॥८७२ ॥
तदयं मुच्यतां मास्मिन्नुच्यतां चौर्यदुर्यशः ।
रोहिणीयोगमात्रार्क्षं स्यात्कलङ्कीन्दुवद्रविः ॥ ८७३ ॥
द्वादशव्रतधर्तायं नासत्यं वदतीत्यथ ।
सुदत्तवचसामुच्चैस्तलारक्षो मलिम्लुचम् ॥ ८७४ ॥
असत्यमपि तत्सत्यं यत्प्राणिहितमित्यसौ ।
असत्ययापि वाचामुं श्रेष्ठी चौरममूमुचत् ॥ ८७५ ॥
श्रेष्ठी तं भोजयित्वा च वरे दत्त्वा च चीवरे ।
नाकृत्येषु मतिः कृत्येत्युक्त्वा च प्राहिणोत्कृती ॥ ८७६ ॥
श्रेष्ठीन्दोरुपकारेण शिक्षया च द्रवन्मनाः ।
किं स्यादकृत्यमित्येष विज्ञातुं धारयन्धियम् ॥ ८७७ ॥
निर्यन्पुराद्बहिर्भागभूमौ शुभ्रप्रभाभिधम् ।
धर्मोपदेशान्ददतं मुनिराजमलोकत ॥ ८७८ ॥ कुलकम् ॥
श्रुत्वा तदेवनां ज्ञातकृत्याकृत्यविवेचनः ।
मुनीन्दोस्तस्य पादान्ते दीक्षां दक्षो ऽयमग्रहीत् ॥८७९ ॥

चारित्रं शुद्धमासेव्य सौधर्मे ऽसौ सुरो ऽभवत् ।
सुदत्तस्तु विपद्यायमभवत्सचिवस्तव ॥ ८८० ॥
संपत्सु ह्रियमाणासु यद्भभञ्ज न पौषधम् ।
पदे पदे तदत्रायं विचित्राः प्राप संपदः ॥ ८८१ ॥
स तु चौरः सुरीभूतः स्मरन्नुपकृतीः कृती ।
चिन्तार्तायं ददौ रत्नं प्रस्तावं प्राप्य मन्त्रिणे ॥ ८८२ ॥
प्रभो द्रक्ष्यति तं मन्त्रीत्युक्ते राज्ञा मुनिर्जगौ ।
मन्त्रिणो जीवितान्ते तद्दर्शनं भावि मुक्तये ॥ ८८३ ॥
यतो नन्दीश्वरे देवान्नन्तुमस्याभिलाषिणः ।
समयज्ञसुरानीतविमानस्थस्य गच्छतः ॥ ८८४ ॥
शुद्धध्यानलयस्यान्तःकृतकेवलितायुजः ।
लवणाब्धेरुपर्येव मुक्तिर्भूप भविष्यति ॥८८५॥ युग्मम् ॥
इत्याकर्ण्य मुनेर्वाचमुदश्चद्धर्मबुद्धयः ।
सर्वे ऽप्युर्वीश्वराद्यास्ते सानन्दा मन्दिराण्यगुः ॥ ८८६ ॥
एवं प्राक्पुण्यपूर्णर्द्धिमित्रानन्दनिदर्शनात् ।
भजन्तु भवपौषाय पौषधे सुधियो धियम् ॥ ८८७ ॥

इति पौषधव्रतविचारे मित्रानन्दकथा ॥

दानं चतुर्विधाहारवस्त्रपात्रौकसां मुनौ ।
शिक्षाव्रतं तदतिथिसंविभागं तुरीयकम् ॥ ८८८ ॥
एकावयवतो ऽप्येतत्सेवितं श्रद्धयाधिकम् ।
सुमित्राया इवोन्नत्यै जायते द्वादशं व्रतम् ॥ ८८९ ॥

तद्यथा पृथिवीभूषा श्रीवसन्तपुराभिधम् ।
पुरन्दरपुरश्रीणां विवर्तो वर्तते पुरम् ॥ ८९० ॥
विक्रमाक्रान्तदिक्चक्रः क्ष्माशक्रो विक्रमाभिधः ।

नृपः कृपापवित्रो ऽभूत्तत्र क्षत्रशिरोमणिः ॥ ८९१ ॥
तन्मन्त्रीशो वसुर्जज्ञे यद्बुद्धिभरनीरजे ।
राज्यलक्ष्मीः सुखं तस्थौ विकाशाद्ये दिवानिशम् ॥८९२॥
जिनदासाभिधः श्रेष्ठी तस्य पृथ्वीपतेः प्रियः ।
बभूव तीर्थकृद्धर्मधौरेयः श्रेयसां निधिः ॥ ८९३ ॥
तदर्जितैरसंख्यातैः स्वर्णरत्नैरपि ध्रुवम् ।
निष्पाद्येते क्षितौ मेरुरोहणावपरावपि ॥ ८९४ ॥
यक्षराजो धनाध्यक्ष इत्येव ख्यातिमर्हति ।
धनदो जिनदासस्तु स स्तुतो ऽर्थिगणैरपि ॥ ८९५ ॥
धनस्य सार्थवाहस्य सुतां काशिनिवासिनः ।
ख्यातां रत्नवतीं नाम्ना व्यवहारी व्युवाह सः ॥८९६॥
जिनदासस्य विश्वासपात्रं लक्ष्मीधराभिधः ।
विप्रो बभूव भ्रातेव चरमः परमः सुहृत् ॥ ८९७ ॥
न मन्त्री न कलत्रं न पुत्रो धात्रीपतेः पुनः ।
नान्यत्किंचिच्च तस्याभूज्जिनदास इव प्रियम् ॥ ८९८ ॥
मित्रे नृपः कदाप्यत्र मन्त्रितामपि दास्यति ।
राजमन्त्रीति तं हन्तुं विरुद्धं विदधे मनः ॥ ८९९ ॥
जिनदासस्तु दाक्ष्येण परचित्तोपलक्षकः ।
चक्षुर्वचोविकारेण तं विरुद्धमबुध्यत ॥ ९०० ॥
ततो भूपालमापृच्छ्य तीर्थयात्रापदेशतः ।
पत्नीं रत्नवतीं प्रैषीदसौ पितृगृहं प्रति ॥ ९०१ ॥
अथ चौरच्छलेनासौ तमालब्धुं कृतादरः ।
मन्त्री निशि तदावासमार्गं भृत्यैररोधयत् ॥ ९०२ ॥
मत्वेति कर्मकृद्वेषः सह लक्ष्मीधरेण सः ।

प्रभाववन्ति रत्नानि गृहीत्वा निःसृतः पुरात् ॥ ९०३ ॥
अजानन्नपि पन्थानं गच्छन्नेष निरन्तरम् ।
अरण्ये पतितः क्वापि तृष्णातरललोचनः ॥ ९०४ ॥
तत्र वस्त्रलवाबद्धां रत्नालीं सुहृदः करे ।
रीणो ऽयमर्पयामास जीवितव्यमिवात्मनः ॥ ९०५ ॥
क्वापि पश्यन्पथः कूपे रत्नलोभाद्विजेन सः ।
करभ्यां पातितः प्रेयं विश्वासः को ऽस्तु जीवताम् ॥९०६॥
स तदा पतितः कूपे को ऽयमित्यभृणोद्वचः ।
उपलक्ष्य स्वरेणाथ प्राह रत्नवतीं प्रियाम् ॥ ९०७ ॥
अयि त्वमपि कूपे ऽत्र पतितासि कुतः प्रिये ।
स ते परिजनः क्वास्ति धिग्धिग्विधिविडम्बितम् ॥९०८॥
साप्यवस्थागतं कान्तं वीक्ष्य प्राप्तं च संनिधौ ।
बाष्पं दधौ दुःखानन्दसंकरसंकटम् ॥ ९०९ ॥
मन्वाना धन्यमात्मानं तत्रापि प्रियदर्शनात् ।
ऊचे सतीशिरोरत्नमियं रत्नवती ततः ॥ ९१० ॥
तत्सर्वमटवीमध्ये गृहीतमिह तस्करैः ।
कान्दिशीकः समग्रो ऽपि ययौ परिजनः क्वचित् ॥९११॥
तेषु मद्भोगलुब्धेषु वेगादहमिहापतम् ।
वरं हि मरणं स्त्रीणां न पुनः शीलखण्डनम् ॥ ९१२ ॥
कृतान्तमुखरूपे ऽस्मिन्कूपे ऽपि पतिता प्रिय ।
जीवितास्मि भवद्वक्त्रालोकभोक्तव्यकर्मभिः ॥ ९१३ ॥
कथ्यतां च कथं पातः कूपे ऽत्र भवतामपि ।
सचिवः स च विद्वेषी विदधे किं विरोधतः ॥ ९१४ ॥
जगाद जिनदासो ऽथ सचिवे मारणोत्सुके ।

गृहतः कर्मकृत्कूटादेको ऽहं निशि निःसृतः ॥ ९१५ ॥
निरन्तरविहारेण कान्तारे ऽत्र समागतः ।
तृषितो ऽस्मिन्पयः पश्यन्पादस्खलनतो ऽपतम् ॥ ९१६ ॥
अनुक्तमित्रदौष्ट्यस्य तदा तस्यातिसत्त्वतः ।
कूपे ऽस्मिन्निर्जले ऽप्यम्भो नाभिदघ्नं ददुः शिराः ॥९१७॥
अथ तौ प्रथितस्वेदखेदतृष्णापरम्परौ ।
जितक्षीरेण नीरेण तेन प्रीतिं परां गतौ ॥ ९१८ ॥
अथ कूपे ऽत्र केनापि सज्जरज्जुनियन्त्रितः ।
क्षिप्तो ऽम्भःकृतये कुम्भः पुण्यकुम्भ इवैतयोः ॥९१९॥
ततो ऽन्तःकुम्भरोधेन तौ मत्वा तेन धीमता ।
मेलयित्वा जनान्कृष्टौ कूपान्मृत्योर्मुखादिव ॥ ९२० ॥
यावत्तौ निःसृतौ सार्थस्तावदग्रे स्थितो महान् ।
निर्गतं मिथुनं कूपादिति कोलाहलं व्यधात् ॥ ९२१ ॥
तच्छब्दात्कौतुकी सार्थवाहो ऽपि द्रुतमागतः ।
सुतां पतियुतामग्रे पश्यन्मनसि विस्मितः ॥ ९२२ ॥
धनाख्यं जिनदासो ऽपि सार्थवाहं निरीक्ष्य तम् ।
श्वशुरो ऽयमिति ज्ञात्वा नमश्चक्रे चमत्कृतः ॥ ९२३ ॥
ननाम नितरां प्रीत्या पितरं रत्नवत्यपि ।
अहो भाग्यस्य सौरभ्यं चिन्तयन्ती स्वचेतसि ॥ ९२४ ॥
अथास्मै सार्थवाहाय किमेतदिति पृच्छते ।
जिनदासः स्ववृत्तं तदादितो ऽपि न्यवेदयत् ॥९२५॥
तादृक्स्वजनसंपर्कनिपीतव्यापदूर्मयः ।
अथ ते तोषपोषेण तस्थुर्वसनवेश्मनि ॥ ९२६ ॥
अथास्मिंश्चरिते चित्रे गत्वाकर्णेव शंसिते ।

तद्वीक्षाकौतुकेनेव संध्यायां विधुरुद्ययौ ॥ ९२७ ॥
तोयपात्रं गृहीत्वाथ जिनदासो निशागमे ।
तरूनन्तरयामास देहचिन्ताकृते बहून् ॥ ९२८ ॥
अथेन्दुद्युतिभिर्वीक्ष्य सुप्तं कंचिदसौ नरम् ।
यावद्यात्यग्रतस्तावन्मृतो लक्ष्मीधरः पुमान् ॥ ९२९ ॥
मृतमक्षतमेवैनं वीक्ष्यासौ मित्रवत्सलः ।
भुजङ्गदशनं तस्मिन्निश्चिनोति स्म दुःखितः ॥ ॥९३०॥
आदाय स्वान्मणींस्तस्मात्कृष्ट्वा फणिमणिं ततः ।
तदीयस्पर्शपूतेन पयसा तमजीवयत् ॥ ९३१ ॥
उपकृत्युपकुर्वाणा म्रियन्ते धरया न के ।
अपकृत्युपकारी यस्तेन तु म्रियते धरा ॥ ९३२ ॥
वीक्ष्य लक्ष्मीधरो जीवञ्जिनदासमथाग्रतः ।
त्रपानतमुखाम्भोजस्तत्सौहार्दमिषानमत् ॥ ९३३ ॥
अथैनमाह माहात्म्यमयो रत्नवतीपतिः ।
अन्तःप्रेमसुधासिन्धुतरङ्गोत्तरया गिरा ॥ ९३४ ॥
पादस्खलनतः कूपे पतितो ऽहं त्वयोज्झितः ।
इति किं लज्जसे केन स्वो ऽप्यनुम्रियते जनः ॥९३५॥
मिलितो ऽस्मिन्ममारण्ये सार्थवाहो ऽधुना धनः ।
काशिं यास्याम्यहं गच्छ स्वावासं प्रति संप्रति ॥९३६॥
इत्युक्त्वा प्रेषितो विप्रस्तपमाणस्तदा ययौ ।
सहैव सार्थवाहेन सो ऽपि वाणारसीमगात् ॥ ९३७ ॥
यावल्लक्ष्मीधरो याति वसन्तपुरपत्तनम् ।
जिनदासवियोगेन तावदार्तो ऽस्ति भूपतिः ॥ ९३८ ॥
इति लक्ष्मीधरो मत्वा गत्वा क्षितिपतेः पुरः ।

स्वरूपं जिनदासस्य मन्त्रिणश्च न्यवेदयत् ॥ ९३९ ॥
श्रुत्वेति भूभुजा मन्त्री कारागारे नियन्त्रितः ।
पश्यतो जिनदासस्य हन्तव्यो ऽयमिति क्रुधा ॥ ९४० ॥
अथ जङ्घालकरभारूढो वीरद्वयान्वितः ।
जगाम जिनदासाय काशीं गुप्तो नृपः स्वयम् ॥ ९४१ ॥
कार्यो मन्त्री स एवेति वचो निश्चित्य धर्मधीः ।
सभार्यः सह भूपेन स वसन्तपुरं ययौ ॥ ९४२ ॥
सर्वैश्वर्यं नृपादाप्य सचिवायापकारिणे ।
मन्त्रित्वं स ददौ धीमान्न द्विष्टा ह्युपकारिणः ॥ ९४३ ॥
अथागाद्वनपालो ऽत्र वर्धयन्निति भूपतिम् ।
वने ऽभूत्केवलज्ञानं शङ्करर्षेस्तपस्यतः ॥ ९४४ ॥
तुष्टिदानं प्रदायास्मै वने ऽगाद्विक्रमो नृपः ।
सहैव जिनदासेन धुर्या धर्मे हि तादृशाः ॥ ९४५ ॥
मुनिं नत्वोपदेशं च श्रुत्वावादीददो नृपः ।
मन्मित्रे जिनदासे किं सापदः संपदः प्रभो ॥ ९४६ ॥
अथ ज्ञानामृताम्भोधिर्दशनद्युतिवीचिभिः ।
तत्पुण्यवेलाविपिनं प्लावयन्प्रभुरभ्यधात् ॥ ९४७ ॥
कौशाम्ब्यां दत्तनामाभून्मातृभक्तो धनी वणिक् ।
सुमित्राख्या जनन्यस्य दयिता च जयाह्वया ॥ ९४८ ॥
दानमेव गृहस्थानां मुख्यो धर्म इति स्फुटम् ।
स्वगुरोर्वाचमाचख्यौ सुमित्रा सूनवे ऽन्यदा ॥ ९४९ ॥
दानोन्मुखं मनो मातुर्मत्वा मतिमतां वरः ।
आनन्दाज्जननीं नत्वा सभार्यः स व्यजिज्ञपत् ॥ ९५० ॥
यथाविधि सुपात्रेषु कृपापात्रेष्वपि स्वयम् ।

देहि त्वं हि धनं धान्यं त्वत्प्रसादाद्गृहे बहु ॥ ९५१ ॥
सत्फलं नियमान्मत्वेत्येषाभिग्रहमग्रहीत् ।
स्वेच्छया विधिवद्दानं दत्त्वा भोक्ष्ये ऽहमन्वहम् ॥९५२॥
ततः सुतस्नुषाभ्यां चानुमताभिमतं निजम् ।
पूरयन्ती मुदा कालं कियन्तं सात्यवाहयत् ॥ ९५३ ॥
दैवज्ञैः कथिते ऽत्यर्थमवृष्टे दारुणे ऽन्यदा ।
दुर्भिक्षे सर्वतो जाते जया दत्तमदो ऽवदत् ॥ ९५४ ॥
मूले ऽपि रौरवः कालो ऽपत्यपूर्णं च ते गृहम् ।
अतः स्वां जननीं दानात्कुटुम्बाधार वारय ॥ ९५५ ॥
अथ तेन निषिद्धाम्बा सुमित्रा दानतः क्षणात् ।
निःसत्त्वतामपि ह्यङ्गीकुर्वन्ति स्त्रीजिता नराः ॥ ९५६ ॥
संस्मृत्य नियमं सा स्वं निश्चिकायेति चेतसि ।
अदत्ते भोज्यमात्रे ऽपि न भोक्ष्ये ऽन्ते ऽपि जन्मनः॥९५७॥
उपवासाष्टकस्यान्ते तस्याः सत्त्वमहानिधेः ।
वृत्तमज्ञापयद्दत्तं दुर्यशःशङ्किता जया ॥ ९५८ ॥
दत्तेन बन्धुभिः सार्धं निर्बन्धं बध्नताधिकम् ।
नवमे ऽह्नि भोक्तुमुपवेशिता सेत्याचिन्तयत् ॥ ९५९ ॥
कारणं भोजनत्यागे विदन्नपि सुतः स्वयम् ।
न मां दापयते किंचिद्धिग्मे दुःकर्मजृम्भितम् ॥ ९६० ॥
तत्स्वभोज्यामिदं किंचित्कस्मैचिच्चेद्ददे ऽधुना ।
तन्मे स्यान्नियमः श्राध्यो ऽश्राध्यो न स्याच्च मे सुतः ।९६१।
ध्यायन्त्येति गृहायातः सहसैव मुनिस्तदा ।
अदृश्यत तया मूर्तः पुण्यराशिरिवात्मनः ॥ ९६२ ॥

साधो विशुद्धमाहारं गृहाणानुगृहाण माम् ।
वदन्त्येति सहर्षाश्रु प्रत्यलाभि मुनिस्तया ॥ ९६३ ॥
गन्धाम्बुपुष्पवर्षान्ते ऽवदच्छासनदेवता ।
धन्ये मासोपवासी यत्पारणं कारितस्त्वया ॥ ९६४ ॥
तत्ते सत्त्वभवाद्दानाच्छान्ता दृष्टिहृतो ग्रहाः ।
अस्माद्गर्जिरवादिव्याद्वृष्टो दुर्भिक्षहृद्धनः ॥ ९६५ ॥
॥ युग्मम् ॥
अत्रोत्सवे कृते राज्ञा पौरैश्चाक्षतपात्रिभिः ।
मातरं क्षमयामास नत्वा दत्तो जयान्वितः ॥ ९६६ ॥
ते ऽथ धर्मं व्यधुः शुद्धं श्रद्धावन्तो निरन्तरम् ।
भुक्त्वायुस्तत्र जज्ञे ऽत्र सुमित्रात्मा नृपो भवान् ॥९६७॥
दत्तात्मा जिनदासो ऽभूज्जयात्मा रत्नवत्यपि ।
दानरोधाद्भूलक्ष्मीस्त्वन्मित्रे सकृदन्तरा ॥ ९६८ ॥
श्रुत्वेति प्राग्भवं स्मृत्वा गुरुं नत्वा गताः पुरम् ।
धर्मध्यानरताः प्रापुर्नृपाद्यास्ते महोदयम् ॥ ९६९ ॥
इत्याकर्ण्य जनाः सौम्यं सुमित्राया निदर्शनम् ।
व्रतं सेवध्वमतिथिसंविभागं शुभास्पदम् ॥ ९७० ॥
॥ इत्यतिथिसंविभागव्रतविचारे सुमित्राकथा ॥
एवं निशम्य सम्यक्त्वमूलव्रतविचारणाम् ।
द्विपृष्टः प्राप सम्यक्त्वं श्राद्धत्वं विजयः पुनः ॥९७१॥
भूरयो ऽप्यभजन्भर्तुः पुरो भद्रकतां जनाः ।
श्रावकत्वं यतित्वं च चञ्चदुत्सवचञ्चवः ॥ ९७२ ॥
महीमहीनसुकृतां कुर्वन्मोहतमो हरन् ।
विजहार यशोहारनायको जिननायकः ॥ ९७३ ॥

देशनापदपीयूषजीमूतो भूतलं विभुः ।
क्रमेण जनयामास धर्मबीजाङ्कुराङ्कितम् ॥ ९७४ ॥
[इतश्च भूषयत्युर्वीमखर्वसुकृता पुरी ।
संपन्नसंपत्संपाता चम्पा तारुण्यवद्दिवः ॥ ९७५ ॥
वसुपूज्ये जयायुक्ते स्वर्गस्थे वासुपूज्यजः ।
मघवा नामतस्तस्यामवनीमघवाजनि ॥ ९७६ ॥
कटाक्षपातैः कामस्य काण्डताण्डवपण्डिता ।
अभूद्दलक्ष्यवक्त्रेन्दुलक्ष्मीर्लक्ष्मीस्तदङ्गना ॥ ९७७ ॥
अनयोर्जयसेनाद्याः सूनवो बहवो ऽभवन् ।
तेषामुपर्यभूत्पुण्यारोहिणी रोहिणी सुता ॥ ९७८ ॥
स्वस्वव्यवस्थावस्थानश्लाघ्यरुग्वर्णवर्णना ।
याराजद्रूपराजस्य राजधानीव जङ्गमा ॥ ९७९ ॥
सकलोद्यत्कलावल्लेर्गुणद्रुमवनावनेः ।
यस्या यशःप्रसूनानि कालीचक्रे न मन्मथः ॥ ९८० ॥
तां मत्तयौवनां वीक्ष्य नृपः समदसंमदः ।
अस्या योग्यं वरं ख्यात सचिवानूचिवानिति ॥ ९८१ ॥
ततः सुबुद्धिसिद्धार्थसमुद्रनयवादकाः ।
चत्वारः सचिवाश्चारुदृक्सम्यग्दृष्टिविष्टपाः ॥ ९८२ ॥
कलाविलासरूपश्रीकोलिशैलानिलापतीन् ।
स्थामनामान्वयस्थानैराख्यायेदं न्यवेदयन् ॥ ९८३ ॥
॥ युग्मम् ॥

स्वामिन्नमी समीभावं भजन्ते भूभुजः श्रिया ।
नैतत्तु विद्मः कुत्रापि कन्याया रमते मतिः ॥ ९८४ ॥
स्वयंवरं कुरु ततस्त्वत्कन्येयं यथारुचि ।

कंचिद्वरं वृणोत्वक्षिपरीक्षकपरीक्षितम् ॥ ९८५ ॥
तथेत्यथ नृपस्तेने तेनेह त्वरितं नृपाः ।
सर्वे ऽपि रूपगर्वेण दूताहूताः समाययुः ॥ ९८६ ॥
ते तदाहारताम्बूलचेलालंकारढौकनैः ।
महीभृता मघवता मोदयांचक्रिरे मुदा ॥ ९८७ ॥
अथार्कं कलशीकर्तुमिव नीते महोन्नतिम् ।
आनिन्यिरे नरेशास्ते स्वयंवरणमण्डपे ॥ ९८८ ॥
न रूपं पापवृत्त्यै स्यादिति वाचामुदाहृतिः ।
श्रीमान्महेन्द्रसेनाख्यः श्रीकोशलपुरेश्वरः ॥ ९८९ ॥
स्वकायकान्तिपीयूषपानानिमिषविष्टपः ।
सिंहनाथः सुधर्मैकाशिथिलो मिथिलापतिः । ॥ ९९० ॥
लावण्यामृतसिन्धूर्मितरन्मकरकेतनः ।
जिनभक्ताभिधः पुंसां रत्नं रत्नपुराधिपः ॥ ९९१ ॥
सुनेत्रानेत्रकुमुदोल्लासलीलाविशारदः ।
चन्द्रचारुमुखश्चन्द्रपुरेशश्चन्द्रवर्धनः । ९९२ ॥
प्रभापल्लवलावण्यपुष्परूपफलद्रुमः ।
जयसेनो जयत्सेनाराजी राजगृहेश्वरः ॥ ९९३ ॥
वहन्पुण्यमहाम्भोधिजलमानुषरत्नताम् ।
चन्द्रामित्रयशाश्चन्द्रामित्रः काशीपुरीश्वरः ॥ ९९४ ॥
अन्ये ऽपि सुरसंदेहकरदेहद्युतो नृपाः ।
प्रपश्चात्पञ्चबाणस्यालंचक्रुर्मञ्चसंचयम् ॥ ९९५ ॥
॥ सप्तभिः कुलकम् ॥
कुरुजाङ्गलदेशालंकारनागपुरेश्वरः ।
सूनुः श्रीवीतशोकस्य शोको विद्युत्प्रभाङ्गभूः ॥ ९९६ ॥

जगद्दृगिन्द्रियोन्निद्रभोगकर्ममहाफलम् ।
अलंचकार मञ्चं सो ऽप्युदञ्चद्गुणगौरवः ॥९९७॥ युग्मम्॥
शृङ्गारयन्ती शृङ्गारमप्यङ्गगुणगौरवैः ।
मदयन्ती मदनमप्यमन्दैर्भावसंमदैः ॥ ९९८ ॥
अङ्गनिःस्यन्दिलावण्यमस्याः सर्वाङ्गमेतु माम् ।
इत्याश्रितेव रत्नाधो रत्नेक्ष्वी प्रतिमामिषात् ॥ ९९९ ॥
रोहिणीयमियं चेति मोहयन्ती निरीक्षकान् ।
वयस्याभिर्वृता प्राप भूपकन्याथ मण्डपम् ॥ १००० ॥
॥ त्रिभिर्विशेषकम् ॥

राज्ञामथ गुणग्रामकुलनामनिवेदिनी ।
दक्षा पुरो ऽभवत्तस्या वयस्या मञ्जुभाषिणी ॥ १००१ ॥
पिबन्ती च वमन्ती च लोचनान्तेन भूभुजः ।
सखीमन्वचलन्मञ्चमध्यवर्त्मनि कन्यका ॥ १००२ ॥
नृपेषु ताड्यमानेषु तेषु पञ्चेषुपत्रिभिः ।
स स वीररसाविष्टो हृष्टो यं यं ददर्श सा ॥ १००३ ॥
यं यमैक्षिष्ट सा श्याममुखपार्श्वनृपद्वयः ।
अदिनद्वयमध्यस्थदिनवद्दिद्युते स सः ॥ १००४ ॥
उत्कण्ठाविस्मयप्रीतिदुःखभाजो महीभुजः ।
तत्र श्रीरिव कुर्वाणा समचलत्क्वचिदस्थिरा ॥ १००५ ॥
स्पृष्ट्वा स्पृष्ट्वा मुमोचाशु तद्दृष्टिरवनीभृतः ।
रोचमानमपश्यन्ती पुष्पाणीव मधुव्रता ॥ १००६ ॥
अशोकं वीतशोकस्य सुतं तस्यै प्रदर्श्य सा ।
प्रीता सखी समाचख्यौ समाचख्यौ च गुणोर्मिभिः ॥१००७॥
अथास्मिन्दक्षमात्मानमानन्दे विस्मये मनः ।

वपुः सात्त्विकभावे च मज्जयामास रोहिणी ॥ १००८ ॥
तद्रूपेण तदाकृष्टिमन्त्रज्ञेनेव सत्वरं ।
आकृष्टा वरमालां सा तत्कण्ठे क्षिपति स्म ताम् ॥१००९॥
तूर्णमर्घासने तस्य कलाबहुलतेजसः ।
रोहिणी रोहिणीवेन्दोरुपाविक्षन्मुदा ततः ॥ १०१० ॥
तत्कालप्रस्फुरत्तूर्यगीतनृत्यसमाकुलः ।
पठद्बन्दिगणः प्रीतिमयो ऽयं समयो ऽभवत् ॥ १०११ ॥
भव्यमासीद्गुणज्ञेयमद्वणोदुचितं पतिम् ।
इति स्वयंवरे सर्वैर्भूप्रियैरपि पिप्रिये ॥ १०१२ ॥
मघवापि मुदात्मीयनामोचितमहोत्सवैः ।
तयोररचयत्प्रीतः पाणिग्रहणमङ्गलम् ॥ १०१३ ॥
रोहिण्याः पुण्यमाहात्म्यादशेषान्हर्षितान्नृपान् ।
आवर्ज्य दानसंमानैर्मघवा विससर्ज च ॥ १०१४ ॥
वाग्भिर्धर्मैकधुर्याभिर्जिनधर्मानुरक्तया ।
रोहिण्या जिनधर्मानुरक्तः कान्तो ऽपि निर्ममे ॥ १०१५ ॥
तत्रैव भोगान्भुञ्जानो भूजानिसुतया सह ।
कुमारः स सुखं तस्थौ दोगुन्दक इवामरः ॥ १०१६ ॥
एत्य क्रमेलकैरब्धिलहरीचक्रमेलकैः ।
अशोकं वीतशोकस्य पुमांसो ऽन्येद्युरावयन् ॥ १०१७ ॥
अशोको ऽपि तदुत्कण्ठी रोहिणीसहितस्ततः ।
मघवन्तं समापृच्छ्य त्वरितत्वरितं ययौ ॥ १०१८ ॥
स्नातः स पौरीशृङ्गारसागरोर्मिभिरक्षिभिः ।
दधौ कुसुमवन्मूर्ध्नि पितृपादनखत्विषः ॥ १०१९ ॥
राज्ञाप्युत्थाप्य पाणिभ्यामालिङ्ग्योत्थाय च स्वयम् ।

न्यस्य सिंहासने हर्षाश्रुभिरेवाभ्यषेचि सः ॥ १०२० ॥
कारयित्वा कुमारस्य राज्यलब्धिमहोत्सवम् ।
श्रीसंयमधरोपान्ते प्रवव्राज प्रजापतिः ॥ १०२१ ॥
मन्त्रिन्यस्तमहीभारः स रोहिण्या समं नृपः ।
धर्मशृङ्गारयोरेव सेवयाहर्निशं बभौ ॥ १०२२ ॥
रसादशोकरोहिण्योः सहेलं खेलतोर्ययुः ।
ऋतुचक्रेण ददतोर्मुदं कत्यपि वत्सराः ॥ १०२३ ॥
गुणपालप्रभृतयः सविस्तारगुणास्तयोः ।
सूनवो ऽष्टावभूवन्दिग्भागा भूनभसोरिव ॥ १०२४ ॥
पुत्र्यश्च गुणमालाद्याश्चतस्रो निचितश्रियः ।
अभूवन्कामभूपालचतुरङ्गचमूसमाः ॥ १०२५ ॥
धिष्ण्ये राज्ञा सहारूढा गवाक्षे सप्तमे क्षणे ।
वसन्ततिलकां धात्रीमन्यदा रोहिणी जगौ ॥ १०२६ ॥
अक्षि निक्षिप रथ्यायां मातः किमिदमीक्ष्यते ।
आमुक्तकेशं स्त्रीवृन्दं करुणस्वरगीतभृत् ॥ १०२७ ॥
रीत्यन्तरस्फुरत्तूर्यनादप्रमितनर्तनम् ।
सुव्यक्तस्वस्तिकाकारभुजास्फालनहस्तकम् ॥ १०२८ ॥
भरतादिषु शास्त्रेषु न श्रुतं नेक्षितं क्वचित् ।
अत्याश्चर्यकरं कुर्वन्त्यमूः किं नाम नाटकम् ॥ १०२९ ॥
॥ त्रिभिर्विशेषकम् ॥

तां क्रोधादभ्यधाद्धात्री रूपगर्वः किमेष ते ।
श्रीगर्वः पतिगर्वो वा यदिहोपहसस्यमूः ॥ १०३० ॥
रोहिण्यथाह मा कुप्य मातः को ऽपि न मे मदः ।
अदृष्टपूर्वमाश्चर्यादिदं पृच्छामि तत्त्वतः ॥ १०३१ ॥

ततो धात्री जगौ पुत्रि यासौ स्त्रीवृन्दमध्यगा ।
मृतस्तस्याः सुतस्तस्य जलदानदिनं ह्यदः ॥ १०३२ ॥
ग्राहं ग्राहं गुणान्सूनोरित्यसौ बत रोदिति ।
तवापूर्वं भवे ऽमुष्मिन्नेतत्संसारनाटकम् ॥ १०३३ ॥
चेन्मृतः सूनुरस्यास्तदित्थं रोदित्यसौ कथम् ।
कानया रोदनं ज्ञातमिति धात्रीमथाह सा ॥ १०३४ ॥
रोदनं ज्ञापयामि त्वामिति हास्यं वदन्नृपः ।
तदङ्काल्लोकपालाख्यमग्रहीच्चरमं सुतम् ॥ १०३५ ॥
क्ष्मायां क्षिपामि ते पुत्रमिति जल्पन्प्रियां प्रति ।
करस्थं तं बहिर्भित्तेर्बालमान्दोलयन्नृपः ॥ १०३६ ॥
दैवादथ च्युतो बालः स महीपालपाणितः ।
वातात्फलमिवोच्चाद्रिशृङ्गशाखिशिखाग्रतः ॥ १०३७ ॥
पुरीजने परिजनेऽप्यथोद्घुष्टहहारवे ।
किंकिंवचसि रोहिण्यामनुकम्पोन्मुखे नृपे ॥ १०३८ ॥
अस्पृष्टभूतलं बालं तत्कालं पुरदेवता ।
तं नरेन्द्रासने ऽमुञ्चत्पुष्पचन्दनचर्चितम् ॥ १०३९ ॥
॥ युग्मम् ॥

स्वस्य पुत्रस्य पत्न्याश्च शृण्वन्पुण्यस्तुतिं जनात् ।
भूवरो ऽकारयत्तत्र पुत्रामृत्यूत्सवं ततः ॥ १०४० ॥
तदोद्याने चतुर्ज्ञानो मणिकुम्भाद्यसंयुतः ।
आगात्क्षमासुधाकुम्भो रूपकुम्भो महामुनिः ॥ १०४१ ॥
तत्रागात्क्षितिसुत्रामा पुत्रामात्यकलत्रवान् ।
मुनिं नत्वाशृणोज्जीवविचारां धर्मदेशनाम् ॥ १०४२ ॥
अथ पप्रच्छ पृथ्वीन्दुः पृथ्वीं भक्तिं वहन्हृदि ।

रोहिणीभाग्यसौभाग्यचमत्कृतमना मुनिम् ॥ १०४३ ॥
प्रभो किं मघवत्पुत्र्या प्राग्भवे सुकृतं कृतम् ।
यदेनां शोकलेशो ऽपि पस्पर्श न कदाचन ॥ १०४४ ॥
किं वा निरवधिः प्रीतिर्ममैतस्याः परस्परम् ।
किं वापत्यान्यमून्यस्याः शुभान्येवाखिलान्यपि ॥१०४५॥
ततः सर्वसभालोकचकोरानन्दचन्द्रिकाम् ।
शस्तां विस्तारयामास मुनीन्दुर्विंशदां गिरम् ॥ १०४६ ॥
धरित्रीश तवात्रैव पुरे नागपुरे पुरा ।
राजासीद्वसुपालाख्यस्तत्प्रिया वसुमत्यभूत् ॥ १०४७ ॥
मित्रं धात्रीपतेस्तस्य समभूद्भूरिवैभवः ।
धनमित्राभिधः श्रेष्ठी धनमित्रा च तत्प्रिया ॥ १०४८ ॥
अनयोस्तनया जज्ञे वैरूप्यैकनिकेतनम् ।
उग्रदुर्गन्धदेहत्वादुर्गन्धेत्यभिधानतः ॥ १०४९ ॥
जनेष्वनिष्टां बीभत्सरसस्येवाधिदेवताम् ।
न तां पर्यणयत्को ऽपि यौवने ऽप्यतिदुर्भगाम् ॥ १०५० ॥
संख्यातीतवसुश्चेह वसुमित्रो ऽभवद्वणिक् ।
वसुकान्ता च तत्कान्ता श्रीषेणश्च तदङ्गजः ॥ १०५१ ॥
स सप्तव्यसनव्यग्रः श्रीषेणः क्वापि चौर्यकृत् ।
वध्योर्वीं नेतुमारेभे वधाय पुररक्षकैः ॥ १०५२ ॥
राज्ञो विज्ञप्तिमारच्य धनमित्रो विमोच्य तम् ।
वसुभिर्वाग्भिरावर्ज्य दुर्गन्धां पर्यणाययत् ॥ १०५३ ॥
अपि शोचन्वधोन्मुक्तिं स तदुर्गन्धबाधया ।
कथंचिद्गमयित्वाहर्निशि निःसृत्य यातवान् ॥ १०५४ ॥
दानं दातुं नियुक्ताथ पित्रा भिक्षाचरेष्वसौ ।

भिक्षामपि न तत्पाणिगृहीतां कश्चिदग्रहीत् ॥ १०५५ ॥
श्रुत्वाथ धर्मं साधुभ्यस्तन्निष्ठा गृह एव सा ।
अनातुरेव शान्तात्मा मातुरेव तटे ऽचरत् ॥ १०५६ ॥
राजन्नन्येद्युरुद्याने ऽत्रैव ज्ञानामृतार्णवः ।
अमृतासव इत्यागान्नित्यागाधमहो मुनिः ॥ १०५७ ॥
विज्ञाय धनमित्रोक्त्या तमत्र नृपतिर्यतिम् ।
आययौ मुदितस्वान्तः सान्तःपुरपुरव्रजः ॥ १०५८ ॥
नत्वा नृपे निविष्टे ऽथ युक्तिव्यक्तक्रमं मुनिः ।
जगौ विचारं जीवानां धर्माधर्मगतीश्च ताः ॥ १०५९ ॥
प्रमोदविशदस्तूपे भूपे दुर्गन्धया मुनिः ।
दुर्गन्धकारणं स्वस्य पृष्टः स्पष्टं जगाद सः ॥ १०६० ॥

जम्बूद्वीपस्य भरते क्षेत्रे पात्रं शुभश्रियाम् ।
सुराष्ट्रो नाम देशो ऽस्ति देशानां मौलिमण्डनम् ॥ १०६१ ॥
स्वसौन्दर्यसमाकृष्टदैवतस्तत्र रैवतः ।
पर्वतो विद्यते हृद्यांह्रिपराजिविराजितः ॥ १०६२ ॥
तस्याद्रेः पश्चिमे भागे भागधेयमिव श्रियाम् ।
नाम्नास्ते गिरिनगरं गीर्वाणनगरोपमम् ॥ १०६३ ॥
तत्रासीत्पृथिवीपालः पृथिवीपालसंज्ञया ।
जिनधर्ममतारामममतासोमपालकः ॥ १०६४ ॥
तस्य सिद्धमतिः प्रेमरससिद्धिरभूत्प्रिया ।
दधौ प्रियप्रियत्वेन जिनधर्मे ऽपि सा धियम् ॥ १०६५ ॥
उद्यानिकायामन्येद्युर्व्रजन्सान्तःपुरो नृपः ।
गिरेर्यान्तं पुरे ऽपश्यन्महर्षिं गुणसागरम् ॥ १०६६ ॥
सो ऽथ प्राह प्रियां मासोपवासिनममुं मुनिम् ।

विधाप्य पारणं तूर्णमेहि यामः शनैर्वयम् ॥ १०६७ ॥
क्रुधा स्वेच्छागतिच्छेदादाज्ञालोपाच्च बिभ्यती ।
ततः सिद्धमतिः साधुं पारणायालये ऽनयत् ॥ १०६८ ॥
कटुतुम्बीफलं साथ हयेभ्यः परिपाचितम् ।
जनेन वार्यमाणापि तस्मै खाद्ययुतं ददौ ॥ १०६९ ॥
तदाहृत्य मुनिर्दह्यमानकुक्षिः-श्रिताश्रयः ।
आहारादिपरीहारहृद्यः सद्यो दिवं ययौ ॥ १०७० ॥
तत्परिज्ञाय राज्ञाथ सर्वमादाय सा रुषा ।
शरावमालामालम्ब्य गले निर्गमिता पुरात् ॥ १०७१ ॥
अथोडुम्बरकुष्ठेन गलिता सप्तमे ऽहनि ।
विशीर्णकर्णनासोष्ठा मृत्वागात्षष्ठदुर्गतौ ॥ १०७२ ॥
उद्वृत्ता दुर्गतेः सा तु नरकेष्वपि सप्तसु ।
असंख्यदुःखदुष्टात्मतिर्यग्जन्मान्तरास्वगात् ॥ १०७३ ॥
सर्पिण्युष्ट्री शुनी क्रोष्ट्री वराही गृहगोधिका ।
मूषी जलौका काक्योतुस्त्री खरी साथ गौरभूत् ॥१०७४॥
सा तु गौर्जीवितस्यान्ते पीडया पतिता पथि ।
शुश्राव मुनिभिर्दत्तां परमेष्ठिनमस्क्रियाम् ॥ १०७५ ॥
तत्प्रभावात्समाधिस्था मृत्वास्य श्रेष्ठिनः सुता ।
जाता त्वं पापशेषेण महादुर्गन्धदूषिता ॥ १०७६ ॥

जातजातिस्मृतिस्तास्ता नरकादिव्यथास्ततः ।
साक्षादनुभवन्तीवाखर्वसर्वाङ्गवेपथुः ॥ १०७७ ॥
शुष्कोष्ठी दीनवदना लोलकातरलोचना ।
मूर्धबद्धाञ्जलिः साश्रुः सा दुर्गन्धाभ्यधाद्गुरुम् ॥१०७८॥
॥ युग्मम् ॥

हहा भीतास्मि भीतास्मि स्वामिन्मां कर्ष दुःखतः ।
न व्यथासु पुनस्तासु यथा यामि तथा कुरु ॥ १०७९॥
ततः कृपाब्जिनीकेलिनवहेलिर्महामुनिः ।
तमःसमुदयच्छेदकलां कलयति स्म गाम् ॥ १०८० ॥
वासरे रोहिणीनाम्ना नक्षत्रेण पवित्रिते ।
उपवासस्त्वया कार्यः सप्तवर्षी निरन्तरम् ॥ १०८१ ॥
व्रतादस्मादशोकस्य राज्ञस्त्वं रोहिणी प्रिया ।
शचीपतेरिव शची भविष्यसि भवान्तरे ॥ १०८२ ॥
चिरमप्राप्तशोकैव भुक्त्वा भोगान्प्रियान्विता ।
सिद्धिं यास्यसि विहरद्वासुपूज्यांहिसेवया ॥ १०८३ ॥
अशोकरोहिणीयुक्तामशोकतरुसंश्रयाम् ।
ततः श्रीवासुपूज्यस्य कारयेर्मूर्तिमद्भुताम् ॥ १०८४ ॥
तत्पुरस्तस्य तपसः कार्य उद्यापनोत्सवः ।
तत्राभयप्रदानस्योद्घोषो ऽत्रश्यं विधीयते ॥ १०८५ ॥
स्नात्रं श्रीवासुपूज्यस्य चर्चा सुरभिवस्तुभिः ।
पूजा मौक्तिककल्याणमाणिक्यकुसुमांशुकैः ॥ १०८६ ॥
तत्पुरः प्राज्यपक्वान्नफलतन्दुलढौकनम् ।
क्रियते रासकैर्नृत्यैः संगीतैश्च प्रभावना ॥ १०८७ ॥
साधर्मिकाणां वात्सल्यमशनांशुकभूषणैः ।
दीने ऽनुकम्पया दानं कारागाराङ्गिमोचनम् ॥ १०८८ ॥
चैत्यनिर्मापणं शक्त्या दानं पात्रेषु भक्तितः ।
लेखनं पुस्तकानां च विधेयं विधिना तदा ॥ १०८९ ॥
इदं विदधती वत्से विकाशिसुकृतक्रमा ।
मुच्यसे दुःखबन्धेन सुगन्धो नृपतिर्यथा ॥ १०९० ॥

किं नाथ पूर्वमप्येतत्केनापि विदधे तपः ।
त्वया ज्ञानवतात्रैवं दर्शितं यन्निदर्शनम् ॥ १०९१ ॥
इति दुर्गन्धया पृष्टो मुनीन्दुः पापतापहृत् ।
ववर्ष वाक्सुधां बोधिबीजदुर्भिक्षभेदिनीम् ॥ १०९२ ॥
॥ युग्मम् ॥

विषये शकटालाख्ये भरतस्यास्य भूषणे ।
अस्ति चापलाखिन्नश्रीशय्या सिंहपुरं पुरम् ॥ १०९३ ॥
तत्र चित्रतनूबन्धो नानामणिगणैरिव ।
रराज राजमुकुटः सिंहसेन इति श्रुतः ॥ १०९४ ॥
तत्प्रिया धूतकनकप्रभाभूत्कनकप्रभा ।
यन्मुखं लाञ्छनोद्वेगत्यक्तेन्दुः श्रीराशिश्रियत् ॥ १०९५ ॥
सुतो ऽभूच्चारुरूपो ऽपि तयोर्दुर्गन्धदेहवान् ।
अतो दुर्गन्ध इत्येव पृथ्व्यां तन्नाम पप्रथे ॥ १०९६ ॥
न राज्यदानलोभे ऽपि तं भेजे भामिनीजनः ।
वालव्यजनवाते ऽपि नामुञ्चन्मक्षिकाश्च तम् ॥ १०९७ ॥
आस्यसंचारितश्वासैः गुप्ततूलाप्तनासिकैः ।
क्रमागतैरपि स्वान्तबलात्सो ऽसेवि सेवकैः ॥ १०९८ ॥
इति मातृपितृक्लेशोत्कटकष्टोर्मिपातिनि ।
तस्मिन्मृत्युमपि श्लाघमाने भूजानिजन्मनि ॥ १०९९ ॥
हर्षौत्सुक्यभृतो भूरिभूषाभासुरदिङ्मुखाः ।
चेरुर्गगनपद्यासु विद्याधरसुरासुराः ॥११००॥ युग्मम् ॥
षष्ठं जिनेन्द्रं पद्माभं श्रीपद्मप्रभमागतम् ।
तेभ्यो मत्वा ययौ नन्तुं स सुतादियुतो नृपः ॥११०१॥
राजा समवसृत्यां स प्रविश्य विधिवत्ततः ।

पद्मप्रभप्रभुं नत्वा सपुत्रः समुपाविशत् ॥ ११०२ ॥
सुधाम्बुधिरिव स्वामी गम्भीरनिभृतध्वनिः ।
धर्मोक्तिशीकरैस्तापमपजह्रे शुभात्मनाम् ॥ ११०३ ॥
दुर्गन्धस्य ततः पृष्टे राज्ञा दौर्गन्ध्यकारणे ।
जज्ञे वाग्मधुभुग्वक्त्रपद्मः पद्मप्रभः प्रभुः ॥ ११०४ ॥
अत्रास्ति भरतक्षेत्रे श्रीमन्नागपुरं पुरम् ।
ततो द्वादशयोजन्याः प्रान्ते नीलगिरिर्गिरिः ॥ ११०५ ॥
तस्य प्रस्थोपले तस्थौ सोढुं सर्वानुपद्रवान् ।
शमी संयमराश्याख्यो मुनिर्मासोपवासवान् ॥ ११०६ ॥
तस्याद्रेर्मूर्ध्नि पापर्द्धिप्रवर्धितसदारसः ।
व्याधो ऽभून्मृगमाराख्यः क्रौर्याक्रान्तः कृतान्तवत् ॥ ११०७ ॥
भूरिलब्धिभृतस्तस्य प्रभावेण महामुनेः ।
नित्यनिःफलपापर्द्धिः सो ऽभवन्मृगमारकः ॥ ११०८ ॥
व्याधस्य क्रोधलीनस्य तद्वधं ध्यायतस्ततः ।
उपत्यकापुरं साधुः पारणाय नगादगात् ॥ ११०९ ॥
इहान्तरे दुरात्मासौ व्याधस्तत्रेन्धनैर्घनैः ।
प्रज्वाल्याधः शिलां सर्वां व्यपनीयान्यतो गतः ॥ १११० ॥
कृतकृत्यो मुनिस्तत्रावधेर्ज्ञात्वायुषः क्षयम् ।
कर्मान्तं कर्तुमारोहत्त्यक्ताहारो ऽथ तां शिलाम् ॥ ११११ ॥
तस्य विषहमाणस्य तं तापमतिदारुणम् ।
शुक्लध्यानं वरज्ञानं निर्वाणं च मुनेरभूत् ॥ १११२ ॥
व्याधो ऽपि तेन पापेन कुष्ठेन विगलत्तनुः ।
जगाम दुर्गतिं तत्र सप्तमीमुपवेदनाम् ॥ १११३ ॥
स्वयंभूरमणे मत्सीभूयाथो भूरिपातकः ।

दीर्घदुःखमयीं प्राप षष्ठीं निरयभूमिकाम् ॥ १११४ ॥
सर्पीभूय च पापीयान्पञ्चमीं दुर्गतिं गतः ।
सिंहीभूय जगामैष चतुर्थीमथ भूमिकाम् ॥ १११५ ॥
पापी द्वीपी बभूवाथ तृतीयं नरकं ययौ ।
ओतुस्ततो द्वितीयं च बको ऽथ प्रथमं च सः ॥ १११६ ॥
चण्डालादिभवेष्वेव भ्रान्त्वा नागपुरे ऽजनि ।
सूनुर्वृषभसेनाख्यो गन्धार्या गोपयोषितः ॥ १११७ ॥
चारयञ्श्रावकाणां गाः सङ्गात्तेषां तु भद्रकः ।
सो ऽगान्नीलगिरेस्तट्यां दैवाद्दावेन वेष्टितः ॥ १११८ ॥
मयापि प्राग्भवे को ऽपि दग्ध इत्यनुतापभाक् ।
स्मरन्पञ्चनमस्कारमदह्यत दवेन सः ॥ १११९ ॥
सुकृतेन ततस्तेन तव भूप सुतो ऽभवत् ।
सो ऽयं शेषेण दोषेण महादुर्गन्धविग्रहः ॥ ११२० ॥
तयोक्त्या जिनराजस्य राजसूनुर्भयाकुलः ।
जातिस्मृतिवशाज्जातकम्पः प्राञ्जलिरालपत् ॥ ११२१ ॥
नाथ नाथ भवाम्भोधेः समुद्धर समुद्धर ।
तैर्मोक्ष्ये ऽहं कथं पापैर्निवेदय निवेदय ॥ ११२२ ॥
इदं वदति दीने ऽस्मिन्कृपाराशिर्नृपात्मजे ।
श्रीजिनो ट्टजिनद्रोही रोहिणीव्रतमादिशत् ॥ ११२३ ॥
जिनं नत्वाथ सपरीवारः पुरमगान्नृपः ।
स चकार कुमारस्तु यथोक्तं रोहिणीव्रतम् ॥ ११२४ ॥
उद्भविष्यन्मुक्तिफलै रोहिणीव्रतवल्लिजैः ।
पुण्यपुष्पैरदुर्गन्धः सुगन्धश्च बभूव सः ॥ ११२५ ॥
प्रीतिपूरपरीतेन पुरि कारयतोत्सवम् ।

राज्ञास्य विदधे नाम सुगन्ध इति विश्रुतम् ॥ ११२६ ॥
ततस्त्वमपि कल्याणि कुर्वाणा रोहिणीव्रतम् ।
तद्वद्भविष्यसि भृशं सौख्यसंभारभाजनम् ॥ ११२७ ॥
इति श्रुत्वा च नत्वा च मुनीन्द्रममृतासवम् ।
निःशोका सह लोकेन दुर्गन्धापि पुरे ऽविशत् ॥ ११२८ ॥
निर्वाणारोहिणीभूतरोहिणीव्रतरोहिणी ।
दुर्गन्धेनाथ दुर्गन्धामोचि दुःकर्मबन्धुना ॥ ११२९ ॥
रूपं किमपि बिभ्राणा सा तेन तपसा सती ।
सुरस्त्रीणामहंकारामिव हन्तुमगाद्दिवम् ॥ ११३० ॥
चिरं तत्र विचित्रान्सा भोगान्भुक्त्वा च्युताच्युता ।
चम्पायां मघवत्क्ष्मापलक्ष्मीदेव्योः सुताभवत् ॥११३१॥
श्रीमन्नशोकलोकेश त्वत्प्रिया रोहिणी हि सा ।
रोहिणीव्रतमाहात्म्यादद्दुःखा सौख्यभागभूत् ॥ ११३२ ॥
यस्तु षष्ठजिनादिष्टं सिषेवे रोहिणीव्रतम् ।
अथ तस्य सुगन्धस्य स्वरूपं शृणु भूपते ॥ ११३३ ॥
नृपं सिंहपुरे कृत्वा तं सुगन्धं स्वनन्दनम् ।
पीरव्रज्याटवीं सिंहः सिंहसेनो ऽजनि स्वयम् ॥ ११३४ ॥
प्रत्यक्षं प्रत्ययं वीक्ष्य दुर्गन्धध्वंसतो ऽद्भुतम् ।
शुद्धे धर्मे ऽधिकां श्रद्धां सुगन्धो विदधे ध्रुवम् ॥ ११३५ ॥
जयन्बलेन बाह्यारीनान्तरारींश्च सक्षमः ।
चिरं धरित्रीं धर्मं च श्रीवर्यः पर्यपालयत् ॥ ११३६ ॥
सद्बोधः श्राद्धधर्मैकध्यानाधानमहाधनः ।
समाधिमृत्युतः प्राप क्ष्मापतिः स्वर्गसंपदम् ॥ ११३७ ॥
इतः पूर्वविदेहे ऽस्ति विजयः पुष्कलावती ।

तत्रास्ते नगरी विश्वमण्डनं पुण्डरीकिणी ॥ ११३८ ॥
सा शक्रेणेव नाकश्रीकला विमलकीर्तिना ।
राज्ञापालि पुराचन्द्रकलाविमलकीर्तिना ॥ ११३९ ॥
तस्य शस्यप्रथा पृथ्वीप्रियस्य हृदयप्रिया ।
मुखनिर्जितपद्मश्रीः पद्मश्रीः संज्ञयाजनि ॥ ११४० ॥
तत्कुक्षौ स्वर्गतो जीवः सुगन्धस्य धरेशितुः ।
चतुर्दशमहास्वप्नसूचितः समवासरत् ॥ ११४१ ॥
महनीयं महैर्देवी सुपुत्रं सुषुवे ऽथ सा ।
अर्ककीर्तिरिति क्ष्मापस्तस्य नाम विनिर्ममे ॥ ११४२ ॥
स कीर्तिकौमुदीकीर्णनभाश्चन्द्र इव व्यभात् ।
यूना तेन समग्राहि समग्रा हि कलावलिः ॥ ११४३ ॥
सब्रह्मचारी विद्यासु सहचारी च केलिषु ।
आसीत्तस्य कुमारस्य मेघसेनाभिधः सुहृत् ११४४ ॥
इतश्च मथुरापुर्यामुत्तराभाजि मन्दरः ।
श्रेष्ठिसागरदत्तस्य लक्ष्मीवत्यां सुतो ऽभवत् ॥ ११४५ ॥
वणिग्दक्षिणदिग्भाजि मथुरायामभूत्पुनः ।
नन्दिमित्राभिधः श्रेष्ठी सुभद्राख्या च तत्प्रिया ॥ ११४६॥
ददाते मन्दराय स्वे नन्दिमित्रेण कन्यके ।
विश्रुते कमलश्रीश्च गुणमाला च सद्गुणैः ॥ ११४७ ॥
अर्ककीर्तिकुमारस्ते मारकीर्तिश्रियाविव ।
सुहृदा मेघसेनेन रूपलोभादहारयत् ॥ ११४८ ॥
राजा विमलकीर्तिस्तद्विज्ञाय श्रेष्ठिनो मुखात् ।
विमोच्य कन्यके लोकमशोकमकरोत्ततः ॥ ११४९ ॥
यः प्रजां पीडयत्येवं किं तेनेति नृपो नयी ।

तदा तदागसा पुत्रं समित्रं निरकासयत् ॥ ११५० ॥
जलस्थलद्युदेवीनामपि दृष्टीर्विलोभयन् ।
वीतशोकां पुरीमर्ककीर्तिर्मित्रयुतो ययौ ॥ ११५१ ॥
नृपालिमालितोद्यानामर्ककीर्तिर्विलोक्य ताम् ।
किमेतदिति पप्रच्छ नरं कंचिदुवाच सः ॥ ११५२ ॥
राजास्तीह श्रियामुत्साहनो विमलवाहनः ।
गुरुणा धीगुणेनासिर्यस्याहिंसाव्रती कृतः ॥ ११५३ ॥
दिद्युते सुप्रभा नाम सत्प्रभाधाम तत्प्रिया ।
जाने यद्रूपनिष्पत्तौ विधातापि चमत्कृतः ॥ ११५४ ॥
अनयोस्तनयास्ति श्रीरिव स्मरमहीभुजः ।
नाम्ना जयवती धाम्ना हेम्नामिव समुच्चयः ॥ ११५५ ॥
सत्यप्रत्ययदैवज्ञादिष्टज्ञानवशंवदः ।
नृपः प्रत्यगृणोद्दातुं तां राधावेधवेधसे ॥ ११५६ ॥
तद्भूभुजो भुजोद्दर्पाः कन्दर्पाज्ञाबशंवदाः ।
के के ऽत्र नागमन्नाम राधावेधविधायिनः ॥ ११५७ ॥
इति मत्वा प्रमुदितः समित्रो नृपनन्दनः ।
ययौ तत्र द्रुतं राधायन्त्रं यत्र प्रपञ्चितम् ॥ ११५८ ॥
तत्र यन्त्रं भ्रमिश्रान्तमिवातुलतृषाकुलम् ।
सर्वेषामपि भूपानां पपौ कीर्तिमयं पयः ॥ ११५९ ॥
चमत्कारं हृदि म्लानिमानने भूभुजां सृजन् ।
उत्कीर्तिरर्ककीर्तिस्तु राधावेधविधिं व्यधात् ॥ ११६० ॥
पर्यणैषीज्जयवतीमसौ सप्तानुजान्विताम् ।
अर्ककीर्तिस्ततः प्राचीमिवार्कः सप्तदिग्युताम् ॥ ११६१ ॥
तत्र तस्थौ चिरं भोगभरादनुभवन्सुखम् ।

कलत्रैरष्टभिः सो ऽब्जपत्रैरिव मधुव्रतः ॥ ११६२ ॥
विमलाद्रौ जिनं नन्तुं गतो ऽन्येद्युर्वृतो जनैः ।
जिनार्चारचनैः श्रान्तो रात्रौ सुष्वाप तत्र सः ॥११६३॥
गिरावागतया तत्र खेचर्या चित्रलेखया ।
कुमारेन्द्रः सनिद्रस्तु हृतो रूपानुरक्तया ॥ ११६४ ॥
वैताढ्यमूर्ध्नि तं क्षीणनिद्रं वीक्ष्य रुषारुणम् ।
सा सिद्धायतने मुक्तापहारभयभाग्ययौ ॥ ११६५ ॥
द्राक्सिद्धायतने वज्रकपाटैरुदघट्यत ।
तस्मिन्दृष्टे स्वयं पद्मपत्रैरिव विवस्वति ॥ ११६६ ॥
हर्षसंदर्भनिर्भग्नदुरितो नृपनन्दनः ।
ततः प्रण्यपतत्सिद्धान्सिद्धायतनवर्तिनः ॥ ११६७ ॥
तत्र नत्वाथ तं प्राह पुमान्कश्चित्कृताञ्जलिः ।
अद्वैताढ्योल्लसल्लक्ष्मीर्वैताढ्यो ऽयं गिरिः प्रभो ॥११६८॥
इहाभयपुरं नाम पुरमास्ते रमास्पदम् ।
राजा पवनवेगो ऽत्र वैरिगोत्रदवानलः ॥ ११६९ ॥
तस्य चित्तप्रिया चित्तवेगाख्यास्ति स्मरायुधम् ।
तत्सुता गतशोका च रूपे वाचामगोचरः ॥ ११७० ॥
को भविष्यति भर्तास्याः सुताया इति भूभुजा ।
पृष्टः प्राह त्रिकालज्ञः पुरापि प्रत्ययप्रदः ॥ ११७१ ॥
रूपानुरक्तया दूराद्विद्याधर्या हृतः प्रभो ।
भविष्यच्चक्रवर्तीति पुत्र्या भर्ता भविष्यति ॥ ११७२ ॥
ज्ञातव्यः स त्रिकालज्ञ कथं नरशिरोमणिः ।
इति मौहूर्तिकं भूपः पप्रच्छातुच्छसंमदः ॥ ११७३ ॥
सिद्धकूटे कपाटाभ्या प्राप्ते यत्रोद्घटिष्यते ।

अस्याः पतिः स चक्रीति राज्ञे दैवज्ञको ऽदिशत् ॥११७४॥
तं ज्ञातुमिह राज्ञाहं दिष्टो दृष्टो ऽसि तच्चिरात् ।
तदेहि गेहिनी ते ऽस्तु स्मराज्ञा देहिनीव सा ॥ ११७५ ॥
इत्याकर्ण्य कुमारेन्दुः समं तेनैव सो ऽचलत् ।
तेन विज्ञापितश्चागात्संमुखं खेचरेश्वरः ॥ ११७६ ॥
उत्सवेन प्रवेश्याथ कुमारं पुरि खेचरः ।
प्रीतो विवाहयामास सुतया गतशोकया ॥ ११७७ ॥
हृष्टेन तेन जामात्रा काममात्राधिकश्रिया ।
प्राप प्रीतः परां कोटिमखिलः खेचरान्वयः ॥ ११७८ ॥
दत्ताश्चित्रिंशतं कन्याः खेचरैरपरैरपि ।
स व्युवाह स्मरक्ष्मापनृलक्षणकला इव ॥ ११७९ ॥
पञ्चवर्षीमसौ हर्षी तत्र स्थित्वोपभोगभाक् ।
विद्याधरेन्द्रमापृच्छ्य लब्धविद्याचयो ऽचलत् ॥११८०॥
कमलाकरमाकाशं कुर्वन्कान्तामुखैरसौ ।
ययौ रथविमानाश्वद्विपस्थैः खेचरैर्वृतः ॥ ११८१ ॥
भग्नस्तम्भेन मदिना पार्श्वे ऽञ्जनगिरेर्जनम् ।
दुर्दमेन द्विपेन्द्रेण दम्यमानं ददर्श सः ॥ ११८२ ॥
अथोत्तीर्याम्बरादर्ककीर्तिरर्क इव द्रुतम् ।
ध्वान्ताधिदैवतामिव द्विपाधीशं वशं व्यधात् ॥ ११८३ ॥
प्रभञ्जनो ऽञ्जनगिरिस्वामी ज्ञानिवचःस्मृतेः ।
ददौ तदास्मै मदनावल्याद्या अष्ट कन्यकाः ॥ ११८४ ॥
प्रभञ्जनमुदे तत्र स्थित्वाल्पं वैरिभञ्जनः ।
वीतशोकां पुरीं लोकदृक्कृताभ्युत्थितिर्ययौ ॥ ११८५ ॥
अथात्तजयवत्यादिपरीवारः पुरीमगात् ।

सपुण्डरीकिणीं तातकीर्तिभिः पुण्डरीकिणीम् ॥११८६॥
अल्पानल्पस्फुरच्चक्रयुगैर्धुर्योष्ट्रगर्दभैः ।
शकटैरेकहक्कुब्जखञ्जतुन्दिलखेटकैः ॥ ११८७ ॥
कर्पूरखटिकानीलीकस्तूरीहेमपित्तलैः ।
भाण्डैरन्यैरपि भृतैः संमिश्रैरुत्तमाधमैः ॥ ११८८ ॥
स पञ्चवर्णपञ्चाङ्गः पञ्चवर्णशिरोरुहः ।
कौतुकादर्ककीर्तिस्तां वणिग्भूयाविशत्पुरीम् ॥ ११८९ ।
॥ त्रिभिर्विशेषकम् ॥

तेन तेन स्वरूपेण भाण्डैस्तैस्तैश्च ढौकितैः ।
आराजरङ्कं स पुरं चक्रे सोत्प्रासविस्मयम् ॥ ११९० ।
ततस्तस्करूपेण हृत्वा नगरगोधनम् ।
अयं व्यधान्मृधाधिक्यं भूधनेनानुधाविना ॥ ११९१ ॥
हयोर्मिभिर्महीपालसैन्यसिन्धोः प्रसर्पतः ।
अर्ककीर्तिशरा भेजुर्मर्यादावलितुल्यताम् ॥ ११९२ ॥
जयिनो बहवस्तेन स्वहस्तेन निवारिताः ।
एकेन ते विवेकेन दूरं दोषगणा इव ॥ ११९३ ॥
एकोऽप्ययं मया भूरिसैन्येनापि न जीयते ।
धिग्धिग्मत्पौरुषमिति ध्यायन्नथ धराधवः ॥ ११९४ ॥
विज्ञप्तो मेघसेनेन स्वामिन्मोदस्व मा शुचः ।
अयं स्वं ज्ञापयत्यर्ककीर्तिर्विक्रमढौकनः ॥ ११९५ ॥
॥ त्रिभिर्विशेषकम् ॥

इति श्रुत्वा प्रमोदाब्धिशीकरायितदृग्जलः ।
उपेत्य सुतमालिङ्गन्निजरूपस्थमानतम् ॥ ११९६ ॥
पुरप्रवेशपूर्वं स राज्यमेवाथ सूनवे ।

राजा चिरागममीतिमदातव्यपदे ददौ ॥ ११९७ ॥
श्रीचारुगुप्तपादान्ते स सामन्तसहस्रभाक् ।
व्रतमादाय भूजानिर्मुक्तिजानिरजायत ॥ ११९८ ॥
एताः प्रजा न मोदन्ते विना विमलकीर्तिना ।
इतीवासौ बभारार्ककीर्तिर्विमलकीर्तिताम् ॥ ११९९ ॥
निशास्वपि प्रतापार्को दिनेष्वपि यशःशशी ।
अक्रीडतां जगत्क्रोडे यस्य विश्वैकविस्मयः ॥ १२०० ॥
कृतं लक्षैरिवाग्रीनां कोटीभिरिव भास्वताम् ।
दीप्तमायुधशालायां चक्रमस्योदपद्यत ॥ १२०१ ॥
अथाधाय रथाङ्गस्य महिमानं महोत्सवैः ।
उत्पन्नसर्वरत्नश्रीरुद्वर्धिष्णुचमूचयः ॥ १२०२ ॥
जिनार्चावसरैर्लुम्पन्प्रयाणावसराशुभम् ।
क्रमाज्जिगाय षट्खण्डमवनीमण्डलं नृपः ॥ १२०३ ॥
॥ युग्मम् ॥

ततः पुरं स्फुरज्जैनालयमण्डलमण्डनम् ।
स पुण्डरीकिणीं चक्रे नवद्वादशयोजनाम् ॥ १२०४ ॥
सो ऽजीजनज्जिनगृहान्ग्रामे ग्रामे पुरे पुरे ।
मार्गानिव सतां मुक्तिगमनेच्छाभृतां नृपः ॥ १२०५ ॥
स मदोन्मुदितामुर्वीमेवं निर्माय निर्मदः ।
कृतकृत्यमिवात्मानममन्यत महामतिः ॥ १२०६ ॥
श्रामण्यं सो ऽन्यदा श्रुत्वा जितशत्रुमुनेर्मुखात् ।
सुकृतेभ्यः कृती पूर्वकृतेभ्यो बह्वमन्यत ॥ १२०७ ॥
बलात्पुष्ट्वा कलत्राणि पुत्रान्मित्राणि मन्त्रिणः ।
पुत्रं धवलकीर्तिं स राज्ये न्यस्यादित व्रतम् ॥ १२०८ ॥

अर्ककीर्तिस्तपस्तैक्ष्ण्यादर्ककीर्तिमवाप्य सः ।
ययौ मृत्वाच्युते कल्पे शक्रकल्पेन तेजसा ॥ १२०९ ॥
भुक्तभोगभरः श्रीमानच्युतप्रच्युतः स च ।
राजन्नशोक निःशोकभावभूमिर्भवानभूत् ॥ १२१० ॥
एकेन रोहिणीसंज्ञतपसार्जितपुण्ययोः ।
दम्पत्योर्युवयोः प्रेमबन्धो निरवधिस्ततः ॥ १२११ ॥
रोहिणीतपसस्तस्य प्रभावाद्भवतोरभूत् ।
एवं सौभाग्यभाग्यश्रीर्भुवनाभोगभास्वरा ॥ १२१२ ॥
एवं प्रभावमुद्भाव्य भव्यैः सेव्यमिदं व्रतम् ।
निर्दुःखसुखसिद्ध्यर्थमुपवासैर्यथाविधि ॥ १२१३ ॥
आचाम्लैर्निर्विकृतिकैरपीदं रोहिणीव्रतम् ।
उपवासाक्षमैः सेव्यं हृद्योद्यापनमात्मभिः ॥ १२१४ ॥

इत्यकथ्यत वां भूप भवान्तरकथा पृथुः ।
इदानीं त्वदपत्यानां वदामि प्राग्भवं भवम् ॥ १२१५ ॥
आस्ते पृथिव्या नेपथ्यं प्रथिता मथुरेति पूः ।
सिञ्चन्वीररसेनोर्वीं वीरसेनो ररक्ष ताम् ॥ १२१६ ॥
विप्रो ऽग्निशर्मा तत्राभूत्सावित्रीति च तत्प्रिया ।
अभूवन्सूनवः सप्त शिवशर्मोदयस्तयोः ॥ १२१७ ॥
ययुर्भद्रकभावास्ते दूना दारिद्र्यमुद्रया ।
धनार्जनार्थं सप्तापि पाटलीपुत्रपत्तनम् ॥ १२१८ ॥
श्रीसिंहवाहनो नाम तत्र प्रभुरभूत्तदा ।
कमलश्रीतनूजस्तु तत्पुत्रो हरिवाहनः ॥ १२१९ ॥
कन्यां कनकमालाख्यां वसुमित्रमहीपतेः ।
तदा पर्यणयत्तत्र महद्ध्यर्या हरिवाहनः॥ ॥ १२२० ॥

तां महर्द्धिमिहालोक्य निजदौःस्थ्येन दुःखिताः ।
कनिष्ठाः षट् तदा ज्येष्ठं शिवशर्माणमूचिरे ॥ १२२१ ॥
आर्य पश्य विरिञ्चस्य केयं केलिविचित्रता ।
सामान्ये ऽपि मनुष्यत्वे करोति कियदन्तरम् ॥ १२२२ ॥
विवाहे ऽस्मिन्नमी लोका महाहस्तिहयाश्रयाः ।
निःपादुकौ तु नः पादौ दूयेते पटुकण्टकैः ॥ १२२३ ॥
प्रत्येकमेषां यावन्तो भूषामुक्ताकणास्तनौ ।
तावन्तो भोक्तुमस्माकं न जोनालकणा अपि ॥ १२२४ ॥
एषां वस्त्रैकतन्तोर्यन्मूल्यं तन्न लगिष्यति ।
यावज्जीवितमस्माभिर्धार्याणां वाससामपि ॥ १२२५ ॥
तत्किं दास्यन्ति महिषीममी तस्मै विरिञ्चये ।
ईदृग्ददौ यदेतेषामस्माकं तु न किंचन ॥ १२२६ ॥
तानूचे शिवशर्माथ किमुपालभ्यते विधिः ।
उपालभ्यो ऽयमात्मैव यः प्राग्धर्मं न निर्ममे ॥ १२२७ ॥
प्रागनिर्मितधर्माणां श्रीर्नास्माकमिहाभवत् ।
नेहापि कुर्महे धर्मं सा नाग्रे ऽपि भविष्यति ॥ १२२८ ॥
उपशान्तहृदस्ते ऽपि तद्विरा स्मोद्विरन्ति गाम् ।
आर्य कार्यस्तदस्माभिर्धर्मस्तत्कर्म कथ्यताम् ॥ १२२९ ॥
शिवशर्मा पुनर्मायाविमुक्तं वाक्यमुक्तवान् ।
कुतो ऽपि सद्गुरोर्ज्ञेयो धर्मः सो ऽमेयशर्मकृत् ॥ १२३० ॥
तद्यामः क्वचिदारामगिरिगह्वरभूमिषु ।
सामान्यजनमान्यासु क्ष्मासु दृश्यो न सद्गुरुः ॥ १२३१ ॥
इत्यमी निर्ययुः पुर्या ददृशुश्च वने मुनिम् ।
मनोरथो ऽपि धर्मस्य कल्पते कल्पपादपः ॥ १२३२ ॥

तं दिशन्तं दशविधव्रतधर्मविधीन्सुधीः ।
शिवशर्माथ सहसोपानमत्सह सोदरैः ॥ १२३३ ॥
श्रुतधर्मा व्रतं प्राप्य शिवशर्मोदयस्ततः ।
तपस्तापेन सौधर्मं भेजुः सुखसुधासरः ॥ १२३४ ॥
भल्लक्षुल्लकनामा च वैताढ्ये ऽत्रैव भारते ।
खेचरो ऽजनि जैनेन्द्रधर्मारामैकषट्पदः ॥ १२३५ ॥
व्यदधादन्वहं स्तोकीकृतकर्ममहाभरः ।
जिनयात्रोत्सवं पञ्चदशकर्ममहीषु सः १२३६ ॥
स धर्मरतिरुत्कण्ठाकुण्ठविघ्नकदम्बकः ।
यत्र यत्राशकद्गन्तुं तत्र तत्रानमज्जिनान् ॥ १२३७ ॥
शुद्धश्राद्धव्रताम्भोजखण्डमार्तण्डमण्डलः ।
खेचरः सो ऽपि सौधर्मकल्पस्याकल्पतां गतः ॥ १२३८ ॥
इतश्च जम्बूद्वीपे प्राग्विदेहे दक्षिणादिशि ।
अभूद्वरुडवेगाख्यो वैताढ्ये खेचरेश्वरः ॥ १२३९ ॥
कमलश्रीमुखी तस्य कमलश्रीः प्रियाजनि ।
पद्मश्रीप्रमुखाः पुत्र्यश्चतस्रो जज्ञिरे तयोः ॥ १२४० ॥
वनावनिगतास्तत्र चतस्रो ऽपि निरीक्ष्य ताः ।
समाधिगुप्तनामानमानमन्मुनिमुन्मुदः ॥ १२४१ ॥
अल्पायुष्कं मुनिस्तासां मत्वा तत्तारणैकधीः ।
तत्पञ्चमीतिथिदिनं ज्ञात्वा चेदमवोचत ॥ १२४२ ॥
ज्ञानप्रपञ्चात्पञ्चम्यामुपवासः क्रियेत यः ।
भवन्त्यनन्यसामान्या भोगास्तत्फलमुज्ज्वलम् ॥१२४३॥
उपवासः स एवोच्चैः कृतकर्मशमः क्रमात् ।
याति स्वर्गापवर्गश्रीसुखदाननिदानताम् ॥ १२४४ ॥

इति श्रुत्वा चतस्रस्ता गृहीत्वा पञ्चमीव्रतम् ।
कृतकृत्यमिवात्मानं मन्वानाः सद्मने ऽचलन् ॥ १२४६ ॥
विद्युत्पातेन पथि ता मथिताश्चिदिवं ययुः ।
ततश्च्युत्वा नृपश्रेष्ठ भवद्दुहितरो ऽभवन् ॥ १२४६ ॥
शिवशर्मादयः स्वर्गच्युतास्ते सूनवस्तव ।
बभूवुः स च पुण्यात्मा खेचरश्चरम सुतः ॥ १२४७ ॥
इति पूर्वभवश्रुत्या जातिस्मृतिमवाप्य ते ।
श्रावकं धर्ममासाद्याशोकाद्याः स्वाश्रये ययुः ॥ १२४८ ॥
भूपे ऽन्यदा सभाभाजि धर्मेभाद्भुतगर्जिवत् ।
ध्वानयन्वियदध्वानं दिव्यो दध्वान दुन्दुभिः ॥ १२४९ ॥
नृपस्तद्ध्वनये वासुपूज्यागमनशंसिने ।
दूरोच्छ्वासाङ्गनुन्नानि भूषणानि ददाविति ॥ १२५० ॥
हित्वा सिंहासनं दत्त्वा पञ्चषाणि पदान्यथ ।
ननाम भूपः ककुभं प्रभुपादपवित्रिताम् ॥ १२५१ ॥
उद्भास्वदुत्सवोत्साहं कृत्वा नागपुरं पुरम् ।
पुत्रमित्रकलत्राणि समाहूय ससंमदः ॥ १२५२ ॥
शृङ्गारसारमातङ्गतुरङ्गारूढसज्जनः ।
भूप प्रभुं ययौ गायद्भृत्यद्रव्यौघमध्यगः ॥ १२५३ ॥
॥ युग्मम् ॥
भूपः पुण्यार्णवावर्तमध्यवर्तीव स भ्रमन् ।
प्रभु प्रदक्षिणीकृत्य प्रणम्योपाविशत्पुरः ॥ १२५४ ॥
कर्णपेयां सुधां वर्षत्यथ तीर्थेशतोयदे ।
कर्णेन्द्रियत्वं नो केन लोकेनाङ्गेषु काङ्क्षितम् ॥ १२५५ ॥
वहन्मध्ये ऽधिकं रागं नीरागो ऽन्वे ऽपि नैव यः ।

नरो न रोचते मुक्त्यै सकुसुम्भमिवांशुकम् ॥ १२५६ ॥
चला इति चलाक्षीभ्यश्चित्तं कर्षन्नमर्षतः ।
आलिङ्ग्यते नरो मुक्त्या जराजीर्णोऽप्यनीर्ष्यया ॥१२५७॥
इत्यादिभिर्जगद्भर्तुरुपदेशैः प्रशान्तधीः ।
राज्ये न्यस्य सुतं राजा भेजे भार्यान्वितो व्रतम् ॥१२५८॥
विहरन्विभुना साकमशोकाख्यो मुनिर्महीम् ।
सापत्यया समं पत्न्या मुक्तिं भुक्ततपा ययौ ॥ १२५९ ॥

इति रोहिणीकथा समाप्ता ॥

प्रथितां वीरनाथेन श्रेणिकस्य पुरः पुरा ।
यामकार्षीदुमास्वातिः कथा सेत्थमिहोदिता ॥ १२६० ॥
ततोऽवसर्पिणीतापविपुलव्यापदो भुवः ।
कुर्वञ्शैत्यौषधमिव क्रमसंचारिवारिजैः ॥ १२६१ ॥
प्रसुप्तमान्तरं चक्षुर्जनानां मोहनिद्रया ।
समुज्जागरयन्दिव्यदुन्दुभिध्वनिडम्बरैः ॥ १२६२ ॥
यो मां श्रयते तं दुःखाद्रक्षामीत्यग्रगामिना ।
धर्मध्वजोर्ध्वदोष्णेव धर्मेणोद्यत्प्रभावनः ॥ १२६३ ॥
ज्ञानस्य केवलाख्यस्य ज्ञानेषु सकलेष्वपि ।
सर्पता धर्मचक्रेण स्पष्टयंश्चक्रवर्तिताम् ॥ १२६४ ॥
त्रिलोकीदुरितध्वान्तभिदे तुल्योदयस्पृशाम् ।
छत्रत्रयेन्दुबिम्बानां जङ्गमः पूर्वपर्वतः ॥ १२६५ ॥
ज्ञानध्यानविभूतिभ्यां चामरद्वयकैतवात् ।
कीर्तिपुण्यपटप्रान्तदशाभ्यामिव वीजितः ॥ १२६६ ॥
अमी एव सहन्तेऽद्रिभारं विश्वगुरोरिति ।
द्युपुष्पवृष्ट्या हृष्येषु सर्वदेशेषु संचरन् ॥ १२६७ ॥

शुद्धश्रद्धारसैः पौरैर्ग्राम्यैरुद्दामकौतुकैः ।
विमुक्तान्योन्यपैशून्यैः पशूनामपि राशिभिः ॥ १२६८ ॥
मूकीकृतनदीवृन्दैः शैलारण्याधिदेवतैः ।
पारावाराधिदेवीभिर्निरुद्धध्वनदूर्मिभिः ॥ १२६९ ॥
स्थानस्थानोद्यदाश्चर्यैरमरैः सहचारिभिः ।
स्वाद्यमानं प्रभुर्धर्मोपदेशं रचयन्क्रमात् ॥ १२७० ॥
पुरः पुरः स्फुरद्भक्तिक्रियमाणमहोत्सवः ।
देशानार्याननार्यांश्च विहारेण व्यभूषयत् ॥ १२७१ ॥
॥ एकादशभिः कुलकम् ॥

अथ यत्र महातीर्थराजभाजि पदे पदे ।
अमुद्रो ऽभूत्समुद्रो ऽपि कार्ष्ण्यं हन्तुमिवात्मनः ॥१२७२॥
शत्रुञ्जयोज्जयन्ताख्यतीर्थभूधरसंभवाः ।
यं शुचिं रचयन्त्युच्चैः परितः सरितः शुभाः ॥ १२७३ ॥
दीप्तिर्दिनादिनेन्दूनां मज्जतां पश्चिमार्णवे ।
पृथग्भूत्वेव यत्रास्ति सरोजालजलच्छलात् ॥ १२७४ ॥
पादाः पातालपीयूषकुण्डैरासां सिषेचिरे ।
यस्मिन्नित्याहुरस्ताघवापीः पीताम्भसो जनाः ॥ १२७५ ॥
सदाफलद्रुमैरर्थियाञ्चाकालफलद्रुमम् ।
आनन्दनैर्वनैर्यस्य हस्यते नन्दनं वनम् ॥ १२७६ ॥
गिरयो निरयोद्दामदुःखादुद्धर्तुमङ्गिनः ।
यत्राविनम्रविष्टाङ्गाः प्रेक्ष्यन्ते तीर्थमानिनः ॥ १२७७ ॥
नालिकेरीफलस्तन्यः कूपगम्भीरनाभयः ।
सत्ताम्बूलीकृतमुखा यद्वाट्यः कस्य न प्रियाः ॥१२७८॥
यत्केशपाशस्तमसां रहस्येनेव निर्मितः ।

निषेधतीव नेत्राणां पदार्थशतदर्शनम् ॥ १२७९ ॥
या नेत्रैः प्रसृतिमायैः पिबन्तीव नृणां मनः ।
वाग्भिः सुधामनोज्ञाभिर्जीवयन्तीव मन्मथम् ॥ १२८० ॥
यासां वर्धयतीवास्यशशी संसारसागरम् ।
तमेवालङ्करोतीव बन्धुरो ऽधरविद्रुमः ॥ १२८१ ॥
संध्यारागरुचिर्यासां पाणिपादप्रभाभरः ।
स्त्रीलोकनिन्दास्वाध्याये रुणद्धीव मुनीनपि ॥ १२८२ ॥
स्वर्णरत्नैः कृतं यासां दैवादकठिनैरिव ।
संसारभूषणान्यङ्गं विदधातीव तेजसा ॥ १२८३ ॥
ताभिर्यद्ग्रामरामाभिर्जिता इव सुरस्त्रियः ।
न लभन्ते प्रियैः सार्धं निद्रां चिन्ताकुला इव ॥ १२८४ ॥
तं देशं श्रीसुराष्ट्राख्यं सुरासुरवृतो विभुः ।
पुनः पवित्रयामास विहारक्रमलीलया ॥ १२८५ ॥
चतुर्दशभिः कुलकम् ॥
द्रुमाः स्वदानश्रीसङ्गसेविनो यत्तटीजुषः ।
मन्ये पूर्णायुषः कल्पद्रुमाः स्युर्दिवि दानिनः ॥ १२८६ ॥
दर्शनादादिदेवस्य साधुस्वाध्यायकर्णनात् ।
यात्तिर्यञ्चो ऽपि पुण्याप्त्या हसन्ति द्युपतीनपि ॥१२८७॥
जगद्गुरुस्तमारोहदुच्चैः शत्रुञ्जयाचलम् ।
स्वोत्तं भुवि सुनिष्पन्नं धर्मक्षेत्रमिवेक्षितुम् ॥ १२८८ ॥
॥ त्रिभिर्विशेषकम् ॥
तादृक्समवसारश्रीभूषणो भगवानथ ।
मोहादिमूर्छितं विश्वं वाक्सुधाभिरजीवयत् ॥ १२८९ ॥
पूर्वं प्रबोधितो ऽप्येष देशः पूज्यैरलंकृतः ।

अमुमेवाद्रिमारोढुं तदस्यादिश्यतां गुणः ॥ १२९० ॥
इति बद्धाञ्जलौ श्रद्धाजलौघविमलात्मनि ।
द्युपतौ पृच्छति स्वामी श्रुतिभाग्यफलं जगौ ॥ १२९१ ॥
॥ युग्मम् ॥

धर्मकल्पद्रुमोद्यानं धर्मकामगवीकुलम् ।
यं श्रितैर्दृश्यते धर्मचिन्तामणिमहाकरः ॥ १२९२ ॥
महद्भ्यो ऽपि महीयान्यो यत्रारूढैर्भवार्णवः ।
दृश्येत गोपदप्रायो मुक्तिः स्पृश्येत पाणिना ॥ १२९३ ॥
आद्यं लोकाग्रगमने सोपानं समवाप्य यम् ।
असिध्यन्पुण्डरीकाद्या मुनयः कोटिकोटयः ॥ १२९४ ॥
धिग्मुक्तिक्षेत्रभावं मे ऽद्याप्यनन्ता हि जन्तवः ।
आर्ता भवे भ्रमन्तीति निर्झरैः रोदितीव यः ॥ १२९५ ॥
अहो यस्य सुदुर्भेदः कश्चित्कठिनतागुणः ।
आत्मा त्यक्ततनुर्यत्र न क्षमः स्याद्धोगतौ ॥ १२९६ ॥
क्रूराशयाः क्रूरगिरः कृष्णाः शौचबहिश्चराः ।
पापस्येव चरा यस्मिन्न पदं ददति द्विकाः ॥ १२९७ ॥
हिमाद्रौ कविवाचैव यत्रैवाचलराजता ।
आद्यो जगद्गुरुर्यत्र तिलकाय स्वयं स्थितः ॥ १२९८ ॥
सर्वज्ञा अपि तस्यास्य गिरेर्नेशा गुणोक्तिषु ।
आयुस्तेषामपि मितं क्रमोद्यं च यतो वचः ॥१२९९॥
अष्टभिः कुलकम् ॥

इत्यादिश्याल्पशेषे ऽह्नि देवच्छन्दे ऽविशद्विभुः ।
स्वं स्वं स्थानं पुनः सर्वे तिर्यग्मर्त्यव्रजा ययुः ॥१३००॥
अस्वप्नत्वफलं किं न गृह्णामीति स्मरन्हरिः ।

निशि नाभेयमभ्यर्च्य प्रारेभे प्रेक्षणं पुरः ॥ १३०१ ॥
तताडिकचतुर्वाद्यसमहस्तकहेलया ।
चतुर्गतिकसंसारत्रासावेशं सुरा व्यधुः ॥ १३०२ ॥
ते च पञ्चमुखेनेव पञ्चशब्देन चञ्चता ।
वाद्येन चक्रिरे पञ्चमहापापेभपञ्चताम् ॥ १३०३ ॥
महामृदङ्गधोंकारः स कश्चन तदाभवत् ।
श्रोतुर्नर्तनस्य येनासञ्शिथिलाः कर्मसंचयः ॥ १३०४ ॥
युगादिजिनवक्त्रेन्दुक्षुभितस्य निरन्तरः ।
रवः पुण्यार्णवस्येव रराज सुरनध्वनिः ॥ १३०५ ॥
अप्यादिनाथमुखतः कृपन्ती द्युसदां दृशः ।
बभूव भाग्यभूरेव नर्तकी भावनर्तनैः ॥ १३०६ ॥
संक्षिपन्ती चतस्रो ऽपि संसारस्य गतीरिव ।
उद्धतांह्रिकरद्वन्द्वा वर्तनैर्नर्तकी बभौ ॥ १३०७ ॥
सप्तरन्ध्रस्वरसुधाधौताशेषगतिदुर्मलः ।
अवादयत्तदा वंशं सुरवं सुरवांशिकः ॥ १३०८ ॥
बद्धतुम्बाभवत्तत्र वीणा मधुरवादिनी ।
उत्तारयितुकामेव श्रोतॄन्संसृतिवाहिनीम् ॥ १३०९ ॥
सुधाम्बुधिमिवोद्भान्तं गीतमुद्भाव्य भाविनाम् ।
ह्रियेव विलयं याप संसारक्षारसागरः ॥ १३१० ॥
प्रातर्दीपसहस्राभकरव्यतिकरः स्वयम् ।
धर्मेशस्याभवत्तत्रारात्रिकं रात्रिकण्टकः ॥ १३११ ॥
इति प्रेक्षणमापूर्य प्रणम्यादिजिनं मुदा ।
चक्रे कृतविहारं श्रीवासुपूज्यं हरिः सुरैः ॥ १३१२ ॥
द्वासप्ततिसहस्राणि श्रमणाः स्वामिनो ऽभवन् ।

गताः सहस्रमूर्तित्वं तपःपुंसः कला इव ॥ १३१३ ॥
लक्षसंख्यैरिव गुणैर्गुणिता जगदीशितुः ।
एका क्षमैव मूर्तैव साध्वीलक्षमजायत ॥ १३१४ ॥
शतद्वयीयुतं जज्ञे सहस्रं पूर्वशालिनाम् ।
चतुःशतीयुता पञ्चसहस्र्यवधिवेदिनाम् ॥ १३१५ ॥
मनःपर्ययवर्याणां षट्सहस्री शताधिका ।
षट्सहस्राणि साधूनां केवलज्ञानशालिनाम् ॥ १३१६ ॥
लब्धवैक्रियलब्धीनां शतं शतगुणीकृतम् ।
वादलब्धिमतां सप्तचत्वारिंशच्छतानि च ॥ १३१७ ॥
लक्षद्वयं श्रावकाणां दशपञ्चसहस्रयुक् ।
चतुर्लक्षी सषट्त्रिंशत्सहस्राः श्राविका इति ॥ १३१८ ॥
वर्षलक्षाश्चतुःपञ्चाशतं मासेन वर्जितम् ।
आ केवलाद्विहरतः परिवारः प्रभोरभूत् ॥ १३१९ ॥
ततस्त्रिजगतः स्वामी बोधयन्वसुधां क्रमात् ।
मुक्त्या संकेतितमिव प्राप चम्पापुरीवनम् ॥ १३२० ॥
षड्भिर्मुनिशतैः सार्धं पादपोपगमं श्रितः ।
पर्यङ्कासनमासीनः प्रपेदे ऽनशनं प्रभुः ॥ १३२१ ॥
इति प्रज्ञाय दूतेभ्यः कृति तत्राशु नाययुः ।
दुःखिनः पादचारेण प्रत्यासन्ना महीभुजः ॥१३२२ ॥
अस्मत्प्रभूणां संदेहमिदानीं हन्त हन्तु कः ।
इतीवेन्द्रासनैः प्राप्ति कम्पस्त्यक्तासने जिने ॥ १३२३ ॥
अवधिज्ञानविज्ञातपीठकम्पनकारणाः ।
चतुःषष्टिरिहाजग्मुर्वासवा देवतावृताः ॥ १३२४ ॥
अथेन्द्राश्च नरेन्द्राश्च प्रभुं दत्तप्रदक्षिणाः ।

नत्वा तस्थुर्महाशोककीलिता इव निश्चलाः ॥ १३२५ ॥
अन्ते मासस्य चन्द्रे ऽथोत्तराभद्रपदास्थिते ।
शुक्लाषाढचतुर्दश्यां स्वामी मोक्षोन्मुखो ऽजनि ॥१३२६॥
बादरे काययोगे ऽथ स्थित्वा स्थिरतरासनः ।
स्वामी रुरोध वाक्चित्तयोगौ योगेन बादरौ ॥ १३२७॥
काययोगेन सूक्ष्मेण काययोगं स बादरम् ।
रुद्ध्वा रुरोध वाक्चित्तयोगौ सूक्ष्मौ जगद्गुरुः ॥१३२८ ॥
तार्तीयीकमिदं शुक्लध्यानं सूक्ष्मक्रियाह्वयम् ।
प्रभुः क्रमादमुं सूक्ष्मकाययोगमसाधयत् ॥ १३२९ ॥
अथोच्छिन्नक्रियं तुर्यं शुक्लध्यानमशिश्रियत् ।
पञ्चह्रस्वाक्षरोच्चारसमानसमयं विभुः ॥ १३३० ॥
क्षीणकर्मार्थकर्तव्यो विलीनक्लेशसंततिः ।
अनन्तदर्शनज्ञानवीर्यानन्दो गुरुर्गुरुः ॥ १३३१ ॥
ऊर्ध्वगो बन्धविध्वंसादेरण्डफलबीजवत् ।
ऋजुनैव पथा शिष्यैः साकं लोकाग्रमासदत् ॥ १३३२ ॥
॥ युग्मम् ॥
स्वामिना नारकेभ्यो ऽपि ददतानन्दवर्णिकाम् ।
महानन्दस्य बुभुजे स्वयं नवफली तदा ॥ १३३३ ॥
मोहचेष्टामपि तदाक्रन्दं संक्रन्दनादयः ।
विभोर्वियोगे कुर्वन्तो न शोच्यत्वदशामगुः ॥ १३३४ ॥
जगद्बन्धुः कृपासिन्धुः स्वाभिनख्यातो ऽसि किं ततः ।
दत्त्वास्मभ्यं महादुःखं महानन्दं श्रितः स्वयम् ॥१३३५॥
स्वर्गस्यापि नमस्यत्वं या मिन्ये नाथ भूस्त्वया ।
विश्वाश्रुवारिधौ मङ्क्तुं त्वद्वियोगे ऽद्य सेच्छति॥१३३६॥

धिगस्मान्नेरणवो ऽप्येते भान्ति धन्यतमाः प्रभो ।
अनुयान्तीव ये ऽद्य त्वामस्मन्निश्वासपीडिताः ॥१३३७॥
त्वद्वाचो दुग्धवर्षिण्या जनन्येव वियोगिनः ।
अतिवाल्यम्य जगतो गतिः काद्य भविष्यति ॥ १३३८ ॥
धर्मदुग्धाब्धिचन्द्रेण केवलज्ञानभानुना ।
त्वया विना जगन्मोहध्वान्तात्कस्त्रायतां प्रभो ॥१३३९॥
हहा महाधमतमा विश्वतारक नारकाः ।
प्रमोदं कलयामासुर्यें तनुं त्यजति त्वयि ॥ १३४० ॥
इत्यादिवाग्भिर्दलयन्हृदयान्यश्मनामपि ।
सुहृदेव रुदञ्छक्रः स्वहृदैव व्यबोध्यत ॥ १३४१ ॥
॥ सप्तभिः कुलकम् ॥
आक्रन्दतो ऽथ भूशक्रान्प्रबोध्य विबुधाधिपः ।
तत्कालकृत्ये त्रिदशानादिदेशाभियोगिकान् ॥ १३४२ ॥
वनादानीय गोशीर्षचन्दनैधांसि नन्दनात् ।
ऐन्द्र्यां ककुभि तैर्वृत्ता नाथाय रचिता चिता ॥१३४३॥
ऐक्ष्वाकवेभ्यः साधुभ्यस्त्रिकोणा दक्षिणादिशि ।
पश्चिमायां चतुःकोणान्येभ्यस्तु विहिता चिता ॥१३४४॥
स्नानं क्षीराम्बुधेर्नीरैर्लेपं गोशीर्षचन्दनैः ।
शक्रः स्वामितनोश्चक्रे ऽन्येषामन्ये ऽथ नाकिनः॥१३४५॥
देवदूष्येण देवेन्द्रो हंसाङ्केनाध्यवासयत् ।
जिनाङ्गं सुमनोरत्नभूषणैरप्यभूषयत् ॥ १३४६ ॥
मूर्तिमद्भिः प्रभोर्भक्तित्रैविध्यसुकृतैरिव ।
रत्नैश्च रचयांचक्रुस्त्रिदशाः शिविकात्रयम् ॥ १३४७ ॥
नत्वा कृत्वा प्रभुं मूर्ध्नि शिविकायां हरिर्न्यधात् ।

अन्याञ्छिबिकयोः साधून्छक्रवच्चिक्षिपुः सुराः॥१३४८॥
सहस्रवाह्यां तीर्थेशशिबिकामुदवौ हरिः।
ऊहे सुरसहस्राभ्यां तच्चान्यच्छिबिकाद्वयम् ॥ १३४९ ॥
सुरस्त्रीषु ददानासु परितस्तालरासकान् ।
पुरः सुपर्वगन्धर्वगणे तूर्यत्रयोद्यते ॥ १३५० ॥
कुर्वत्सु त्रिदशेष्वग्रे चीरतोरणधोरणीः ।
यक्षकर्दमविच्छर्दान्पुरः कुर्वत्सु केषुचित् ॥ १३५१ ॥
केषुचिद्विदधानेषु धूपोत्क्षेपं पुरः पुरः ।
विभोरुपरि बिभ्रत्सु शुभ्रच्छत्राणि केषुचित् ॥१३५२॥
शिबिकां परि वर्षत्सु केषुचित्कुसुमस्रजः ।
हन्त्रीं निःशेषदोषाणां शेषां गृह्णत्सु केषुचित् ॥१३५३॥
नानाविधां शुचश्चेष्टां स्पष्टयत्सु च केषुचित्
हरिः सुराश्च शिबिकात्रयं निन्युश्रिताः प्रति ॥१३५४॥
॥ पञ्चभिः कुलकम् ॥

चितायामुचितज्ञो ऽथ पूर्वस्यां पूर्वदिक्पतिः ।
न्यधात्प्रभुतनुं साधूनन्ये देवाश्रिताद्वये ॥ १३५५ ॥
अग्निरग्निकुमारैर्द्राग्वायुर्वायुकुमारकैः ।
चितासु चिक्षिपे पूरः कर्पूराणां सुरैः परैः ॥ १३५६ ॥
चितात्रयस्य तस्योच्चैः प्रसृता धूमवल्लयः ।
दधुः सदुःखद्योमुक्तवेणिपाशत्रयोपमाम् ॥ १३५७ ॥
अभ्रंलिहमहाकीलाचक्रवालेन ताश्रिताः ।
मूर्ता लोकत्रयीशोककृशानव इवाज्वलन् ॥ १३५८ ॥
दग्धेषु वह्निकीलाभिरस्थिभ्यो ऽन्येषु धातुषु ।
चिता व्यध्यापयन्मेघकुमाराः क्षीरधेर्जलैः ॥ १३५९ ॥

अधिमाणवकः स्तम्भं वृत्तवज्रसमुद्गके ।
न्यस्य पूजयितुं स्वस्य जयमङ्गलहेतवे ॥ १३६० ॥
अथोपरितनीं शक्रः श्रेयोबीजमिवाग्रहीत् ।
जिनेन्दोर्दक्षिणां दंष्ट्रामीशानेन्द्रस्तु दक्षिणाम् ॥ १३६१ ॥
युग्मम् ॥

जगृहे ऽधस्तनीं दंष्ट्रामवामां चमरेश्वरः ।
बलिस्तु वामामन्ये तु शक्रा दन्तान्यथोचितम् ॥१३६२॥
अगृह्णन्कीकसकणान्सुपर्वाणः परे प्रभोः ।
भस्मलेशान्नरेशास्तद्धूरेणूंश्चापरे नराः ॥ १३६३ ॥
रेणूनां ग्रहणेनैव मर्त्यैः खाते कृते ऽद्भुते ।
रत्नस्तूपं व्यधुः शक्राश्चितास्थाने जिनेशितुः ॥१३६४ ॥
कौमारे ऽष्टादशाब्दानां लक्षाण्यथ विभोर्व्रते ।
चतुःपञ्चाशदेत्यायुर्द्वासप्तत्यब्दलक्ष्यभूत् ॥ १३६५ ॥
श्रेयांसानिर्वृतेरासीद्वासुपूज्यस्य निर्वृतिः ।
सागरेषु व्यतीतेषु चतुःपञ्चाशति प्रभोः ॥ १३६६ ॥
इति प्रशस्तिमालिख्य रत्नस्तूपे जगत्पतेः ।
चेलुर्निर्वाणकल्याणकारिणः पविपाणयः ॥ १३६७ ॥
॥ त्रिभिर्विशेषकम् ॥

लब्धिर्महोदयपदस्य बभूव भर्तु–
रित्युल्लसद्विशदसंमदपूरपूर्णाः ।
नन्दीश्वरे ध्रुवजिनेश्वरमन्दिरेषु
यात्रां पवित्ररुचयो ऽष्टदिनानि कृत्वा ॥ १३६८ ॥
श्रीवासुपूज्यचरितं परिपूर्णमेत–
दाह्लादनं सततमन्तरनुस्मरन्तः ।

रोमाञ्चरम्यमहसः सह सर्वदेवैः
स्थानं ययुर्निजनिजं जयिनः सुरेन्द्राः ॥ १३६९ ॥
युग्मम् ॥

इति दण्डाधिपतिश्रीमदाह्लादनसमभ्यर्थितश्री-
विजयसिंहसूरिशिष्यश्रीवर्धमानसूरि-
विरचिते श्रीवासुपूज्यचरित आह्लाद-
नाङ्के महाकाव्ये महोदयलब्धि-
वर्णनो नाम चतुर्थः सर्गः ॥

श्रीनागेन्द्रमुनीन्द्रगच्छतिलकः श्रीवीरसूरिर्बभौ
यस्माद्बोधमवाप्य मण्डलपतिर्जज्ञे यतिश्चन्द्रिगः ।
तच्छिष्यः परमारवंशविशदः श्रीवर्धमानप्रभु-
स्तत्पट्टोदयपर्वतैकतरणिः श्रीरामसूरिस्ततः ॥ १ ॥
चन्द्रः कुवलयोद्बोधे चन्द्रसूरिरभूदथा
ततः शमसुधाम्भोधिर्देवसूरिर्मुनीश्वरः ॥ २ ॥
बभूवाभयदेवाख्यः सूरिर्भूरिगुणस्ततः ।
श्रीहेमसूरिर्यद्वाख्यां व्याचख्यौ भूभुजा समम् ॥ ३ ॥
श्रीमान्धनेश्वरः सूरिरथाजनि मुनिप्रभुः ।
रूपे वचसि च प्राप जयपत्रं जनेषु यः ॥ ४ ॥
गुरुर्विजयसिंहो ऽभूद्यश्चक्रे प्रियमेलकम् ।
सर्वत्र स्वसरस्वत्या विद्वज्जनमनोऽम्बुधौ ॥ ५ ॥
निस्तन्द्रो ऽजनि देवेन्द्रसूरिर्यन्मुखमण्डपे ।
विललास कवित्वश्रीः साकं वक्तृत्वसंपदा ॥ ६ ॥
सूरेर्विजयसिंहस्य शिष्यो गुर्वाज्ञया ततः ।
सूरिः श्रीवर्धमानो ऽस्मिन्गच्छे यामिकतां दधौ ॥ ७ ॥
उदयद्रिरिव श्रीमान्स नन्द्यादुदयप्रभुः ।
यत्रोदयी वचोभानुर्भव्याम्भोजानि भासयेत् ॥ ८ ॥
अस्मिन्गुरुक्रमे भक्तः श्रीगलककुले ऽभवत् ।
बाधूर्व्याधूतदुष्कर्मा धर्माम्बुधिविधुः सुधीः ॥ ९ ॥
यो ऽकारयन्महावीरचैत्यं संगमखेटके ।
तस्मै हलशतक्षोणीं चतुर्वाटीयुतां ददौ ॥ १० ॥
तद्भूरभूदघोन्मर्दी कपर्दी येन कारितम् ।
चैत्यं युगादिदेवस्य ग्रामे वटसराभिधे ॥ ११ ॥

तत्पुत्र आम्रदेवो ऽभूदाम्रवन्मङ्गलास्पदम् ।
राणुका गेहिणी तस्य पुण्यश्रीरिव देहिनी ॥ १२ ॥
तत्सूनुर्देवचन्द्रो ऽभून्निस्तन्द्रो धर्मकर्मणि ।
पद्मिनी पद्मिनीवास्य प्रिया शीलश्रियो गृहम् ॥ १३ ॥
चत्वारो जज्ञिरे विश्वनन्दना नन्दनास्तयोः ।
भव्यजीवमनःशुद्ध्योर्धर्मभेदा इवाङ्गिनः ॥ १४ ॥
तेषु ज्येष्ठो ऽजनि श्रीमानम्बडः सचिवाग्रणीः ।
अद्वितीयो विवेकेन द्वितीयो जह्नणस्ततः ॥ १५ ॥
पश्चादाह्लादनो जातिमण्डनं दण्डनायकः ।
मन्त्री धर्मधुराधुर्यस्तुर्यः प्रह्लादनः पुनः ॥ १६ ॥
ज्येष्ठे स्वर्गश्रियं प्राप्ते श्रीमदम्बडमन्त्रिणि ।
विशेषाद्धर्मधुर्यत्वमाह्लादनसुधीर्दधौ ॥ १७ ॥
यत्कीर्तिव्रततिस्थारापद्रस्थानकसंभवा ।
न्यायधर्मामृतैः सिक्ता विस्तृता विश्वमण्डपे ॥ १८ ॥
यः श्रीसत्यपुरे वीरप्रासादे नाभिनन्दनम् ।
थारापद्रे च नाभेयचैत्ये श्रीपार्श्वनायकम् ॥ १९ ॥
तथा चन्द्रप्रभस्वामिसीमन्धरयुगन्धरान् ।
अम्बिकाभारतीमूर्तीर्दिव्यस्फूर्तीर्व्यधापयत् ॥ २० ॥
॥ युग्मम् ॥
नाभीपद्मे यथात्मानं योगी ध्यायत्यहर्निशम् ।
पद्मकोशे तथा यो ऽयमादिनाथं स्वकारितम् ॥ २१ ॥
ग्रामे वटसरे माज्ञि तथा संगमखेटके ।
येनोदधे समं पूर्वैश्चैत्यद्वन्द्वं जिनान्वितम् ॥ २२ ॥
अणहिल्लपुरे लक्ष्म्यास्तिलकं प्रेयसां निधिः ।

स्वगुरोर्वसतिर्येनोदधे भक्तिशुभात्मना ॥ २३ ॥
लेखयत्यमलज्ञानदानभृत्पुस्तकानि यः ।
अगण्यपुण्यलक्ष्म्याश्रयै शासनानीव सर्वदा ॥ २४ ॥
प्रासादः शुशुभे येनोद्धृतः श्रीवासुपूज्ययुक् ।
पत्तनस्य पुरो राज्ञो रत्नवानिव शेखरः ॥ २५ ॥
अमेयं स्पृहयञ्छ्रेयः श्रीमदाह्लादनो गुरुम् ।
श्रीवर्धमानसूरिं स भक्त्याभ्यर्थितवानिति ॥ २६ ॥
जीर्णोद्धार इहाणहिल्लनगरे श्रीवासुपूज्यप्रभोः
प्रासादस्य मया भवद्वचनतः स्वश्रेयसे कारितः ।
यूयं तच्चरितस्य पुण्यघटनां कुर्वीत जीर्णोद्धृतिं
कृत्ये ऽस्मिन्निपुणा यतो गणधराः स्युः सूत्रधारा ध्रुवम् २७
ततो ऽसौ निधिनिध्यर्कसंख्ये (१२९९) विक्रमवत्सरे ।
आचार्यश्चरितं चक्रे वासुपूज्यविभोरिदम् ॥ २८ ॥
चतुरा वाचयन्त्वेतद्वृद्धा व्याख्यां नयन्त्वपि ।
शब्दप्रमाणसाहित्यागमज्ञाः शोधयन्तु च ॥ २९ ॥
यावत्पूर्वाङ्गणे ऽस्मिन्नसमतमतमोगोमयालेपनार्द्रे
सायंसंध्यापुरन्ध्री स्फुरदुडुकुसुमे मुञ्चतीन्दुप्रदीपम् ।
मातःश्रीः सांध्यरागप्रसृमरघुसृणे भानुकुम्भं च तुष्टचै
धर्माधीशस्य तावज्जिनचरितमिदं सङ्घलोके मुदे ऽस्तात्॥३०॥
सर्वाक्षरगणानायां जयति श्रीवासुपज्यचरितमिदम् ।
वेदानिधिवेदबाणानीताङ्कग्रन्थसंपूर्णम् ॥ ३१ ॥